श्री राघवेन्द्रतीर्थयतिसार्वभौमविरचितः

भाट्टसङ्ग्रहः

with the exposition in English

प्रथमं सम्पुटम्

Edited by

Prof. K.T. Pandurangi
Formerly Prof. of Sanskrit, Bangalore University
Hon. Director, Dvaita Vedanta Studies and Research Foundation

Published by :
Dvaita Vedanta Studies and Research Foundation
Bangalore.

श्री राघवेन्द्रतीर्थयतिसार्वभौमविरचितः

भाट्टसङ्ग्रहः

With the exposition in English and Kannada

Edited by

Mahāmahopādhyāya

Prof. K.T. Pandurangi

formerly Professor of Sanskrit, Bangalore University

Hon. Director of Dvaita Vedanta Studies and

Research Foundation, Bangalore.

2004

This Volume is published with the grant from Govt. of India. Ministry of Human Resources Development, Dept. of Education under the Central Plan scheme – Development of Sanskrit Education.



Published by

Dvaita Vedanta Studies and Research Foundation

No.11, Uttaradi Matha Compound, Basavanagudi, Bangalore-4.

Bhātta Saṅgraha of Śrī Rāghavendratīrtha, Edited by Prof. K.T. Pandurangi with Exposition in English and Kannada. Published by Dvaita Vedanta Studies and Research Foundation, 11, Uttaradi Matha Compound, Basavanagudi, Bangalore-560 004.

No. of Pages : 8+594

No. of Copies : 1000

Price : Rs. 400

Copies can be had from :
Dvaita Vedanta Studies and Research Foundation
No.11, Uttaradi Math Compound, Basavanagudi, Bangalore-560 004.
Ph.: 26627272

Printed at : **Raghavendra Enterprises,** Bangalore

Preface

Bhātta Saṅgraha of Śrī Rāghavendra tīrtha is the unique commentary on the entire Jaimini Sūtras. शास्त्रदीपिका and जैमिनीयन्यायमालाविस्तर are the earlier commentaries on Jaimini Sūtras. शास्त्रदीपिका is very elaborate while जैमिनीयन्यायमाला विस्तर is very brief. It gives पूर्वपक्ष and सिद्धान्त in one or two sentences. भाट्टसङ्ग्रह gives a simple and clear narration of the two sides and clearly brings out the conclusion. Wherever there is variation between the भाष्य and वार्तिक भाट्टसङ्ग्रह gives the interpretation of the two separately stating as भाष्यरीत्या and वार्तिकरीत्या. Another feature of भाट्टसङ्ग्रह is that the important मन्त्रs are fully quoted and the obscure terms therein are fully explained. This work was greatly honoured by the great scholar Nīlakanta Dīkshit of Tanjore and the Tanjore Royal palace honoured it by arranging a procession on elephant.

Prof. Pandurangi has added an exposition in English and Kannada to help the modern scholars.

Publication of this work is planned in three volumes. The present volume contains the first three chapters.

It is hoped that this work will be useful for the Research Scholars of पूर्वमीमांसा and वेदान्त.

N. Narasimha Rau
Chairman

Bhātta Saṅgraha

Bhātta Saṅgraha of Śrī Rāghavendra Swāmīji is a unique commentary on entire Jaimini Sūtras.

Mīmāmsa Darśana is one of the six systems of Indian Philosophy and is very ancient one. The terms 'Mīmāmsā,' 'Mīmāmsante' occur in Brāhmaṇas and refer to the discussions of meaning of Vedic passages dealing with the performance of sacrifices. In due course such discussions developed into a systematic śāstra and Jaimini wrote these sūtras. There are two thousand and seven hundred sūtras arranged in twelve chapters. The chapters normally have four pādas but chapters third, sixth and tenth are Sarabhapādas or have eight padas. There are about thousand adhikaraṇas or topics of discussion.

According to our tradition Jaimini was a disciple of Krisṇa-Dvaipāyana-Vedavyāsa and lived at the close of Dvāpara (31,000 B.C.). However, modern scholars assign him to 3rd Century B.C.

The purpose served by Pūrvamīmāmsa is three-fold :

1. Evolving the rules of interpretation or nyāyas for the interpretation of vedic-passages. Therefore, this śāstra is called Vākyaśāstra.

2. Giving authoritative rulings on sacrificial matters such as adhikāra, aṅga, atideṣa, ūha, bādha, tantra etc. and fixing the correct procedure and the nature of sacrifices. For this reason it is called Karma-Mīmānsā.

3. It is also a Darśana or one of the philosophical systems and hence discusses Pramāṇa and Prameyas. In this connection, the contributions made by Pūrvamīmāmsā for the discussion of Vedāpauruśeyatva and Svatahprāmāṇya are very valuable. Its concepts of ātman, mokṣa etc. are peculiar and are eclipsed by the great heights achieved in Vedānta on these concepts. Keeping these discussions in mind this system is considered as a Darśana and called Mīmāmsā Darśana.

Jaimini refers to certain earlier thinkers in his Sūtras such as Bādari, Kārshñajani, Ātreya, Aitiṣayana and Kāmukāyana. The surmise of the modern scholars that these are likely to have written similar sūtras which are lost to us has not sufficient evidence.

Three Vṛttis or short commentaries seem to have been written on Jaimini sūtras by Baudhāyana, Upavarṣa and Bhavadasa. These are not available to us. The extracts of Upavarṣa's Vṛtti are incorporated in Śabara's Bhāṣya. The first two seems to have written their Vṛtti both on Jaimini-sūtras and Bādarāyaṇa-Sūtras. Śabara wrote his Bhāṣya during 200 A.D. Bhartṛmitra's (400 A.D.) commentary on this was written before Kumāriḷa. It is not available. Kumāriḷa (620-703 A.D.) was a versatile scholar who wrote three commentaries i.e. Ślokavārtika, Tantravārtika and Tup-tīka on different portions of Śabara Bhāṣya. The main object of Ślokavārtika was to offer a strong criticism of Buddhistic doctrines, and the remaining two commentaries were intended for a detailed exposition of Jaimini's Sūtra and Śabara's Bhāṣya. With Kumāriḷa commenced the Bhātta School of Pūrvamīmāmsa. Prābhākara's (650-700 A.D.) Brihati or Vivaraṇa started Prābhākara School. Murari's third School did not develop further. Umveka, Sucharita-Miśra, Parthasarathi, Bhavadeva, Mādhavachārya, Bhātta Someshwara and Khanda Deva are important writers of Bhātta School, while Śālikantha, Bhavanātha, Nandīśvara etc. are important writers on Prābhākara side.

The present work 'Bhātta Saṅgraha' of Śrī Rāghavendra Swāmīji is a direct commentary on entire Jaimini-Sūtras. Śāstradīpika and Jaiminīya-nyāyamāla were earlier such commentaries on Jaimini Sūtras while Bhāttadīpika of Khandadeva (1600-1665 A.D.) is contemporaneous to Śrī Rāghavendra Swāmīji's work.

Śrī Rāghavendra Swāmīji neatly arranges the topic of each adhikaraṇa under : 1. Sangathi (context and connection). 2. Vishaya (topic and the passage setting the topic). 3. Samśaya (doubt or alternate possibilities) of interpretation. 4. Pūrvapakṣa (prima-facie view). 5. Siddhānta (Final view).

Discussing each topic under these heads he mentions the phala or prayojana from both Pūrvapakṣa and Siddhānta points of view. This brings out the full significance of the discussion and the siddhānta view. At the close he gives word by word interpretation of key Sūtras of pūrvapakṣa and siddhānta. By this method the gist of the adhikaraṇa is made so clear that nothing remains ambiguous. This method is not new to those scholars who have studied Tatvaprakāṣikā of Śrī Jayatīrtha and Tantradīpika of Śrī Raghāvendra Swāmīji himself on Brahma Sūtra. Here is a combination of methods adopted in these two works. As for the working out of Saṅgati he is guided by the methods of Tātparyachandrikā of Śrī Vyāsarāja.

Both Śāstradīpikā and Bhāttadīpikā mention Saṅgati. But these two works do not explicitly work out saṅgati at the commencement of each adhikaraṇa. In some adhikaraṇas saṅgati is mentioned, in others it is implied. But in Bhātta-Saṅgraha Saṅgatis such as Ākshepiki, Āpavādiki, Prāsangiki and Pratyudāharaṇa are clearly worked out. This clearly shows the difference as well as the connection of the nyāyas or rulings given in the earlier adhikaraṇa and the adhikaraṇa under discussion and unfolds the intricacies of interpretations and rules of interpretations. Similarly adhyaya and pāda saṅgatis are also clearly worked out. In respect of Vishaya-vākyas, there is a broad agreement between Śāstradīpika and Bhāttasaṅgraha. However, in a few cases Bhātta-Saṅgraha points out the divergence between Bhāṣya and Śāstradīpika, and follows Bhāṣya. Śāstradīpika is very elaborate in its treatment of topics while Bhātta-Saṅgraha is to the point. It is not a mix-up of Vādagrantha and Vyākhyāna-grantha like Śāstradīpika; nor it is very brief as Jaiminīya Nyāyamāla. While Nyāya-māla just mentions Pūrvapakṣa and siddhānta in one or two sentences the Bhātta-saṅgraha gives a simple and clear narration of the two sides and clearly brings out the conclusion. A clear setting of word by word meaning of key sūtras of each adhikaraṇa is a great help to the correct grasping of their meanings. Wherever, there is variation between the views of Bhāṣyas and Vārtika, Bhātta Saṅgraha gives the interpretation of the two separately, stating as 'Bhāṣyarītya' and 'Vārtikarītya.'

Similarly Vrittikāra's views are also separately stated. In a few adhikaraṇas where alternate interpretations are possible and adopted in the Pūrvamīmāmsa tradition, the two interpretations are clearly and separately given as prathama varṇaka and dvitīya varṇaka. Another feature of Bhātta Saṅgraha is that the important mantras are fully quoted and obscure terms therein are explained. Similarly technical terms are also fully explained. Kārikas from Ślokavārtika are quoted in the relevant context.

While Bhāttadīpika differs from Bhāṣya here and there, and sets its own views, Bhātta-Saṅgraha properly explains those portions and finds no difficulty in understanding Bhāṣya. Thus Bhātta Saṅgraha offers simple, clear and authoritative interpretations to Jaimini-sūtras and is a valuable work of Pūrvamīmāmsa.

Those who are familiar with the works of Śrī Jayatītha, Śrī Vyāsarāja, Śrī Vijayīndra and the two important works i.e. Parimala and Chandrikāprakāṣa of Śrī Rāghavendra himself know well, how useful is the study of Pūrvamīmāmsā as an aid to the study of Vedānta. They also know the erudite Pūrvamīmāmsā scholarship of these authors. The publication of Bhātta-saṅgraha will enhance such aid of Pūrvamīmāmsa further. Both the scholars of pūrvamīmāmsā and vedānta will immensely benefit by the publication of this work. No wonder this work was greatly honoured by the great scholar Nīlakantha Dixita of Tanjore and the Tanjore royal palace honoured it by arranging a procession on elephant. Gurugunastava of Sri Vādindra records this occasion.

With a view to make the contents of such a valuable work available to modern scholars the summaries in English and Kannada are also added. It is hoped that the Research Scholars and students will utilise this work for their study and research in Pūrvamīmāmsā and Vedānta.

Prof. K.T. Pandurangi

विषयानुक्रमणिका

1. भाट्टसङ्ग्रहे प्रथमाध्यायस्य प्रथमः पादः 1

-''- -''- द्वितीयः पादः 8

-''- -''- तृतीयः पादः 12

-''- -''- चतुर्थः पादः 25

2. द्वितीयाध्यायस्य प्रथमः पादः 37

-''- द्वितीयः पादः 49

-''- तृतीयः पादः 61

-''- चतुर्थः पादः 73

3. तृतीयाध्यायस्य प्रथमः पादः 76

-''- द्वितीयः पादः 92

-''- तृतीयः पादः 108

-''- चतुर्थः पादः 125

-''- पञ्चमः पादः 142

-''- षष्ठः पादः 156

-''- सप्तमः पादः 169

-''- अष्टमः पादः 187

4. अधिकरणार्थसङ्ग्रहः 205

5. The exposition of 'Bhātta Sangraha'' in English 233

6. ಭಾಟ್ಟಸಂಗ್ರಹದ ಕನ್ನಡ ವಿವರಣೆ. 471

॥ श्रीः ॥

अथ श्रीराघवेन्द्रतीर्थयतिसार्वभौमविरचितः

भाट्टसङ्ग्रहः

मङ्गलाचरणम्

नत्वा धर्मं वेदगम्यं जैमिन्यादिमुनीनपि ।
करोमि बालबोधाय भाट्टोक्तन्यायसङ्ग्रहम् ॥ १ ॥

अथ प्रथमं धर्मजिज्ञासाधिकरणम्

इह खल्वध्ययनादिसम्पत्तिमदधिकारिणामनुष्ठानद्वारा निःश्रेयसहेतुवेदार्थभूतधर्मस्वरूपनिर्णयाय वेदेतिकर्तव्यतारूपन्यायनिबन्धनात्मकं शास्त्रं प्रणिनाय भगवान् जैमिनिः । तत्राध्याया द्वादश, तृतीयषष्ठदशमा अष्टपादाः, सहस्रमधिकरणानीति प्रसिद्धिः । एवमतिगहनात्मकैतच्छास्त्रस्य विषयादिमत्त्वोपपादनेनाऽरम्भणीयत्वसमर्थनार्थमिदमादिमं सूत्रम् ।

अथतो धर्मजिज्ञासा ॥ १ ॥

अत्र अध्ययनविधिवाक्यं विचार्यते । लिङ्लोट्तव्यप्रत्ययलेटामन्यतमयुक्तं वाक्यं विधिवाक्यमुच्यते । लिङादिरूपविध्यर्थस्तु प्रवर्तनापरपर्यायभावना । सा च फलकरणेतिकर्तव्यतारूपांशत्रयवती । अत्र 'स्वाध्यायोऽध्येतव्यः' इत्यादिविधिवाक्यं **विषयः** । स्वाध्यायो नाम क्रमविशेषविशिष्टवर्णराशिः । तद्विषयकगुरूच्चारणानूच्चारणमध्ययनम् । तव्यप्रययस्य भावना ह्यर्थः । तथा च स्वाध्यायगोचराध्ययनेन स्वर्गं भावयेदुत्पादयेदित्यर्थः उतार्थज्ञानं भावयेदुत्पादयेत् इत्यर्थ **इति सन्देहः** ।

पूर्वपक्षस्तु ''फलांशे भावनायास्तु प्रत्ययो न विधायकः'' इति भट्टोक्त्या वाक्यार्थज्ञानोद्देशेन अध्ययनं विधीयत इति वाच्यम् । तत्राध्ययनार्थज्ञानयोर्हेतुहेतुमद्भावस्यान्वयव्यतिरेकाभ्यां भारताध्ययनादौ दृष्टत्वेन विध्यनपेक्षणात् । न चापूर्वविधित्वाभावेऽप्यर्थज्ञानमध्ययनेनैव सम्पाद्यम्, न लिखिताव-लोकनादिनेत्येवं रूपनियमविधिरस्त्विति वाच्यम् । अध्ययनजन्येन वा लिखितपाठादिना वा जातेन अर्थज्ञानेनानुष्ठानसिद्धेर्न नियमविधौ हेतुरस्तीति द्विरूपस्यापि विधेरयोगात् । किञ्च 'अधीत्य स्नायात्' इत्यध्ययनस्नातकव्रतयोः श्रुतमानन्तर्यमर्थज्ञानभाव्यकत्वपक्षे अर्थज्ञानायाध्ययनानन्तरमपि गुरुकुल एव वासप्रसक्त्या बाध्येत ।

अतोऽश्रुतस्यापि स्वर्गस्य चतुर्थे **'स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वात्'** इति वक्ष्यमाणन्यायेन विश्वजिदादाविव कल्प्यतया स्वर्गभाव्यकत्वमेव युक्तमित्यर्थज्ञानहेतोर्न्यायानुसन्धानरूपविचारस्याकर्तव्यत्वात् तद्धेतुन्यायनिबन्धनात्मकमिदं शास्त्रं नारम्भणीयमिति फलम् ।

सिद्धान्तस्तु दृष्टे सम्भवत्यदृष्टकल्पनायोगात् दृष्टार्थज्ञानफलकत्वमेवाध्ययनस्य युक्तम् । प्रागुक्तरीत्या अपूर्वविधित्वायोगेऽपि नियमविधित्वसम्भवात् । अन्यथा विध्यानर्थक्यापत्तेः । येन केनापि जातेनार्थज्ञानेनानुष्ठानद्वारा अशेषक्रतुजन्यापूर्वासिद्धेश्च । अधीत्येति वाक्ये अध्ययनस्नातकव्रतयोः पौर्वापर्यमात्रश्रवणेन अव्यवधानस्याश्रवणात् । श्रवणे वा

अधीत्येत्यधिगम्येति व्याख्याने त्वविरोधता

इति भट्टोक्त्या अधीत्येत्यस्य अध्ययनेनार्थमवगम्येति व्याख्यानेप्युपपत्तेः । अर्थज्ञानस्य विना विचारेणायोगात् तदर्थं न्यायनिबन्धनरूपमिदं शास्त्रमारभ्यमेवेति **फलं** ज्ञेयम् ।

सूत्रार्थस्तु, अथ अध्ययनानन्तरं, **अतः** अध्ययनस्य वृत्तत्वात्, धर्मजिज्ञासा कर्तव्येति । एतेन शास्त्रस्य धर्मो विषयः । अनुष्ठानद्वारा स्वर्गादिपुमर्थहेतुत्वात् धर्मज्ञानं फलम् । अध्ययनवांस्त्रैवर्णिकोऽधिकारीति सूचितम् ॥ १ ॥

इति प्रथमं धर्मजिज्ञासाधिकरणम् ॥

अथ द्वितीयं धर्मलक्षणाधिकरणम्

चोदनालक्षणोऽर्थो धर्मः ॥ २ ॥

अत्र पूर्वोक्तजिज्ञासाऽऽक्षेपेण पूर्वपक्षप्रवृत्तेराक्षेपिकी **सङ्गतिः** । पूर्वत्र जिज्ञास्यतयोक्तो धर्मः किं लक्षणप्रमाणाभ्यां युक्तः उत नेति **सन्देहः** । न ताभ्यां युक्तः इति **पूर्वपक्षः** । सजातीयविजातीयव्यावर्तको लक्ष्यनिष्ठो लोकप्रसिद्धः कश्चिद्धर्मो हि लक्षणम् । न ह्यलौकिके अग्निहोत्रादिरूपे धर्मे तादृशधर्मोऽस्ति । लक्षणयुक्ते हि प्रमाणं वाच्यम् । लक्षणस्यैवाभावे कुत्र प्रमाणोक्तेरवसरः । किञ्च प्रमाणं भवन्न तावत् रूपादिहीने प्रत्यक्षं सम्भवति । नाप्यनुमानम् । तद्व्याप्यलिङ्गाभावात् । नापि शब्दः । अनुपस्थिते धर्मे सङ्केतग्रहायोगात् । अतो धर्मस्वरूपस्य नृशृङ्गादिवदलीकत्वप्राप्त्या न जिज्ञास्यतेति ।

सिद्धान्तस्तु लोकसिद्धस्य कस्यचिद्धर्मस्याभावेऽपि श्रेयस्साधनत्वरूपार्थत्वे सति चोदनागम्यत्वरूपाऽकारस्य सम्भवान्न लक्षणाभावदोषः । तेन च लक्षणेनोपेते धर्मे प्रमाणावसरोऽस्ति । तत्र

प्रत्यक्षादेरयोगेऽपि प्रसिद्धपदसमभिव्याहारेण गृहीतसङ्गतिकस्यास्य चोदनाख्यस्य विध्युपेतशब्दस्य प्रामाण्योपपत्त्या ताभ्यां लक्षणप्रमाणाभ्यां धर्मस्वरूपसिद्धेर्जिज्ञास्यत्वं प्रागुक्तं युक्तमिति ।

सूत्रार्थस्तु चोदनेति सविधिकं वाक्यमुच्यते । लक्षणशब्दः प्रमाणवाची । चोदनाप्रमाणको धर्मः । स च अर्थरूपः इति । अत्र लक्षणे श्येनादिव्यावृत्त्यर्थं सत्यन्तम् । चैत्यवन्दनादिव्यावृत्त्यर्थं विशेष्यमित्याहुः ॥ २ ॥

इति द्वितीयं धर्मलक्षणाधिकरणम् ॥

अथ तृतीयं धर्मप्रमाणपरीक्षाधिकरणम्

(धर्मे चोदनैकगम्यत्वस्य चोदनाप्रामाण्यस्य च परीक्षाया आवश्यकत्वसमर्थनम्)

तस्य निमित्तपरीष्टिः ॥ ३ ॥

पूर्वत्र चोदनैव धर्मे प्रमाणम् । चोदना प्रमाणमेवेत्यवधारणद्वयं विवक्षितम् । तद्द्वयं साधयितुमिदमुपक्रमसूत्रम् । पूर्वत्र धर्मे प्रमाणत्वेनोक्ता चोदना **विषयः** । सैव धर्मे मानं नान्यदिति, चोदना प्रमाणमेवेति च परीक्षा कार्या उत नेति **सन्देहः** । न कार्येति **पूर्वः पक्षः** । मानोक्त्यैव मेयसिद्धेः किं परीक्षयेति ।

सिद्धान्तस्तु प्रमाणत्वोपपादनेन विना प्रमाणोक्तिमात्रेण प्रमेयसत्त्वानिर्णयात् उपपादनस्य विचारमन्तरेणायोगात् युक्तायुक्तत्वचिन्तारूपपरीक्षा कार्यैवेति ॥ **सूत्रार्थस्तु, तस्य** धर्मस्य **यन्निमित्तं** चोदनारूपं प्रमापकं तस्य **परीष्टिः** परीक्षा कार्यैवेति ॥ ३ ॥

इति तृतीयं धर्मप्रमाणपरीक्षाधिकरणम् ॥

अथ तुरीयं धर्मे प्रत्यक्षाद्यगम्यत्वाधिकरणम्

(धर्मे चोदनैकगम्यत्वसमर्थनम्)

सत्सम्प्रयोगे पुरुषस्येन्द्रियाणां बुद्धिजन्म तत्प्रत्यक्षमनिमित्तं विद्यमानोपलम्भनत्वात् ॥ ४ ॥

पूर्वत्र चोदनैव धर्मे प्रमाणं नान्यदित्येतद्विचार्यमित्युक्तम् । तदिह विचार्यते इति **सङ्गतिः** । धर्मः किं प्रत्यक्षादिगम्यः अथ चोदनैकगम्यः इति **सन्देहः** ।

पूर्वपक्षस्तु प्रत्यक्षादेरपि प्रमाणतया प्रमेयप्रत्यायकत्वात् धर्मस्य च घटादिवत्प्रमेयत्वात् प्रत्यक्षादिगम्य इति चोदनैकप्रमाणकत्वमयुक्तमिति ।

सिद्धान्तस्तु प्रत्यक्षस्य वर्तमानमात्रग्राहित्वात् धर्मस्य चानुष्ठेयतया कालत्रयासंस्पृष्टतया विधिबोधितत्वान्न प्रत्यक्षयोग्यत्वमिति कथं तेन तदवगमः । प्रत्यक्षाप्रसरादेव प्रत्यक्षावगतव्याप्तिसादृश्यानुपपद्यमानार्थपूर्वकत्वादनुमानोपमानार्थापत्तयोऽपि न धर्मे प्रमाणम् । अतश्चोदनैकप्रमाणको धर्मः परिशेषात्सिद्ध इति ।

सूत्रार्थस्तु, सता विद्यमानेन अर्थेन **इन्द्रियाणां सम्प्रयोगे** सति या बुद्धिरुपजायते **तत्प्रत्यक्षम् ।** तच्च धर्मे न प्रमाणम् । तस्य वर्तमानमात्रार्थग्राहित्वादिति ॥ ४ ॥

इति तुरीयं धर्मे प्रत्यक्षाद्यगम्यत्वाधिकरणम्

अथ पञ्चमं धर्मे विधिप्रामाण्याधिकरणम्

औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्धस्तस्य ज्ञानमुपदेशोऽव्यतिरेकश्चार्थेऽनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वात् ॥ ५ ॥

प्रमाणाभावात्मकस्य अभावप्रमाणस्य विषयोऽस्तु धर्मः इत्याशङ्क्य धर्मे प्रमाणं वदन् चोदना प्रमाणमेवेतीममंशमत्र साधयतीति **सङ्गतिः** । चोदना **विषयः** । प्रमाणं न वेति **सन्देहः** । प्रमाणं नेति **पूर्वपक्षः ।**

प्रमामुत्पादयद्धि प्रमाणम् । न च चोदना तथा । अलौकिके स्वर्गादिभावनारूपधर्मे लिङादेः शक्तिग्रहासम्भवेन बोधकत्वस्यैवाभावात् कुतः प्रमापकत्वं तस्याः । तथा च प्रत्यक्षादिकं धर्माबोधकत्वाद्यथा तत्र न प्रमाणं तथा चोदनापीति तदितिकर्तव्यतारूपो विचारो न कर्तव्यः इति जिज्ञासाक्षेपः **फलम् ।**

सिद्धान्तस्तु चोदना प्रमाणमेव । यथा 'कमलोदरे मधूनि मधुकरः पिबति' इत्यत्र मधुकरशब्दस्यार्थमजानन् इतरपदानामर्थं बुद्ध्वा तत्समभिव्याहारात् कमलमध्यगते मधुपानं कुर्वति दृश्यमानभ्रमरे मधुकरशब्दस्य सङ्केतं गृहीत्वा वाक्यार्थं प्रतिपद्यते तथा 'कारीर्या वृष्टिकामो यजेत' इत्यादौ लोकप्रसिद्धार्थवृष्ट्यादिपदसमभिव्याहारादलौकिकभावनादौ लिङादिविधेः सङ्गतिं गृहीत्वा चोदनावाक्यार्थो बुध्यत इत्यबोधकत्वस्यासिद्धेः ।

न च संवादाद्यभावादप्रामाण्यम् । ज्ञानजननशक्त्यैवापवादाभावे प्रमाजनकत्वरूपस्योत्पत्तौ स्वतःप्रामाण्यस्य, ज्ञानजननशक्तिग्राहकेणैव प्रमाजननशक्तिग्रहणरूपस्य ज्ञप्तौ स्वतः प्रामाण्यस्य चाङ्गीकारेण संवादाद्यनपेक्षणात् । तथा च चोदनायाः प्रमाजनकत्वात्तदितिकर्तव्यतारूपो विचारः कर्तव्यः इति **फलं** व्यक्तम् ।

सूत्रार्थस्तु औत्पत्तिकः स्वाभाविकः शब्दार्थयोः सम्बन्धो नाधुनिकः । **उपदेशश्चोदना**

चोदना चोपदेशश्च विधिश्चैकार्थवाचिनः ।

इति भट्टोक्तेः ।

तस्य धर्मस्य । **ज्ञानं** ज्ञापकः । **अव्यतिरेकः** तस्य ज्ञानस्याविपर्ययः । चकारादसंशयश्च । **अनुपलब्धे** मानान्तराज्ञाते अर्थे । **तत्** चोदनावाक्यं **प्रमाणं** संवादाद्यनपेक्षत्वादिति । बादरायणग्रहणं पूजार्थम् ॥ ५ ॥

इति पञ्चमं धर्मे विधिप्रामाण्याधिकरणम्

अथ षष्ठं शब्दनित्यत्वाधिकरणम् (सूत्राणि ६-२३)

कर्मैके तत्र दर्शनात् ॥ ६ ॥

(अस्थानात् ॥ ७ ॥ करोतिशब्दात् ॥ ८ ॥ सत्त्वान्तरे च यौगपद्यात् ॥ ९ ॥ प्रकृतिविकृत्योश्च ॥ १० ॥ वृद्धिश्च कर्तृभूम्नाऽस्य ॥ ११ ॥ समन्तु तत्र दर्शनम् ॥ १२ ॥ सतः परमदर्शनं विषयानागमात् ॥ १३ ॥ प्रयोगस्य परम् ॥ १४ ॥ आदित्यवद्यौगपद्यम् ॥ १५ ॥ वर्णान्तरमविकारः ॥ १६ ॥ नादवृद्धिपरा ॥ १७ ॥ नित्यस्तु स्याद्दर्शनस्य परार्थत्वात् ॥ १८ ॥ सर्वत्र यौगपद्यात् ॥ १९ ॥ सङ्ख्याभावात् ॥ २० ॥ अनपेक्षत्वात् ॥ २१ ॥ प्रख्याभावाच्च योगस्य ॥ २२ ॥ लिङ्गदर्शनाच्च ॥ २३ ॥)

पूर्वोक्तस्य शब्दार्थसम्बन्धस्यौत्पत्तिकत्वस्य उपदेशशब्दितचोदनाप्रामाण्यस्य वा आक्षेपेण पूर्वपक्षप्रवृत्तेराक्षेपिकी **सङ्गतिः** । वर्णसमुदायात्मकपदात्मकः शब्दोऽत्र **विषयः** । किमनित्यः उत नित्यः इति **सन्देहः** ।

पूर्वपक्षस्तु यदुक्तं पूर्वत्र वाक्यार्थसम्बन्धस्यौत्पत्तिकत्वमुपदेशस्य प्रामाण्यं वा तदयुक्तम् । शब्दरूपसम्बन्धिनः कृत्रिमत्वात् । कृत्रिमस्य च कर्तृदोषपूर्वकत्वसम्भवेन पदस्य दुष्टतया तत्समुदायरूपोपदेशस्यापि दुष्टत्वेन प्रामाण्यायोगात् । शब्दस्योत्पत्तिमत्त्वं च 'शब्दः कृत्रिमः प्रयत्नानन्तरभावित्वात् घटवत्' इत्यनुमानसिद्धम् । उच्चारणानन्तरमनवस्थानेन विनष्टत्वाच्च । 'घटं कुरु' इत्यादाविव 'शब्दं कुरु, मा शब्दं कार्षीः' इति कृतिविषयतावगमाच्चेति ।

सिद्धान्तस्तु बहुभिर्बहुकृत्वो गवादिशब्दे उच्चारिते 'त एवेमे गकारादयो वर्णाः' इत्यबाधितप्रत्यक्षप्रत्यभिज्ञानात् शब्दस्यानादिनित्यत्वसिद्धेः पूर्वपक्ष्यभिमतकृतिमत्त्वसाधकहेतवः 'समन्तु तत्र दर्शनात्' इत्यादिसूत्रोक्तदिशा व्यञ्जकध्वनिविषयत्वादिना अन्यथा नेया इति शब्दोऽकृत्रिम एवेति प्रागुक्तं सम्बन्धौत्पत्तिकत्वादिकं युक्तमेवेति ।

सूत्रार्थस्तु कर्म करणं शब्दस्य । **एके** नैयायिकादयो मन्यन्ते **तत्र** कर्मणि सति शब्दस्य **दर्शनादिति** ॥ ६ ॥

इति षष्ठं शब्दनित्यत्वाधिकरणम् (सूत्राणि ६-२३)

अथ सप्तमं वेदे प्रत्यायकत्वाधिकरणम् (सूत्राणि २४-२६)

शब्दनित्यत्वेऽपि चोदनाऽप्रमाण्यशङ्का तत्परिहारश्च

उत्पत्तौ वाऽवचनाः स्युरर्थस्यातन्निमित्तत्वात् ॥ २४ ॥

(तद्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वात् ॥ २५ ॥ लोके सन्नियमनात्प्रयोगसन्निकर्षः स्यात् ॥ २६ ॥)

शब्दस्य अनादिनित्यतया तत्सम्बन्धस्य तथात्वं प्रागुक्तमुपेत्य चोदनाप्रामाण्यमयुक्तमित्याक्षेपादाक्षेपिकी **सङ्गतिः** ।

चादना **विषयः** । प्रमाणं न वेति **सन्देहः** । न प्रमाणमिति **प्राप्तम्** । पदात्मकशब्दस्यानादि नित्यत्वेऽपि अग्निहोत्रादिपदमात्रस्य धर्माप्रमापकत्वात् । 'अग्निहोत्रं जुहुयात्' इति पदकदम्बात्मकं वाक्यमेव हि तथाभूतं वाच्यम् । वाक्यश्चागृहीतसङ्गतिकं वाक्यार्थं बोधयति चेदतिप्रसङ्गः । गृहीतसङ्गतिकं चेत् पुरुषकृतसङ्केतसापेक्षत्वेनानपेक्षत्वलक्षणप्रामाण्यभङ्गात् पदार्थानां च वाक्यार्थबोधानुपायत्वाद्वाक्यार्थस्याशाब्दत्वापत्तेश्चेति ।

सिद्धान्तस्तु पदानामेव वृद्धव्यवहारादिना गृहीतसङ्गतिकानां पदार्थप्रत्यायनद्वारा वाक्यार्थबोधकत्वोपपत्तेः वाक्यस्यान्यनिरपेक्षत्वाद्युक्तं चोदनायाः प्रामाण्यम् ।

वाक्यार्थमितये तेषां प्रवृत्तौ नान्तरीयकम् ।
पाके ज्वालेव काष्ठानां पदार्थप्रतिपादनम् ॥ इति भट्टोक्तेः ।

पूर्वपक्षसूत्रस्यायमर्थः, वाशब्दः सिद्धान्तनिरासकः । **उत्पत्तौ** औत्पत्तिकत्वे शब्दार्थसम्बन्धानां स्वाभाविकत्वेऽपि चोदना **अवचनाः** वाक्यार्थस्यावाचकाः स्युः । **अर्थस्य** पदार्थस्य पदाभिहितपदार्थानां **अतन्निमित्तत्वात्** वाक्यार्थबोधानिमित्तत्वादिति ॥ २४ ॥

इति सप्तमं वेदे प्रत्यायकत्वाधिकरणम् (सूत्राणि २४-२६)

अथाष्टमं वेदापौरुषेयत्वाधिकरणम् (सूत्राणि २७-३२)

(वेदापौरुषेयत्वसमर्थनम्)

वेदांश्चैके सन्निकर्षं पुरुषाख्याः ॥ २७ ॥

(अनित्यदर्शनाच्च ॥ २८ ॥ उक्तन्तु शब्दपूर्वत्वम् ॥ २९ ॥ आख्याः प्रवचनात् ॥ ३० ॥ परन्तु श्रुतिसामान्यमात्रम् ॥ ३१ ॥ कृते वा विनियोगः स्यात्कर्मणः सम्बन्धात् ॥ ३२ ॥)

पूर्वत्र वाक्यार्थबोधोपायः पदान्येवेत्युक्तम् । इह तु प्रामाण्यमेव नेत्याक्षिप्यत इति **सङ्गतिः** । वेदवाक्यं प्रमाणमुत नेति **सन्देहे** नेति **प्राप्तम्** । पौरुषेयत्वात् । पौरुषेयत्वं च पिप्पलादादिपुरुषसमाख्यानात् । तस्य च कठेन कृतं काठकमित्येवं काठककालापकादिशब्दवाच्यत्वात् । तद्धितप्रत्ययस्य कृतौ स्मरणात् । किञ्च 'वेदवाक्यं पौरुषेयं वाक्यत्वात् लौकिकवाक्यवत्' इत्यनुमानाच्च । एवञ्च पौरुषेयत्वे सति पुरुषदोषाज्ञानभ्रमप्रमादादिदोषमूलत्वस्य सम्भवादिति ।

सिद्धान्तस्तु काठकादिसमाख्यायाः कठेन प्रोक्तं काठकमिति अध्ययनसम्प्रदायप्रवर्तकत्वेनोपपत्तेः वाक्यत्वस्य च 'वेदः पौरुषेयश्चेत् भारतादाविव कर्ता स्मर्येत, न च स्मर्यते, अतो न पौरुषेयः' इति तर्कपराहतत्वादपौरुषेयो वेद इति प्रमाणमेव वेदवाक्यमिति तन्मध्यगतचोदनापि प्रमाणमेवेति ॥

सूत्रार्थस्तु, एके वादिनः सन्निकर्षं सन्निकृष्टकालत्वं लक्षीकृत्य वेदान् कृतकान् मन्यन्ते । यतस्ते वेदाः पुरुषैराख्यायन्त इति ॥ २७ ॥

इति अष्टमं वेदापौरुषेयत्वाधिकरणम् (सूत्राणि २७-३२)

अत्र पादे अधिकरणानि ८ सूत्राणि ३२

इति भाट्टसङ्ग्रहे श्रीराघवेन्द्रयतिसार्वभौमकृते प्रथमाध्यायस्य तर्कपादाख्यः प्रथमः पादः

अथ भाट्टसङ्ग्रहे प्रथमाध्यायस्य द्वितीयः पादः

अथ प्रथममर्थवादाधिकरणम् (सूत्राणि १-१८)

॥ ॐ ॥ पूर्वत्र वेदस्य अपौरुषेयतया प्रामाण्योक्त्या तन्मध्यस्थचोदनानामपि धर्मे प्रामाण्यमित्युक्तम् । अत्र पादे वेदैकदेशस्य चोदनया अपेक्षितस्य अर्थवादस्य मन्त्रजातस्य च अपौरुषेयतया सामान्यतः सिद्धे प्रामाण्ये तत्प्रकारश्चिंत्यत इति पूर्वपादानन्तर्यमस्य पादस्य ।

आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां, तस्मादनित्यमुच्यते ॥ १ ॥

(शास्त्रदृष्टविरोधाच्च ॥ २ ॥ तथा फलाभावात् ॥ ३ ॥ अन्यानर्थक्यात् ॥ ४ ॥ अभागिप्रतिषेधाच्च ॥ ५ ॥ अनित्यसंयोगात् ॥ ६ ॥ विधिना त्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः ॥ ७ ॥ तुल्यश्च साम्प्रदायिकम् ॥ ८ ॥ अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधः स्याच्छब्दार्थस्त्वप्रयोगभूतस्तस्मादुपपद्येत ॥ ९ ॥ गुणवादस्तु ॥ १० ॥ रूपात्प्रायात् ॥ ११ ॥ दूरभूयस्त्वात् ॥ १२ ॥ अपराधात्कर्तुश्च पुत्रदर्शनम् ॥ १३ ॥ आकालिकेप्सा ॥ १४ ॥ विद्याप्रशंसा ॥ १५ ॥ सर्वत्वमाधिकारिकम् ॥ १६ ॥ फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलविशेषः स्यात् ॥ १७ ॥ अन्त्ययोर्यथोक्तम् ॥ १८ ॥)

काम्यपशुकाण्डे विध्यर्थवादौ श्रूयेते । 'वायव्यं श्वेतमालभेत भूतिकामः' इति विधिः । 'वायुर्वै क्षेपिष्ठा देवता, वायुमेव स्वेन भागधेयेनोपधावति, स एवैनं भूतिं गमयति' इत्यर्थवादः । क्षिप्रगामी वायुः स्वोचितेन भागेन हविषा तोषितः भागप्रदायैश्वर्यं प्रयच्छतीत्यर्थः । तत्रार्थवादः किं भावनाख्ये धर्मे प्रमाणं उत नेति सन्देहः ।

वेति पूर्वः पक्षः। लिङादेः विधिप्रत्ययस्याभावेन भावनास्वरूपस्य तदंशत्रयभूतफलकरणेतिकर्तव्यतानां अन्यतमस्य वा अप्रतिपादकत्वेन भूतार्थमात्रकथनात्। न च विध्यपेक्षितार्थार्पणद्वारा विध्येकवाक्यतया धर्मे प्रामाण्यमिति युक्तम्। अन्योन्याकाङ्क्षावशाध्येकवाक्यत्वम्। न चेह तथा। विध्युद्देशस्य 'वायुदेवताकश्वेतपश्वालम्भनेन भूतिं भावयेत्' इत्यर्थबोधनेऽन्याकाङ्क्षाभावात्। अर्थवादस्यापि यावदपेक्षितक्रियाकारकसत्त्वेन निराकाङ्क्षत्वादिति। **सिद्धान्तस्तु** यद्यपि प्रयत्नापरपर्यायार्थभावनातदंशत्रयप्रतिपादनं नास्ति, तथापि लिङादिविधिप्रत्ययनिष्ठा पुरुषप्रवृत्तिहेतुभूता प्रवर्तनापरपर्याया विधिशब्दिता शाब्दभावना लिङादिरूपविधिप्रत्ययवाच्या अर्थभावनाभाव्यिका लिङादिरूपवाचकेन वाच्यवाचकसम्बन्धबोधकरणिका प्राशस्त्यरूपेतिकर्तव्यताका सती पुरुषं कर्मानुष्ठाने प्रवर्तयतीति तदपेक्षितप्राशस्त्यरूपेतिकर्तव्यतासमर्पणेन विध्येकवाक्यतया प्रामाण्यमर्थवादस्य। न हि 'वायव्यश्वेतपश्वालम्भः प्रशस्तः' इत्यनुक्तौ स्वभावतोऽलसानां बहुवित्तव्ययायाससाध्ये प्रवृत्तिर्युज्यते। स्वाध्यायाध्ययनविधिना फलवदर्थावबोधपर्यवसानस्य आद्यसूत्रे निर्णीतत्त्वेन अर्थवादानां भूतार्थमात्रबोधने फलाभावेन फलवदर्थरूपप्राशस्त्यबोधने आकाङ्क्षावत्त्वेन नष्टाश्वदग्धरथन्यायेन अन्योन्याकाङ्क्षावत्तया 'यतः क्षिप्रगामिस्वभावतया शीघ्रफलप्रदो वायुरस्य पशोर्देवता अतः प्रशस्तं वायव्यं पशुमालभेत' इत्यन्वयेन विध्येकवाक्यत्वसम्भवाच्च धर्मे प्रामाण्यमिति। **फलन्तु** प्राक् सामान्येन सिद्धप्रामाण्यस्य समर्थनमिति ज्ञेयम्। विध्यर्थवादयोरविनाभावसिद्धिर्वा।

सूत्रार्थस्तु, आम्नायस्य वेदस्य **क्रियार्थत्वात् अतदर्थानां** अक्रियार्थानां भूतार्थानां **आनर्थक्यं** धर्माप्रतिपादकत्वं **तस्मात् अनित्यं** अनित्यमिव **उच्यते** अर्थवादजातमिति ॥ १ ॥

इति प्रथममर्थवादाधिकरणम् (सूत्राणि १-१८)

अथ द्वितीयं विधिवन्निगदाधिकरणम् (सूत्राणि १९-२५)

विधिर्वा स्यादपूर्वत्वाद्वादमात्रं ह्यनर्थकम् ॥ १९ ॥

(लोकवदिति चेत् ॥ २० ॥ न पूर्वत्वात् ॥ २१ ॥ उक्तन्तु वाक्यशेषत्वम् ॥ २२ ॥ विधिश्चानर्थकः क्वचित्, तस्मात्स्तुतिः प्रतीयेत, तत्सामान्यादितरेषु तथात्वम् ॥ २३ ॥ प्रकरणे सम्भवन्नपकर्षो न कल्प्येत, विध्यानर्थक्यं हि तं प्रति ॥ २४ ॥ विधौ च वाक्यभेदः स्यात् ॥ २५ ॥)

पूर्वोक्ताऽक्षेपेण पूर्वपक्षप्रवृत्तेराक्षेपिकी **सङ्गतिः** । 'औदुम्बरो यूपो भवति, ऊर्ग्वा उदुम्बरः, ऊर्क्पशवः, ऊर्जैवास्मा उर्जं पशूनाप्नाति, ऊर्जोऽवरुध्द्यै' इति वैकृतपशुप्रकरणे श्रुतं वाक्यं **विषयः** । ऊर्क्शब्देनात्यन्तसारभूतः सूक्ष्मोऽन्नरस उच्यते । उदुम्बररूपया ऊर्जा यजमानार्थं अध्वर्युः पशुरूपां ऊर्जमाप्नोति । ततो यूपस्यौदुम्बरत्वमूर्जःसम्पादनाय भवतीत्यर्थः । तत्र ''ऊर्जोऽवरुध्या'' इति वाक्यं औदुम्बरत्वरूपसाधनं प्रति फलसमर्पकमुत आप्नोतीत्यन्तवाक्यवदयमप्यर्थवादः इति **सन्देहः** ।

पूर्वपक्षस्तु यदुक्तं पूर्वत्र सर्वार्थवादानां प्राशस्त्यरूपार्थसमर्पणेन विधेयस्तुत्या विध्येकवाक्यत्वं तद्युक्तम् । 'ऊर्जोऽवरुध्या' इत्येवमादेः फलसमर्पकत्वसम्भवात् । न च फलवचनस्य लक्षणया स्तावकत्वं युक्तम् । स्वर्गकामादिपदस्यापि तथात्वापत्तेरिति ।

सिद्धान्तस्तु विहितस्य साधनस्येदं फलसमर्पकं वाच्यम् । न चौदुम्बरताया विधिरस्ति । विधिप्रत्ययस्याश्रवणात् । न च फलवचनपूर्वमर्थवादत्वेन 'भवति' इत्यस्य लेट्त्वरूपविधित्वं कल्पयित्वा, विहितौदुम्बरत्वरूपसाधनं प्रति फलसमर्पकं भवत्विति युक्तम् । आवृत्तिरूपवाक्यभेदप्रसङ्गात् । आप्नोत्यन्तार्थवादेन विधित्वमुन्नीय तत्र फलार्पकमित्येतदपि गौरवादयुक्तम् । कामपदरहितमेवमादिवाक्यं फलार्पणशक्तं नेति **द्रव्यगुणसंस्कारकर्मसु** इति चतुर्थे पर्णमय्यधिकरणे वक्ष्यमाणत्वाच्चायमप्यर्थवाद एवेति । **फलन्तु** पूर्वोक्तार्थसमर्थनं व्यक्तम् ।

सूत्रार्थस्तु, वाशब्दोऽवधारणे । ऊर्क्प्राप्तिरूपफले औदुम्बरत्वाख्यसाधन**विधिरेव स्यात्** । कुतः **अपूर्ववत्वात्** । एवं हि अपूर्वार्थो विहितो भवति । अन्यथा स्तुतिवादमात्रमनर्थकमाश्रितं स्यादिति ॥ १९ ॥

इति द्वितीयं विधिवन्निगदाधिकरणम् (सूत्राणि १९-२५)

अथ तृतीयं हेतुवन्निगदाधिकरणम् (सूत्राणि २६-३०)

हेतुर्वा स्यादर्थवत्त्वोपपत्तिभ्याम् ॥ २६ ॥

(स्तुतिस्तु शब्दपूर्वत्वात् अचोदना तस्य ॥ २७ ॥ अर्थे स्तुतिरन्याय्येति चेत् ॥ २८ ॥ अर्थस्तु विधिशेषत्वाद्यथा लोके ॥ २९ ॥ यदि च हेतुरवतिष्ठेत निर्देशात्, सामान्यादिति चेदव्यवस्था विधीनां स्यात् ॥ ३० ॥)

पूर्वत्र विधिवन्निगदेषु फलाय विधानमाशङ्क्य अर्थवादत्वमेवेति स्थापितम्। तथेहापि क्वचिद्धेतुवन्निगदेषु हेतुसमर्पकत्वमाशंक्य अर्थवादत्वमेवेति स्थाप्यत इति **सङ्गतिः**। 'शूर्पेण जुहोति, तेन ह्यन्नं क्रियते' इति वाक्यं **विषयः**। विधेये होमसाधने शूर्पे 'तेन हि' इति वाक्यं अन्नकरणत्वरूपहेतुसमर्पकमुत अर्थवाद इति **सन्देहे**,

हि यस्मात् **तेन** शूर्पेण **अन्नं क्रियते** इति शब्दावगतहेतुसमर्पकं 'तेन हि' इति वाक्यम्। एवं हि सति यद्यदन्नकरणं दर्वीपिठरादिकं तत्सर्वं होमसाधनं लभ्यत इति प्रवृत्तिविशेषकरत्वात्प्रयोजनवत्त्वम्। एवञ्च श्रुतस्य शूर्पस्यानुमितदर्वीपिठरादिना विकल्पादिरिति **प्राप्ते**,

सिद्धान्तः श्रुतस्य शूर्पस्यानुमितदर्वीपिठरादिना विकल्पसमुच्चयबाधानामयोगात्, श्रुत्युक्ते होमसाधनत्वे श्रुतेरेव मानत्वेन हेतुसापेक्षत्वाभावात्, प्ररोचनाया अवश्यापेक्षितत्वात् श्रुतशूर्पस्तुतिपरत्वमेव युक्तमित्यर्थवादत्वं 'तेन हि' इत्यादेरिति। **फलन्तु** प्रागुक्तार्थवादत्वसमर्थनमेवेति व्यक्तम्।

सूत्रार्थस्तु, हेतुरेव स्यात् 'तेन हि' इत्यादिकम्। तथा **ह्यर्थवत्त्वम्** दर्वीपिठरादेरपि होमसाधनत्वप्राप्त्या प्रयोजनवत्त्वं हिशब्दश्रुत्युपपत्तिरपि इति ॥ २६-३०)

इति तृतीयं हेतुवन्निगदाधिकरणम् (सूत्राणि २६-३०)

अथ तुरीयं मन्त्रलिङ्गाधिकरणम् (सूत्राणि ३१-५३)

तदर्थशास्त्रात् ॥ ३१ ॥

(वाक्यनियमात् ॥ ३२ ॥ बुद्धशास्त्रात् ॥ ३३ ॥ अविद्यमानवचनात् ॥ ३४ ॥ अचेतनेऽर्थबन्धनात् ॥ ३५ ॥ अर्थविप्रतिषेधात् ॥ ३६ ॥ स्वाध्यायवदवचनात् ॥ ३७ ॥ अविज्ञेयात् ॥ ३८ ॥ अनित्यसंयोगान्मन्त्रानर्थक्यम् ॥ ३९ ॥ अविशिष्टस्तु वाक्यार्थः ॥ ४० ॥ गुणार्थेन पुनः श्रुतिः ॥ ४१ ॥ परिसङ्ख्या ॥ ४२ ॥ अर्थवादो वा ॥ ४३ ॥ अविरुद्धं परम् ॥ ४४ ॥ सम्प्रैषेकर्मगर्हानुपलम्भः संस्कारत्वात् ॥ ४५ ॥ अभिधानेऽर्थवादः ॥ ४६ ॥ गुणादप्रतिषेधः स्यात् ॥ ४७ ॥ विद्यावचनमसंयोगात् ॥ ४८ ॥ सतः परमविज्ञानम् ॥ ४९ ॥ उक्तश्चानित्यसंयोगः ॥ ५० ॥ लिङ्गोपदेशश्च तदर्थत्वात् ॥ ५१ ॥ ऊहः ॥ ५२ ॥ विधिशब्दाश्च ॥ ५३ ॥)

एवं त्रिभिर्नयैर्विधिसमभिव्याहृतार्थवादचिन्ता कृता। अधुना विधिबहिर्भूतमन्त्रविषयचिन्ता क्रियत इति वा विध्येकवाक्यत्वेनार्थवादशब्दानां धर्मे प्रामाण्येऽपि मन्त्राणां तदभावान्न प्रामाण्यमित्याक्षेपाद्वा **सङ्गतिः**। 'उरु प्रथस्व' इत्यादिर्मन्त्रो यागप्रयोगेषूच्चार्यमाणः किमदृष्टार्थः, उत अर्थप्रकाशनेन दृष्टार्थः इति **सन्देहः**।

'हे पुरोडाश त्वं **उरु** विशालता यथा भवति तथा **प्रथस्व** प्रसर' इति मन्त्रार्थः। मन्त्रो याग-प्रयोगेषूच्चार्यमाणोऽदृष्टमेव जनयति। न त्वर्थप्रकाशनमपि। न च कर्मानुष्ठानोपयुक्तपदार्थानां ज्ञानाय मन्त्रैरर्थप्रकाशनं कार्यमिति वाच्यम्। ''उरु प्रथस्वेति पुरोडाशं प्रथयति'' इति विनियोजक-ब्राह्मणवाक्यादिनापि तज्ज्ञानसम्भवात् अदृष्टार्थ एव मन्त्र इति **पूर्वपक्षः**।

सिद्धान्तस्तु अर्थप्रत्यायनस्य दृष्टप्रयोजनस्य सम्भवे केवलादृष्टकल्पनायोगादनुष्ठेयपदार्थस्मरणस्य अन्यतः सम्भवेऽपि मन्त्रेणैव पदार्थस्मरणं सम्पाद्य तदनुष्ठाने अदृष्टविशेषकल्पनादर्थप्रत्यायका एव मन्त्राः प्रयोगेषूच्चार्यमाणा इति। **फलन्तु** मन्त्रैरेव मन्त्रार्थस्मृतिपूर्वकमनुष्ठानसिद्धिरित्येके। प्रागुक्तस्य धर्मे प्रामाण्यस्य सिद्धिरित्यन्ये।

सूत्रार्थस्तु, तदर्थे मन्त्रप्रकाश्ये अर्थे ''ऊरु प्रथस्वेति पुरोडाशं प्रथयति'' इति **शास्त्रस्य** सत्त्वात् अदृष्टार्था मन्त्रा इति॥ ३१॥

इति तुरीयं मन्त्रलिङ्गाधिकरणम् (सूत्राणि ३१-५३)

इति भाट्टसङ्ग्रहे श्रीराघवेन्द्रयतिसार्वभौमकृते प्रथमाध्यायस्य द्वितीयः पादः

अत्र पादे अधिकरणानि ४ सूत्राणि ५३

आदितः '' १२ '' ८५

अथ भाट्टसङ्ग्रहे प्रथमाध्यायस्य तृतीयः पादः

अथ प्रथमं स्मृतिप्रामाण्याधिकरणम् (सूत्रे १,२)

श्रीहरिः ओं, एवं विध्यर्थवादमन्त्राणां चिन्तानन्तरं पौरुषेयस्मृत्याचाराणां धर्मे प्रामाण्यमत्र पादे चिन्त्यत इति पूर्वानन्तर्यमस्य पादस्य। नामधेयविचारकरणानन्तरमस्य कर्तव्यत्वेऽपि स्मार्तकर्मना-मधेयस्यापि तत्र विचार्यत्वात् नामधेयपादस्य पश्चात्तनत्वमिति ज्ञेयम्।

धर्मस्य शब्दमूलत्वादशब्दमनपेक्ष्यं स्यात् ॥ १ ॥

'अष्टकाः कर्तव्याः' इत्यादिस्मृतिवाक्यं धर्मे प्रमाणमुत नेति **सन्देहे** नेति **प्राप्तम्**। सम्भवद्भ्रमप्रमादादिदोषवत्पुरुषकृतवाक्येषु मूलप्रमाणाभावे प्रामाण्यनिर्णयायोगात्। यदि समूलत्वाय वेदार्थवादिन्येव स्मृतिरिति मतं तर्हि वेदेनैव तदर्थज्ञप्तिसम्भवे स्मृतिप्रणयनवैयर्थ्यात् अनुवादत्वप्रसङ्गाच्चेति।

सिद्धान्तस्तु वेदार्थानुष्ठातॄणामेव स्मृतिकर्तृत्वेन वैदिकमन्वाद्याप्तप्रणीतस्मृतीनां तत्प्रणीतस्मृतित्वहेतुना उपनयनाध्ययनादिस्मृतिदृष्टान्तेन वेदमूलत्वानुमानसम्भवात् समूलत्वेन प्रमाणमेवैवमादिस्मृतिरिति। तथा च सूत्रम्,

अपि वा कर्तृसामान्यात् प्रमाणमनुमानं स्यात् ॥ २ ॥ इति ॥

न चैवं व्यर्थता शङ्क्या। अस्मदादीनां प्रत्यक्षेष्वप्रत्यक्षेषु च वेदेषु विप्रकीर्णस्य अनुष्ठेयार्थस्यैकत्र संक्षिप्य कथनात्। अत एव नानुवादकत्वमपीति। **फलन्तु** स्मार्तकर्मानुष्ठानं व्यक्तम्।

सूत्रार्थस्तु, धर्मस्य वेदरूपशब्द**मूलत्वात् अशब्दं** स्मार्तकर्म **अनपेक्ष्यं** उपेक्ष्यं स्यादिति ॥ १ ॥

इति प्रथमं स्मृतिप्रामाण्याधिकरणम् (सूत्रे १-२)

अथ भाष्यरीत्या द्वितीयं श्रुतिप्राबल्याधिकरणम् (सूत्रे ३-४)

विरोधे त्वनपेक्षं स्यात्, असति ह्यनुमानम् ॥ ३ ॥

(हेतुदर्शनाच्च ॥ ४ ॥)

अत्र पूर्वसिद्धान्तन्यायेन शङ्कनादाक्षेपिकी **सङ्गतिः**। ज्योतिष्टोमे सदोनामकमण्टपस्य मध्ये औदुम्बरी शाखा निखन्यते। तस्याश्च वाससा वेष्टनं स्मर्यते 'औदुम्बरी सर्वा वेष्टयितव्या' इति। सा स्मृतिः प्रमाणं उत नेति **सन्देहे** अष्टकादिस्मृतिवत् समूलत्वानुमानेन प्रमाणमेवेति **प्राप्ते,**

सिद्धान्तः 'ओदुम्बरीं स्पृष्ट्वोद्गायेत्' इति प्रत्यक्षश्रुत्या स्पर्शो विधीयते। **न च** सर्ववेष्टने स्पर्शः सम्भवति। अतो मूलवेदानुमानस्य बाधितत्वाद्विप्रलम्भकवाक्यवन्निर्मूलं विततवासोलिप्सारूपहेतुमूलकं चैवं स्मृतिजातमप्रमाणमिति। **फलन्तु** सर्ववेष्टनाननुष्ठानम्। **सूत्रार्थस्तु** श्रुतिस्मृत्योः **विरोधे** स्मृतिजातं **अनपेक्षं** मूलप्रमाणानपेक्षं **स्यात्। असति हि** विरोधे **अनुमानं** मूलानुमानमिति ॥ ३ ॥

इति भाष्यरीत्या द्वितीयं श्रुतिप्राबल्याधिकरणम् (सूत्रे ३-४)

अथ भाष्यरीत्या तृतीयं दृष्टमूलकस्मृत्यप्रामाण्याधिकरणम्

हेतुदर्शनाच्च ॥ ४ ॥

पूर्वत्र किञ्चिद्विस्तृतवासोलिप्सारूपहेतुमूलकत्वाच्चामानं विरुद्धस्मृतिजातमिति पूर्वशेषतामस्योक्त्वाऽधिकरणान्तरतयाऽपि योजितम्। तथा च पूर्वत्रैव हेतुमूलत्वेनेह सिद्धान्तोक्तेरातिदेशिकी **सङ्गतिः**। अत्र गृह्यमाणमूलान्तरं श्रुत्यविरुद्धं स्मृतिजातं **'वैसर्जनीयहोमीयं वासोऽध्वर्युर्गृह्णाति'** इत्येवमादिकं **विषयः**। (ज्योतिष्टोमे अग्नीषोमीयपशोस्तन्त्रे प्रकान्ते सति विहितस्य अवान्तरदीक्षाविसर्जनार्थस्य होमस्य काले प्रसर्पतां यजमानतत्पत्नीपुत्राणामुपर्याच्छाद्यमानमहतं वास **इत्यर्थः**) तत्स्मृतिजातं प्रमाणमुत नेति **सन्देहे**

सर्ववेष्टनस्मृतिवत् प्रत्यक्षश्रुत्यविरोधात् अष्टकादिस्मृतिवन्मूलश्रुत्यनुमानसम्भवात् प्रमाणमिति **प्राप्ते,**

लोभरूपहेत्वन्तरे दृश्यमाने अत्यन्तादृष्टश्रुतिमूलकत्वकल्पनायोगात् प्रत्यक्षश्रुत्यविरुद्धमपि लोभरूपहेतुदर्शनात् अप्रमाणमेवंजातीयकमिति **सिद्धान्तः**। व्यक्तः **सूत्रार्थः** ॥ ४ ॥

एतच्च **विरोधे तु** इत्याद्यधिकरणद्वयं **यथाभाष्यमुक्तम्**।

इति भाष्यरीत्या तृतीयं दृष्टमूलकस्मृत्यप्रामाण्याधिकरणम्

अथ भट्टरीत्या द्वितीयमधिकरणम् (सूत्राणि ३-६)

(विरोधे त्वनपेक्षं स्यादसति ह्यनुमानम् ॥ ३ ॥ हेतुदर्शनाच्च ॥ ४ ॥ शिष्टाकोपेऽविरुद्धमिति चेत् ॥ ५ ॥ न, शास्त्रपरिमाणत्वात् ॥ ६ ॥)

भट्टमतेन तु :- श्रुतिविरुद्धस्मृतीनां यत्र कचिद्देशान्तरे कैश्चित्पुरुषैः पठ्यमानश्रुतिमूलत्वसम्भवेन तुल्यबलत्वाद्विकल्प एव। न त्वत्यन्ताप्रामाण्यम्। न च लोभमूलकत्वकल्पनादप्रामाण्यम्।

स्मृतीनां श्रुतिमूलत्वे दृढे पूर्वं निरूपिते।
विरोधे सत्यपि ज्ञातुं शक्यं मूलान्तरं कथम्॥

इति **वार्तिकोक्तदिशा** तस्य दुर्ज्ञानत्वात्। परन्तु मूलभूतश्रुतिदर्शनपर्यन्तं श्रौतार्थस्यानुष्ठानं, न स्मार्तस्येत्यनुष्ठानस्यैव बाधो न स्वरूपस्येति। **उक्तं हि,**

यावदेकं श्रुतौ कर्म स्मृतौ चान्यत्प्रतीयते।
तावत्तयोर्विरुद्धत्वे श्रौतानुष्ठानमिष्यते ॥ इति।

यद्यप्रमापकत्वरूपाप्रामाण्यपरत्वं **विरोधे तु** इति नयस्य वाच्यमिति निर्बन्धस्तदा तु शाक्यार्हत-पाञ्चरात्रसाङ्ख्ययोगादिपरिगृहीतवाक्यानामष्टकादिवद्वेदमूलत्वेन तत्तदीयप्रत्यक्षमूलत्वेन वा प्रामाण्ये प्राप्ते श्रुतिविरोधहेतुदर्शनाभ्यामप्रामाण्यं वर्णनीयमित्येवं ज्ञेयम्।

इति भट्टरीत्या द्वितीयमधिकरणम् (३-६)

अथ भाष्यरीत्या चतुर्थं पदार्थप्राबल्याधिकरणम् (सूत्राणि ५-७)

शिष्टाकोपेऽविरुद्धमिति चेत् ॥ ५ ॥

(न, शास्त्रपरिमाणत्वात् ॥६॥ अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् ॥७॥)

पूर्वत्र श्रुतिविरोधे स्मृतीनाममानत्वमुक्तम्। विरोध एव क्वास्ति क्व नेति चिन्तनाद्वा, विरोधे सत्यप्यप्रामाण्यं नेति चिन्तनाद्वा **सङ्गतिः**। 'क्षुत आचमेत्' इति विहितं आचमनं पुरुषार्थम्। यद्वा क्रतुमध्ये क्षुतादिनिमित्तं प्राप्नोति तदा नैमित्तिकमाचमनं क्रत्वङ्गत्वेन स्मृत्या विधीयते 'आचान्तेन कर्तव्यम्' इति। सा स्मृतिःकिं मानमुत नेति **सन्देहे**

'वेदं कृत्वा वेदिं करोति' इति श्रुतौ पूर्वकालवाचिना क्त्वाप्रत्ययेन वेदवेद्योः प्रतीतस्य नैरन्तर्य-रूपक्रमस्य मध्ये क्षुतनिमित्ताचमनानुष्ठाने बाधप्रसक्तेर्बलवच्छ्रुतिप्राप्तक्रमस्य दुर्बलस्मार्ताचमनेन च तदयोगात्तद्विरोधेन सर्ववेष्टनस्मृतिवदमानमिति **प्राप्ते,**

सिद्धान्तः क्रमो न वेदवेद्यादिवदनुष्ठेयः पदार्थः। किन्तु तद्धर्मः। एवं च धर्मिरूपपदार्थ-प्राप्त्यपेक्षक्रमापेक्षया जघन्यस्मृतिप्रमाणकोऽप्याचमनादिपदार्थः पूर्वं प्राप्नोति। पश्चात्तु क्रमः सर्व-पदार्थाङ्गतया अवतरन्नपि न पदार्थैर्विरुध्यत इति प्रमाणमेवंजातीयका स्मृतिरिति। **वेदो** नाम सम्मार्जनहेतुदर्भमुष्टिः। **वेदिस्तु** आहवनीयगार्हपत्यमध्यवर्तिनी चतुरङ्गलखाता भूमिः। **फलन्तु** स्मार्ताचमनादेरप्यनुष्ठानसिद्धिः।

शिष्टस्य श्रुत्युक्तस्य क्रमस्य **अकोपे** कोपाभावे आचमनादिस्मृतिवाक्यं **अविरुद्धमिति चेत्** इति सिद्धान्ताभिप्रायेण शङ्कापरसूत्रस्यार्थः।

अत्र **शिष्टेति न शास्त्रपरिमाणत्वात्** इति **अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन्** इति त्रिसूत्री भाष्यरीत्या एकमधिकरणम् ।

इति भाष्यरीत्या तृतीयं पदार्थप्राबल्याधिकरणम् (सूत्राणि ५-७)

भट्टमतेन पूर्वाधिकरणस्य वर्णकान्तरम्

भट्टरीत्या तु पूर्वसूत्रद्वयं पूर्वशेषः । **अपि वा** इत्यधिकरणान्तरम् । तत्रायमर्थः । **विरोधे** तु इति सूत्रे श्रुतिविरोधे स्मृतेः प्रामाण्य**मनपेक्षं** अनादरणीयमित्युक्त्या अर्थादविरोधे मानमित्युक्तं स्यात् । तथा च शाक्याद्युक्तं 'अहिंसासत्यवचनदमशमदयावैराग्यादिर्धर्मः' इति वाक्यमविरोधात् मानमिति चेन्न ।

पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः ।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश ॥

इति धर्मप्रमापकस्य परिमितत्वोक्तेर्न तैरुक्तैर्वाक्यैर्धर्मः प्रमातव्य इत्यप्रमाणमेव तदपीति ।

अथ भट्टरीत्या तृतीयं सदाचारप्रामाण्याधिकरणम्

अपि वा कारणाग्रहणे प्रयुक्तानि प्रतीयेरन् ॥ ७ ॥

अपि वा इत्यत्र तु सदाचारा धर्मे प्रमाणमुत नेति **सन्देहे** मूलादर्शनादप्रमाणमिति **प्राप्ते** वैदिकैर्धर्मत्वेनानुष्ठीयमानस्य वसन्तोत्सवाद्याचारस्य असति समूलत्वे अनुपपत्तेः प्रमाणमेव धर्मे सदाचारा इत्येवं **सिद्धान्तः** इति ज्ञेयम् ।

वसन्तोत्सवो नाम फाल्गुनकृष्णप्रतिपदि क्रियमाणमन्योन्यजलसेचनमित्याहुः । आचारस्य समूलत्वं च स्मृतिप्रणाडिकया श्रुतिकल्पनेन । न साक्षाच्छ्रुतिमूलत्वेन इति **वार्तिकोक्तवर्णकान्तरे** अग्रे व्यक्तीभविष्यति ।

इति भट्टरीत्या तृतीयं सदाचारप्रामाण्याधिकरणम्

अथ पञ्चमं शास्त्रप्रसिद्धार्थप्रामाण्याधिकरणम् (सूत्रे ८-९)

तेष्वदर्शनात् विरोधस्य समा विप्रतिपत्तिः स्यात् ॥ ८ ॥

(शास्त्रस्था वा तन्निमित्तत्वात् ॥ ९ ॥)

पूर्वत्र श्रुतिस्मृत्योर्विरोधेऽपि नाप्रामाण्यमित्युक्ताविहापि शब्दार्थप्रसिध्द्योर्विरुद्धयोरपि नाप्रामाण्यमिति शङ्कनाद्वा, आचारप्रसङ्गाच्छब्दप्रयोगरूपाचारचिन्तनात्प्रासङ्गिकी वा **सङ्गतिः** । वरुणप्रघासाख्ये पर्वणि श्रुतं 'यवमयश्चरुर्भवति' इति 'वाराही उपानहावुपमुञ्चते' इति । तत्र केचिद्यववराहशब्दौ दीर्घशूकसूकरयोः प्रयुञ्जते । अन्ये प्रियङ्गुवायसयोः । तत्र किं यवादिशब्दः उभयत्र मुख्यः, उत दीर्घशूकादिष्वेव मुख्योऽन्यत्र गौणः इति **सन्देहे** लोकव्यवहारेण निर्णेतव्येषु शब्दार्थेषु द्विविधप्रसिध्द्योर्विरोधस्यादर्शनात् द्विविधा अप्यर्था विकल्पेन ग्राह्या इति **प्राप्तम्** । तथा च **सूत्रम् ॥ तेष्वित्यादि ॥** निगदव्याख्यानमेतत् ।

सिद्धान्तस्तु शास्त्रीयधर्मावबोधे शास्त्रप्रसिद्धिरेव बलीयसी । अन्तरङ्गत्वात् । शास्त्रे च यवविध्यर्थवादे 'यत्रान्या ओषधयो म्लायन्ते तत्रैते मोदमाना इवोत्तिष्ठन्ति' इति श्रुतं मोदमानत्वं दीर्घशूकेष्वेव दृश्यते । न प्रियङ्गुषु । तेषामितरोषधिपरिपाकात् पूर्वमेव पच्यमानत्वात् । उपानद्विशेषे च 'वराहं गावोऽनुधावन्ति' इति श्रुतं गवां वराहानुधावनं च वत्सभ्रान्त्या सूकरे सम्भवति । न तु वायसे । अतो यववराहशब्दौ दीर्घशूकसूकरयोर्मुख्यावन्यत्र गौणाविति तावेव ग्राह्यौ, नान्याविति । **फलन्तु** दीर्घशूकाद्यनुष्ठानं व्यक्तम् ।

अस्याधिकरणस्य वार्तिककारोक्तं प्रथमं वर्णकान्तरम्

वार्तिककारस्तु 'शिष्टानामेव मिथोभिधानविप्रतिपत्तौ वाक्यशेषानुगृहीत एवार्थो ग्राह्यो नान्यः इति **भाष्योक्तमयुक्तम्** । उदाहरणादर्शनात् । '**सन्दिग्धे तु वाक्यशेषात्**, (१-४-२९) इत्युत्तरपादीयाधिकरणेन गतार्थत्वापत्तेश्चेति दूषयित्वा पील्वादिशब्दानुदाहृत्य आर्यम्लेच्छप्रसिद्धिभ्यां वृक्षहस्त्यादिवाचित्वं सन्दिह्य **तेष्वदर्शनात् विरोधस्य** इत्यंशस्य पूर्वसूत्रशेषत्वमुपेत्य **समा विप्रतिपत्तिः स्यात्** इति विकल्पं पूर्वपक्षीकृत्य विप्लुतम्लेच्छप्रयोगादविप्लुतव्यवहारतया आर्यप्रसिद्धेः बलीयस्त्वेन **शास्त्रस्था वा तन्निमित्तत्वात्** इति सूत्रेण सिद्धान्तितवान् ॥ ८-९ ॥

स्मृत्याचारयोर्मध्ये स्मृतेः प्राबल्यसमर्थनम्

वार्तिककारीयं द्वितीयं वर्णकान्तरम्

तथा– **मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च ।**
समानप्रवरां चैव त्यक्त्वा चान्द्रायणं चरेत् ॥

इत्यादिस्मृतिविरुद्धं मातुलसुताविवाहाद्याचारमुदाहृत्य श्रुतिमूलतया स्मृत्याचारयोस्तुल्यबलतया विकल्पं **पूर्वपक्षीकृत्य** वेदे नानास्थानेषु विक्षिप्योक्तार्थं साक्षाद्बुध्वा धर्माचरणस्याशक्यत्वात्तत्सङ्ग्रह-रूपस्मृतिभिरेवार्थं बुद्ध्वा धर्ममाचरन्तीति वाच्यत्वेनाऽचारान्मूलस्मृत्यनुमानद्वारा श्रुतेरनुमातव्यत्वेन स्मृतेरिव साक्षाच्छ्रुतिमूलत्वाभावेन प्रामाण्यस्य विप्रकृष्टतया स्मृतितो दुर्बलत्वात् तद्विरुद्धाचाराणां धर्मे न प्रामाण्यमिति **सिद्धान्तितवान्**। तदुक्तं

आचाराच्च स्मृतिं ज्ञात्वा श्रुतिर्विज्ञायते ततः।
तेन ह्यन्तरितं तस्य प्रामाण्यं विप्रकृष्यते ॥ इति ॥

लोकप्रसिद्धिवाक्यशेषयोर्मध्ये वाक्यशेषस्य प्राबल्यसमर्थनम्

(वार्तिककारोक्तं तृतीयं वर्णकान्तरम्)

तथा त्रिवृच्चर्वाश्ववालादिशब्दानुदाहृत्य व्यचारयत्। तथा हि 'त्रिवृद्बहिष्पवमानम्' इति श्रुतौ श्रुतस्त्रिवृच्छब्दः 'त्रिवृद्रज्जुः' इति लोके त्रैगुण्ये प्रसिद्धः। 'नवभिः स्तुवन्ति' इति शाखान्तरस्थ-वाक्यशेषात् स्तोत्रीयानवके प्रसिद्धः। 'आदित्यश्चरुः' इत्यादौ श्रुतश्चरुशब्दः स्थाल्यां लोकतः प्रसिद्धः। 'अदितिमोदनेन' इति वाक्यशेषात् ओदने प्रसिद्धः। 'आश्ववालः प्रस्तरः' इति श्रुतोऽश्ववालशब्दो लोकतोऽश्वस्य वाले प्रसिद्धः।

ते वालाः काशतां प्राप्ताः कार्योऽतः प्रस्तरस्तु तैः।

इति वाक्यशेषात् काशेषु प्रसिद्धः। तत्र लोकवाक्यशेषयोस्तुल्यबलत्वं, उत वाक्यशेषस्था प्रतिपत्ति-र्बलीयसी इति **सन्देहे** पदात् पदार्थप्रतीतौ लोकवेदयोस्तुल्यबलत्वमेव। अतो विकल्प इति **प्राप्ते** लौकिकार्थस्वीकारपक्षे विधिवाक्यतद्वाक्यशेषयोर्भिन्नार्थतापत्तेरेकवाक्यता तयोर्न स्यात्। ततो विध्येक-वाक्यत्वाय वाक्यशेषप्रतीत एवार्थो विधिवाक्यस्थशब्दानां ग्राह्यो न लौकिक इति **सिद्धान्तः** इति। एवं वार्तिकोक्तवर्णकत्रयेपि **फलमनुष्ठानभेदरूपं** व्यक्तम् ॥ ८-९ ॥

इति पञ्चमं शास्त्रप्रसिद्धार्थप्रामाण्याधिकरणम्

अथ षष्ठं म्लेच्छप्रसिद्धार्थप्रामाण्याधिकरणम्

(प्रमाणाविरोधे म्लेच्छप्रसिद्धेरपि प्रामाण्यसमर्थनम्)

चोदितन्तु प्रतीयेताविरोधात् प्रमाणेन ॥ १० ॥

प्रागुक्ता म्लेच्छप्रसिद्धेरमानतेहापोद्यत इत्यापवादिकी **सङ्गतिः**। पिकवेमशततामरसादिशब्दार्थेषु म्लेच्छप्रसिद्धिरमानं उत मानमिति **सन्देहे** म्लेच्छव्यवहारे विप्लुतेरपि सम्भवेन शब्दार्थानिश्चायकत्वात् अप्रमाणमिति **प्राप्ते,**

पूर्वत्राविप्लुतार्थप्रसिद्धिविरोधेनामानता म्लेच्छप्रसिद्धेरुक्ता। न चेह तद्विरोधोऽस्ति। आर्याणा-मर्थविशेषे क्वाप्यप्रयोगात् निरुक्त्यादिबलेनापूर्वार्थकल्पनापेक्षया क्लृप्तत्वाद्विरोधाभावाच्च शब्दार्थनिर्णये म्लेच्छप्रसिद्धेरपि मानतोपपत्तेः पिकशब्देन कोकिलः, वेमशब्देनार्धं, शतशब्देन शतच्छिद्रदारुपात्र-विशेषः, तामरसशब्देन पद्ममित्येवं म्लेच्छप्रसिद्ध एवार्थो ग्राह्य इति **सिद्धान्तः**। तथाच **सूत्रम्**। **चोदितं त्विति ॥**

सूत्राक्षरार्थस्तु म्लेच्छैरपि **चोदितं** प्रमाणत्वेन **प्रतीयेत**। **प्रमाणेन** शिष्टप्रयोगेण **अविरोधात्** इति। **फलन्तु** व्यक्तम्।

इति षष्ठं म्लेच्छप्रसिद्धार्थप्रामाण्याधिकरणम्

अथ सप्तमं कल्पसूत्रादीनां स्वतो मानत्वाभावाधिकरणम् (सूत्राणि ११-१४)

प्रयोगशास्त्रमिति चेत् ॥ ११ ॥

(नासंनियमात् ॥ १२ ॥ अवाक्यशेषाच्च ॥ १३ ॥ सर्वत्र च प्रयोगा-त्संनिधानशास्त्राच्च ॥ १४ ॥)

वेदेतरेषां वेदमूलत्वेन प्रामाण्यमुक्तम्। तदाक्षिप्य समाधीयत इति वा, पूर्वत्र म्लेच्छप्रसिद्धेरपि शिष्टप्रसिद्धेरिव स्वतः प्रामाण्योक्तौ तर्हि कल्पसूत्रादीनामपि वेदमूलत्वेन वेदसरूपत्वेनैव वा स्वतो मानताऽस्त्विति शङ्कनाद्वा **सङ्गतिः**।

बोधायनाऽपस्तम्बाऽश्वलायनकात्यायनादिकल्पसूत्रग्रन्था निरुक्तादिषडङ्गग्रन्था मन्वादिस्मृतयश्च किं वेदवत्स्वतन्त्राः प्रमाणं उत वेदमूलत्वेन परतन्त्राः सन्तः इति **सन्देहः**। वेदवत्स्वतन्त्रा एव मानमिति **प्राप्तम्**। कुतः ? धर्मप्रमितिजनकत्वात्। वेदमूलत्वेन मानत्वे तु मूलवाक्यं किञ्चित्कल्प-नीयम्। तस्य प्रामाण्यायापौरुषेयत्वं च कल्पनीयमिति गौरवम्। अतः एतेषामेवापौरुषेयत्वेन मानत्वोक्तौ लाघवमिति।

सिद्धान्तस्तु एतेषु परम्परया कर्तृस्मरणस्य दृष्टत्वेन बोधायनादिसमाख्यायाः काठकादि-समाख्यावत् प्रवचननिमित्तत्वायोगात् पौरुषेयत्वेऽवश्यं वाच्ये वेदमूलत्वेनैव प्रामाण्यं **न स्वतः इति ।** **फलन्तु, अपि वा कर्तृसामान्यात्प्रमाणमनुमानं स्यात्** (१-२-२) इति स्मृतितयोक्तवेदमूलत्व-समर्थनम् । **सूत्रार्थस्तु, प्रयोगशास्त्रं** क्रतुप्रयोगशासकं कल्पसूत्रादिशास्त्रं स्वतः प्रमाणम् **इति चेत् इति** ॥ ११ ॥

इति सप्तमं कल्पसूत्रादीनां स्वतो मानत्वाभावाधिकरणम् (सूत्राणि ११-१४)

अथ अष्टमं होलाकाधिकरणम् (सूत्राणि १५-२३)

(देशभेदेनानुष्ठीयमानानां होळिकाद्याचाराणां सार्वदेशिकत्वसमर्थनम्)

अनुमानव्यवस्थानात् तत्संयुक्तं प्रमाणं स्यात् ॥ १५ ॥

(अपि वा सर्वधर्मः स्यात्तन्न्यायत्वाद्विधानस्य ॥ १६ ॥ दर्शनाद्विनियोगः स्यात् ॥ १७ ॥ लिङ्गाभावाच्च नित्यस्य ॥ १८ ॥ आख्या हि देशसंयोगात् ॥ १९ ॥ न स्याद्देशान्तरेष्विति चेत् ॥ २० ॥ स्याद्योगाख्या हि माथुरवत् ॥ २१ ॥ एकधर्मो वा प्रवणवत् ॥ २२ ॥ तुल्यं तु कर्तृधर्मेण ॥ २३ ॥)

स्मृत्याचारप्रामाण्यप्रसङ्गात् तद्व्यवस्थितिर्विचार्यत इति प्रासङ्गिकी **सङ्गतिर्वा** बोधायनीय-शौनकादिकल्पसूत्राणां यथाशाखं व्यवस्थावदिहापि व्यवस्थामाशङ्क्य निरस्यत इत्यापवादिकी वा **सङ्गतिः ।** होलाकाद्याचाराः प्राच्यादिदेशभेदेष्वनुष्ठीयन्ते । ते किं यथादेशं व्यवस्थिताः, उत सर्वे सर्वत्रानुष्ठेयाः इति **सन्देहः ।**

नियमेन तत्तद्देशस्थानामेवाऽचरणं अन्येषामनाचरणं व्यवस्थयैव मूलप्रमाणमाचाराणां कल्पयति । अतो व्यवस्थिता एव देशभेदेनाऽचारा इति **प्राप्ते,**

अननुष्ठातृभ्यो व्यावृत्तस्य अनुष्ठातृमात्रनिष्ठस्य जातिव्यक्तिगुणसंस्थानादिविशेषस्याभावान्नियमे-नानुष्ठानाननुष्ठानयोराभिमानिकत्वेनोपपत्तेः मूलकल्पनस्यापि 'होलाकाद्याचारः कार्यः' इति साधारण्येनैव कल्पनात् सर्वधर्मतेति **सिद्धान्तः** इति । **फलन्तु** सर्वानुष्ठानं व्यक्तम् ।

सूत्राक्षरार्थस्तु, अनुमानात् अनुमापकाचारात् तत्तद्देशभेदेन **व्यवस्थानात्** व्यवस्थितात् **तत्संयुक्तं** व्यवस्थायुक्तमेव श्रुतिरूपं **प्रमाणं** अनुमेयं **स्यात्** इति ॥ १५ ॥

इति अष्टमं होलाकाधिकरणम् (सूत्राणि १५-२३)

अथ नवमं साधुशब्दप्रयोगाधिकरणम् (सूत्राणि २४-२९)

(व्याकरणस्मृतिमूलानामेव शब्दानां साधुत्वसमर्थनम्)

प्रयोगोत्पत्त्यशास्त्रत्वाच्छब्देषु न व्यवस्था स्यात् ॥ २४ ॥

(शब्दे प्रयत्ननिष्पत्तेरपराधस्य भागित्वम् ॥ २५ ॥ अन्यायश्चानेकशब्दत्वम् ॥ २६ ॥ तत्र तत्त्वमभियोगविशेषात्स्यात् ॥ २७ ॥ तदशक्तिश्चानुरूपत्वात् ॥ २८ ॥ एकदेशत्वाच्च विभक्तिव्यत्यये स्यात् ॥ २९ ॥)

पूर्वत्र व्यवस्थापकाभावात् होलाकाद्याचाराणामव्यवस्थोक्ताविह गोगाव्यादिशब्दप्रयोगरूपाचाराणामपि साधुत्वादिव्यवस्थापकाभावादव्यवस्थेति शङ्कनात् **सङ्गतिः** ।

गौः गावी गोणी गोपोतलिकेत्येवमादयः शब्दाः सर्वेऽपि किमेकस्मिन् सास्नादिमत्यर्थे साधवः अथ गोशब्द एव साधुः अन्येऽपभ्रंशा इति **सन्देहः** ।

'अयं साधुः, अयं न' इत्यत्र नियामकाभावात् सर्वेऽपि साधव इति **प्राप्तम्** न च व्यवहारो नियामकः । तस्य गाव्यादिशब्देष्वपि सत्त्वात् । न च व्याकरणादिस्मृतिर्नियामिका । तस्या निर्मूलत्वेनामानत्वात् । तस्मात् यथेच्छं विकल्पेन सर्वेऽप्येकस्मिन्नर्थे प्रयोक्तव्या इति ।

सिद्धान्तस्तु व्याकरणस्मृतेः पूर्वपूर्वव्याकरणस्मृतिमूलत्वेन प्रमाणत्वात् तन्मूलत्वेन 'गवादिशब्दा एव साधवो, नान्ये' इति निश्चयसम्भवाद्गवादयः शब्दा एव प्रयोक्तव्याः । नान्येऽपभ्रंशा इति । **फलन्तु** साध्वसाधुशब्दयोः प्रयोगाप्रयोगौ व्यक्तौ ।

सूत्रार्थस्तु, प्रयोगोत्पत्तेः उच्चारणानुष्ठानस्य **अशास्त्रत्वात्** साधुत्वादिविवेकशास्त्ररहितत्वात् **व्यवस्था** 'गवादयः शब्दा एव प्रयोज्याः' इति व्यवस्था **न स्यात्** इति ।

इति नवमं साधुशब्दप्रयोगाधिकरणम् (सूत्राणि २४-२९)

अथ दशमं लोकवेदयोः शब्दार्थैक्याधिकरणम् (सूत्राणि ३०-३५) (प्रथमं वर्णकम्)

प्रयोगचोदनाभावात् अर्थैकत्वमविभागात् ॥ ३० ॥

(अद्रव्यशब्दत्वात् ॥ ३१ ॥ अन्यदर्शनाच्च ॥ ३२ ॥ आकृतिस्तु क्रियार्थत्वात् ॥

३३ ॥ न क्रिया स्यादिति चेदर्थान्तरे विधानं न द्रव्यमिति चेत् ॥ ३४ ॥ तदर्थत्वात्प्रयोगस्याविभागः ॥ ३५ ॥)

वाचकप्रसङ्गाद्वाच्यविशेषोऽत्र चिन्त्यत इति प्रासङ्गिकी **सङ्गतिः**। तत्र जात्यादिविचारात् प्रागुपोद्धातत्वेनेदं **वर्णकान्तर**मारभ्यते। लौकिकेभ्यः शब्देभ्योऽर्थेभ्यश्च वैदिकाः शब्दा अर्थाश्च भिन्नाः, उत त एवेति **सन्देहः**।

अन्ये इति **प्राप्तम्** एते वैदिका एते लौकिका इति व्यपदेशभेदात्। 'ब्राह्मणासः पितरः सौम्यासः' इति 'ब्राह्मणाः सौम्याः' इति लौकिकेभ्यो रूपभेदात्। 'उत्ताना वै देवगवा वहन्ति' इति वेदे देवगवानां उत्तानवाहित्वोक्त्या अधोवाहिलौकिकबलीवर्देभ्योऽर्थान्यत्वस्य स्फुटत्वादिति।

सिद्धान्तस्तु वर्णानामैक्यप्रत्यभिज्ञानेन तदात्मकपदानामप्यैक्यमेव लोकवेदयोः। पदैक्यादेव चार्थैक्यम्। व्यपदेशादिभेदस्त्वप्रयोजकः। अर्थभेदौपयिकभेदस्यैव शब्दभेदकल्पकत्वेनात्र तदभावात्। काचित्कव्यपदेशादिभेदमात्रेण बहुषु स्थलेषु प्रत्यभिज्ञावगतशब्दैक्यबाधायोगात्। 'उत्ताना' इत्यादेस्तु यज्ञद्रव्यार्थत्वेन देवसम्बन्धिन्यो या मनुष्याणां गावस्तत्स्तुत्यर्थत्वेनार्थवादत्वान्नार्थभेदोऽपीति।

फलन्तु लोकवेदयोः शब्दार्थैक्ये लोके वृद्धव्यवहारादिना गृहीतसङ्गतिकानां पदानां वेदे अर्थबोधकत्वसम्भवोऽन्यथा तु नेति। तथा च **सूत्रम् ॥ प्रयोगेत्यादि ॥ सूत्रार्थस्तु**, 'व्रीहिभिर्यजेत' इत्यादि **प्रयोगचोदनानां भावात्** तासां च शब्दार्थैक्यपक्षे एव अर्थप्रत्यायकत्वोपपत्तेः **अर्थैक्य**मिति। शब्दैकत्वस्याप्युपलक्षणमेतत् **प्रयोगचोदने**ति ॥

अस्मिन्नधिकरणे द्वितीयं वर्णकम् (आकृत्यधिकरणम्)

एवं लोकवेदयोः शब्दार्थैक्ये सति, शब्दानां जातिर्वाच्या अथ व्यक्तिः उत जातिविशिष्टा व्यक्तिः इति चिन्त्यते। व्यक्तिर्वा जातिविशिष्टव्यक्तिर्वा शब्दवाच्येति **प्राप्तम्** 'व्रीहीनवहन्ति' 'पशुमालभेत' 'गामानय' 'ब्रह्मणो न हन्तव्यः' इत्येवमादिवाक्योक्तानां अवहननाऽलम्भनाऽनयनहनननिषेधानां व्यक्तौ वा जातिविशिष्टव्यक्तौ वा सम्भवात्। आकृतावसम्भवात्। न च 'गां पश्य' इत्यादौ दृष्टिकर्मत्वयोग्यत्वाज्जातिरर्थः, अन्यत्र व्यक्तिरिति युक्तम्। अनेकार्थत्वप्रसङ्गदिति।

सिद्धान्तस्तु, व्यक्त्यर्थत्वे तदानन्त्यव्यभिचाराभ्यां व्यक्तौ शक्तिग्रहायोगः। जातेः शक्तिग्रहनिमित्तत्वे हि लाघवात् सैव वाच्या। प्रयोगचोदनासु व्रीह्यादिशब्दानां लक्षणया व्यक्त्यर्थत्वेन अवहननाद्युपपत्तेराकृतिरेव वाच्येति। उक्तं हि

ततस्तल्लक्षितव्यक्तेः क्रियासम्बन्धचोदना।

जातिव्यक्त्योरभेदो वा वाक्यार्थेषु विवक्ष्यते ॥ इति ।

फलन्तु 'पशुना यजेत' इत्यादौ जातिवैकल्ये सति न क्रियाङ्गविशेषणवैकल्यनिमित्तं प्रायश्चित्तं कार्यम् । किन्तु क्रियाङ्गवैकल्यनिमित्तमेवेति । **सूत्रार्थस्तु** लोकवेदाधिकरणे सिद्धान्तसूत्रमपीदमिह पूर्वपक्षसूत्रम् । **चोदनानां** 'व्रीहीनवहन्ति' इत्यादिप्रयोगचोदनानां **भावात्** जातिपक्षेऽवहननादेरयोगात् व्यक्तीनामानन्त्येऽपि जातेरुपलक्षणत्वेन **अर्थैक्यं** युज्यते । जातिभानस्य च जातेः **अविभागात्** व्यक्त्यविभागेनोपपत्तेरिति ॥ ३० ॥

इति दशमं लोकवेदयोः शब्दार्थैक्याधिकरणं आकृत्यधिकरणञ्च (सूत्राणि ३०-३५)

इति श्रीराघवेन्द्रयतिसार्वभौमकृते भाट्टसङ्ग्रहे प्रथमाध्यायस्य तृतीयः पादः

अस्मिन् पादे अधिकरणानि १० सूत्राणि ३५

आदितः ,, २२ ,, १२०

अथ प्रथमाध्याये चतुर्थः पादः

अथ प्रथमं उद्भिदादिपदानां यागनामतया प्रामाण्याधिकरणम्

॥ ॐ ॥ विध्यर्थवादमन्त्रनामधेयरूपे वेदे विध्यादेर्विधानादिना प्रामाण्ये सिद्धे अवशिष्टनामधेयस्य चिन्ताऽत्र पादे क्रियते । स्मार्तकर्मनाम्नामप्यत्र विषयत्वात् पूर्वानन्तर्यमस्य पादस्य ज्ञेयम् ।

उक्तं समाम्नायैदमर्थ्यं तस्मात्सर्वं तदर्थं स्यात् ॥ १ ॥

उद्भिदेत्यादिकं पदं किं प्रमाणं, उत नेति **सन्देहे** 'उद्भिदा यजेत' 'बलभिदा यजेत' इत्यादौ श्रुतोद्भिदेत्याद्यंशस्य लिङादिविधिप्रत्ययोक्तभावनाया वा फलकरणेतिकर्तव्यतारूपभावनांशत्रयान्यतमस्य वा अप्रतिपादकत्वेन विध्यन्तर्भावस्य, स्तुतेर्वा कर्मसमवेतार्थप्रकाशनस्य वा उद्भिदादिपदैरजनेनोत्तमामन्त्रणादेर्मन्त्रप्रसिद्देश्चाभावेनार्थवादमन्त्रयोरन्तर्भावस्य चाभावान्न धर्मे प्रामाण्यमिति **प्राप्ते,**

विध्यर्थभावनाकरणांशे यागादौ गुणत्वेन नामत्वेन वा अन्वयसम्भवेन विध्यन्तर्भावाद्भवति धर्मे प्रमाणमिति **सिद्धान्त** इति ।

सूत्रार्थस्तु, समाम्नायैदमर्थ्यं विध्येकवाक्यत्वमर्थवादादीनां सर्वेषामपि **उक्तम्** अर्थवादनये, **तस्मात्** उद्भिदादिपदं **सर्वं तदर्थं स्यात्** इति ॥ १ ॥

इति प्रथमं उद्भिदादिशब्दानां यागनामतया प्रामाण्याधिकरणम्

अथ द्वितीयं उद्भिदादिशब्दानां यागनामधेयताधिकरणम्

अपि वा नामधेयं स्याद्यदुत्पत्तौ चापूर्वमविधायकत्वात् ॥ २ ॥

एवं विध्यन्तर्गतत्वेन सामान्यतः सिद्धे प्रामाण्ये अत्र विशेषचिन्तनात् **सङ्गतिः**। यौगिक उद्भिदादिशब्दः किं पशुफलाय गुणविधिपरोऽथ कर्मनामधेयं इति **सन्देहः**। 'दध्ना जुहोति' इत्यादौ दध्न इव उद्भिन्नामकगुणस्याप्रसिद्धावपि 'उद्भिद्यते भूमिरनेन' इति व्युत्पत्त्या योगेन खनित्रादिवाचित्व-सम्भवात् प्रकृतज्योतिष्टोमयागं 'यजेत' इति यजिना अनूद्य पशुफलाय खनित्रादिगुणो विधीयते 'उद्भिदा यागनिर्वृत्तिद्वारा पशून् भावयेत्' इति, इति **प्राप्ते**,

सामानाधिकरण्येनान्वये सम्भवति 'उद्भिदा साधितेन यागेन पशून् भावयेत्' इति वैय्यधिकरण्ये-नान्वयमुपेत्य गुणविधिपक्षे गुणफलसम्बन्धविधानेन धात्वर्थस्याविधानात् धातोरत्यन्तपारार्थ्यापत्तिः। 'उद्भिद्यते पशुफलमनेन यागेन' इति व्युत्पत्त्या उद्भिच्छब्दस्य यागनामत्वे तु फलाय यागविधानेन धातोरपारार्थ्यं सामानाधिकरण्यं च लभ्यते। न च 'उद्भिद्वता यागेन' इत्युक्तावपि सामानाधि-करण्यलाभ इति वाच्यम्। मत्वर्थलक्षणादोषप्रसङ्गात्। अतः कर्मनामधेयमुद्भिदादिशब्दः इति **सिद्धान्तः**। **फलन्तु** 'अनेनाहं यक्ष्ये' इत्यादिव्यवहारो नामत्वसमर्थनस्येति ज्ञेयम्।

सूत्रार्थस्तु, उत्पत्तौ प्रथमज्ञाने **यदपूर्व**मर्थान्तरवाचकत्वेन प्रसिद्धं उद्भिदादि **तन्नामधेयं स्यात्**। कुतः मत्वर्थलक्षणादोषेण **गुणविधायकत्वासम्भवादिति** ॥ २ ॥

इति द्वितीयमुद्भिदादिशब्दानां यागनामधेयताधिकरणम्

अथ तृतीयं चित्रादिशब्दानां यागनामधेयताधिकरणम्

यस्मिन् गुणोपदेशः प्रधानतोऽभिसम्बन्धः ॥ ३ ॥

पूर्ववैषम्येण पूर्वपक्षप्रवृत्तेः प्रत्युदाहरणरूपा **सङ्गतिर्ज्ञेया**। 'चित्रया यजेत पशुकामः,' 'पञ्चदशान्याज्यानि भवन्ति' इत्यादौ श्रुतः चित्रादिशब्दः किं गुणविधिः, उत कर्मनामधेयं इति **सन्देहः**। पूर्वत्र यौगिकत्वेन उद्भिदादिशब्दस्य कर्मनामधेयत्वेऽपीह चित्रादिशब्दस्य रूढ्या चित्रत्वस्त्रीत्वविशिष्टार्थवाचित्वादाज्यशब्दस्य घृतवाचित्वात् कर्मनामत्वस्य सर्वथाऽयोगात् 'अग्नीषोमीयं पशुमालभेत' इति विहितपशुयागमत्र यजिनाऽनूद्य तस्मिन् पशौ चित्रत्वस्त्रीत्वगुणो विधीयते। तथा सङ्ख्यायुक्तं घृतं स्तोत्राङ्गतया विधीयत इति **प्राप्ते**,

सिद्धान्तः चित्रत्वस्त्रीत्वरूपगुणद्वयविधौ 'पशुश्चित्रः, स्त्री च' इति वाक्यभेदप्रसङ्गात् वाक्यभेदपरिहाराय गुणद्वययुक्तपशुद्रव्यकापूर्वकर्मविधानेऽपि विशिष्टविधानरूपगौरवं स्यात् अतो 'दधि मधु घृतमापो धानास्तण्डुलास्तत्संसृष्टं प्राजापत्यं' इत्युत्पत्तिवाक्यावगतविचित्रनानाद्रव्यसम्बन्धेन यागस्य चित्रत्वोपपत्तेः 'चित्रनामकेन यागेन पशून् भावयेत्' इति सामानाधिकरण्येन पूर्ववद्यागनामधेयं चित्रापदमिति । तथा 'पञ्चदशान्याज्यनि' इत्यत्र समासाभावेन सङ्ख्याविशिष्टद्रव्यविध्ययोगेनोभयविधौ वाक्यभेदप्रसङ्गात् 'यदाजिमीयुस्तदाज्यानामाज्यत्वं' इति वाक्यशेषावगतनिर्वचनेन मन्त्रनामधेयमाज्यपदम् । एवं च 'आज्यैः स्तुवते' इति वाक्ये आज्यपदस्य नामत्वे तदनुवादेन सङ्ख्यामात्रविधाने लाघवमवाक्यभेदश्चेति । तथा च **सूत्रम् ॥ यस्मिन्नित्यादि ॥ यस्मिन्** चित्रादिवाक्ये **गुणोपदेश इव** भाति तत्र वाक्यभेदादिदोषात्**प्रधानकर्मणैव** नामत्वेनाभिसम्बन्ध इति । **फलन्तु, पूर्वपक्षे** अग्नीषोमीयपशुः चित्रः स्त्री च सम्पाद्यः । **सिद्धान्ते** त्वपूर्वकर्मानुष्ठानमिति । व्यक्तम् ॥ ३ ॥

इति तृतीयं चित्रादिशब्दानां नामधेयत्वाधिकरणम्

अथ तुरीयमग्निहोत्रादिशब्दानां यागनामधेयत्वाधिकरणम्

तत्प्रख्यश्चान्यशास्त्रम् ॥ ४ ॥

पूर्ववैषम्येण पूर्वपक्षोत्थानात्प्रत्युदाहरणसङ्गतिः । 'अग्निहोत्रं जुहोति' इत्यादावग्निहोत्रशब्दः किं गुणविधिपरः, कर्मनाम वेति **सन्देहे** पूर्वत्रोद्भिच्छब्दे मत्वर्थलक्षणादोषाच्चित्रादिशब्दे वाक्यभेदादिदोषादुद्भिच्चित्रादिशब्दानां गुणविधिपरत्वासम्भवेन नामत्वेपीह 'अग्नये होत्रं हविरस्मिन्' इति बहुव्रीहिणा मत्वर्थलक्षणादोषं विनैवोपसर्जनीभूतोऽग्निदेवतारूपो गुणोऽविहितदेवताकेषु दर्वीहोमेषु विधीयते । नामत्वे तु द्रव्यदेवतारूपयागरूपाभावेन यागस्वरूपस्यैवासिद्धेः इति **प्राप्ते,**

सिद्धान्तः एकपदोपात्तधात्वर्थविधिसम्भवे भिन्नपदोपात्तार्थविध्ययोगात् 'दध्ना जुहोति' इत्यादिवाक्यैर्दध्यादिद्रव्यस्य 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति' 'सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति प्रातः' इति विहितमन्त्रलिङ्गप्राप्ताग्निसूर्याख्यदेवतयोश्च सत्त्वेन यागस्वरूपावगतिसम्भवान्मन्त्रप्राप्ताग्निसम्बन्धनिमित्तं यौगिकमग्निहोत्रपदं नामधेयमिति ।

एवं 'आघारमाघारयति' इत्यत्रापि आघारशब्दो गुणविधिपरः, उत कर्मनामधेयमिति **सन्देहे** 'घृ क्षरणदीप्त्योः' इति धातोरुत्पन्नाऽघारशब्दार्थमुपांशुयागसम्बन्धि क्षरद्द्रव्यं घृतं द्वितीयया निर्दिश्य 'आघारयति' इति तस्य संस्कार्यत्वमुच्यत इति **प्राप्ते**

'चतुर्गृहीतं वा एतदभूत्तस्याघारमाघार्य' इत्यनेन क्षरणात्मकत्वं प्राप्तमिति तन्निमित्तं यौगिकं यत्र कर्मणि नैऋर्तीं दिशमारभ्यैशानीं दिशमवधिं कृत्वा सन्तत्या घृतं क्षार्यते तस्य कर्मणो नामधेयमिति **सिद्धान्तितम्**। तथा च **सूत्रम्**॥ **तत्प्रख्यञ्चेत्यादि**॥

तस्य विधित्सितस्याग्निरूपगुणस्य उद्देश्यस्याज्यस्य प्रख्यापकं प्रापकमन्यत् **'अग्निर्ज्योतिः'** इत्यादि **शास्त्रं** अस्तीति नामैवैतदिति। 'अग्निहोत्रेण जुहोति' 'आघारेणाघारयति' इति वाच्ये **द्वितीयया** निर्देशस्तु अनुष्ठानादूर्ध्वं धात्वर्थस्य सिद्धत्वाकारेण करणत्वेऽपि ततः पूर्वं साध्यत्वाकारं वक्तुमिति ज्ञेयम्। **फलन्तु** मासाग्निहोत्रे नाम्ना नैयमिकाग्निहोत्रधर्माणामतिदेशः। आघारपदस्य नामत्वे तु **'इन्द्र ऊर्ध्वम्'** इति मन्त्रस्य तन्मात्रे विनियोगेनेन्द्रस्योपांशुदेवतात्वाभावात् विष्ण्वादीनामुपांशुयाजदेवतानां नेन्द्रेण विकल्प इति॥ ४॥

इति तुरीयमग्निहोत्रादिपदानां यागनामधेयत्वाधिकरणम्

अथ पञ्चमं श्येनादिशब्दानां यागनामधेयताधिकरणम्

तव्द्यपदेशञ्च॥ ५॥

पूर्ववैषम्येणेह शङ्कनात्प्रत्युदाहरण**सङ्गतिः**। 'श्येनेनाभिचरन् यजेत' इत्यादौ श्रुतः श्येनादिशब्दः किं गुणपरः, उत नामधेयं इति **सन्देहः**। पूर्वत्राग्निहोत्रशब्दस्य यौगिकत्वाद्युक्तं कर्मनामत्वम्। श्येनशब्दस्य तु पक्षिविशेषे रूढत्वेन कर्मणि वर्तितुमशक्यत्वात् नामत्वपक्षे द्रव्यदेवतयोरभावेन यागस्वरूपस्यैवानवगतेश्च कस्य नामेदं श्येनपदं स्यात्। रूढस्यापि श्येनशब्दस्य गुणपरत्वे चित्रादि-वाक्य इवानेकगुणविधानाभावेन वाक्यभेददोषस्याभावात् ज्योतिष्टोमे नित्यमुत्पत्तिशिष्टमपि सोमं काम्यत्वाद्बाधित्वा सोमस्य स्थाने पक्षिरूपः काम्यगुणो विधीयत इति **प्राप्ते**

'यथा वै श्येनो निपत्यादत्ते एवमयं द्विषन्तं भ्रातृव्यं निपत्यादत्ते' इति वाक्यशेषोपात्तोपमानो-पमेयभावस्य पक्षिण्येकस्मिन्नयोगादुपमानभूतपक्षिणो गुणस्य निपत्यादानरूपस्योपमेये कर्मणि सत्त्वात् गौण्या वृत्त्या श्येनशब्दस्याभिचारकर्मनामत्वमिति **सिद्धान्तः**। एवं 'सन्दंशेनाभिचरन् यजेत' 'गवाऽभिचर्यमाणो यजेत' इत्यत्रापि **सन्दंशगोशब्दयोर्या**गनामत्वं ध्येयम्। 'यथा सन्दंशेन दुरादान-मादत्ते' 'यथा गावो गोपायन्ति' इति वाक्यशेषाभ्यामुपमानोपमेयभावाभिधानात्। तथा च **सूत्रम्**॥ **तदित्यादि**॥ **तेन** प्रसिद्धेन श्येनादिना यस्य सादृश्यव्यपदेशस्तत्कर्मैव। न द्रव्यम्। अतस्तद्वाचिपदं कर्मनामधेयमिति। **फलन्तु** उत्पत्तिशिष्टसोमाबाधनं व्यक्तम्॥ ५॥

इति पञ्चमं श्येनादिशब्दानां यागनामधेयताधिकरणम्

अथ षष्ठं वाजपेयादिशब्दानां यागनामधेयताधिकरणम् (सूत्राणि ६-८)

नामधेये गुणश्रुतेः स्याद्विधानमिति चेत् ॥ ६ ॥

(तुल्यत्वात्क्रिययोर्न ॥ ७ ॥ ऐकशब्द्ये परार्थवत् ॥ ८ ॥)

प्रागधिकरणचतुष्टयोक्तनामत्वाक्षेपेणेह शङ्कनादाक्षेपिकी **सङ्गतिः** । 'वाजपेयेन स्वाराज्यकामो यजेत' इत्यत्र श्रुतो वाजपेयशब्दो गुणविधिपरोऽथ नामधेयमिति **सन्देहः** ।

पूर्वपक्षस्तु 'यजेत' इत्यत्र प्रत्ययोक्तभावनायां प्रकृतिप्रत्ययसमभिव्याहारादन्वीयमानो धात्वर्थो यागः कर्मत्वेन करणत्वेन वा यद्यन्वीयेत तदा वाजपेयपदोपात्तगुणस्वाराज्यकामपदोपात्तफलयोरन्यतरान्वय एव स्यात्, नोभाभ्याम् । न चैवम् । कर्मत्वादिविशेषान्वयवाचिपदाभावात् । किं तु कर्मत्व करणत्वसाधारणसम्बन्धमात्रेणान्वेति । तत्र कर्मत्वांशमादाय गुणस्य करणत्वांशेन फलस्य 'पेयरूपवाजेन यागं, यागेन स्वाराज्यं' इति च युगपदन्वयसम्भवेन मत्वर्थलक्षणादिकं विनैव तन्त्रेण फलकरणाभ्यां यागः सम्बद्धुमर्हतीति (पेयरूपमन्नं वाजं सुराद्रव्यमिति यावत्) सुराग्रहाणां तत्रानुष्ठेयत्वात् तद्रूपगुणपरोऽयं वाजपेयशब्दः । 'उद्भिदा यजेत' इत्यादिपूर्वोदाहरणेष्वप्येवं वक्तुं शक्यत्वान्न क्वापि नामेधेयत्वमिति ।

सिद्धान्तस्तु कर्मत्वकरणत्वौदासीन्येन सम्बन्धमात्रावगतौ गुणफलयोरन्यतरेणाप्यनन्वयः । कर्मत्वकरणत्वयोरन्यतरविशेषबोधने गुणफलयोरन्यतरेणान्वयो न द्वाभ्यामपि । यागकर्मिका यागकरणिका च भावनेति युगपदुभयान्वयबोधपक्षे गुणफलोभयसम्बन्धसम्भवेऽपि तथा बोध एवायुक्तः । विरुद्धत्रिकद्वयापत्तेः । कर्मत्वसमानाश्रया उद्देश्यत्वानुवाद्यत्वप्रधानत्वरूपास्त्रयो धर्माः । करणत्वसमानाधिकरणा उपादेयत्वविधेयत्वगुणत्वरूपास्त्रयो धर्माः । ते युगपदापद्येरन् । अतः पेयरूपवाजभूतसुराद्रव्यसम्बन्धनिमित्तेन वाजपेयशब्दो नामधेयम् । एवमुद्भिदादयः प्राचीनाः सर्वेऽपि शब्दा इति । **फलन्तु** गुणविधित्वे औषधद्रव्यकादैष्टिकविध्यन्तातिदेशः । नामत्वे त्वनवगतदेवतात्वेनाव्यक्तचोदनात्वात् **'अव्यक्तासु तु सोमस्य' (८-१-१६) इति सौमिकविध्यन्तातिदेशः ।**

सूत्रार्थस्तु, वाजपेये नामधेयत्वाभिमते वाजपेयशब्दे **गुणश्रुतेः** गुणश्रवणात् **गुणविधानं स्यात्** इति ॥ ६ ॥

इति षष्ठं वाजपेयादिशब्दानां यागनामधेयताधिकरणम्

अथ सप्तममाग्नेयादिशब्दानामनामताधिकरणम्

तद्गुणास्तु विधीयेरन्नविभागाद्विधानार्थे न चेदन्येन शिष्टाः ॥ ९ ॥

अथ पूर्वोक्तनामत्वापवादादापवादिकी **सङ्गतिः** । दर्शपूर्णमासयोः श्रूयते 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां च पौर्णमास्याञ्चाच्युतो भवति' इति । तत्राऽग्नेयशब्दः किं कर्मनामोत गुणपरः इति **सन्देहे** आग्नेयाष्टाकपालपदाभ्यामुक्ताग्निपुरोडाशलक्षणदेवताद्रव्यरूपानेकगुणविधाने वाक्यभेदप्रसङ्गादग्निहोत्रशब्दवत् 'अग्निर्मूर्धा' इत्यदियाज्यानुवाक्यामन्त्रप्राप्ताग्निसम्बन्धं निमित्तीकृत्याग्नेयशब्दोऽष्टाकपालद्रव्यकयागनामेति **प्राप्ते,**

अग्निहोत्रे 'अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति सायं जुहोति' इति प्रत्यक्षवचनमिवेह मन्त्रविधायकवचनाभावेन तत्प्रख्यन्यायासम्भवादाकाङ्क्षादिवशेन मन्त्रसम्बन्धकल्पकस्य प्रत्यक्षयागस्याश्रवणात् द्रव्यदेवताविशिष्टापूर्वकर्मविधौ वाक्यभेददोषाभावात् 'अग्निर्देवता अस्य' इत्यर्थे 'अग्नेर्ढक्' इति तद्धितप्रत्ययोक्त्या अग्निरूपदेवतालक्षणगुणपरोऽयमाग्नेयशब्दः इति **सिद्धान्तः** ।

तथा च **सूत्रम्** ॥ **तद्गुणा इत्यादि** ॥ स च यागश्च गुणौ द्रव्यदेवतारूपगुणौ च **तद्गुणाः** । **ते** सर्वेप्याग्नेयवाक्ये **विधीयेरन्** । **विधानार्थे** लिङ्प्रत्यये अस्यैव विधिः अस्य तु न, इति विभागाभावात्, यदि **अन्येन** वाक्येन **शिष्टा** विहिताः **न चेत्** इति ॥ ९ ॥ **फलन्तु गुणत्वे** पुरोडाशधर्मप्राप्तिः । **नामत्वे तु** सान्नाय्यधर्माणामेवेत्याहुः ।

इति सप्तममाग्नेयादिशब्दानामनामताधिकरणम्

अथ अष्टमं बर्हिरादिशब्दानां जातिवाचिताधिकरणम्

बर्हिराज्ययोरसंस्कारे शब्दलाभादतच्छब्दः ॥ १० ॥

अत्र कर्मनामप्रसङ्गात् द्रव्यनामसु प्रवृत्तिनिमित्तचिन्तनात्प्रासङ्गिकी वा, पूर्वत्राष्टाकपालशब्दवत् बर्हिराज्यादिशब्दा अपि संस्कृतवाचिन इति चिन्तनाद्वा **सङ्गतिः** । 'बर्हिर्लुनाति' 'आज्यं विलापयति' 'पुरोडाशं प्रथयति' इति दर्शपूर्णमासयोः श्रुतवाक्यस्थबर्हिराज्यादिशब्दा जातिनिमित्ताः संस्कारनिमित्ता वेति **सन्देहे** शास्त्रस्थैर्याज्ञिकैः संस्कृतेष्वेवैषां प्रयोगात् पील्वादिशब्देषु शास्त्रीयरूढिप्राबल्यस्योक्तत्वात् यूपाहवनीयादिशब्दवत्संस्कारानिमित्तका बर्हिराज्यादिशब्दा इति **प्राप्ते** जातेरव्यभिचारेण संस्कारस्य व्यभिचारात् जातिनिमित्तका एवैते इति **सिद्धान्तः** । यत्र यत्र बर्हिरादिशब्दप्रयोगस्तत्र तत्र जातिरिति

नियमस्य नास्ति व्यभिचारः। संस्कारस्य त्वस्ति व्यभिचारः। क्वचिद्देशविशेषे लौकिकव्यवहारे जातिमात्रमुपजीव्य विनापि संस्कारं ते शब्दाः प्रयुज्यन्ते 'बर्हिरादाय गावो गताः' 'क्रय्यमाज्यम्' इत्यादि। अतो जातिनिमित्तका इति। तथा च **सूत्रम्** ॥ **बर्हिरित्यादि** ॥ **बर्हिराज्यपदयोः असंस्कारे** संस्कारहीनेऽपि **शब्दलाभात्** प्रयोगलाभात् **अतच्छब्दः** तच्छब्दवाच्यो न भवति संस्कार इति। **फलन्तु** 'बर्हिषा यूपावटमास्तृणाति' 'आज्येन यूपमनक्ति' इत्यादावसंस्कृतग्रहणम्।

इति अष्टमं बर्हिरादिशब्दानां जातिवाचिताधिकरणम्

अथ नवमं प्रोक्षण्यादिशब्दानां यौगिकताधिकरणम्

(प्रोक्षणीशब्दस्य यौगिकत्वसमर्थनम्)

प्रोक्षणीष्वर्थसंयोगात् ॥ ११ ॥

अत्र पूर्वसिद्धान्तन्यायेन शङ्कनादापवादिकी **सङ्गतिः**। दर्शपूर्णमासयोः 'प्रोक्षणीरासादयति' इति श्रुतवाक्यस्थप्रोक्षणीशब्दः किं संस्कारनिमित्तकोऽथ जातिनिमित्तको यौगिको वेति **सन्देहः**। अभिमन्त्रणासादनादिसंस्कृतास्वेवाप्सु शास्त्रस्थसर्वलोकप्रयोगात् संस्कारनिमित्तक **इत्येकः पूर्वपक्षः**। लोके 'जलक्रीडायां प्रोक्षणीभिरुद्वेजिताः स्मः' इति क्वचिद्देशविशेषे असंस्कृतास्वप्सु प्रयोगेण जातौ रूढत्वात् संस्कारस्य व्यभिचारात् लोके वेदे च जातेरव्यभिचाराच्च रूढ्या अप्त्वादिजातिनिमित्तक **इत्यन्यः**।

सिद्धान्तस्तु वृद्धव्यवहारे प्रोक्षणीशब्दस्य उदकजातौ पूर्वमक्लृप्तत्वेनेतः परं शक्तेः कल्पनीयत्वात् अश्वकर्णादिशब्दवन्न रूढिः। योगस्तु व्याकरणे क्लृप्तः। प्रपूर्वात् 'उक्षसेचने' इति धातोः करणे ल्युट्प्रत्यये व्युत्पादनात्। अक्लृप्तरूढितः क्लृप्तयोगस्य बलवत्त्वात्प्रकृष्टोक्षणसाधनत्वार्थको यौगिकोऽयं शब्द इति। तथा च **सूत्रं** ॥ **प्रोक्षणीष्वित्यादि** ॥ **प्रोक्षणीषु** अवयवार्थसंयोगान्न जातौ समुदायशक्तिरूपा रूढिरिति ॥ ११ ॥

फलन्तु यत्र विकृतिविशेषे 'सोमारौद्रं चरावाज्यं प्रोक्षणम्' इति घृतस्य श्रुतप्रोक्षणसाधनत्वसिद्धिः। ततश्च तत्र चोदकप्राप्ते 'प्रोक्षणीरासादय' इति वाक्ये 'आज्यमासादय' इत्यूहो **जातिवाचित्वपक्षे**। **संस्कारवाचित्वपक्षे** तु स्त्रीलिङ्गबहुवचनान्तस्यैव संस्कारवाचित्वात् आज्येऽपि अविकारेण 'प्रोक्षणीरासादय' इत्येव प्रयोगो नोहः। **यौगिकत्वपक्षे** तु विशेष्यनिघ्नत्वात् 'प्रोक्षणमासादय' इत्यूह इति।

इति नवमं प्रोक्षण्यादिशब्दानां यौगिकताधिकरणम्

अथ दशमं निर्मन्थ्यशब्दस्य यौगिकताधिकरणम्

तथा निर्मन्थ्ये ॥ १२ ॥

अत्राधिकाशङ्कां कृत्वा पूर्वोक्तयौगिकत्वातिदेशादातिदेशिकी **सङ्गतिः** । अग्निचयनप्रकरणे श्रुते 'निर्मन्थ्येनेष्टकाः पचन्ति' इति वाक्ये निर्मन्थ्यशब्दो यौगिको न वेति **सन्देहः** । युक्तं प्रोक्षणीशब्दस्य यौगिकत्वम् । प्रकृष्टोक्षणसाधनत्वस्याप्सु सदा सत्त्वात् । निर्मन्थ्यशब्दस्य तु 'ऋहलोर्ण्यत्' इति कर्मणि विहितण्यत्प्रत्ययान्तत्वेन मथनकर्मत्वनिमित्तकत्वात् मथनकर्मत्वरूपनिमित्तस्य च निष्पन्नेऽग्नावभावेन 'निर्मन्थ्येन पक्ष्यामः' इत्यादौ मथनकर्मत्वरूपयोगस्य व्यभिचारान्न यौगिकत्वमस्य शब्दस्य । किन्तु वह्नित्वजातिनिमित्तकत्वमिति **प्राप्ते,**

भूतपूर्वमपि योगं निमित्तीकृत्य तत्सन्तानाभिप्रायेण 'निर्मन्थ्येन पक्ष्यामः' इत्यादिप्रयोगोपपत्तेर्यौगिकोऽयं शब्द इति **सिद्धान्तः** । तथा च **सूत्रम्** ॥ **तथेत्यादि** ॥ तथा प्रोक्षणीशब्द इव **निर्मन्थ्य**शब्देऽपि योग एवेति ॥ १२ ॥

फलन्तु, जात्यर्थकत्वे येन केनचिद्वा वह्निजातीयेनेष्टकानां पाकः । **यौगिकत्वे** तु तद्देशे तत्काले तत्कर्त्रा लौकिकनिर्मथनेन जाताग्निना पाक इति । **अन्ये** तु 'आधानकाले निर्मथ्य गार्हपत्ये धृतोऽग्निश्चिरनिर्मथितः । तं वारयितुमचिरत्वाख्यगुणविधानेनाचिरनिर्मथिताग्निग्रहणायायं योगः । तस्य तदानीं नष्टत्वेऽपि तज्जातीयाभिप्रायेण भूतपूर्वयोगेन निर्मन्थ्यशब्दो यौगिकः' इत्याहुः ।

इति दशमं निर्मन्थ्यशब्दस्य यौगिकताधिकरणम्

अथैकादशं वैश्वदेवादिशब्दानां यागनामधेयताधिकरणम् (सूत्राणि १३-१६)

वैश्वदेवे विकल्प इति चेत् ॥ १३ ॥

(न वा प्रकरणात्प्रत्यक्षविधानाच्च, न हि प्रकरणं द्रव्यस्य ॥ १४ ॥ मिथश्चानर्थसम्बन्धः ॥ १५ ॥ परार्थत्वाद्गुणानाम् ॥ १६ ॥)

पूर्वसिद्धान्तन्यायेनेह शङ्कनात्सङ्गतिः । चातुर्मास्याख्ये कर्मणि वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयशब्दितपर्वनामककर्मसमुदायचतुष्टयमाम्नातम् । तत्र प्रथमे पर्वणि अष्टौ यागा विहिताः 'आग्नेयमष्टाकपालं निर्वपति, सौम्यं चरुं, सावित्रं द्वादशकपालं, सारस्वतं चरुं, पौष्णं चरुं, मारुतं

सप्तकपालं, वैश्वदेवीमामिक्षां, द्यावापृथिव्यमेककपालं' इति । तेषां यागानां सन्निधौ **'वैश्वदेवेन यजेत'** इति श्रुतम् ।

तत्र वैश्वदेवशब्दो गुणविधिः, उत नामधेयमिति **सन्देहः** । पूर्वत्र 'निर्मन्थ्येनेष्टकाः पचन्ति' इत्यत्र यथा पाकविधिनैव विशेष्यस्याग्नेः प्राप्त्योपसर्जनभूताचिरमथनरूपगुणविधिस्तथेहाप्युक्तयागान् 'यजेत' इत्यनूद्योपसर्जनीभूतविश्वदेवाख्यदेवतारूपो गुणो विधीयते । सप्तमे यागे विश्वदेवानां प्राप्तत्वेऽपि तदन्यसप्तयागेषु गुणविधिरस्तु । इतः पूर्वमुत्पत्तिशिष्टगुणप्राबल्यस्यानुक्तेस्तुल्यबलत्वेनाग्न्यादिभिर्विश्वदेवदेवता विकल्प्यन्ते । तथा च **सूत्रम्** ॥ **वैश्वदेवे विकल्प इति चेत्** ॥ इति । एवं **प्राप्ते,**

सिद्धान्तः उत्पत्तिवाक्ये विहितानष्टौ यागान् यजिनाऽनूद्याष्टानां सङ्घे वैश्वदेवनामसम्बन्धः क्रियते । स च सम्बन्धो द्वेधा । आमिक्षायागे विश्वेषां देवानामिज्यमानतया तत्सहचरितानां सर्वेषां छत्रिन्यायेनौपचारिको वा, 'यद्विश्वे देवाः समयजन्त तद्वैश्वदेवस्य वैश्वदेवत्वम्' इति ब्राह्मणवाक्योक्त्या विश्वदेव कर्तृकत्वाद्वेति । न च सङ्घे नामसम्बन्धो व्यर्थः । 'प्राचीनप्रवणे वैश्वदेवेन यजेत' इत्यत्र एकेन वैश्वदेव नाम्ना अष्टानां समुदायस्य प्राचीनप्रवणसम्बन्धसिध्द्यर्थत्वात् । द्वितीये गुणाधिकरणे उत्पत्तिशिष्टप्राबल्यस्य वक्ष्यमाणत्वेन विकल्पायोगाच्चेति । **फलन्तु** विश्वैर्देवैरग्न्यादेरविकल्प इति व्यक्तम् ।

इत्येकादशं वैश्वदेवादिशब्दानां यागनामधेयताधिकरणम् (सूत्राणि १३-१६)

अथ द्वादशं वैश्वानरे अष्टाकपालादिशब्दानामर्थवादताधिकरणम् (सूत्राणि १७-२२)

पूर्ववन्तोऽविधानार्थास्तत्सामर्थ्यं समाम्नाये ॥ १७ ॥

(गुणस्य तु विधानार्थे तद्गुणाः प्रयोगे स्युरनर्थका न हि तं प्रत्यर्थवत्ताऽस्ति ॥ १८ ॥ तच्छेषो नोपपद्यते ॥ १९ ॥ अविभागाद्विधानार्थे स्तुत्यर्थे नोपपद्येरन् ॥ २० ॥ कारणं स्यादिति चेत् ॥ २१ ॥ आनर्थक्यादकारणं, कर्तुर्हि कारणानि, गुणार्थो विधीयते ॥ २२ ॥)

पूर्ववन्नामत्वमष्टाकपालादिशब्दानामाशङ्क्य निरस्यत इत्यापवादिकी **सङ्गतिः** । काम्येष्टिकाण्डे श्रुतम् 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते, यदष्टाकपालो भवति गायत्र्यैवेनं ब्रह्मवर्चसेन पुनाति, यन्नवकपालस्त्रिवृतैवास्मिंस्तेजो दधाति, यद्दशकपालो विराजैवास्मिन्नन्नाद्यं दधाति, यदेकादशकपालस्त्रिष्टुभैवास्मिन्निन्द्रियं दधाति, यद्द्वादशकपालो जगत्यैवास्मिन् पशून् दधाति, यस्मिन् जात

एतामिष्टिं निर्वपति, पूत एव स तेजस्व्यन्नाद इन्द्रियावी पशुमान् भवति' इति। तत्राष्टाकपालादिशब्दाः किं कर्मनामानि, उत गुणविधयः, अर्थवादो वेति **सन्देहे**

पूर्वत्रेवाष्टाकपालादिशब्दाः कर्मनामानि, वैश्वानरवाक्ये श्रुतद्वादशसङ्ख्यास्वष्टत्वादिसङ्ख्यानामन्तर्भावेण तत्र प्राप्तसङ्ख्यासम्बन्धेन तत्प्रख्यन्यायादग्निहोत्रशब्दवत्, इत्युत्सूत्रस्तावत्प्रथमः **पूर्वः पक्षः**। द्वादशकपालादिशब्दानां 'द्वादशसु कपालेषु संस्कृतः' इत्यादिव्युत्पत्त्या पुरोडाशद्रव्यपरतया सङ्ख्यापरत्वाभावेन यत्प्रख्यन्यायाभावात् यजिसामानाधिकरण्याभावाच्च नामधेयानीति पक्षो न युक्तः। किन्तु अष्टाकपालनवकपालादिपुरोडाशरूपगुणविध्यर्था एते अष्टाकपालादिशब्दा इत्यन्यः **पूर्वपक्षः**। तथा च **सूत्रं ॥ पूर्ववन्त इत्यादि ॥ ये पूर्ववन्तः** पूर्वप्राप्तिमन्तो वैश्वदेवादिशब्दास्ते **अविधानार्थाः** न गुणविध्यर्थाः अस्मिंस्त्वष्टाकपालादि**समाम्नाये तत्सामर्थ्यं** गुणविधिसामर्थ्यं स्यादिति।

सिद्धान्तस्तु, अनेकगुणविधने वाक्यभेदापत्त्या 'वैश्वानरं द्वादशकपालं निर्वपेत्' इति विहितस्य 'यस्मिन् जात एतामिष्टिं निर्वपति' इत्युपसंहारेण प्रतीतैकवाक्यताया भङ्गप्रसङ्गात् अंशैरष्टाकपालादिभिरंशिनो द्वादशकपालस्य स्तावकत्वेनायं सर्वोऽप्यर्थवादः। तथा चैकवाक्यताप्युपपद्यत इति। **फलन्तु** अनेकपुरोडाशाननुष्ठानं व्यक्तम्।

इति द्वादशं वैश्वानरे अष्टाकपालादिशब्दानामर्थवादत्वाधिकरणम् (सूत्राणि १७-२२)

अथ त्रयोदशं यजमानशब्दस्य प्रस्तरादिस्तुत्यर्थत्वाधिकरणम्

तत्सिद्धिजातिसारूप्यप्रशंसाभूमलिङ्गसमवाया गुणाश्रयाः ॥ २३ ॥

(१) तत्सिद्धिः

अत्र अष्टाकपालादिशब्दवत् कथञ्चिदपि स्तावकत्वायोगात् यजमानशब्दस्य नामत्वं गुणविधित्वं वा आश्रयितव्यमिति शङ्कनात्**सङ्गतिः**। 'यजमानः प्रस्तरः' इत्यत्र यजमानशब्दः किं नाम, उत गुणपरः, अथ अर्थवाद इति **सन्देहे** सामानाधिकरण्याद्यजमानशब्दः प्रस्तरनामेत्येकः **पक्षः**। गोमहिषपदयोरिव यजमानप्रस्तरशब्दयोर्भिन्नार्थकत्वेन प्रसिद्धत्वान्नामधेयपक्षो न युक्तः। किन्तु गुणविधिः। यजमानकार्ये यागादौ प्रस्तरस्याचेतनस्यासामर्थ्यात् प्रथमश्रुतशब्दे कार्यकारित्वलक्षकत्वायोगाच्च, प्रस्तरकार्ये स्रुग्धारणादौ यजमानस्य शक्तत्वाच्चरमश्रुते कार्यकारित्वलक्षणायामदोषाच्च प्रस्तरकार्ये यजमानरूपो गुणो विधीयत इति **प्राप्ते,**

'प्रस्तरं प्रहरति' इत्युक्तस्याग्नौ प्रहरणस्यापि प्रस्तरकार्यत्वात् यजमानस्याप्यग्नौ प्रहरणे सति कर्मशेषपरिलोपप्रसङ्गान्न गुणविधिपक्षो युक्तः । किन्तु यज्ञसाधनत्वरूपयजमानगुणयोगेन विधेयः प्रस्तरो यजमानपदेन स्तूयत इत्यर्थवाद इति **सिद्धान्तः** ।

तथा चाह **सूत्रकारः** ॥ **तत्सिद्धिरिति** ॥ **गुणाश्रय**पदं प्रत्येकमन्वेति । **तस्य यजमानकार्यस्य** यागादेः **सिद्धिः** निष्पादकत्वं, **गुणाश्रयः** गुणस्य गौणशब्दस्य प्रस्तरादावन्यत्र **वृत्तौ आश्रयो** निमित्तमिति ॥ **फलन्तु** प्रस्तर एव स्रुगादिसाधनं, न यजमान इति ॥

इति त्रयोदशं यजमानशब्दस्य प्रस्तरादिस्तुत्यर्थताधिकरणम्

अथ चतुर्दशं आग्नेयादिशब्दानां ब्राह्मणादिस्तुत्यर्थताधिकरणम्

(२) जातिः

परत्र परशब्दवृत्तौ निमित्तान्तरोक्त्या अर्थवादत्वस्यैव स्थापनात् **सङ्गतिः** । 'आग्नेयो वै ब्राह्मणः' इति **भाष्योक्त**वाक्यमनादृत्य 'अग्निर्वै ब्राह्मणः' इति वाक्यमुदाजहार **वार्तिककारः** । **तत्र पूर्वत्रेव सन्देहे** सामानाधिकरण्यप्राप्तनामत्वस्य भिन्नार्थकत्वेनायोगादग्निकार्ये होमे ब्राह्मणरूपगुणविधिः । ब्राह्मणकार्यार्त्विज्यादावग्नेरयोग्यत्वेऽपि 'ब्राह्मणस्य दक्षिणे हस्ते होतव्यम्' इति श्रुत्या ब्राह्मणस्याग्निकार्यकरत्वसम्भवात् इति **प्राप्ते**,

अग्नेर्ब्राह्मणस्य च प्रजापतिमुखजातत्वेन प्रजापतिमुखजन्यत्वस्याग्निगुणस्य ब्राह्मणे सम्भवेनाग्निशब्देन ब्राह्मणः स्तूयत इत्यर्थवादोऽयमपीति **सिद्धान्तः** ।

तथा चाह **सूत्रकारः** ॥ **जातिरिति** ॥ **गुणाश्रय** इत्यन्वेति । **जातिः** जननं **गुणस्य** अग्निरूपगौणशब्दस्य परत्र ब्राह्मणे वृत्तौ **आश्रयो** निमित्तमिति । **फलन्तु** ब्राह्मणस्याग्निकार्ये होमादावाधारत्वादिरूपेणाप्राप्तिः ।

इति चतुर्दशं आग्नेयादिशब्दानां ब्राह्मणादिस्तुत्यर्थताधिकरणम्

अथ पञ्चदशं आदित्यादिशब्दानां यूपस्तुत्यर्थताधिकरणम्

(३) सारूप्यम्

पूर्वत्र मुखजन्यत्वाग्निगुणयोगाद्ब्राह्मणेऽग्निशब्दस्य गौण्या वृत्त्या ब्राह्मणस्तावकत्वसम्भवेऽपीह

तादृशगुणाभावान्नामत्वादिकमेव युक्तमिति शङ्कनात्सङ्गतिः । 'आदित्यो यूपः' इत्यादौ नामधेय-गुणविध्यर्थवादत्व**सन्देहे** सामानाधिकरण्यादादित्यशब्दो यूपनामेति प्राप्तपक्षस्य गवाश्वशब्दयोरिव भिन्नार्थत्वप्रसिद्ध्या अयोगेनायुक्तत्वं मत्वा, यूपकार्ये पशुनियोजनादौ आदित्यस्यायोग्यत्वेऽपि कर्माङ्गाऽदित्योपस्थानादौ कार्ये यूपाख्यगुणविधिरिति मन्वानं प्रति **सिद्धान्त्यते** आदित्यगुणस्याति-तेजस्वित्वस्य घृताक्ते यूपे सत्त्वेनैतद्द्वारा आदित्यशब्दो गौण्या वृत्त्या यूपं स्तौतीत्यर्थवाद एवायमिति ।

तथा चाह **सूत्रकारः ॥ सारूप्यमिति ॥ गुणाश्रय** इत्यन्वेतीत्यवोचाम । **गुणस्य** गौणादित्यपदस्य यूपे वृत्तौ **सारूप्यमाश्रयो** निमित्तमिति । सर्वत्र तत्सिद्ध्याद्युदाहरणेषु परत्र परशब्दप्रवृत्तौ सारूप्यस्य निमित्तत्वोक्तावपीह चाक्षुषं सारूप्यमिति विशेषः । फलं तु अन्यकार्ये अन्यस्य गुणत्वेनाप्राप्तिः ।

इति पञ्चदशं आदित्यादिशब्दानां यूपस्तुत्यर्थताधिकरणम्

अथ षोडशमपश्वादिशब्दानां गवादिप्रशंसार्थत्वाधिकरणम्

(४) प्रशंसा

उक्तनिमित्तत्रयेऽन्यतमस्याप्यभावान्न गौणत्वमिति शङ्कनात्सङ्गतिः । 'अपशवो वा अन्ये, गोऽश्वेभ्यः पशवः' इति श्रुते वाक्ये 'अन्ये अजादयः पशवः अपशवः' इत्यत्र अपशुशब्दोऽजादीनां पशुत्वेन प्रमितानां नामधेयमिति पक्षस्य बाधेनानाशङ्क्यत्वात् गुणविधिरर्थवादो वेत्येव **सन्देहः** । गवाश्वान्यपदोपात्तानामजादीनां 'अपशवः' इति पदेन पशुकार्यनिषेधरूपो गुणो विधीयते इति **पूर्वपक्षे,**

सिद्धान्तः पशुकार्यनिषेधे अजादिपशुविधिवैयर्थ्यप्रसङ्गत् गवाश्वस्तावकत्वेनार्थवाद एवायमपि । अपशुशब्दस्य गवाश्वान्याजादिपशुषु वृत्तौ गवाश्वेषु प्रशस्ततैव निमित्तमिति । तथा चोक्तं **सूत्रकृता ॥ प्रशंसेति ॥** गवाश्वादिगता **प्रशंसा** अजादिपशुषु गौणापशुशब्दस्य वृत्तौ निमित्तमिति तस्यार्थः । पूर्वत्र सर्वत्र प्रशंसाया अर्थवादफलत्वम्, इह तु परत्र परशब्दवृत्तौ निमित्तत्वमिति विशेषः । फलन्तु तत्र तत्र विहिताजादीनां पशुकार्यसिद्धिरिति व्यक्तम् ।

इति षोडशमपश्वादिशब्दानां गवद्प्रिशंसार्थत्वाधिकरणम्

अथ सप्तदशं भूमाधिकरणम्

(५) भूमा

पूर्वत्र विध्यश्रवणादर्थवादत्वेऽपि अत्र विधिश्रवणात् गुणविधिरिति शङ्कनात् **सङ्गतिः** । अग्निचयन

प्रकरणे 'सृष्टीरूपदधाति' इति श्रुतम्। सर्जनार्थकासृज्यतेत्यादिशब्दोपेता मन्त्रा यासामिष्टकानामुपधाने विद्यन्ते, ता इष्टकाः सृष्टय इत्युच्यन्ते। उपधानं स्थलविशेषेषु स्थापनम्। सृष्टिमतीरिति वक्तव्ये सृष्टीरित्युक्तिः 'तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः (४-४-१२५ पा.सू) इति चतुर्थान्त्यपादस्थव्याकरणसूत्रेण प्रथमासमर्थान्मतुबन्तात् प्रातिपदिकात् षष्ठ्यर्थे प्रथमासमर्थ उपधान-साधनमन्त्रश्चेत् आसामित्युक्तषष्ठ्यर्थ इष्टकाश्चेन्मतुपो लुग्भवतीति व्युत्पादनादिति ज्ञेयम्। तत्र यद्यपि यत्प्रत्ययप्रकरणात् तत्परत्व एव मतुपो लुगुक्तः तथापीहाभेदोपचारात्सृजधातुनिष्पन्नशब्दोपेत-मन्त्रोपधेयेष्टकाः सृष्टीरित्यादिशब्देन ग्राह्याः। तथैव **मञ्जर्याद्युक्तेः**। तत्र सृष्टिशब्दः किं गुणविधि-परोऽथार्थवाद इति **सन्देहे** 'लेहितोष्णीषा ऋत्विजः प्रचरन्ति' इत्यादाविव सृष्टिपदार्थविशेषणीभूत-सृष्टिबोधकपदोपेताः 'एकयाऽस्तुवत' 'प्रजा अधीयन्ते' इत्यनुवाकस्थाः 'ब्रह्मासृज्यत, भूतान्य-सृज्यन्त' इत्यादिमन्त्रा उपधानार्थे विधीयन्ते इति **प्राप्ते,**

चयनप्रकरणे तेषां मन्त्राणां पाठेन सामान्यतश्चयनसम्बन्धस्य 'असृज्यत' इत्यादिसृजिधातुप्रयोग-रूपलिङ्गबलेन विशेषसम्बन्धस्य च प्राप्तत्वेन मन्त्राणामविधेयत्वात् 'सृष्टीरेवोपदध्यान्नान्याः' इति मन्त्रान्तरपरिसङ्ख्यापक्षे प्रकरणपठितानां सृजतिपदापेतमन्त्राणामानर्थक्यापत्तेरुपधानमेवात्र विधीयते।

सृष्टीरिति तु 'असृज्यत' इत्यादिमन्त्रलिङ्गप्राप्तमन्त्रानुवादमात्रं 'यथासृष्टिमेवावरुन्धे' इत्युपरि पठितार्थवादोपपत्त्यर्थम्। इह विधिवाक्ये सृष्टिपदेन मन्त्राणामननुवादेऽर्थवादे सृष्टिपदप्रयोगाद्विध्यर्थ-वादयोरेकवाक्यता न स्यात्। अतो मन्त्रानुवादी सृष्टिशब्दो न गुणविधिः। किन्त्वर्थवादः। 'एक-याऽस्तुवत, प्रजा अधीयन्त' इति प्रथममन्त्रे सृष्ट्यर्थकपदाभावेऽपि द्वितीयादिषु बहुषु तत्सत्त्वेन तद्भूय-स्त्वेनासृष्टिमन्त्रस्यपि सृष्टिपदेनेह ग्रहणात् सृष्ट्यसृष्टिमन्त्रसमुदाये अयं सृष्टिशब्द इति **सिद्धान्तः**।

तदुक्तं **भूमा गुणाश्रयः** इति। तदर्थः, सृष्टिमन्त्रसमुदाये सृष्टिभूमा वर्तते। स गुणस्य गौण-सृष्टिपदस्य सृष्ट्यसृष्टिमन्त्रसमुदायेऽस्तीति अनेन सादृश्येन समुदायवृत्तौ निमित्तमिति। **फलन्तु** सृष्टिपदेनासृष्टीनामपि ग्रहणसिद्धिः।

इति सप्तदशं भूमाधिकरणम्

अथ अष्टादशं प्राणभृदादिशब्दानां स्तुत्यर्थत्वाधिकरणम्

(६) लिङ्गसमवायः

सृष्टिशब्दभूमेवेह प्राणपदबाहुल्याभावान्न गौणत्वमिति शङ्कनात्सङ्गतिः। 'प्राणभृत उपदधाति'

इत्यत्र प्राणभृच्छब्देन 'प्राणशब्दं बिभर्ति' इति व्युत्पत्त्या 'अयं पुरोभुवः' इत्यनुवाकस्थाः 'तस्य प्राणो भौवायनः, वसन्तः प्राणायनः, प्राणं गृह्णाति' इत्यादिमन्त्रा उच्यन्ते। तत्र किं प्राणभृच्छब्दो गुणविधिपरोऽथार्थवादः इति **सन्देहे** पूर्वत्रेवोपधाने मन्त्ररूपगुणविधिरिति **प्राप्ते** लिङ्गप्रकरणाभ्यां चयनाङ्गत्वेन प्राप्तत्वेन मन्त्राणामविधेयत्वात् उपधानमात्रस्य विधानात् प्राणभृत इत्यनुवादः 'एतस्यैव प्राणान् दधाति' इति वक्ष्यमाणार्थवादोपपत्त्यर्थमिति प्राणभृदप्राणभृन्मन्त्रसमुदाये प्राणभृच्छब्दोऽयं गौण इति **सिद्धान्तः**।

तथा चोक्तम् **लिङ्गसमवायो गुणाश्रय** इति। प्राणभृच्छब्देषु विद्यमानः 'प्राणः प्राणं' इत्यादिः श्रुतलिङ्ग**समवायो गुणस्य** गौणप्राणभृच्छब्दस्य प्राणभृदप्राणभृन्मन्त्रसमुदाये प्रवृत्तौ निमित्तम्। पूर्वत्रेव च सादृश्यं ज्ञेयम्। **फलमपि** पूर्वत्रेवोपधाने अप्राणभृतामप्युपादानसिद्धिः।

इत्यष्टादशं प्राणभृदादिशब्दानां स्तुत्यर्थताधिकरणम्

अथैकोनविंशं वाक्यशेषेण सन्दिग्धार्थनिर्णयाधिकरणम्

सन्दिग्धेषु वाक्यशेषात् ॥ २९ ॥

पूर्वत्र प्राणभृदप्राणभृत्समुदाये प्राणभृच्छब्दस्येवेह घृतशब्दस्यापि घृताघृतसङ्घे वृत्तिरस्त्विति शङ्कनात्**सङ्गतिः**। 'अक्ताः शर्करा उपदधाति' 'तेजो वै घृतम्' इति श्रूयते। मृत्तिकामिश्राः क्षुद्रपाषाणाः **शर्कराः**। ताः किं घृततैलवसानामन्यतमेनाञ्जनीया उत वाक्यशेषाद्घृतेनैवेति **सन्देहे** अञ्जनसाधनसामान्यबोधकस्य विधिवाक्यस्य घृतविशेषबोधकादर्थवादात्प्राबल्यात् (प्राबल्यञ्च विधेः स्वार्थपरतया मुख्यत्वात् प्रथमश्रुतत्वादसञ्जातविरोधित्वात् अनधिगतार्थबोधकत्वाच्चेति हेतुचतुष्टयात्। अर्थवादस्य तु हेतुचतुष्टये अन्यतमस्याप्यभावात् तद्विपरीतहेतुभावाच्च) घृताघृतलक्षकोऽस्त्वर्थवाद इति **प्राप्ते** एवमुक्तदिशा विधिवाक्यस्य प्राबल्येपि तत्र प्रतीतस्य अञ्जनसाधनसामान्यस्यानुष्ठानायोग्यत्वात्तद्योग्यविशेषे सन्देहजनकत्वेन तन्निर्धारणाय चरमस्याप्यर्थवादस्यानुसरणीयत्वेन 'तेजो वै घृतम्' इति तेजस्त्वेन स्तूयमानघृतरूपविशेषेणैवाञ्जनमिति **सिद्धान्तः**।

तथा च **सूत्रम्** ॥ **सन्दिग्धेष्विति** ॥ घृततैलवसादावञ्जनसाधनत्वसन्देहजनकेषु 'अक्ताः' इत्यादिवाक्येषु **वाक्यशेषा**द्विशेषनिर्णय इति। **फलन्तु** घृतेनैवाञ्जनमिति। **छागो वा मन्त्रवर्णात्** (६-८-३१) इति षष्ठान्त्यनयादस्यापौनरुक्त्यं तत्रैव वक्ष्यामः।

इत्येकोनविंशं वाक्यशेषेण सन्दिग्धार्थनिर्णयाधिकरणम्

अथ विंशं सामर्थ्येनाव्यवस्थितानां व्यवस्थाधिकरणम्

अर्थाद्वा कल्पनैकदेशत्वात् ॥ ३० ॥

पूर्ववैषम्येणेह शङ्कनात् प्रत्युदाहरणसङ्गतिः । 'स्रुवेणावद्यति, स्वधितिनाऽवद्यति, हस्तेनावद्यति' इत्यवदानाङ्गत्वेन विहितस्रुवादीनि किमाज्यमांसपुरोडाशाख्यहविष्षु अविशेषेण प्राप्नुवन्ति उत यथा-सामर्थ्यमिति **सन्देहे** पूर्वत्रेव वाक्यशेषरूपव्यवस्थापकाभावादव्यवस्थया प्राप्नुवन्तीति **प्राप्ते** अशक्यार्थ-विधेरसम्भवात् 'विधायकस्य शक्तिः सहकारिणी' इत्यस्य अवश्यमुपेयत्वाच्छक्तिसहायो विधिरेव यथा सामर्थ्यं स्रुवेणाऽज्यं, स्वधितिना मांसं, हस्तेन पुरोडाशमिति विधेयं व्यवस्थापयतीति **सिद्धान्तः ।** तथा च **सूत्रम्, अर्थात्** विधिसामर्थ्यात् **कल्पनापि** स्रुवेणाज्यम् इत्यादिकल्पितवाक्यमपि श्रुत-**शब्दैकदेशत्वात्** सन्दिग्धार्थनिर्णायकतया प्रमाणमिति । **फलन्तु** व्यवस्थैवेति व्यक्तम् ।

इति विंशं सामर्थ्येनाव्यवस्थितानां व्यवस्थाधिकरणम्

इति सर्वतन्त्रस्वतंन्त्रश्रीसुधीन्द्रतीर्थश्रीपादशिष्यश्रीराघवेन्द्रयतिसार्वभौमकृते भाट्टसङ्ग्रहे प्रथमोऽध्यायः

अस्मिन् पादे अधिकरणानि २० सूत्राणि ३०

आदितः '' ४२ '' १५०

अथ भाट्टसङ्ग्रहे द्वितीयाध्यायस्य प्रथमः पादः

अथ प्रथमं प्रतिपदाधिकरणम्

श्रीरस्तु ॥ हरिः ओं ॥ 'मानाधीना मेयसिद्धिः' इति न्यायेन पूर्वाध्याये विध्यर्थवादमन्त्र-नामधेयस्मृत्याचारादेर्धर्मे प्रामाण्योक्त्या धर्मस्वरूपे सिद्धे, तदवान्तरभेदोऽत्राध्याये निरूप्यत इत्यध्याययोः पौर्वापर्यं ध्येयम् ।

तत्राद्यः पादः श्रुतार्थापत्तिसमधिगम्यापूर्वभेदानुसारिकर्मभेदोपयोग्यर्थप्रतिपादकत्वादुपोद्घात-विचारप्रधानः । तत्राद्यमधिकरणमुपोद्घातार्थम् । अन्यानि तु प्रसक्तानुसक्तार्थानि ।

अत्र विधिवाक्यं सर्वमुदाहरणम् । तत्र विधिवाक्ये यावन्ति पदानि तावन्ति प्रत्येकं फलं सम्बध्या-पूर्वं प्रतिपादयन्त्युत एकमेव पदं तथेति **संशयः** । सर्वेषां फलसम्बन्धेनापूर्वप्रतिपादकत्वे सर्वेषां प्रधानसम्बन्धलाभादवैरूप्यसम्भवाच्च सर्वाण्यपि पदान्यपूर्वप्रतिपादकानि । एकस्यैव पदस्य तथात्वेप्य-न्येषां पदानां तेन सामानाधिकरण्येनान्वये मत्वर्थलक्षणादोषप्रसङ्गेन वैयधिकरण्येनान्वये वाच्ये वाक्यभेदो वा वाजपेयनयोक्तदिशा विरुद्धत्रिकद्वयरूपवैरूप्यं वा स्यादिति **प्राप्ते,**

एकेनैवापूर्वेणोपपत्तावनेकादृष्टापूर्वकल्पनाऽयोगात् एकमेव पदं फलेन सम्बध्यापूर्वमुपपादयति । अन्यानि तु तद्विशेषणानि । न चोक्तदोषः । उद्भिच्छ्येनादिशब्दानां नामत्वात् सोमेनेत्यादौ मत्वर्थलक्षणयोपपत्तेरनेकादृष्टकल्पनातो लक्षणाया वरत्वादिति **सिद्धान्तः । फलन्तु** उत्तरचिन्तारम्भः । एवं उत्सूत्रमेकस्मात् पदार्थात् अपूर्वमिति प्रतिपदाधिकरणे स्थिते,

इति प्रथमं प्रतिपदाधिकरणम्

अथ द्वितीयं भावार्थाधिकरणम् (सूत्राणि १-४)

भावार्थाः कर्मशब्दाः, तेभ्यः क्रिया प्रतीयेत, एष ह्यर्थो विधीयते ॥ १ ॥

(सर्वेषां भावोऽर्थ इति चेत् ॥ २ ॥ येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामानि, तस्मात्तेभ्यः पराकांक्षा भूतत्वात्स्वे प्रयोगे ॥ ३ ॥ येषां तूत्पत्तावर्थे स्वे प्रयोगो न विद्यते तान्याख्यातानि, तस्मात्तेभ्यः प्रतीयेताऽऽश्रितत्वात् प्रयोगस्य ॥४॥)

इति भावार्थाधिकरणमारभ्यते । 'सोमेन यजेत' इत्यादौ धात्वर्थापरपर्यायभावार्थादपूर्वं उत उपपदार्थादिति **सन्देहे** द्रव्यादेरुपपदार्थस्य सिद्धत्वेन फलं प्रति साधनत्वसम्भवात् भावार्थस्य तु स्वयं फलवत्साध्यतया साधनत्वायोगात् उपपदार्थात्सोमादिद्रव्यादित एवापूर्वमिति **प्राप्ते,**

सोमादेर्द्रव्यस्य सिद्धत्वेऽपि साक्षात्फलसाधनत्वायोगेन आख्यातोपात्तफलभावनारूपक्रियानिर्वृत्तिद्वारैवेति वाच्यम् तत्र चैकपदोपात्तधात्वर्थस्यैव प्रत्यासन्नत्वात् पदश्रुत्या करणत्वं प्राप्नोति । तस्यासिद्धरूपत्वेऽपि सोमादिना साधितस्य करणत्वसम्भवात् । एवं हि सोमादेर्यागनिष्पत्तिर्दृष्टं फलं लभ्यते । अन्यथा सोमादित एकमपूर्वं, यागेनासिद्धरूपेण सोमनिष्पत्तेरयोगेन ततोप्यपूर्वान्तरमिति गौरवम् । अतो भावार्थादेवापूर्वमिति **सिद्धान्तः** । तथा च **सूत्रम्, भावार्थाः** प्रत्ययवाच्यभावनाप्रयोजनकाः **कर्मशब्दाः** धातवः **तेभ्यः क्रिया** अपूर्वं **प्रतीयेत** । कुतः ? **एष ह्यर्थः** कर्मशब्दार्थो यागादिर्हि प्रत्यासत्त्यादिभिः भावनाकरणतया **विधीयत** इति । **फलन्तु** द्रव्यादीनां फलभावनाकरणत्वाभावेनादृष्टार्थत्वाभावात् प्रतिनिध्युपादानम् ।

इति द्वितीयं भावार्थाधिकरणम् (सूत्राणि १-४)

अथ तृतीयमपूर्वाधिकरणम्

चोदना पुनरारम्भः ॥ ५ ॥

पूर्वोक्ताक्षेपेणाशङ्कायां पूर्वोक्तस्योपोद्घातत्वेनेदमपूर्वाधिकरणमारभ्यत इति आक्षेपिकी वा औपोद्घातिकी वा पूर्वेणास्य **सङ्गतिर्ज्ञेया ।**

'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यादौ अपूर्वमस्त्युत नेति **सन्देहे** तृतीयाश्रुत्या भावार्थभूतयागस्यैव आख्यातोपात्तस्वर्गभावनायां साधनत्वप्रतीतेरपूर्वसत्त्वे मानाभावात्, क्षणिकयागस्य कालान्तरभाविफलहेतुत्वायोगेन श्रुतसाधनत्वान्यथानुपपत्त्या यावत्फलभावियागजन्यापूर्वस्य मध्ये कल्पने श्रुतयागसाधनत्वभङ्गापत्तेर्वचनप्रामाण्याद्यागस्यैव तावत् स्थायित्वं वा नष्टस्यैव वा तद्धेतुत्वं कल्प्यतां इति **प्राप्ते,**

क्षणिकत्वेन प्रमिते स्थायित्वकल्पनस्य बाधात् नष्टस्य च पूर्वक्षणवृत्तित्वरूपहेतुत्वशङ्काया व्याहतत्वेनानुदयात् श्रुतार्थापत्त्या कल्प्यमानापूर्वस्य यागावान्तरव्यापारत्वेनैव कल्प्यत्वेन श्रुतिविरोधाभावात् अस्त्यपूर्वमिति **सिद्धान्तः** । तथा च **सूत्रम्** ॥ **चोदनेत्यादि** ॥ चोद्यते आक्षिप्यत इति **चोदना** इत्यपूर्वमुच्यते । **पुनः** अस्तीति शेषः । कुतः? यतः कर्मणा फलस्य **आरम्भः** उत्पादः उपदिश्यत इति ।

फलन्तु प्रागुक्तप्रमेयसमर्थनं व्यक्तम् । अत्रैवं **प्रक्रिया,** प्रधानं फलापूर्वमेकम् । तच्च पर्वद्वयानुष्ठेयदर्शत्रिकपौर्णमासत्रिकरूपसमुदायद्वयेन युगपत्फलापूर्वारम्भायोगात् एकैकं समुदायं प्रत्यपूर्वं कल्प्यते । तच्च समुदायापूर्वद्वयं क्रमभाविनस्त्रिकत्रिकात् युगपदुत्पत्तुं नार्हतीति त्रीणि त्रीण्युत्पत्त्यपूर्वाणि कल्प्यन्त इति नवापूर्वीति ।

इति तृतीयमपूर्वाधिकरणम्

अथ तुरीयं कर्मणां गुणप्रधानविभागाधिकरणम् (सूत्राणि ६-८)

तानि द्वैधं गुणप्रधानभूतानि ॥ ६ ॥

(यैर्द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि, द्रव्यस्य गुणभूतत्वात् ॥ ७ ॥ यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत, तस्य द्रव्यप्रधानत्वात् ॥ ८ ॥)

अत्र भावार्थनयन्यायेन प्राप्तशङ्का निरस्यत इत्यापवादिकी सङ्गतिः । दर्शपूर्णमासप्रकरणे श्रुते 'व्रीहीनवहन्ति' 'तण्डुलान् पिनष्टि' इत्यादौ अवघातादितोऽपूर्वनिष्पत्तिरस्त्युत नेति सन्देहे अवघातादेरपि धात्वर्थत्वात् भावार्थनयन्यायेन अवघातादितोऽप्यस्ति फलापूर्वमिति दर्शादियजिवदर्थकर्मावघातादिकमिति प्राप्ते,

दृष्टे सत्यदृष्टकल्पनायोगात्, इह च तुषविमोकादिरूपदृष्टप्रयोजनमवघातस्य लभ्यत इति नादृष्टं कल्प्यम् । अतो नास्त्यवघातादितोऽदृष्टम् । नियमादृष्टन्तु कल्प्यते । 'अवघातेन तुषविमोकं कुर्यात्, नान्येन नखविदलनादिना' इत्यस्य दृष्टप्रयोजनाभावादिति **सिद्धान्तः** ।

अतो गुणकर्मैवावघातादि, न तु यागादिवत् प्रधानकर्मेति । तथा च **सूत्रम्, तानि धात्वर्थभूतानि** कर्माणि **द्वैधं** द्विप्रकाराणि । कानिचिदवघातादीनि **गुणकर्माणि** । यागादीनि तु **प्रधानकर्माणीति** । गुणप्रधानकर्मणोर्लक्षणे तु **यैस्तु द्रव्यं न चिकीर्ष्यते तानि प्रधानभूतानि, द्रव्यस्य गुणभूतत्वात्** (२-१-७)

इति **यैस्तु द्रव्यं चिकीर्ष्यते गुणस्तत्र प्रतीयेत, तस्य द्रव्यप्रधानत्वात्** (२-१-८) इति सूत्राभ्यामुक्ते ध्येये । **फलन्तु, पूर्वपक्षे** अवघातादेः सकृदनुष्ठानम् । **सिद्धान्ते** तु यावत्तुषविमोचनमिति ।

इति तुरीयं कर्मणां गुणप्रधानविभागाधिकरणम् (सूत्राणि ६-८)

अथ पञ्चमं सम्मार्जनादीनामप्रधानताधिकरणम् (सूत्राणि ९-१२)

धर्ममात्रे तु कर्म स्यादनिर्वृत्तेः प्रयाजवत् ॥ ९ ॥

(तुल्यश्रुतित्वाद्वेतरैः स धर्मः स्यात् ॥ १० ॥ द्रव्योपदेश इति चेत् ॥ ११ ॥ न तदर्थत्वाल्लोकवत्तस्य च शेषभूतत्वात् ॥ १२ ॥)

अत्र 'यैस्तु द्रव्यं न चिकीर्ष्यते' इत्यादिनोक्तस्यापवादादापवादिकी वा पूर्ववैषम्येण शङ्कनात् प्रत्युदाहरणरूपा वा **सङ्गतिः** । दर्शपूर्णमासप्रकरणे श्रुतं 'स्रुचः सम्मार्ष्टि' 'पुरोडाशं पर्यग्नि करोति' इत्यादि । तत्र सम्मार्जनादि प्रधानकर्मोत गुणकर्मेति **सन्देहे** युक्तं पूर्वत्र व्रीहिषु तुषविमोकरूपदृष्टसंस्काररूपोपकारस्य सत्त्वादवघातस्य गुणकर्मत्वम् । 'यैस्तु द्रव्यं चिकीर्ष्यते' इत्युक्तलक्षणसत्त्वात् । स्रुगादिषु तु सम्मार्जनादिना आधेयातिशयस्य कस्यचिदभावात् न गुणकर्मत्वम् । गुणकर्मलक्षणाभावात् । अतः प्रयाजादिवत् प्रधानकर्मैव, तल्लक्षणसत्त्वादिति **प्राप्तम्** । तदुक्तं **सूत्रे, धर्ममात्रे** दृष्टोप-

काररहिते कर्मस्वरूपमात्रे श्रुते **कर्म स्यात्** प्रधानकर्मैव स्यात् । कुतः ? **अनिर्वृत्तेः** दृष्टस्य कस्याप्युपकारस्यानिष्पादनात् **प्रयाजकर्मवदिति** ।

सिद्धान्तस्तु 'कर्तुरीप्सिततमं कर्म' इति ईप्सिततमे विहितकर्मसंज्ञां निमित्तीकृत्य प्रवृत्तया 'कर्मणि द्वितीया' इति सूत्रोक्तया पुमर्थहेतुक्रत्वङ्गतयेप्सिततमत्ववाचिन्या द्वितीयाश्रुत्या स्रुचः साध्यत्वावगमात् 'सम्मार्जनेन स्रुचं भावयेत्' इति स्रुगर्थत्वात् सम्मार्गस्य गुणकर्मत्वमेव । स्रुचि दृष्टोपकारस्य कस्यचिदभावेऽदृष्टः कश्चित्संस्काररूपः कल्पनीय इति । **फलन्तु** स्रुच इति बहुत्वश्रवणेऽप्येकस्या एव सम्मार्गः **पूर्वपक्षे । सिद्धान्ते** तु प्रतिसाधनं संस्कारावृत्तेः सर्वासामपीति ।

इति पञ्चमं सम्मार्जनादीनामप्रधानताधिकरणम् (सूत्राणि ९-१२)

अथ षष्ठं स्तोत्रादिप्राधान्याधिकरणं (सूत्राणि १३-२९)

स्तुतशस्त्रयोस्तु संस्कारो याज्यावद्देवताभिधायित्वात् ॥ १३ ॥

(अर्थेन त्वपकृष्येत देवतानामचोदनार्थस्य गुणभूतत्वात् ॥ १४ ॥ वशावद्वा गुणार्थं स्यात् ॥ १५ ॥ न श्रुतिसमवायित्वात् ॥ १६ ॥ व्यपदेशभेदाच्च ॥ १७ ॥ गुणश्चानर्थकः स्यात् ॥ १८ ॥ तथा याज्यापुरोरुचोः ॥ १९ ॥ वशायामर्थसमवायात् ॥ २० ॥ यत्रेति वाऽर्थवत्त्वात्स्यात् ॥ २१ ॥ न त्वाम्नातेषु ॥ २२ ॥ दृश्यते ॥ २३ ॥ अपि वा श्रुतिसंयोगात् प्रकरणे स्तौतिशंसती क्रियोत्पत्तिं विदध्याताम् ॥ २४ ॥ शब्दपृथक्त्वाच्च ॥ २५ ॥ अनर्थकश्च तद्वचनम् ॥ २६ ॥ अन्यश्चार्थः प्रतीयते ॥ २७ ॥ अभिधानञ्च कर्मवत् ॥ २८ ॥ फलनिर्वृत्तिश्च ॥ २९ ॥)

पूर्वत्र 'येन द्रव्यं न चिकीर्ष्यते तत्प्रधानं कर्म' इत्यस्यापवाद उक्तः । अत्र तु 'येन द्रव्यं चिकीर्ष्यते' इत्यस्यापवाद उच्यत इति **सङ्गतिः** । ज्योतिष्टोमे 'आज्यैः स्तुवते' 'प्रउगं शंसति' इत्यादिना स्तोत्रशस्त्रे श्रुते । प्रउगमिति शस्त्रविशेषस्य नाम । प्रगीतमन्त्रसाध्या गुणगुणिसम्बन्धकीर्तनरूपा स्तुतिः **स्तोत्रम्** । अप्रगीतमन्त्रसाध्या स्तुतिः **शस्त्रम्** । 'अभि त्वा शूर नो नुमः' इत्यादयस्तन्मन्त्राः ।

तत्र **सन्देहः** स्तोत्रशस्त्रे गुणकर्मणी, उत प्रधानकर्मणी' इति । दृष्टे सत्यदृष्टकल्पनायोगात् गुणगुणिसम्बन्धकीर्तनेन गुणवत्या देवतायाः कीर्तनलाभात् गुणवद्देवतास्मरणं क्रतूपयोगि दृष्टमेव

प्रयोजनं लभ्यत इति नादृष्टकल्पना युक्ता । तस्मात् गुणकर्मेति **प्राप्तम्** । तदुक्तं **सूत्रे, स्तुतशस्त्रयोः** स्तोत्रशस्त्रयोः प्रकाशनरूपो देवता**संस्कार** एव **याज्यामन्त्राणामिव प्रयोजनं स्यात्** । कुतः ? **देवताभिधायित्वात्** देवताभिधानरूपत्वादिति ।

सिद्धान्तस्तु गुणोक्तिद्वारा गुणवद्देवताप्रकाशनार्थत्वे 'आज्यैर्देवतां प्रकाशयेत्' इत्यादिरूपे विध्यर्थे पर्यवसानात् स्तावकत्वमनयोर्न स्यात् । 'वक्रकेशान्तो यस्तमानय' इत्यादौ स्तुतेरदर्शनात् । 'वक्रकेशान्तो देवदत्तः' इत्यादाविव गुणसम्बन्धोक्तिमात्रपरत्वे तु स्तुतिरूपत्वमनयोर्लभ्यत इति **'स्तौति'** 'शंसति' इति धातुश्रुत्यबाधाय गुणाभिधानमात्रपरत्वात्तस्य च दृष्टप्रयोजनाभावाददृष्टार्थत्वमेव स्तुतिशस्त्रयोरिति प्रधानकर्मणी स्तुतिशस्त्रे इति ।

फलन्तु, पूर्वपक्षे माहेन्द्रग्रहयागसन्निधावाम्नातः 'अभि त्वा शूर नो नुमः' इत्यैन्द्रो मन्त्रो यत्रेन्द्रो देवता तत्रोत्कृष्येत । **सिद्धान्ते तु** नेत्यैन्द्रमन्त्रस्योत्कर्षानुत्कर्षौ ।

इति षष्ठं स्तोत्रादिप्राधान्याधिकरणम् (सूत्राणि १३-२९)

अथ सप्तमं मन्त्राविधायकत्वाधिकरणम् (सूत्रे ३०-३१)

विधिमन्त्रयोरैकार्थ्यमैकशब्द्यात् ॥ ३० ॥

(अपि वा प्रयोगसामर्थ्यान्मन्त्रोऽभिधानवाची स्यात् ॥ ३१ ॥)

प्रधानकर्मविधायकं गुणकर्मविधायकञ्चेति द्विविधमाख्यातमुक्तं पूर्वत्र । नैतावदेव । किन्त्वभिधायकमपि तृतीयमाख्यातमस्तीतीहोच्यत इति प्रासङ्गिकी **सङ्गतिः** । 'देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह' इति श्रूयते । अस्यार्थः, 'गोपतिः यजमानः **याभिः** गोभिः **देवान् यजते** याश्च गाः ब्राह्मणेभ्यो **ददाति** चिरमेव ताभिः परलोकेऽवतिष्ठते' इति । तत्र **सन्देहः** यजते ददाति इत्याद्याख्यातानि विधायकानि, उत अभिधायकानि इति । विध्युद्देशगताख्यातमिव मन्त्रगताख्यातमपि विधायकमेव । अविशेषात् । इति **प्राप्तम्** । उक्तं च **सूत्रे,** विधिवाक्यमन्त्रवाक्ययोराख्यातानां विधायकत्वरूप**मेकार्थत्वम्, ऐकशब्द्यात्** विधायकशब्दैकरूपत्वादिति ।

सिद्धान्तस्तु यच्छब्दयोगेनानुवादत्वप्रतीत्या विधिशक्तिप्रतिबन्धान्न विधायकत्वम् । किन्तु अभिधायकत्वमेव । एवं 'बर्हिर्देवसदनं दामि' इत्युत्तमपुरुषयोगे 'अग्नीदग्नीन्विहर' इत्यामन्त्रणादौ च

विधिशक्तिप्रतिबन्धेनाभिधायकत्वं ध्येयम्। **फलन्तु** मन्त्रविहितकर्मणां पृथगनुष्ठानं **पूर्वपक्षे, सिद्धान्ते** तु नेति व्यक्तम्।

इति सप्तमं मन्त्राविधायकत्वाधिकरणम् (सूत्रे ३०-३१)

अथ अष्टमं मन्त्रनिर्वचनाधिकरणम्

तच्चोदकेषु मन्त्राख्या ॥ ३२ ॥

पूर्वत्र सूत्रे मन्त्रपदस्य प्रसक्तत्वात् तल्लक्षणमत्रोच्यत इति प्रासङ्गिकी **सङ्गतिः**। आधानप्रकरणे 'अहे बुध्निय मन्त्रं मे गोपाय' इति श्रुतवाक्यस्थमन्त्रशब्दार्थोऽत्र **विषयः**। 'अहे बुध्निय' इति गार्हपत्य-सम्बोधनम्। तस्य लक्षणं नास्त्युतास्तीति **सन्देहे** अव्याप्त्यादिशून्यलक्षणानुपलम्भान्नास्ति लक्षणमिति **प्राप्ते,**

यानि प्रयोगकाले अनुष्ठानौपयिकार्थाभिधानरूपाणि वाक्यानि तानि मन्त्रशब्देनोच्यन्त इत्यनुष्ठानौ-पयिकार्थाभिधायकवाक्यत्वं मन्त्रत्वमिति सुवचत्वादस्ति लक्षणमिति **सिद्धान्तः**। तथा च **सूत्रम्** ॥ **तदित्यादि** ॥ **तस्य** अनुष्ठेयार्थस्य **चोदकेषु** प्रकाशकेषु **मन्त्र**संज्ञेति। एतच्चोपलक्षणम्। 'यत्राभियुक्तानां मन्त्रत्वप्रसिद्धिः स मन्त्रः' इति मन्त्रत्वेनाभियुक्तप्रसिद्धिमत्त्वं मन्त्रलक्षणं ध्येयम्। अन्यथा ह्यदृष्टार्थक मन्त्रेषु तच्चोदकेष्वित्युक्तलक्षणस्याव्याप्त्यापत्तेरिति। **फलन्तु** लक्ष्यस्वरूपज्ञानमेवेति व्यक्तम्।

इति अष्टमं मन्त्रनिर्वचनाधिकरणम्

अथ नवमं ब्राह्मणनिर्वचनाधिकरणम्

शेषे ब्राह्मणशब्दः ॥ ३३ ॥

विधिमन्त्रयोरिति सूत्रोपात्तयोर्मध्ये मन्त्रशब्दार्थो लक्षितः। अत्र तु विधिशब्दितब्राह्मणशब्दार्थस्य लक्षणमुच्यत इति **सङ्गतिः**। चातुर्मास्येषु 'एतद्ब्राह्मणान्येव पञ्च हवींषि' इति श्रुतम्। तत्रत्य-ब्राह्मणशब्दस्य लक्षणमस्त्युत नेति **सन्देहे** वेदभागानामियत्तानवधारणेन ब्राह्मणभागे तदितरभागेषु च अव्याप्त्यतिव्याप्तिशून्यलक्षणस्य निर्धारणायोगान्नास्ति लक्षणमिति **प्राप्ते,**

मन्त्रब्राह्मणरूपेण द्वावेव वेदभागावित्यङ्गीकारात् मन्त्रलक्षणस्य प्रागुक्तत्वात् अविशिष्टो वेदभागो ब्राह्मणशब्दार्थ इति वेदत्वे सति मन्त्रान्यत्वरूपलक्षणमस्तीति **सिद्धान्तः**। तदुक्तं **सूत्रे, शेषे** मन्त्र-

भागादवशिष्टवेदभागे **ब्राह्मणशब्दो** ज्ञेय इति । **फलन्तु** प्राग्वत् । **'शेषे ब्राह्मणशब्दः'** इत्युक्ति-सौकर्यायैव विधिमन्त्रयोः सौत्रक्रमोल्लङ्घनमिति ज्ञेयम् ।

इति नवमं ब्राह्मणनिर्वचनाधिकरणम्

अथ दशममूहाद्यमन्त्रताधिकरणम्

अनाम्नातेष्वमन्त्रत्वमाम्नातेषु विभागः स्यात् ॥ ३४ ॥

स्वाध्यायकालीनयोर्मन्त्रब्राह्मणयोर्लक्षणोक्तौ तत्प्रसङ्गात् क्रतुप्रयोगकालीनानामूहादीनां मन्त्रत्व-मस्ति, नेति चिन्तनात् **सङ्गतिः** । विधिप्रयोजनकरत्वाभावेन ब्राह्मणत्वमशक्यशङ्कम् । अत्र 'अग्नये त्वा जुष्टं निर्वपामि' इत्यस्य सौर्यचरौ 'सूर्याय' इति पदान्तरप्रक्षेप **ऊहः** । त्र्यार्षेयादिः **प्रवरः** । 'सुब्रह्मण्यायामुको यजते' इति **नामधेयम्** । तेषु ऊहप्रवरनामधेयेषु मन्त्रत्वमस्ति, उत नेति **सन्देहे** मन्त्रेण सह एकवाक्यत्वापन्नत्वान्नियमादृष्टानुविद्धापूर्वीयदेवताप्रकाशनरूपमन्त्रकार्यकरत्वाच्च मन्त्रत्वे **प्राप्ते** मन्त्रकार्यकरत्वस्य 'चोदना लिङ्गसंयोग' इति दशमचतुर्थपादे वक्ष्यमाणदिशा 'रथघोषेण माहेन्द्र-स्तोत्रमुपाकरोति' इति विहिते रथघोषे मन्त्रस्थानापत्त्या मन्त्रकार्यकरे व्यभिचारादभियुक्तानां अध्ययनादिकाले मन्त्रत्वप्रसिद्धेरेव मन्त्रत्वप्रयोजकत्वेन मन्त्रैकवाक्यताया मन्त्रत्वाप्रयोजकत्वात् नास्ति मन्त्रत्वमिति **सिद्धान्तः । तथा च सूत्रम्** स्वाध्यायकाले **अनाम्नातेषु अमन्त्रत्वम्** । कुतः ? **आम्नातेषु** हि 'मन्त्रानध्यापयामः' इत्याद्यभियुक्तोक्त्या **मन्त्रविभागो** मन्त्रविवेकः **स्यादिति** । **फलन्तु** ऊह्यमान-पदभ्रेषे न मन्त्रभ्रेषप्रायश्चित्तमित्यादि ध्येयम् ।

इति दशममूहाद्यमन्त्रताधिकरणम्

अथ एकादशमृग्लक्षणाधिकरणम्

तेषामृग्यत्रार्थवशेन पादव्यवस्था ॥ ३५ ॥

सापवादे मन्त्रे लक्षिते प्रसङ्गात्तदवान्तरभेदा लक्ष्यन्ते त्रिभिः सूत्रैरिति **सङ्गतिः** । 'ऋचः सामानि यजूँषि' इति श्रौतक्रमात्त्रयाणामपि क्रमो ध्येयः । 'अहे बुध्न्य मन्त्रं ये गोपाय, यमृषयस्त्रैविदा विदुः ऋचः सामानि यजूँषि' इति श्रूयते । 'त्रीन् वेदान् विदन्तीति त्रिविदः । त्रिविदां सम्बन्धिनोऽध्येतार-स्त्रैविदाः । ते यं मन्त्रभागं ऋगादिरूपेण त्रिविधमाहुः तं गोपाय' इति योजना । तत्र ऋचो लक्षणं

नास्त्युतास्तीति **सन्देहे** ऋग्वेदपठितमन्त्रत्वरूपलक्षणस्य सामेवेदादौ पठितमन्त्रे अव्याप्तेरितोऽन्यस्य च लक्षणस्यानुपलब्धेर्नास्ति लक्षणमिति **प्राप्ते** 'पादत्वेनोपेता वृत्तबद्धा मन्त्रा ऋचः' इति सुवचत्वादस्ति लक्षणमिति। 'अग्निः पूर्वेभिः' इत्यादौ 'अग्निमीले' इत्यादाविव क्रियापदाभावादव्याप्तिनिरासाय **वृत्तबद्धा** इत्युक्तिः। तदुक्तं **सूत्रे, तेषां** मन्त्राणां मध्ये **यत्रार्थवशेन पादव्यवस्था सा ऋगिति। फलन्तु** लक्ष्यावधारणं व्यक्तम्।

इति एकादशमृग्लक्षणाधिकरणम्

अथ द्वादशं सामलक्षणाधिकरणम्

गीतिषु सामाख्या ॥ ३६ ॥

सङ्गतिः प्रागेवोक्ता। साम्नो लक्षणं नास्त्युतास्तीति **सन्देहे** सामवेदपठितत्वादन्यस्यादर्शनात्तस्य च यजुर्वेदे 'एतत्साम गायन्नास्ते' इति प्रतिज्ञाय पठिते 'हाउ हाउ' इत्यादिसाम्न्यव्याप्तेर्नास्ति लक्षणमिति **प्राप्ते, सिद्धान्तः ॥ गीतिषु सामाख्येति ॥** गानेषु सामसंज्ञेति गानरूपत्वं सामलक्षणमिति। गानयुक्तमन्त्रे सामशब्दप्रसिद्धावपि नागृहीतविशेषणान्यायेन गोत्वादिजातेरिव गीतेरेव सामशब्दवाच्यत्वमिति ज्ञेयम्। **फलन्तु** प्राग्वत्।

इति द्वादशं सामलक्षणाधिकरणम्

अथ त्रयोदशं यजुर्लक्षणाधिकरणम्

शेषे यजुशब्दः ॥ ३७ ॥

अत्र **संशयपूर्वपक्षौ** प्राग्वत्। 'अक्षितमस्यच्युतमसि प्राण शंसितमसि' इति सामवेदपठितेषु त्रिषु यजुस्सु यजुर्वेदे पठितत्वस्याव्याप्तेर्वक्तुं शक्यत्वात्। **सिद्धान्तस्तु** ऋक्सामभ्यामन्यत्प्रश्लिष्टपठितं वा मन्त्रजातं यजुरिति 'शेषे यजुःशब्दः' इति **सूत्रे** व्यक्तम्।

इति त्रयोदशं यजुर्लक्षणाधिकरणम्

अथ चतुर्दशं निगदानां यजुष्ट्वाधिकरणम् (सूत्राणि ३८-४५)

निगदो वा चतुर्थं स्यात् धर्मविशेषात् ॥ ३८ ॥

(व्यपदेशाच्च ॥ ३९ ॥ यजूँषि वा तद्रूपत्वात् ॥ ४० ॥ वचनाद्धर्मविशेषः ॥ ४१ ॥ अर्थाच्च ॥ ४२ ॥ गुणार्थो व्यपदेशः ॥ ४३ ॥ सर्वेषामिति चेत् ॥ ४४ ॥ न ऋग्व्यपदेशात् ॥ ४५ ॥

शेषे यजुःशब्दः इत्युक्तस्य आक्षेपादाक्षेपिकी **सङ्गतिः । निगदा** नाम परसम्बोधनपराः 'अग्नीदग्नीन्विहर' प्रोक्षणीरासादय', 'इन्द्रागच्छ' इत्येवमादयः । ते किं यजुर्भ्योऽन्ये, यजूंष्येव वा इति **सन्देहः ।** ऋक्सामलक्षणाभावात् तदन्तर्भावस्त्वशक्यशङ्कः ।

पूर्वपक्षस्तु 'इमे निगदाः' 'इमानि यजूंषि' इति संज्ञाभेदात् 'उपांशु यजुषा' 'उच्चैर्निगदेन' इति उपांशुत्वोच्चैस्त्वरूपविरुद्धधर्मयोगाच्च यजुर्भ्योऽन्यश्चतुर्थप्रकारो निगदो नामेति । तथा च **सूत्रम्, निगदो** नाम **चतुर्थं** मन्त्रजातं **स्यात् ।** उच्चैस्त्वादि**धर्मविशेषात्** इति ।

सिद्धान्तस्तु संज्ञाभेदस्य 'नितरां गद्यन्ते उच्चैस्त्वेनोच्चार्यन्ते' इति योगेन यजुर्भाग एवोपपत्तेः धर्मभेदस्य च परप्रत्यायनकार्यविरोधेनोपांशुत्वस्याप्राप्तेः अर्थसिद्धोच्चैस्त्वस्य 'उच्चैर्निगदेन' इति वाक्येनानुवादात् यजुष्येवान्तर्भावान्न चतुर्थप्रकारो निगद इति । **फलन्तु** निगदभ्रंशे सति 'भुव इति दक्षिणाग्नौ जुहुयात्' इति यजुर्भ्रंशनिमित्तं प्रायश्चित्तमिति ।

इति चतुर्दशं निगदानां यजुष्ट्वाधिकरणम् (सूत्राणि ३८-४५)

अथ पञ्चदशमेकवाक्यत्वाधिकरणम्

अर्थैकत्वादेकं वाक्यं साकांक्षं चेत् विभागे स्यात् ॥ ४६ ॥

'ऋचः सामानि यजूँषि' इति श्रुतौ प्रकृत्यर्थऋगादिचिन्तानन्तरं प्रत्ययार्थबहुत्वावगततत्तदवान्तरभेदचिन्तौचित्यात्साऽत्र क्रियत इति **सङ्गतिः ।** ऋक्सामयोर्वाक्यपरिमाणं प्रसिद्धमिति तच्चिन्तां विहाय प्रश्लिष्टपठिते यजुषि वाक्यपरिमाणं चिन्त्यते । दर्शपूर्णमासयोः श्रूयते 'देवस्य त्वा सवितुः प्रसवेऽश्विनो र्बाहुभ्यां पूष्णो हस्ताभ्यां अग्नये जुष्टं निर्वपामि' इति । तत्र **सन्देहः ।** किमेतानि वाक्यानि भिन्नानि, उताभिन्नानीति । एकवाक्यत्वनियामकस्य दुर्बोधत्वात् भिन्नानीति **प्राप्ते,**

सिद्धान्तः ॥ अर्थैकत्वादिति ॥ यत् **विभागे** साकांक्षमविभागे चैकार्थं तत् **एकं वाक्यं** इति वाक्यैकत्वप्रयोजकस्योक्तरूपस्य सुज्ञानत्वात् 'देवस्य त्वा' इत्यादीनि सर्वाण्यपि पदानि निर्वापप्रकाशनार्थानि, विभागे च साकांक्षाणीति 'निर्वपामि' इत्यन्तमेकं वाक्यम् । अन्यत्तु वाक्यान्तरमिति ।

फलन्तु प्रयोगकाले नानियतपरिमाणयजुःप्रयोग इति ।

इति पञ्चदशमेकवाक्यत्वाधिकरणम् ।

अथ षोडशं वाक्यभेदाधिकरणम्

समेषु वाक्यभेदः स्यात् ॥ ४७ ॥

पूर्वन्यायेन शङ्कनात् सङ्गतिः । 'इषे त्वोर्जे त्वा' इति, तथा 'आयुर्यज्ञेन कल्पतां, प्राणो यज्ञेन कल्पतां' इत्यादि च श्रूयते । तत्र 'इषे त्वोर्जे त्वा' इत्येकं वाक्यं, उत नानेति । 'आयुर्यज्ञेन कल्पताम्' इत्यादावपि तथैव सन्देहः ।

निर्वापवत् कर्मसमवेतार्थप्रकाशकत्वाभावेन दृष्टप्रयोजनाभावेनादृष्टे कल्प्ये लाघवादेकमेव तत् कल्प्यते । तस्यैकत्वादेकार्थत्वाच्चादृष्टमवयवतो न निष्पद्यत इति विभागे साकांक्षत्वेत्येकवाक्यमेवैवमादिकमिति प्राप्ते,

स्यादेवमदृष्टार्थत्वे कथञ्चिदुक्तदिशैकवाक्यता । न चैवम् । शाखाच्छेदनादिप्रकाशनेन दृष्टार्थत्वात् । 'इषे त्वा' इति छिनत्ति, 'ऊर्जे त्वा' इत्यनुमार्ष्टि इति वाचनिकविनियोगानुसारेण 'इषे त्वा छिनद्मि' इति 'ऊर्जे त्वा अनुमार्ज्मि' इति अध्याहारेण पलाशशाखाच्छेदनानुमार्जनरूपार्थप्रकाशनेऽन्योन्यं निरपेक्षत्वात् भिन्नभिन्नं वाक्यम् । तथा 'क्लृप्तीर्वाचयति' इति क्लृप्तिबहुत्वस्य चोदितत्वात् तत्सम्पत्त्यर्थं आयुरादिविशिष्टक्लृप्तिभेदप्रकाशनपरत्वादर्थभेदेन मन्त्रभेद इति सिद्धान्तः । तथा च सूत्रम्, समेषु अन्योन्यनिरपेक्षेषु 'इषे त्वा' इत्यादिषु वाक्यभेदः स्यात् इति ।

फलन्तु, मन्त्रैक्यपक्षे एकदेशभ्रेषे सति सर्वस्यावृत्तिः । सिद्धान्ते तु यस्य मन्त्रस्य भ्रंशः तस्यैवावृत्तिरिति ।

इति षोडशं वाक्यभेदाधिकरणम् ।

अथ सप्तदशोऽनुषङ्गाधिकरणे प्रथमं वर्णकम्

अनुषङ्गो वाक्यसमाप्तिः सर्वेषु तुल्ययोगित्वात् ॥ ४८ ॥

अत्रापि यजुःपरिमाणचिन्तनात् प्रासङ्गिकी सङ्गतिः । ज्योतिष्टोमे आग्नेयी सौम्या वैष्णवीति तिस्र

उपसदः श्रुताः । तत्राऽग्नेयीसन्निधौ श्रूयते । 'या ते अग्ने अयाशया तनूर्वर्षिष्ठा गह्वरेष्ठा, उग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा' 'या ते अग्ने रजाशया' 'या ते अग्ने हराशया' इति । अयाशया रजाशया हराशयेति भूम्यन्तरिक्षद्युलोकस्थास्तनव **इत्येके** । अयसा रजतेन हिरण्येन च निर्मितं तनुत्रयमित्य**न्ये** । 'उग्रं वचः' इति अशनायापिपासे । अपावधीं अपहन्मि, या ते तनूः । तयेति शेषः । 'त्वेषं वचः' इति एनश्च वैरहत्यश्चेत्यर्थः । तत्र रजाशयाहराशयेतिपदयोः साकांक्षयोः शेषिणोराकांक्षा-पूरणाय लौकिकः शेषोऽध्याहर्तव्यस्तनूरित्यादिः, पूर्व एवानुषञ्जनीयो वेति **सन्देहः** ।

एकत्र निबद्धो वैदिकः शेषो नान्यत्र नेतुं शक्यते । लौकिकस्तु न काप्युपनिबद्ध इति लौकिको वाक्यशेष आकांक्षापूरणायाध्याहर्तव्य इति **प्राप्ते**,

सर्वानन्तरं सकृत्पठितुमशक्यो बुद्धिस्थत्वमात्रेण च सर्वैः साकांक्षैः सम्बन्धसिद्धेः पुनरना-म्नातोऽप्ययं शेषः सर्वार्थेनाऽम्नात इति युक्तमङ्गीकर्तुम् । एतावतैव वेदसमर्पितेन शेषेण नैराकांक्ष्य-सिद्धेर्निष्प्रमाणको लौकिकोऽध्याहारः । अतः 'तनूर्वर्षिष्ठा' इत्यादिशेष उत्तरयोरप्यनुषञ्जनीय इति **सिद्धान्तः** । तदुक्तं **सूत्रे** अनुषज्यत इति **अनुषङ्गः** वाक्यशेषः **वाक्यसमाप्तिः** वाक्यसमापकः **सर्वेषु** शेषिषु **तुल्ययोगित्वात्** तुल्यसम्बन्धादिति ।

फलन्तु पूर्वपक्षे अध्याहृतस्य ऊहादिवदमन्त्रत्वात् तद्भ्रंशे न मन्त्रभ्रंशप्रायश्चित्तम् । **सिद्धान्ते** तद्भ्रंशप्रायश्चित्तम् ।

इति सप्तदशेऽनुषङ्गाधिकरणे प्रथमं वर्णकम्

अथ सप्तदशेऽनुषङ्गाधिकरणे द्वितीयं वर्णकम्

अस्य सूत्रस्य **वर्णकान्तरन्तु** । पूर्ववैषम्येण शङ्कनात् **सङ्गतिः** । 'चित्पतिस्त्वा पुनातु' 'वाक्पति-स्त्वा पुनातु' 'देवस्त्वा सविता पुनातु अच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः' इति श्रुते वाक्ये 'अच्छिद्रेण' इत्यादिशेषः पूर्वयोरप्यनुषज्यते, किं वा परस्यैव मन्त्रस्य शेष इति **सन्देहः** ।

पूर्वस्मिन् वर्णके एकेन शेषिणा अन्वयेन नैराकांक्ष्येऽपीतरयोः शेषिणोः साकांक्षत्वात् पुनर्वाक्य-शेषस्य आकांक्षामुत्थाप्यानुषङ्गोक्तिर्युक्ता । अत्र तु शेषिणां पुनात्वन्तानां निराकांक्षत्वात् शेषस्य चैकान्वयेनापि नैरकांक्ष्यसिद्धेर्नानुषङ्गो युक्त इति **प्राप्ते**,

सिद्धान्तः । पुनातुशब्दैकवाक्यतामुपगतोऽच्छिद्रादिः शेषः करणद्वारेण पावनक्रियाप्रकाशनार्थः । सैव क्रिया पूर्वाभ्यामपि प्रकाश्यते । तदर्थश्च वाक्यशेषः प्रधानवशात् तत्राऽकृष्यत इत्यनुषङ्गसिद्धिरिति । **फलन्तु** वाक्यशेषस्य चरममन्त्रेणैव सहोच्चारणं **पूर्वपक्षे । सिद्धान्ते तु** पूर्वाभ्यामपीति व्यक्तम् ।

इति सप्तदशेऽनुषङ्गाधिकरणे द्वितीयं वर्णकम्

अथाष्टादशं व्यवेताननुषङ्गाधिकरणम्

व्यावायान्नानुषज्यते ॥ ४९ ॥

अत्र पूर्वोक्तापवादादापवादिकी **सङ्गतिः** । अग्नीषोमीयपशौ 'सं ते प्राणो वायुना गच्छतां' 'सं यजत्रैरङ्गानि', 'सं यज्ञपतिराशिषा' इति श्रुतम् । तत्र 'सङ्गच्छतां' इति पदं 'आशिषा' इत्यनन्तरमनुषज्यते, अथाध्याहार इति **सन्देहे** पूर्वत्रेव साकांक्षत्वादनुषङ्ग इति **प्राप्ते,**

संयजत्रैः यागविशेषैः 'सङ्गच्छन्ताम्' इति बहुवचनान्ततया अन्वयेनैकवचनान्तस्य बुद्धिविपरिवृत्तिभङ्गान्नानुषङ्गः । किन्त्वध्याहार इति **सिद्धान्तः** । तथा च **सूत्रम्, व्यवायान्नानुषज्यत** इति । **फलन्तु** तद्भ्रंशे प्रायश्चितं नेति व्यक्तम् ।

इत्यष्टादशं व्यवेताननुषङ्गाधिकरणम्

इति भाट्टसङ्ग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्यश्रीराघवेन्द्रयतिसार्वभौमकृते

द्वितीयाध्यायस्य प्रथमः पादः

अत्र पादे अधिकरणानि १८ सूत्राणि ४९

आदितः " ६० " १९९

अथ भाट्टसङ्ग्रहे द्वितीयाध्यायस्य द्वितीयः पादः

अथ प्रथममङ्गापूर्वभेदाधिकरणम्

हरिः ॐ ॥ पूर्वपादे उपोद्घातप्रसक्तानुप्रसक्तचिन्ता कृता । अत्र पादे अध्यायार्थः कर्मभेदोऽवसरप्राप्तो निरूप्यत इति पूर्वपादानन्तर्यमस्य ध्येयम् । कर्मभेदो नाम भावनाभेदः । तत्र शब्दान्तराभ्याससङ्ख्यानामधेयगुणप्रकरणाख्यानि षट् प्रमाणानि । **शब्दान्तरं** नाम धातुभेदः । अविशेषेण पुनःश्रवणम् **अभ्यासः । सङ्ख्या** तु व्यक्ता । **गुणस्तु** हवीरूपद्रव्यम् । **प्रकरणनामधेये** अप्यग्रे व्यक्ते । तत्रादौ शब्दान्तरात् भेदोऽभिधीयते ।

शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात् ॥ १ ॥

'सोमेन यजेत, हिरण्यमात्रेयाय ददाति, दाक्षिणानि जुहोति' इति श्रूयते । अत्र प्रत्ययांशस्यैकत्वेऽपि यागदानहोमरूपधात्वर्थभेदादाख्यातपदान्यपि मिथः शब्दान्तरं भवन्तीति किमत्र बहुभिर्धात्वर्थैरनुरक्तैका भावनोत भिन्नभिन्नेति **सन्देहः** ।

पूर्वपक्षस्तु प्रत्ययस्यैकत्वात् तद्वाच्या भावनाऽप्येकैव । न च धातुभेदाद्भेदः । प्रत्ययवाच्यभावनायां धातोर्गुणभूतत्वेन गुणभेदात् प्रधानभेदस्यायुक्तत्वात् । किञ्च भावनाभेदे हि भाव्यापूर्वभेदः स्यात् । न चैकेनैवापूर्वेणोपपत्तावनेकापूर्वकल्पना युक्ता । तस्मादनेकधात्वर्थविशिष्टैकैव भावनेति ।

सिद्धान्तस्तु धातुसमुदायादेकप्रत्ययस्य श्रवणे हि सर्वधात्वर्थविशिष्टैका भावनेति वक्तुं शक्यम् । प्रतिधातु प्रत्ययभेदे हि तत्तद्विशिष्टा अन्यान्यैव भावना प्रतीयते । एकधात्वर्थावरुद्धभावनायां धात्वन्तरार्थेनावच्छेदायोगात् । अतो भावनाभेदः । तद्भेदाच्च तत्तद्भाव्यापूर्वभेदोऽपि न्यायप्राप्त इति । तथा च **सूत्रम् ॥ शब्देति ॥ शब्दान्तरे** अपुनरुक्तधात्वन्तरे श्रुते **कर्मभेदो** भावनाभेदः । कुतः? **कृतानुबन्धत्वात्** एकस्या भावनाया धात्वन्तरार्थेन कृतसम्बन्धतया धात्वन्तरार्थेनावच्छेदायोगादिति ।

फलन्तु, पूर्वपक्षे दानादेः प्रधानत्वाद्विकृतिष्वनतिदेशादननुष्ठानम् । **सिद्धान्ते** त्वनुष्ठानमिति ।

इति प्रथममङ्गापूर्वभेदाधिकरणम्

अथ द्वितीयं समिधाद्यपूर्वभेदाधिकरणम्

एकस्यैवं पुनःश्रुतिरविशेषादनर्थकं स्यात् ॥ २ ॥

अत्र पूर्ववैषम्येण शङ्कनात् **सङ्गतिः** । दर्शपूर्णमासयोः 'समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति' इति पञ्चकृत्वोऽभ्यस्तो यजतिशब्दः श्रूयते । तत्र पञ्चभिरप्येकैव भावनोच्यते, अथ प्रत्यभ्यासं भावनाभेद इति **सन्देहः** ।

युक्तं पूर्वत्र प्रत्ययस्यैकरूपत्वेऽपि करणीभूतयागदानादिरूपधात्वर्थभेदात् भावनाभेदः । इह तु प्रत्ययस्य धात्वर्थभूतयागस्य चैकत्वान्न भावनाभेद इति **प्राप्ते** प्रत्यभ्यासं भावनाभेदाभावे अभ्यासवैयर्थ्यात् तदन्यथानुपपत्त्या प्रत्यभ्यासं भावनाभेदः । न च 'समिधो यजति' इति प्रथमवाक्यविहितं समिन्नामकं यागमग्रेतनैश्चतुर्भिर्यजतिपदैरनूद्य तनूनपादादयो देवतारूपा द्रव्यरूपा वा गुणाश्चत्वारो

विकल्पिता विधीयन्त इत्यनुवादार्थत्वान्नाभ्यासवैयर्थ्यमिति शङ्क्यम् । चतुर्थीतद्धितरूपलिङ्गाश्रवणेन देवताविधेः तृतीयान्तत्वद्रव्यत्वप्रसिद्ध्योरभावेन द्रव्यविधेश्चायोगेन तनूनपादादिशब्दानां यागनामत्वात् । अनुवादकत्वे चाप्रवृत्तप्रवर्तनास्वभावरूपविधिश्रुतिर्बाध्येतेति तद्बलात् यागभेदः । तद्भेदाद्भावना-भेदोऽपूर्वभेदश्चेति **सिद्धान्तः** । तदुक्तं **सूत्रे, एकस्यैव** धातोः **पुनःश्रुतिरप्येवं** शब्दान्तरवद्भेदिका, विधायकत्वाविशेषात् । अन्यथा पुनःश्रवणमनर्थकं स्यात् इति । **फलन्तु** एकस्यैव यागस्य विकल्पितसमिदादिदेवताकस्य सकृदनुष्ठानं **पूर्वपक्षे । सिद्धान्ते** तु तत्तद्देवताकानां पञ्चानामपीति ।

इति द्वितीयं समिधाद्यपूर्वभेदाधिकरणम् ।

अथ तृतीयमाघाराग्नेयादीनामङ्गाङ्गिभावाधिकरणम् (सूत्राणि ३-८)

प्रकरणन्तु पौर्णमास्यां रूपावचनात् ॥ ३ ॥

(विशेषदर्शनाच्च सर्वेषां समेषु ह्यप्रवृत्तिः स्यात् ॥ ४ ॥ गुणस्तु श्रुतिसंयोगात् ॥ ५ ॥ चोदना वा गुणानां युगपच्छास्त्राच्चोदिते हि तदर्थत्वात्तस्य तस्योपदिश्येत ॥ ६ ॥ व्यपदेशश्च तद्वत् ॥ ७ ॥ लिङ्गदर्शनाच्च ॥ ८ ॥)

पूर्वन्यायेन शङ्कनादापवादिकी **सङ्गतिः** । 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' 'तावब्रूतामग्नीषोमावाज्यस्यैव नावुपांशु पौर्णमास्यां यजन्' 'उपांशुयाजमन्तरा यजति' 'ताभ्यामेतमग्नीषोमीयमेकादशकपालं पौर्णमासे प्रायच्छत्' 'ऐन्द्रं दध्यमावास्यायां' 'ऐन्द्रं पयोऽमा-वास्यायां' इति षड्यागान् विधायाऽम्नाते 'य एवं विद्वान् पौर्णमासीं यजते' 'य एवं विद्वान् अमावास्यां यजते' इति । अत्र विद्वत्पदयुक्ते वाक्यद्वये पौर्णमास्यमावास्यानामके कर्मान्तरे विधीयेते, उत प्रकृत-षड्यागानां द्वौ समुदायौ यजिद्वयेनानूद्येते इति **सन्देहः** ।

पूर्वपक्षस्तु पुनःश्रवणरूपाभ्यासेन पूर्वत्रेव प्रकृताग्नेयादिभ्योऽन्ये पौर्णमास्यमावास्यानामके कर्मान्तरे 'यजत' इति लेडन्तशब्दाभ्यां विधीयेते । न च द्रव्यदेवतालक्षणयागरूपाश्रवणात् न कर्मान्तर विधिरिति युक्तम् । 'सर्वस्मै वा एतद्यज्ञाय गृह्यते यद्ध्रुवायामाज्यम्' इत्युक्तध्रौवाज्यस्य 'अग्निर्वृत्राणि जङ्घनत्' इत्यादिमन्त्रवर्णप्राप्तदेवतायाश्च सत्त्वादिति **प्राप्ते** द्रव्यलाभेऽपि देवतायाः सर्वथा अलाभः । 'अग्निर्वृत्राणि' इत्यादिमन्त्राणां 'आज्यभागौ यजति' इत्यादिवाक्यविहिताऽज्यभागाङ्गत्वेनैतत्कर्माङ्गत्वा भावात् । प्रकृताऽग्नेयादिषड्यागानां कालसंयुक्तानां समुदायद्वित्वकरणेन यजतिशब्दाभ्यां समुदाय-

द्वयमनूद्य कालसम्बन्धनिमित्तनामसम्बन्धः क्रियत इति युक्तम् । न चैतव्द्यर्थम् । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति फलवाक्यापेक्षितद्विवचनान्तपदार्थभूतसमुदायद्वयसिद्धेः समुदायानुवादफलत्वादिति **सिद्धान्तः** । तथा च **सूत्रम्, पौर्णमास्यां** पौर्णमासीवाक्ये । अमावास्यावाक्ये चेत्यपि ग्राह्यम् । नापूर्वकर्मविधिः । कुतः ? **रूपावचनात्** । किन्तु प्रकरणं सहायीकृत्याऽग्नेयादीन्यत्रानूद्यन्त इति ।

फलन्तु आग्नेयादिषड्यागसन्निध्याम्नातानामपि प्रयाजादीनां प्रधानत्वाद्विकृतिष्वनतिदेशेन तत्राननुष्ठानं **पूर्वपक्षे** । **सिद्धान्ते** त्वङ्गत्वेन विकृतिष्वतिदेशादनुष्ठानमिति ।

इति तृतीयमाग्नेयप्रयाजादीनामङ्गाङ्गिभावाधिकरणम् (सूत्राणि ३-८)

अथ तुरीयमुपांशुयाजापूर्वताधिकरणम् (सूत्राणि ९-१२)

पौर्णमासीवदुपांशुयाजः स्यात् ॥ ९ ॥

(चोदना वाऽप्रकृतत्वात् ॥ १० ॥ गुणोपबन्धात् ॥ ११ ॥ प्रायवचनाच्च ॥१२॥)

एतदादित्रिभिर्नयैः पूर्वत्रेव समुदायानुवादत्वमाशंक्यापोद्यत इत्यापवादिकी **सङ्गतिः** । दर्शपूर्णमासयोः श्रूयते 'जामि वा एतद्यज्ञस्य क्रियते यदन्वंचौ पुरोडाशौ । उपांशुयाजमन्तरा यजति । विष्णुरुपांशु यष्टव्योऽजामित्वाय प्रजापतिरुपांशु यष्टव्योऽजामित्वाय अग्नीषोमावुपांशु यष्टव्यावजामित्वाय' इति । जामि आलस्यहेतुः । अन्वञ्चावव्यवहितौ । तत्रान्तरालवाक्ये विष्ण्वादिवाक्यविहितयागत्रयानुवादो यजिरुतापूर्वकर्मविधिरिति **सन्देहः** ।

पूर्वपक्षस्तु विष्ण्वादिवाक्ये विधिशक्तिप्रतिबन्धकयच्छब्दाद्यनुपहतप्रत्यक्षविधिश्रवणात् अन्तरालवाक्ये वर्तमाननिर्देशेन विधेरश्रवणात् द्रव्यदेवतालक्षणयागरूपाभावाच्च यागविध्ययोगात् विष्ण्वादिवाक्यविहितयागत्रयसमुदायानुवदो यजिरिति । तथा च **सूत्रम्, पौर्णमासी**वाक्यवत् **उपांशुयाज**वाक्यमप्यनुवादः **स्या**दिति ।

सिद्धान्तस्तु विष्ण्वादिवाक्यैर्यागविधावङ्गीकृते सति 'जामि वा एतद्यज्ञस्य क्रियते' इति जामितादोषोपक्रमतन्निर्हरणोपसंहाराभ्यां प्रतीतैकवाक्यताभङ्गप्रसङ्गात् पुरोडाशैनैरन्तर्यकृतजामितादोषाभिधानोपक्रम एवान्तराले किञ्चिद्विधित्सितमित्यवगमात् यजतीत्यस्य लेट्त्वेन विधित्वसम्भवात् आग्नेयाग्नीषोमीययाज्यानुवाक्यायुगलयोर्मध्ये वैष्णवप्राजापत्याग्नीषोमीययाज्यानुवाक्यायुगलयोः शाखा-

भेदेनाऽम्नाततया विष्ण्वादिदेवताया ध्रौवाज्यद्रव्यस्य च सम्भवादन्तरालवाक्य एव यागविधिः । विष्ण्वादिवाक्यानि त्वर्थवादः । तव्यप्रत्ययस्य अर्हार्थेऽपि स्मरणादिति ।

फलन्तु यागत्रयानुष्ठानं **पूर्वपक्षे । सिद्धान्ते** तु विकल्पिततत्तद्देवताकस्यैकस्यैवेति ।

इति तुरीयमपांशुयाजापूर्वताधिकरणम् (सूत्राणि ९-१२)

अथ पञ्चममाघाराद्यपूर्वताधिकरणम् । (सूत्राणि १३-१६)

आघाराग्निहोत्रमरूपत्वात् ॥ १३ ॥

(संज्ञोपबन्धत्वात् ॥ १४ ॥ अप्रकृतत्वाच्च ॥ १५ ॥ चोदना वा शब्दार्थस्य प्रयोगभूतत्वात्, तत्सन्निधेर्गुणार्थेन पुनःश्रुतिः ॥ १६ ॥)

पूर्ववैषम्येणेह शङ्कनात् प्रत्युदाहरणलक्षणा **सङ्गतिः** । 'आघारमाघारयति' 'अग्निहोत्रं जुहोति' इति वाक्यद्वयं 'ऊर्ध्वमाघारयति' 'ऋजुमाघारयति' 'दध्ना जुहोति' 'पयसा जुहोति' इत्यादिविहितकर्मसमुदायानुवादकमुतापूर्वकर्मविधायकमिति **सन्देहः** ।

युक्तं पूर्वत्रोपक्रमोपसंहारावगतैकवाक्यतानुरोधेन विष्ण्वादिवाक्यानामविधायकत्वेनानुवाद्यकर्माभावात् अन्तरालवाक्ये अनुवादकत्वाभाव इति । इह तूर्ध्वादिदध्यादिवाक्यविहितकर्मसमुदायानुवादकत्वं सम्भवतीत्यनुवादकं वाक्यद्वयम् । न चोर्ध्वमित्यादिवाक्यं आघाराग्निहोत्रवाक्यविहितकर्मानुवादेनोर्ध्वत्वादिदध्यादिगुणमात्रविधिपरमिति वाच्यम् । द्रव्यदेवतालक्षणयागरूपाभावेन तत्र यागविधेरयोगादिति **प्राप्तम्** । तथा च **सूत्रम्, आघारवाक्यमग्निहोत्र**वाक्यं च **अरूपत्वान्न** विधायकम् । किन्त्वनुवादकमिति ।

सिद्धान्तस्तु दध्यादिवाक्ये गुणविशिष्टकर्मविधाने विशिष्टविधिगौरवेणाग्निहोत्रादिवाक्यविहितकर्मानुवादेन दध्यादिगुणमात्रविधाने लाघवम् । न च रूपाभावादग्निहोत्रादिवाक्यं न कर्मविधायकमिति वाच्यम् । दध्यादिवाक्यैर्द्रव्यस्य तत्प्रख्याधिकरणोक्तदिशा मान्त्रवर्णिकदेवतायाश्च सम्भवान्नानुवादकमग्निहोत्रदिवाक्यम् । एवमाघारवाक्येऽपि ध्रौवाज्याख्यद्रव्यमान्त्रवर्णिकदेवतयोर्लाभेन कर्मविधिर्ज्ञेयः ।

फलन्तु दध्यादिदशवाक्यविहितदशकर्मणां देवतैक्यात् दध्यादिद्रव्याणां सहप्रदानं **पूर्वपक्षे । सिद्धान्ते तु** विकल्पेनैकैकद्रव्यस्य प्रदानमित्यादि ज्ञेयम् ।

इति पञ्चममाघाराद्यपूर्वताधिकरणम् (सूत्राणि १३-१६)

अथ षष्ठं पशुसोमापूर्वताधिकरणम् (सूत्राणि १७-२०)

द्रव्यसंयोगाच्चोदना, पशुसोमयोः प्रकरणे ह्यनर्थको द्रव्यसंयोगो न हि तस्य गुणार्थेन ॥ १७ ॥

(अचोदकाश्च संस्काराः ॥ १८ ॥ तद्भेदात्कर्मणोऽभ्यासो द्रव्यपृथक्त्वादनर्थकं हि स्याद्भेदो द्रव्यगुणीभावात् ॥ १९ ॥ संस्कारस्तु न भिद्येत, परार्थत्वाद्द्रव्यस्य गुणभूतत्वात् ॥ २० ॥)

अत्र पूर्ववैषम्येण शङ्कनात् **सङ्गतिः** । ज्योतिष्टोमे 'अग्नीषोमीयं पशुमालभेत' इत्युक्त्वा श्रूयते 'हृदयस्याग्रेऽवद्यति' 'अथ जिह्वायाः' 'अथ वक्षसः' इत्यादि । तथा 'सोमेन यजेत' इत्युक्त्वाऽऽम्नायते 'ऐन्द्रवायवं गृह्णाति, मैत्रावरुणं गृह्णाति' इत्यादि । तत्रावद्यतिगृह्णातिवाक्यैर्विहितकर्मणां समुदाययोरालभतियजतिशब्दावनुवादकौ, उतापूर्वकर्मणोर्विधायकाविति **सन्देहः** ।

पूर्वपक्षस्तु युक्तं पूर्वत्र दध्यादीनां विकल्पेऽपि बाधकाभावात् दध्यादिवाक्यानां गुणविधित्वम् । ऐन्द्रवायवादिवाक्यानां गुणविधित्वे द्रव्यदेवतयोर्विकल्पापत्त्या 'आश्विनो दशमो गृह्यते, स तृतीयो हूयते, दशैतानध्वर्युः प्रातःसवने ग्रहान् गृह्णाति' इति क्रमसमुच्चयश्रुतिबाधापत्तेः । एन्द्रवायवमिति तद्धितप्रत्ययेन इन्द्रवाय्वादिप्रातिपदिकैर्देवतानां सोमरसाख्यद्रव्यस्य च प्रतीत्या तेष्वेव द्रव्यदेवता-विशिष्टयागविधिः । तत्समुदायानुवादः 'सोमेन यजेत' इत्यत्र यजतिशब्दः । सोमशब्दश्च 'सोमं क्रीणाति' इत्यादिवाक्यलब्धार्थत्वात् तत्प्रख्यन्यायेन नामधेयं स्यात् । गृह्णातिनाऽऽक्षिप्तद्रव्यनियमपरो वा स्यात् । तथावदानवाक्येषु हृदयादीन्द्रियश्रवणेन द्रव्यविशिष्टयागविधानात्तदनुवादेन पश्वालम्भन-वाक्ये अग्नीषोमरूपदेवता विधीयत इत्यवदानवाक्यविहितानां यागानां समुदायस्य 'आलभेत' इति शब्दोऽनुवादकः । पशुशब्दोऽपि हृदयाद्यवयवाक्षिप्तप्रकृतिद्रव्यानुवादकः इति ।

सिद्धान्तस्तु यजत्यालभतिवाक्ययोर्ग्रहणावदानवाक्यानाञ्च भिन्नार्थत्वान्नानुवाद्यानुवादकभावः । न हि ग्रहणयजनयोर्हृदयादेः पशोश्चैकार्थताऽस्ति । अतः प्रसिद्धसोमलतापशुरूपद्रव्ययुक्तत्वात्सोमादि-वाक्ये अपूर्वकर्मविधायके । गृह्णात्यवदानवाक्यानि तु देवताविशिष्टसोमस्य ग्रहणरूपसंस्कारावदान-रूपपशुसंस्कारविधिपराणीति । तथा च **सूत्रम्, पशुसोमयोः** पशुसोमवाक्ययोः **चोदना** अपूर्वकर्म-विधानं स्यात् । कुतः? **द्रव्यसंयोगात्** पशुसोमलताख्यद्रव्येण संयोगात् । ऐन्द्रवायवादिवाक्यहृदयादि-वाक्यानामपूर्वकर्मविधायकत्वे **तत्प्रकरणेऽयं द्रव्यसंयोगोऽनर्थको हि** । न च तद्वाक्यविहितकर्मानुवादेन

गुणविधानार्थतया नानर्थक्यं वक्तुं शक्यम् । एकत्र हृदयादिरसद्रव्यकत्वादपरत्र पशुसोमलताद्रव्यकत्वात् प्रत्यभिज्ञानगन्धासम्भवेन तदनुवादकत्वाभावेन गुणविधानायोगादिति ।

फलन्तु सोमस्य व्यक्तदेवताकत्वादुद्भिदादिषु न तद्धर्मातिदेशः **पूर्वपक्षे । सिद्धान्ते** तु '**अव्यक्तासु** तु सोमस्य (८-१-१६) इत्याष्टमिकन्यायेन तदतिदेशः ।

इति षष्ठं पशुसोमापूर्वताधिकरणम् (सूत्राणि १७-२०)

अथ सप्तमं सङ्ख्याकृतकर्मभेदाधिकरणम्

पृथक्त्वनिवेशात् सङ्ख्यया कर्मभेदः स्यात् ॥ २१ ॥

अत्र पूर्वन्यायेन शङ्कनात् **सङ्गतिः** । 'तिस्र आहुतीर्जुहोति' इत्यत्र एको होमो विधीयते, बहवो वेति **सन्देहे** 'समिधो यजति' इत्यादाविव 'जुहोति' इत्याख्यातस्य अभ्यासाभावेन सकृदेव श्रवणात् तदैक्यात् तद्वाच्यभावनारूपकर्माप्येकमेव । त्रित्वसङ्ख्या तु 'एकादश प्रयाजान् यजति' इति श्रुत-सङ्ख्यायाः पञ्चप्रयाजेष्वावृत्त्या निवेशवत् पूर्वत्र सोमयागैक्येऽप्यभ्यासात् क्रमसमुच्चयोपपत्तिवदत्रापि कर्मैक्येऽप्यभ्यासादुपपद्यत इति **प्राप्ते**,

पदान्तरनिरपेक्षस्य प्रमित्यजनकत्वात् पदान्तरेण 'तिस्रः' इत्यनेन विशेषितेनाऽख्यातेनावगम्यमानं बहुत्वं नाभ्यासेन नेतव्यम् । प्रयाजेषु तु 'पञ्च प्रयाजाः' इति निर्णीतसङ्ख्यावत्त्वेन अभ्यासेन विनैकादशत्वायोगादावृत्त्या तन्नीयते । तथा सोमयागेऽप्येवं पूर्वोक्तं ध्येयमिति **सिद्धान्त** इति । तथा च **सूत्रम्, सङ्ख्यया कर्मभेदः स्यात्** । कुतः? तस्याः **पृथक्त्वेन** कर्मभेदेन सहैव **निवेशात्** । न ह्येकत्रानेकसङ्ख्या निवेष्टुमलम् । विरोधादिति ।

(द्रव्यदेवतासम्बन्धसङ्ख्याभेदस्य कर्मभेदसाधकत्वसमर्थनम्)

अत्र **वृत्तिकारोक्ते** 'तिस्रः' इति वाक्ये कर्मण्येव सङ्ख्याश्रवणात् पूर्वपक्षाशङ्का मन्देति मत्वा **भाष्यकारो** वाजपेयगतं 'सप्तदश प्राजापत्यान्' इति द्रव्यगतसङ्ख्यायुक्तं वाक्यमुदाहृत्य व्यचारयत् । किं सप्तदशपशुद्रव्यक एको यागो विधीयते उत एकैकपशुद्रव्यकाः सप्तदशयागा इति **सन्देहः** ।

तत्र 'प्रजापतिर्देवता येषां' इति विगृह्य तद्धितोत्पादने तावतां पशूनां देवतासम्बन्धस्यैक्यात्तावत्पशुद्रव्यक एक एव यागः । पशूनां प्राधान्येन बहुत्वयुक्तानामेव तेषां पश्चादुपसर्जनभूतदेवतासम्बन्धस्तद्धिते

नोच्यत इति वाच्यत्वादिति **प्राप्ते**, देवतान्वितद्रव्यवाचिनस्तद्धितान्तप्राजापत्यप्रातिपदिकात् परत्र श्रुत-बहुवचनात् देवतासम्बन्धविशिष्टानामेव पशूनां बहुत्वप्रतीत्या 'बहवः प्राजापत्याः सप्तदश' इत्युक्त्या विशेषणीभूतदेवतासम्बन्धानां सप्तदशत्वप्रतीत्या देवतासम्बन्धानेकत्वादनेके यागाः ।

द्रव्यदेवतासम्बन्धैक्यस्य कर्मैक्यसाधकत्वानङ्गीकारे बाधकोक्तिः

किञ्च द्रव्यदेवतासम्बन्धैक्येन कर्मैक्येऽङ्गीकृते सति 'प्रकृतिवद्विकृतिः कार्या' इति चोदकमप्येकमेव सत् एकमेवावदानगणं प्रापयेत् । स चैकस्मिन् पशौ कृतार्थः सन् पश्वन्तरे न प्राप्नोतीति सर्वपशूनां प्राजापत्यत्वमसम्पादितं स्यात् । यागबहुत्वे तु प्रतिकर्मावसायिभिश्चोदकैस्तावन्त एवावदानगणाः प्राप्यन्त इति चोदकबलात् कर्मभेदसिद्धिरिति **सिद्धान्तः** । तदुक्तं वार्तिके

एककर्मत्वपक्षे स्यादेक एव तु चोदकः ।
ततश्चैकगणप्राप्त्या न सर्वपशुसङ्ग्रहः ॥ इति

सूत्रांशार्थस्तु, पृथक्त्वेन द्रव्यदेवतासम्बन्धभेदेनेत्यर्थः । शिष्टं प्राग्वत् । **फलन्तु** एकस्मिन् पशौ नष्टे पशुगणावृत्तिः **पूर्वपक्षे । सिद्धान्ते तु** एक एव पशुरावर्तत इति ।

इति सप्तमं सङ्ख्याकृतकर्मभेदाधिकरणम् ।

अथाष्टमं संज्ञाकृतकर्मभेदाधिकरणम्

(उत्पत्तिवाक्यगतज्योतिरादिनामधेयानां कर्मभेदकत्वसमर्थनम्)

संज्ञा चोत्पत्तिसंयोगात् ॥ २२ ॥

अत्र पूर्ववैषम्येण शङ्कनात्प्रत्युदाहरणसङ्गतिः । ज्योतिष्टोमे 'अथैष ज्योतिः अथैष विश्वज्योतिः अथैष सर्वज्योतिः एतेन सहस्रदक्षिणेन यजेत' इति श्रुतम् । तत्र प्रकृतज्योतिष्टोमं ज्योतिरादिशब्दैरनूद्य सहस्रदक्षिणाख्यो गुणो विधीयते, अथ कर्मान्तराण्येवंनामकान्येवंदक्षिणकानि विधीयन्ते इति **सन्देहः** ।

पूर्वपक्षस्तु युक्तं पूर्वत्रानेकसङ्ख्यायास्तदाधारभेदनियमाद्भेदकल्पकत्वम् । न तु संज्ञायाः । हेत्वभावात् । अतः 'एषः' इत्येतच्छब्देन प्रकृतं ज्योतिष्टोमं ज्योतिरादिशब्दैरनूद्य तस्मिन् सहस्र-दक्षिणाख्यो गुणो विधीयते । अन्यथा प्रकृतहान्यप्रकृतकल्पनादोषापातादिति । **सिद्धान्तस्तु** प्रकृतस्य ज्योतिष्टोमस्य अथपदेन विच्छेदात्, प्रकृते कर्मणि गुणविधिपरत्वे 'एतेन' इत्यादिवाक्येनैव पूर्तौ

'अथैष' इत्यादेर्वैयर्थ्यापत्तेः, संज्ञाभेदेन प्रतीतार्थभेदस्य बाधकं विना त्यागायोगात् 'एषः' इत्येतच्छब्दस्य वक्ष्यमाणेऽपि सम्भवाच्च कर्मान्तराण्येवंनामकानीति । तथा च **सूत्रम्** यथा सङ्ख्या कर्मभेदिका तथा **संज्ञा च** ज्योतिरादिनामधेयमपि भेदकम् । एकस्मिन्ननेकसंज्ञाया अन्याय्यत्वयुक्तेः । 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति फलवाक्ये संज्ञाभेदेऽप्याग्नेयादितो भेदो न दृष्ट इत्यत उक्तम् । **उत्पत्तिसंयोगादिति** उत्पत्तिवाक्य एव संज्ञाश्रवणादिति ।

फलन्तु द्वादशशतसहस्रदक्षिणयोर्विकल्पः **पूर्वपक्षे । सिद्धान्ते** तु ज्योतिरादिकर्मसु द्वादशशतस्याऽतिदेशिकस्यौपदेशिकसहस्रदक्षिणया बाध इति ।

इत्यष्टमं सञ्ज्ञाकृतकर्मभेदाधिकरणम्

अथ नवमं देवताभेदकृतकर्मभेदाधिकरणम्

गुणश्चापूर्वसंयोगे वाक्ययोः समत्वात् ॥ २३ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात् **सङ्गतिः** । चातुर्मास्येषु वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाख्यपर्वशब्दितकर्मसमुदायेषु चतुर्षु आद्ये वैश्वदेवपर्वणि 'तप्ते पयसि दध्यानयति, सा वैश्वदेव्यामिक्षा' इति यागं विधाय 'वाजिभ्यो वाजिनम्' इति श्रुतम् । **आमिक्षा** हि दध्यतिरिक्तोऽतिपक्वपयसो विकारः । दध्यानयति । आतञ्चनार्थमिति ज्ञेयम् । **वाजिनन्तु** ततो निःसृतं जलम् । तत्र पूर्वस्मिन्नामिक्षायागे वाजिनगुणविधिरुत कर्मान्तरमिति **सन्देहः** ।

युक्तं हि पूर्वत्र अथपदेन प्रकृतविच्छेदात् प्रकृते ज्योतिष्टोमे **एतेनेति** वाक्येन गुणविधानायोग इति । इह तु द्रव्यदेवतासंयोगानुमिते पूर्वस्मिन् आमिक्षायागे आमिक्षाद्रव्यभाजो विश्वदेवान् वाजमामिक्षारूपमन्नमेषामस्तीति व्युत्पत्त्या 'वाजिभ्यः' इति चतुर्थ्यन्तपदेनानूद्य तेभ्य एव वाजिनरूपगुणविधिः सम्भवतीति न कर्मान्तरप्राप्तिः । वाजिनद्रव्यं चामिक्षया विकल्प्यतां समुच्चीयतां वेति **प्राप्ते,**

उत्पत्तिशिष्टेनाऽमिक्षाद्रव्येणावरुद्धे वैश्वदेवयागे उत्पन्नशिष्टं वाजिनद्रव्यं निवेशमलभमानं सत् वाजिशब्दस्य देवतान्तरपरत्वमापादयति । ततो द्रव्यदेवताभेदात् कर्मान्तरमिति **सिद्धान्तः** । तथा हि **सूत्रम्, अपूर्वसंयोगे** पूर्वकर्मणां सम्बन्धायोग्यत्वे सति **गुणश्च** वाजिनादिगुणोऽपि कर्मभेदकः स्यात् । वाजिनस्य तु पूर्वकर्मसंयोगायोग्यत्वं कथमित्यत उक्तं **वाक्ययोरा**मिक्षावाजिनवाक्ययोः **समत्वात्** मिथोऽनपेक्षत्वादिति ।

फलन्तु वाजिनस्याऽमिक्षया समुच्चित्य विश्वदेवेभ्यो दानं **पूर्वपक्षे**। **सिद्धान्ते** तु यागभेदात् पृथगेव वाजिनामकदेवेभ्यो दानमिति।

इति नवमं देवताभेदकृतकर्मभेदाधिकरणम्

अथ दशमं द्रव्यविशेषानुक्तिकृतकर्मभेदाधिकरणम्

अगुणे तु कर्मशब्दे गुणस्तत्र प्रतीयेत ॥ २४ ॥

अत्र वाजिनवद्दध्याद्यपि कर्मभेदकमित्याशङ्क्य निरासादापवादिकी **सङ्गतिः**। 'अग्निहोत्रं जुहोति' इति निर्गुणं कर्म विधाय 'दध्ना जुहोति, पयसा जुहोति' इत्येवमादीनि दशवाक्यानि श्रुतानि। तत्र **सन्देहः** दध्यादेः पूर्वकर्मण्येव निवेशोऽथ कर्मान्तरापादकत्वमिति। तत्र दध्यादीनामनेकेषां गुणानां पूर्वकर्मणि निवेशे सति विकल्पप्रसङ्गात् अन्यतरावरुद्धे च अन्यतरनिवेशायोगात् वाजिनवदेव कर्मान्तर-कल्पकत्वमिति **प्राप्ते, सिद्धान्तितम्** सर्वेषां दध्यादीनामन्योन्यनैरपेक्ष्येणाग्निहोत्रमात्रापेक्षणात् तत्र च निर्गुणस्य कर्मणोऽवगतस्य सर्वगुणयोग्यत्वात् पौर्वापर्याभावाच्च अन्यावरोधिन्यन्यस्यानिवेश इत्यस्या-भावात् तत्रैव गुणमात्रविधानम्। प्रमाणवशाद्विकल्प इति। तदुक्तं **सूत्रे, कर्मशब्दे** कर्मोत्पत्तिवाक्ये **अगुणे** गुणरहिते सति **तत्र** तत्सन्निधिपठितेषु सगुणवाक्येषु **गुण** एव **प्रतीयेत**। न कर्मान्तरमिति। **फलन्तु** तत्तद्गुणकानां सर्वेषां फलवाक्यग्रहणादेकफलार्थमनुज्ञानम् **पूर्वपक्षे, सिद्धान्ते** तु वैकल्पिक-द्रव्यकस्यैकस्यैवेति।

इति दशमं द्रव्यविशेषानुक्तिकृतकर्मभेदाधिकरणम्

अथैकादशं दध्यादिद्रव्यसफलत्वाधिकरणम् (सूत्रे २५-२६)

फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगित्वात् ॥ २५ ॥

(अतुल्यत्वात्तु वाक्ययोर्गुणे तस्य प्रतीयेत ॥ २६ ॥)

अत्र पूर्ववैषम्येण शङ्कनात् **सङ्गतिः**। 'अग्निहोत्रं जुहोति' इति प्रकृत्य 'दध्नेन्द्रियकामस्य जुहुयात्' इति श्रूयते। तत् किमग्निहोत्रात् कर्मान्तरं दधिविशिष्टमिन्द्रियकामाय विधीयते, अथ तत्रैव गुणमात्रं फलाय विधीयत इति **सन्देहः**।

पूर्वपक्षस्तु युक्तं पूर्वत्र दध्यादीनां भिन्नभिन्नवाक्यश्रुतानां प्रकृते कर्मणि निवेशनम्। इह तु गुण-फलयोरेकवाक्यश्रुतयोः प्रकृते कर्मणि निवेशो न युक्तः। एकेन वाक्येन गुणसम्बन्धस्य फलसम्बन्धस्य च विधाने वाक्यभेदप्रसङ्गात्। न च फलाय गुणमात्रविधिरिति वाच्यम्। धात्वर्थमन्तरेण केवलगुणात् फलासिद्धेः। अतो भावार्थनयन्यायेन फलाय होमाख्यमपूर्वं कर्म, तदर्थं च दधीति। तथा च **सूत्रम्, फलश्रुतेः** अपूर्वं **कर्म** स्यात्कर्मण एव करणत्वयोग्यतया **फलस्य कर्मणैव सम्बन्धादिति।**

सिद्धान्तस्तु कर्मान्तरविधौ 'दधिमता होमेन इन्द्रियं भावयेत्' इति मत्वर्थलक्षणाप्रसङ्गात् विशिष्ट-विधौ गौरवप्रसङ्गात् प्रकृतहानाप्रकृतकल्पनापाताच्च लाघवेनाग्निहोत्रवाक्यप्राप्तकर्मानुवादेन गुणमात्रं फलाय विधीयत इति।

फलन्तु फलकामेन नित्याग्निहोत्रादन्यद्दधिसाधनकं होमान्तरं पृथक्कार्यं **पूर्वपक्षे। सिद्धान्ते** तु नित्याग्निहोत्र एव सायंप्रातराहुत्योर्दधि प्रयोक्तव्यमिति।

इत्येकादशं दध्यादिद्रव्यसफलत्वाधिकरणम्

अथ द्वादशं वारवन्तीयादीनां कर्मान्तरताधिकरणम्

समेषु कर्मयुक्तं स्यात्॥ २७॥

पूर्वन्यायेनेह शङ्कनादापवादिकी **सङ्गतिः**। 'त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोम-साम कृत्वा ब्रह्मवर्चसकामो यजेत' इत्यग्निष्टुत्सञ्ज्ञकं यागं विधाय 'एतस्यैव रेवतीषु वारवन्तीय-मग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत' इति श्रूयते। **अस्यार्थः**। अग्निष्टोमविकारभूतोऽग्निष्टु-त्संज्ञकः कश्चिदेकाहः। स च पृष्ठस्तोत्रेषु त्रिवृत्स्तोमयुक्ततया त्रिवृदित्युच्यते। अग्निष्टोमस्तोत्रेण समाप्यत्वादग्निष्टोम इति चोच्यते। तस्याग्निष्टुत एकविंशतिस्तोमयुक्तमग्निष्टोमस्तोत्रसाधनीभूतं साम प्रकृतौ 'यज्ञायज्ञा वोऽग्नयः' इत्यद्याग्नेयीषु ऋक्षु गेयमपि वायव्यासु कृत्वा ब्रह्मवर्चसकामो यजेत। पशुकामस्तु 'रेवतीर्नः सधमादः' इत्यादिषु रेवतीषु वारवन्तीयनामकाग्निष्टोमस्तोत्रसाम कृत्वा यजेतेति। तत्र **सन्देहः** किं पूर्वस्मिन्नग्निष्टुत्संज्ञके यागे पशुफलाय रेवत्याधारवारवन्तीयसामख्यगुणो विधीयते अथ कर्मान्तरमिति।

पूर्वपक्षस्तु यथा हि पूर्वत्रेन्द्रियफलाय प्रकृतेऽग्निहोत्रे दध्यादिगुणो विहितस्तथेहापि एतस्यैवेति प्रकृतपरामर्शकिनैतच्छब्देन अन्यव्यावर्तकैवकारेण च अग्निष्टुद्यागे समर्पिते सति यजेतेति तमनूद्य तत्र

रेवतीनामृचां वारवन्तीयनामकसाम्ना यः सम्बन्धः सोयं पशुफलाय विधीयते। विशिष्टयागान्तरविधौ तु गौरवप्रकृतहानाप्रकृतकल्पनाप्रसङ्ग इति।

सिद्धान्तस्तु पूर्वकर्मानुवादेन फलाय गुणविधौ रेवत्याधारकवारवन्तीयसाम्नः साक्षाद्यागसाधनत्वायोगात् अङ्गावतरणन्यायेन तदङ्गस्तोत्रनिर्वृत्तिद्वारा फलसाधनत्वस्य च यागाङ्गत्वेनाचोदितत्वेनायोगात्, 'सप्तदशारत्निर्वाजपेयस्य यूपः' इति वाजपेयांगत्वेन चोदितस्य सप्तदशारत्नित्वस्य वाजपेये आनर्थक्यात् तदङ्गपशुयागेऽवतार उक्तः 'आनर्थक्यात्तदङ्गेषु' (३-१-१८) इति सूत्रे। न चेह वारवन्तीयं यागाङ्गत्वेन चोदितम्। तस्य फलशेषत्वात्। अतः स्तोत्रसम्बन्धस्यान्यतोऽप्राप्तस्य यागे फलसम्बन्धस्य च विधेयतया विधेयभेदात् वाक्यभेदः स्यात्। दध्यादेर्होमसाधनत्वस्य प्रकरणादितः प्राप्त्या फलसम्बन्धमात्रविधानात् न पूर्वत्र वाक्यभेदः। तस्मात् रेवतीवारवन्तीयसम्बन्धविशिष्टापूर्वयागकरणिका भावना फलाय विधीयत इति। तथा च **सूत्रम् समेषु** निरपेक्षेषु वारवन्तीयादिशब्देषु **कर्मयुक्तं** फलं **स्यात्**। न गुणयुक्तमिति।

फलन्तु, पूर्वपक्षे ब्रह्मवर्चसकामनाप्रयुक्ताग्निष्टुत्प्रयोगमुपजीव्यैव पशुकामनया रेवतीषु वारवन्तीयप्रयोगः। **सिद्धान्ते** तु पशुकामनाप्रयुक्तमेव क्रत्वन्तरमिति।

इति द्वादशं वारवन्तीयादीनां कर्मान्तरताधिकरणम्

अथ त्रयोदशं सौभरनिधनयोः कामैक्याधिकरणम् (सूत्रे २८-२९)

सौभरे पुरुषश्रुतेर्निधने कामसंयोगः ॥ २८ ॥

(सर्वस्य वोक्तकामत्वात्तस्मिन् कामश्रुतिः स्यात्, निधनार्था पुनःश्रुतिः ॥२९॥)

पूर्ववैषम्येण शङ्कनात् प्रत्युदाहरणसङ्गतिः। ज्योतिष्टोमे 'सौभरमुक्थ्यानां ब्रह्म साम' इति नित्यक्रत्वर्थेन विहितं सौभरमेव 'यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीत' इति ब्रह्मसामस्तोत्राश्रयं तत् फलत्रयसाधनत्वेन श्रुतम्। तदेतत् सौभरं प्रकृत्य श्रूयते। 'हीषिति वृष्टिकामाय निधनं कुर्यात्, ऊर्गीत्यन्नाद्यकामाय, ऊ इति स्वर्गकामाय' इति। हीषादीनि **स्तोभाक्षराणि। सौभरं** नाम सामविशेषः। **निधनशब्दस्तु** प्रस्तावः प्रतिहारः उद्गीथः उपद्रवो निधनमिति प्रस्तावादिभक्तिभिरुपेतस्य साम्नोऽन्त्यभक्तेर्वाचकः। **भक्तिः** स्तोभाक्षररूपसामैकदेशः। तत्र **सन्देहः** वृष्ट्यादेः सौभरफलात् हीषादीनि पृथगपरस्य वृष्ट्यादेर्निमित्तम्, उत सौभरस्यैव फलं साधयतो व्यवस्थार्थे तन्निधनं नियम्यत इति।

पूर्वपक्षस्तु युक्तं पूर्वत्र रेवतीवाक्ये वाक्यभेदप्रसङ्गेन प्रकृताग्निष्टुत्कर्माश्रयेण गुणात् फलमित्यस्यायोगेन कर्मान्तरात्फलमिति । अत्र तु प्रकृतस्तोत्राश्रयेण हीषादिगुणादेव फलमित्युक्तौ बाधकाभावात् । किञ्च हीषादिविधिवाक्ये वृष्टिकामायेत्यादिना तादर्थ्ये विहितचतुर्थी हीषादीनां वृष्ट्यादिकामपुरुषशेषत्वं गमयति । तच्छेषत्वं च पुरुषापेक्षितफलहेतुत्वे उपपद्यते नान्यथेति सौभरस्य हीषित्यादिनिधनस्य च द्वयोः फलभूते द्वे वृष्ट्यादिके भवतः । तदुभयमेलनान्महावृष्ट्यादिकमिति । तदुक्तं **सूत्रे, सौभरे फलार्थे** प्रकृते सति **निधने** हीषादौ **कामसंयोगः** वृष्ट्यन्तरादिफलसम्बन्धः । कुतः? **पुरुषश्रुतेः** वृष्टिकामायेत्यादिपदैः फलार्थिनः पुरुषस्य श्रवणादिति ।

सिद्धान्तस्तु सौभरविधौ यो वृष्ट्याद्यकामः स एव हीषादिवाक्यैः प्रत्यभिज्ञायते । तस्या भ्रान्तित्वे बाधकाभावात् । अतः सौभरवाक्यफलभूता वृष्ट्यादय एव हीषादिवाक्येष्वनूद्यन्त इति न फलान्तरम् । न चैवं हीषादीनां नानाशाखास्वध्ययनादेव सौभरे प्राप्तत्वात् व्यर्थोऽयं विधिरिति वाच्यम् । फलत्रयकामानां त्रयाणामनियमेन हीषादिमध्ये यस्य कस्यचिन्निधनस्य प्राप्तौ विधेः 'वृष्टकामो हीषित्येव निधनं कुर्यात्' इति नियमार्थत्वादिति ।

फलन्तु, पूर्वपक्षे 'एतत्फलकाम एवं निधनं कुर्यात्' इति सौभरविशेषनियमासिद्धेः सौभरत्रयस्यापि फलत्रयसाधारण्यात् वृष्टिकामप्रयोगेऽपि ऊर्गिति निधनयुक्तसौभरस्यापि प्रयोगः । तथा तस्मिन्नेव प्रयोगे अन्नाद्यकामनायां तस्यापि सिद्धिः । **सिद्धान्ते तु** तत्तन्निधनयुक्तमेव सौभरं तत्तदेकैकफलार्थमेव प्रयोक्तव्यमिति ।

इति त्रयोदशं सौभरनिधनयोः कामैक्याधिकरणम् (सूत्रे २८-२९)

इति श्रीभाट्टसङ्ग्रहे सर्वतन्त्रस्वतन्त्र श्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते द्वितीयाध्यायस्य द्वितीयः पादः

अस्मिन् पादे अधिकरणानि १३ सूत्राणि २९
आदितः " ७३ " २२८

अथ द्वितीयाध्यायस्य तृतीयः पादः

अथ प्रथमं ग्रहाग्रताया ज्योतिष्टोमाङ्गताधिकरणम् (सूत्रे १-२)

हरिः ॐ ।। शब्दान्तराभ्याससङ्ख्यानामधेयगुणप्रकरणरूपेषु कर्मभेदप्रमाणेषु पञ्चभिः कर्मभेदः सापवादः पूर्वपादेऽभिहितः । अत्र त्ववशिष्टप्रकरणात् कर्मभेदो गुणगतविशेषचिन्तापूर्वकं सापवादो निरूप्यत इति पूर्वपादानन्तर्यमस्य ज्ञेयम् ।

गुणस्तु क्रतुसंयोगात् कर्मान्तरं प्रयोजयेत् संयोगस्याशेषभूतत्वात् ॥ १ ॥

(एकस्य तु लिङ्गभेदात्प्रयोजनार्थमुच्येतैकत्वं गुणवाक्यत्वात् ॥ २ ॥

ज्योतिष्टोमे हि आरादुपकारकाणि आज्यपृष्ठादीनि स्तोत्राणि, तत्साधनानि रथन्तरबृहद्गायत्र-जगद्वैरूपवैराजशाक्वररैवतादिसामानि च सन्ति। तमिमं ज्योतिष्टोमं प्रकृत्य श्रूयते। ''यदि रथन्तरसामा सोमः स्यात् ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्, यदि बृहत्सामा शुक्राग्रान्, यदि जगत्सामा आग्रयणाग्रान्'' इत्यादि। सोमशब्देन सोमरससाधनको याग उच्यते। तस्य रथन्तरसामोपेतत्वे ऐन्द्रवायवग्रहं प्रथमं गृहीत्वा अन्यान् पश्चात्गृह्णीयात् इत्येवंरूपेणार्थो ध्येयः। अत्र **सन्देहः** ऐन्द्रवायवाद्यग्रताविशिष्ट-रथन्तराद्येकैकसामकं कर्मान्तरं विधीयते, अथ प्रकृते ज्यातिष्टोमे ऐन्द्रवायवाग्रतादिगुणविधिरिति।

पूर्वपक्षस्तु कर्मान्तरमिति। कुतः? रथन्तरं साम अस्येति बहव्रीहिरयं समासो रथन्तरसाम-विशेषणकः। विशेषणं च विशेष्यव्यापि विशेषणान्तरव्यवच्छेदकं भवति। ज्योतिष्टोमे च गायत्रादि-सामान्तरोपेते विशेष्यभूतज्योतिष्टोमव्यापित्वसामान्तरव्यवच्छेदकत्वयोरयोगात् रथन्तरसामकं ज्योतिष्टोमादन्यदेव कर्मेति वाच्यत्वात्। एवं बृहत्सामेत्यादावपि ध्येयमिति। तथा च **सूत्रम्, गुणस्तु** ऐन्द्रवायवाग्रतादिः **कर्मान्तरमेव** प्रयोजयेत्। कुतः ? रथन्तरसामेत्यपूर्व**क्रतुसंयोगात्**। न च प्रकृत एव क्रतुरस्त्विति वाच्यम्। **संयोगस्याशेषभूतत्वात्** रथन्तरसंयोगस्य अशेषे कृत्स्नेऽपि विकृतौ **भूतत्वात्** श्रुतत्वात्। ज्योतिष्टोमस्य च रथन्तरेण कृत्स्नस्य संयोगाभावादिति।

सिद्धान्तस्तु 'यदि सोमो रथन्तरसामा स्यात्' इति प्राप्त्यपेक्षनिमित्तवाचियदिशब्देन प्रकरणेन च प्रकृतज्योतिष्टोमस्यैव प्रत्यभिज्ञानात्। विशेषणस्य स्वायोगव्यवच्छेदेन स्वसत्तामात्रतया विशेषणत्वो-पपत्त्या विशेषणान्तरव्यवच्छेदविशेष्यव्यापित्वयोरनावश्यकत्वात् व्यवच्छेदकत्वेपि वैकल्पिकविरोधि-बृहदादिसामान्तरव्यवच्छेदसम्भवेनाविरोधिगायत्रादिसामान्तराव्यवच्छेदेऽपि विशेषणत्वोपपत्तेर्न कर्मान्तरम्। किन्तु ज्योतिष्टोम एव रथन्तरादिसाम्नि निमित्ते, ऐन्द्रवायवाग्रतादिगुणो विधीयते इति।

फलन्तु, पूर्वपक्षे ज्योतिष्टोमे पाठप्राप्तस्याप्यैन्द्रवायवाग्रत्वस्यानैमित्तिकत्वात् बृहत्सामत्व-पक्षेऽप्यैन्द्रवायवाग्रतैवानुष्ठेया। **सिद्धान्ते** तु पाठप्राप्तस्यापि तस्य नैमित्तिकत्वात् बृहत्सामत्वपक्षे शुक्राग्रतैव कार्येति।

इति प्रथमं ग्रहाग्रताया ज्योतिष्टोमाङ्गताधिकरणम् (सूत्रे १-२)

अथ द्वितीयमवेष्टेः क्रत्वन्तरताधिकरणम्

अवेष्टौ यज्ञसंयोगात् क्रतुप्रधानमुच्यते ॥ ३ ॥

पूर्वसिद्धान्तन्यायेन शङ्कनात् सङ्गतिः । 'राजा राजसूयेन स्वाराज्यकामो यजेत' इति इष्टि-पशुसोमाख्ययागसमुदायात्मा राजसूयः श्रुतः । तत्रावेष्टिर्नामेष्टिः पञ्चहविष्काऽऽम्नाता 'आग्नेय-मष्टाकपालं निर्वपति हिरण्यं दक्षिणा, ऐन्द्रमेकादशकपालं ऋषभो दक्षिणा, वैश्वदेवं चरुं पिशङ्गी प्रष्ठौही दक्षिणा, मैत्रावरुणीमामिक्षां वशा दक्षिणा, बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा' इत्यादि । तस्यामवेष्टौ हविषां क्रमव्यत्ययः श्रूयते । ''यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा तमभिघारयेत्, यदि राजन्य ऐन्द्रम्, यदि वैश्यो वैश्वदेवम्'' इति । तत्र **सन्देहः** राजसूये तत्कर्तृतया प्राप्तब्राह्मणादिकं निमित्तीकृत्य प्रकृतराजसूये मध्यनिधानगुणविधिः, उताप्राप्तब्राह्मणादिविशिष्ट-कर्मान्तरविधिरिति ।

पूर्वपक्षस्तु यथा हि पूर्वत्र ऐन्द्रवायवाग्रत्वादिकं व्यवस्थापयितुं रथन्तरसामत्वादिकं निमित्त-त्वेनानूदितं तथेहापि बार्हस्पत्यादिहविः मध्ये स्थापयितुं 'यदि ब्राह्मणः' इत्यादिना ब्राह्मणादिकं निमित्तत्वेनानूद्यते । न च राजसूयवाक्ये राजपदश्रवणेन ब्राह्मणवैश्ययोरप्राप्तिरिति शङ्क्यम् । तत्र राजशब्दस्याऽर्यप्रसिध्या जनपदादिरक्षणरूपराज्यकर्तृत्वनिमित्तकत्वात् तस्य च निमित्तस्य त्रिष्वपि सम्भवेन राजशब्देन ब्राह्मणादित्रयस्यापि प्राप्तेरिति ।

सिद्धान्तस्तु पाणिनीये 'तस्य कर्माणि' इत्यधिकारे 'पत्यन्तपुरोहितादिभ्यो यक्' (पा. सू. ५-१-१२८) इति सूत्रेण पुरोहितादिगणे पठितेन 'राजाऽसे' इति गणसूत्रेण **आसे** असमासे राजशब्दो राज्ञः कर्मेत्यर्थे यकमुत्पदयतीत्युक्त्या राजशब्दयोगादेव राज्यशब्दनिष्पत्त्युक्त्या न राज्ययोगनिमित्तत्वं राजशब्दस्यार्यप्रसिध्या ग्राह्यम्, आर्यप्रयोगरूपाचारादपि स्मृतेः प्राबल्यात्, आर्यवरपाणिन्यनु-गृहीतायाः अनार्यद्रविडप्रसिद्धेः क्षत्रियमात्रे सत्वाच्च 'राजानमभिषेचयेत्' इति राज्ययोगात्प्रागेव क्षत्रियमात्रे राजशब्दस्य वेदे प्रयोगाच्च रूढ्या राजपदस्य क्षत्रियमात्रवाचित्वेन ब्राह्मणादेरप्राप्तेः अप्राप्तब्राह्मणादिकर्तृकं बार्हस्पत्यादिमध्यनिधानादिगुणविशिष्टं कर्मान्तरमिति । तदुक्तं **सूत्रे, अवेष्टौ** 'यदि ब्राह्मणः' इत्यादिवाक्यं **क्रतुप्रधानं** ब्राह्मणादिविशिष्टापूर्वक्रतुविधानपरमेव । कुतः ? **यज्ञसंयोगात्** राजशब्देन क्षत्रियस्यैव राजसूयाख्ययज्ञसंयोगादिति । **फलन्तु** त्रयाणां कर्तृता राजसूय इति **पूर्वपक्षे** । **सिद्धान्ते** तु राज्ञ एवेति व्यक्तम् ।

इति द्वितीयमवेष्टेः क्रत्वन्तरताधिकरणम्

अथ तृतीयमाधानस्य विधेयत्वाधिकरणम्

आधाने सर्वशेषत्वात् ॥ ४ ॥

पूर्ववैषम्येण शङ्कनात् सङ्गतिः । अनारभ्य श्रूयते 'वसन्ते ब्राह्मणोऽग्नीनादधीत' ग्रीष्मे राजन्यः, शरदि वैश्यः'' इति । तथा ''वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजन्यम्, शरदि वैश्यम्'' इति च । तत्र **सन्देहः** आधानोपनयनयोः कर्तृत्वेनार्थप्राप्तानां ब्राह्मणादीनां ब्राह्मणश्चेद्वसन्ते राजन्यश्चेद्ग्रीष्मे इत्यादिरूपेण कालविधिं प्रति निमित्तार्थानि वाक्यानि, उताप्राप्तानां ब्राह्मणादीनां वसन्तादिविशिष्टाधानोपनयनविध्यर्थानीति ।

पूर्वपक्षस्तु युक्तः पूर्वत्रावेष्टौ ब्राह्मणादेरप्राप्त्या निमित्तार्थत्वाभावः । नेह तथा । क्रतुविध्यन्यथानुपपत्त्या प्राप्तिसम्भवात् । ''अग्निहोत्रं जुहुयात् स्वर्गकामः'' इति त्रैवर्णिकसाधारणक्रतुविधयस्तदनुष्ठानद्वारा स्वर्गाद्यर्थाः । न च क्रत्वनुष्ठानमाहवनीयाद्यग्निं वेदाध्ययनतदर्थज्ञानरूपविद्यां च विना युक्तम् । न च ते आधानोपनयने विना शक्यसम्पादे । अत आक्षेपादेव ब्राह्मणादेराधानोपनयनसम्बन्धसिद्धेर्निमित्तार्थकानि वाक्यानीति ।

सिद्धान्तस्तु क्रत्वनुष्ठानस्याग्निविद्यासाध्यत्वेऽपि लौकिकाग्नौ वा अन्येनाऽहिताहवनीयादौ क्रयादिना सम्पादिते वा पुस्तकनिरीक्षणाद्युपायसम्पादितविद्यया वोपपत्त्या नावश्यमाधानोपनयने आक्षिपन्ति क्रतुविधयः इत्यप्राप्तबाह्मणादेर्वसन्तादिविशिष्टाधानोपनयनविध्यर्थानि वाक्यानि । तथा च **सूत्रम्, आधाने** आधानपदवति वसन्तादिवाक्ये अप्राप्ताधानविधिः । कुतः? **सर्वशेषत्वात्** सर्वकर्मशेषभावादित्यर्थः **इत्येके । अन्ये तु असर्वशेषत्वात्** । सर्वक्रत्वनङ्गत्वात् । क्रत्वङ्गत्वे हि क्रतुविधिभिरेवाऽक्षेपान्निमित्तार्थानि वाक्यानि स्युरित्यर्थ इत्याहुः । **फलन्तु** शूद्राणामप्याधानोपनयने **पूर्वपक्षे, सिद्धान्ते** तु त्रैवर्णिकानामेवेति ।

इति तृतीयमाधानस्य विधेयताधिकरणम्

अथ चतुर्थं दाक्षायणादीनां गुणताधिकरणम् (सूत्राणि ५-११)

अयनेषु चोदनान्तरं संज्ञोपसम्बन्धात् ॥ ५ ॥

(अगुणाच्च कर्मचोदना ॥ ६ ॥ समाप्तं च फले वाक्यम् ॥ ७ ॥ विकारो वा प्रकरणात् ॥ ८ ॥ लिङ्गदर्शनाच्च ॥ ९ ॥ गुणात्संज्ञोपसम्बन्धः ॥ १० ॥ समाप्तिरविशिष्टा ॥ ११ ॥)

आधानादिवदपूर्वकर्मविधित्वमाशङ्क्य निरासादत्रापवादिकी **सङ्गतिः** । दर्शपूर्णमासप्रकरणे ''दाक्षायणयज्ञेन स्वर्गकामो यजेत'' इति ''साकम्प्रस्थायीयेन यजेत पशुकामः'' इति च श्रुतम् । तत्र **सन्देहः** दाक्षायणादिशब्देन कर्मान्तरविधिरुत दर्शपूर्णमासयोरेव फलाय गुणविधिरिति ।

दाक्षायणादिशब्दितस्य कस्यचिद्गुणस्याप्रसिद्धेः उद्भिदादिशब्दवद्यजिसामानाधिकरण्येन कर्मनामत्वात् 'अथैष ज्योतिः' इत्यादिवत् संज्ञाभेदात् कर्मान्तरमिति **पूर्वः पक्षः** । तदुक्तं **सूत्रे, अयनेषु** अयनादिशब्दयुक्तेषु 'दाक्षयणयज्ञेन' इत्यादिवाक्येषु **चोदनान्तरं** कर्मान्तरविधानं स्यात् । कुतः? **संज्ञोपसम्बन्धादिति** ।

सिद्धान्तस्तु दाक्षायणादिशब्दस्य गुणवाचितया लोकतोऽप्रसिद्धत्वेऽपि दक्षस्य पुनरावृत्तावनलसस्य सम्बन्धि दाक्षमिति वा दक्षस्य यजमानस्य इमे दाक्षा ऋत्विजः, तेषां तत्कर्तृकमिति यावत्, अयनमावृत्तिर्यस्य तेन यज्ञेन प्रकृतदर्शपौर्णमासाख्येनेति निरुक्त्या 'द्वे पौर्णमास्ये यजेत द्वे अमावास्ये' इति वाक्यशेषाच्च, प्रकृते कर्मणि 'दध्नेन्द्रियकामस्य' इत्यत्रेव फलायावृत्तिरूपगुणविधिः । तथा अमावास्यायागे द्वौ द्वौ दोहौ सम्पाद्य चतसृणां दधिपयसोः कुम्भीनां सहप्रस्थानं साकम्प्रस्थायी तद्युक्तः साकम्प्रस्थायीयः इत्यवयवव्युत्पत्त्या ''सह कुम्भीभिरभिक्रामं जुहोति'' इति वाक्यशेषेण च सहप्रस्थानलक्षणगुणस्य फलाय विधिरिति न कर्मान्तरमिति ।

फलन्तु, पूर्वपक्षे दाक्षायणयज्ञादेः पृथगेव प्रयोगः। **सिद्धान्ते** तु दर्शादिरेवाऽवृत्त्यादिना प्रयोग इति ।

इति चतुर्थं दाक्षायणादीनां गुणताधिकरणम् (सूत्राणि ५-११)

अथ पञ्चमं द्रव्यदेवतायुक्तानां यागान्तरताधिकरणम् (सूत्राणि १२-१५)

संस्कारश्चाप्रकरणेऽकर्मशब्दत्वात् ॥ १२ ॥

(यावदुक्तं वा कर्मणः श्रुतिमूलत्वात् ॥ १३ ॥ यजतिस्तु द्रव्यफलभोक्तृसंयोगादेतेषां कर्मसम्बन्धात् ॥ १४ ॥ लिङ्गदर्शनाच्च ॥ १५ ॥)

पूर्वत्रेवात्रापि गुणविधिरिति शङ्कनात् **सङ्गतिः** । दर्शपौर्णमासप्रकरणे 'ईषामालभेत' इति 'चतुरो मुष्टीर्निर्वपति' इति च श्रुतम् । ईषेति शकटगतो लाङ्गलवद्दीर्घः काष्ठविशेषः । तथा 'वायव्यं श्वेतमालभेत भूतिकामः' इति 'सौर्यं चरुं निर्वपेद् ब्रह्मवर्चसकामः' इति चानारभ्य वाक्यद्वयं श्रूयते । तत्र

सन्देहः वायव्यसौर्यवाक्ययोः ईषावाक्यनिर्वापवाक्यगतालम्भनिर्वापावनूद्य क्रमात् श्वेतत्वगुणचरु-रूपगुणौ विधीयेते, उत यावदुक्तमालम्भनमात्रं निर्वापमात्रं च विधीयते, उत द्रव्यदेवताविशिष्टं कर्मान्तरमिति।

पूर्वपक्षस्तु ईषावाक्यस्थस्पर्शशब्दितमालम्भनमनूद्याऽलभ्यायामीषायां श्वेतत्वगुणो विधीयते 'श्वेतामीषामालभेत' इति। तस्य श्वेतकाष्ठस्य वायुना स्पृश्यमानत्वात् वायव्यता सम्भवति। तथा मुष्टिवाक्यस्थनिर्वापमनूद्य चरुगुणो विधीयते। 'निर्वपेत्' इति यत् तत् चरुम्, चरौ स्थाल्यामिति सप्तम्यर्थे द्वितीया। निरुप्तस्य हविष आग्नेयतया तेजोदैवत्यत्वसाम्यात्सौर्यत्वं च युक्तम्। भूतिब्रह्म-वर्चसकामशब्दौ सार्वकामिकदर्शपूर्णमासयोः पक्षे प्राप्तैकदेशफलानुवादावित्येकः। यथोक्तं **सूत्रे, अप्रकरणे** 'आलभेत' इत्यादिना प्रकृतः **संस्कार एवानूद्यते**। न यागान्तरं विधीयते। कुतः ? **अकर्मशब्दत्वात्** अपूर्वकर्मविधायकशब्दत्वाभावादिति। **अन्यस्तु** फलपदयोः नित्यवच्छ्रुतयोः सम्भव-त्प्रयोजनयोश्च पाक्षिकानुवादत्वरूपमानर्थक्यं न युक्तमिति गुणफलविशिष्टे आलम्भननिर्वापरूपे यथोक्तकर्मान्तरे विधीयेते इति।

सिद्धान्तस्तु श्वेतपशुचरुद्रव्ययोस्तद्धितान्तशब्दार्थयोर्वायुसूर्यदेवतयोश्च स्पष्टं प्रतीत्या द्रव्यदेवता-लक्षणरूपवतोर्यागयोरर्थात् प्राप्तयोर्निरासायोगात्, द्रव्यदेवताफलविशिष्टयागयोर्विधिर्युक्तः। 'भूतिकामो वायव्येन श्वेतेन पशुना यजेत' इति 'ब्रह्मवर्चसकामः सौर्येण चरुणा यजेत, इति द्रव्यदेवतासम्बन्ध-कल्पितस्य यागस्य 'आलभेत' इत्यादौ श्रुतलिङ्प्रत्ययेन कर्तव्यतोक्तौ आलम्भनिर्वापौ विना यागा-सिद्धेरर्थात् प्राप्तालम्भनिर्वापयोरनुवादकावालम्भनिर्वापधातू इति। **फलन्तु** कर्मान्तरानुष्ठानं **सिद्धान्ते**। **पूर्वपक्षे** तन्नेति व्यक्तम्।

इति पञ्चमं द्रव्यदेवतायुक्तानां यागान्तरत्वाधिकरणम् (सूत्राणि १२-१५)

अथ षष्ठं वत्सालम्भादीनां संस्कारताधिकरणम् (सूत्रे १६-१७)

विषये प्रायदर्शनात् ॥ १६ ॥

(अर्थवादोपपत्तेश्च ॥ १७ ॥)

पूर्वन्यायेन यागविधित्वशङ्कनादापवादिकी **सङ्गतिः**। अग्निहोत्रदोहप्रकरणे 'वत्समालभेत' इति श्रुतम्। तत्र यागविधिरुत संस्कारमात्रविधिरिति **सन्देहः**। वायव्यश्वेतालम्भनवत् प्राणिद्रव्या-लम्भनत्वात् वत्सपशुकयागविधिरिति **प्राप्ते**।

द्रव्यदेवतासंयोगान्यथानुपपत्त्या हि पूर्वत्र यागकल्पना । न चेहासावस्ति, अग्निहोत्रदोहादिसंस्कारप्रायपठितत्वात् आलम्भशब्दितस्पर्शो वत्ससंस्कार एवेति **सिद्धान्तः** । तथा च **सूत्रम्, विषये** यागसंस्कारसंशये दोहादिसंस्कार**प्रायदर्शनात्** संस्कार एव वत्सालम्भ इति । **फलन्तु** यागान्तरानुष्ठानं **पूर्वपक्षे, सिद्धान्ते** तु नेति व्यक्तम् ।

इति षष्ठं वत्सालम्भादीनां संस्कारताधिकरणम् (सूत्रे १६-१७)

अथ सप्तमं नैवारचरोरराधानार्थताधिकरणम्

संयुक्तस्त्वर्थशब्देन तदर्थः श्रुतिसंयोगात् ॥ १८ ॥

पूर्ववैषम्येण शङ्कनात् **सङ्गतिः** । चयनं प्रकृत्य श्रूयते 'नैवारश्चरुर्भवति' इति 'चरुमुपदधाति' इति 'बृहस्पतेर्वा एतदन्नं यन्नीवाराः' इति च । तत्र **सन्देहः** किं चरोः यावदुक्तमुपधानमात्रं विहितम्, उत यागविधिरिति । पूर्वत्र देवतासंयोगाप्रतीतेः यावदुक्तविधानेऽप्यत्र 'बृहस्पतेर्वा एतदन्नम्' इति वाक्यशेषेण देवतासम्बन्धप्रतीत्या यागविधिसम्भवात् उपधानं यागोपयुक्तस्य स्विष्टकृदादिवत् प्रतिपत्तिः इति **प्राप्ते,**

यागविधौ हि निश्चिते देवतापेक्षायां वाक्यशेषाद्देवताप्रापणं युक्तम् । न चेह यागविधिः प्रमितः । किन्तु उपधानमात्रम् । न च तस्य यागवद्देवतापेक्षाऽस्ति । अतोऽर्थवादमात्रं वाक्यशेष इत्युपधानमात्रं विहितं चरोः, न यागविधिरिति **सिद्धान्तः । तथा च सूत्रम्, अर्थशब्देन** अर्थः कार्यमुपधानम्, तद्वाचिशब्देन उपदधातीतिशब्देनेति यावत् । **संयुक्तश्चरुस्तदर्थ एव,** न यागार्थः । उपधानेनैव **श्रुत्या संयोगादिति । फलन्तु** पूर्वत्रेव व्यक्तम् ।

इति सप्तमं नैवारचरोराधानार्थताधिकरणम्

अथाष्टमं त्वाष्ट्रपात्नीवतस्य पर्यग्निकरणगुणकत्वाधिकरणम्

पात्नीवते तु पूर्ववत्त्वादवच्छेदः ॥ १९ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात् **सङ्गतिः** । 'त्वाष्ट्रं पात्नीवतमालभेत' इति प्रकृत्य श्रूयते-'पर्यग्निकृतं पात्नीवतमुत्सृजति' इति । तत्र प्रकृते कर्मणि पर्यग्निकरणान्तगुणविधिरुत यागान्तरविधिरिति **सन्देहे** युक्तः पूर्वत्र वाक्यशेषस्थत्वात् बृहस्पतिपदस्य देवतापरत्वाभावः । अत्र तु विध्युद्देश एव पात्नीवत-

शब्देन तद्धितान्तेन पत्नीवन्नामकदेवतासम्बन्धस्य पर्यग्निकृतशब्देन संस्कृतपशुद्रव्यस्य च प्रतीतेर्वायव्य-पशुवद्यागविधिरिति **प्राप्ते,**

अनारभ्याधीते वायव्यश्वेतपशुवाक्ये प्रकृतप्रत्यभिज्ञाऽभावेन यागान्तरविधिः । इह त्वालभ्यत्वेन प्रकृतपशोः पात्नीवतशब्देन प्रत्यभिज्ञानात्तदनुवादेन पर्यग्निकरणान्ताङ्गकलापविधिः । न च तस्य चोदकप्राप्तत्वाद्विधिवैयर्थ्यम् । उत्तराङ्गनिवृत्त्यर्थत्वात् । न चैवं स्वार्थत्यागान्यार्थस्वीकारप्राप्तबाध-रूपदोषत्रययुक्तपरिसङ्ख्यापत्तिः । प्रत्यक्षोपदेशस्य शीघ्रप्रवृत्त्या चोदकप्रवृत्तेः प्रागेवोत्सर्गवाक्येन पर्यग्निकरणान्ताङ्गकलापबोधने सति विकृतियागस्य तावतैव नैराकांक्ष्येण चोदकस्यैवाप्रवृत्त्यार्था-दुत्तराङ्गनिवृत्तिलाभादित्यर्थसिद्ध उत्तराङ्गलोप उत्सृजतीत्यनूद्यते । न चैवं पर्यग्निकरणात्पूर्वाङ्गानामपि निवृत्तिरिति शङ्क्यम् । प्रकृतौ क्लृप्तोपकारस्यैवात्रोपदेशात् पूर्वाङ्गानन्तरभाविन एव क्लृप्तोपकारत्वेन पर्यग्निकरणान्ताङ्गकलापोपदेशसिद्धेरिति **सिद्धान्तः** । तथा च **सूत्रम्, पात्नीवते** 'पर्यग्निकृतं पात्नीवतम्' इति वाक्ये **पूर्ववत्त्वात्** पूर्वस्य प्रत्यभिज्ञाविषयकर्मणः सत्त्वात् तत्रैव पर्यग्निकरणान्ताङ्गकलापविधानात् तदुत्तराङ्गकलापस्य **अवच्छेदो** व्यवच्छेदो व्यावृत्तिः स्यादिति ।

फलन्तु क्लृप्तोपकारस्य प्राकृताङ्गस्य पुनर्विधाने हि चोदकनिवृत्त्या प्रकृतिशून्यत्वेनापूर्वकर्मत्वं भवति । इह च **पूर्वपक्षे** तदभावात् त्वाष्ट्रपात्नीवतस्य नापूर्वत्वम् । **सिद्धान्ते** तु तादृशस्य पर्यग्निकरणस्य पुनर्विधानादपूर्वत्वमिति ज्ञेयम् ।

इत्यष्टमं त्वाष्ट्रपात्नीवतस्य पर्यग्निकरणगुणकत्वाधिकरणम्

अथ नवममदाभ्यादीनां ग्रहनामताधिकरणम्

अद्रव्यत्वात्तु केवले कर्मशेषः स्यात् ॥ २० ॥

अत्रापि पूर्ववैषम्येण शङ्कनात् **सङ्गतिः** । अनारभ्य श्रूयते 'एष ह वै हविषा हविर्यजते योऽदाभ्यं गृहीत्वा सोमाय यजते' इति, तथा 'परा वा एतस्य प्राण एति, योंऽशुं गृह्णाति' इति च श्रुतम् । योऽदाभ्यं गृहीत्वा सोमाय यजते एष सोमाख्येन हविषा सोमाख्यं हविः यजत इति । परेत्यस्य एतीत्यनेनान्वये परेति विनश्यतीत्यर्थः । तत्र **सन्देहः** अदाभ्यांशुनामकयागान्तरविधिः, उत ज्योतिष्टोम एवैतद्ग्रहणविधिरिति ।

तत्र युक्तः पूर्वत्र प्रकृतप्रत्यभिज्ञानात् कर्मान्तरत्वाभावः अत्र तु अनारभ्याधीतत्वेन तदभावात्

कर्मान्तरविधिः । किञ्चादाभ्यशब्दस्यापूर्वनामत्वात् ग्रहणस्य संस्कारकर्मत्वेन नामधेयायोग्यत्वादेवं संज्ञाभेदात्तन्नामकं यागान्तरं 'यजते' इत्याख्यातेन अदाभ्यं यजते' इति विधीयते । अंशुमित्यत्र यजतेरश्रवणेऽपि नामविशेषबलादेवापूर्वयागविधिः । न च द्रव्याद्यभावः । ग्रहणलिङ्गेन ज्योतिष्टोम-विकृतित्वावगतौ तदीयविध्यन्तातिदेशेन तदीयद्रव्यदेवतयोः सम्भवादिति **प्राप्ते**,

अदाभ्यांशुशब्दयोर्नामत्वेप्यव्यवहितेन 'गृहीत्वा' इत्यनेन 'गृह्णाति' इत्यनेन चान्वये सम्भवति व्यवहितेन यजिना अन्वयायोगात् तौ ग्रहयोरेव नामनी । न यागयोः । अंशुवाक्ये यजेरश्रवणाच्च । अतो ज्योतिष्टोमगतसोमरसस्य ग्रहणाख्यसंस्काररूपगुणविधिरेव । न यागान्तरविधिः । ज्योतिष्टोमस्या-प्रकृतत्वेऽपि गृह्णातिना तदुपस्थापनात्, 'देवा वै यद्यज्ञेऽकुर्वत तदसुरा अकुर्वत, ते देवा अदाभ्ये छन्दांसि सवनानि समस्थापयन्' इत्यादिना तथा 'स एतं प्रजापतिरंशुमपश्यत्' इत्यादिना च तैत्तरीय-शाखायां षष्ठे काण्डे ज्योतिष्ठोमप्रकरणेनांश्वदाभ्यग्रहयोः स्पष्टं सम्बन्धावगमाच्चेति **सिद्धान्तः** । तथा च **सूत्रम्, केवले** द्रव्यदेवतादिरहिते अदाभ्यादिवाक्ये **कर्मशेषः** कर्माङ्गभूतः संस्कार एव विधेयः **स्यात्** । न यागः । कुतः ? **अद्रव्यत्वात्** द्रव्यदेवतादिरूपाभावात् इति ।

फलन्तु , पूर्वपक्षे यागान्तरानुष्ठानम् । **सिद्धान्ते तु** ज्योतिष्टोम एवांश्वदाभ्यग्रहयोरनुष्ठानमिति व्यक्तम् ।

इति नवममदाभ्यादीनां ग्रहनामताधिकरणम्

अथ दशममग्निचयनस्य संस्कारताधिकरणम् (सूत्राणि २१-२३)

अग्निस्तु लिङ्गदर्शनात् क्रतुशब्दः प्रतीयेत ॥ २१ ॥

(द्रव्यं वा स्याच्चोदनायास्तदर्थत्वात् ॥ २२ ॥ तत्संयोगात्क्रतुस्तदाख्यः स्यात्तेन धर्मविधानानि ॥ २३ ॥)

अत्रापि पूर्ववैषम्येण शङ्कनात् **सङ्गतिः** । ''य एवं विद्वानग्निं चिनुते'' इति विधाय श्रूयते 'अग्नेः स्तोत्रम्, अग्नेः शस्त्रम्' इति 'षडुपसदोऽग्नेश्चित्यस्य सम्भवन्ति' इति च । तत्र **सन्देहः** यावदुक्तचयन-मात्रं, उत अग्निनामकं यागान्तरं विधीयते, अथ ज्योतिष्टामादौ गुणविधिरिति ।

पूर्वपक्षस्तु यदुक्तं पूर्वत्र तैत्तिरीये क्रतुसंयोजकवाक्यसत्वेन ज्योतिष्टोमे गुणविधानमिति, नेह तथा

वाक्यमस्ति, येन ज्योतिष्टोमे गुणविधिरिति स्यात् । यावदुक्तचयनमात्रविधिपक्षस्त्वानर्थक्यादयुक्तः । अतोऽग्निनामकयागविधिः । यजेरश्रवणेपि 'अग्नेः स्तोत्रम्' इति वाक्यशेषे स्तोत्रशस्त्रादिरूपयाग-लिङ्गश्रवणात् । 'अथाऽतोऽग्निमग्निष्टोमेनानुयजति' इत्यग्निष्टोमाख्यसंस्थाविधिपरे वाक्ये 'यदग्निं यजति तदग्निष्टोमाख्यसंस्थाविशेषेण' इति यजिना अग्निनामककर्मणोऽनुवादाच्च । 'चिनुते' इति तु 'इष्टकाभि-रग्निं चिनुते' इत्यादिवाक्यप्राप्तानुवाद इति । तदुक्तं **सूत्रे, अग्निस्तु** 'य एवं विद्वान्' इति वाक्यस्थाग्नि-शब्दः **क्रतुशब्दः' क्रतुवाचक एव प्रतीयेत**, कुतः ? स्तोत्रशस्त्रादिरूपलि**ङ्गदर्शनात्**, यजतिना अनुवाद्यत्वरूपलिङ्गदर्शनादिति वेति ।

सिद्धान्तस्तु अग्निशब्दस्य रूढ्या वह्निवाचित्वात्, रूढेर्लिङ्गादिकल्प्याद्यागवाचित्वाद्बलवत्त्वात्, यागरूपयोर्द्रव्यदेवतयोरसिद्धेश्च न यागनामत्वमग्निशब्दस्य युक्तम् । किन्त्वग्नेश्चयनाख्यसंस्कारविधिरेव । चयननिर्वर्तितेष्टकारचितरूपस्थण्डिलविशेषे स्थापनमेवाग्नेः संस्कार इति चयनमप्यग्नेः परम्परया संस्कारत्वादग्नेः संस्कार इत्युच्यते । तस्य च संस्कृतस्याग्नेः ''अथातोऽग्निमग्निष्टोमेनानुयजन्ति, तमुक्थ्येन, तं षोडशिना, तमतिरात्रेण'' इत्यादिवाक्यैरग्निष्टोमादौ विनियोगेनार्थवत्त्वाच्च संस्कार-विधिरेवेति । **फलन्तु, पूर्वपक्षे** क्रतुविशेषानुष्ठानम् । **सिद्धान्ते तु** अग्निष्टोमाद्युपयुक्तगुणानुष्ठानम् ।

इति दशममग्निचयनस्य संस्कारताधिकरणम् (सूत्राणि २१-२३)

अथैकादशं मासाग्निहोत्रादीनां क्रत्वन्तरताधिकरणम्

प्रकरणान्तरे प्रयोजनान्यत्वम् ॥ २४ ॥

अत्र पूर्वन्यायेन शङ्कनात् **सङ्गतिः** । कुण्डपायिनामयननामकसत्रम् । तत्र श्रूयते ''उपसद्भिश्च-रित्वा, मासमग्निहोत्रं जुहोति'' ''मासं दर्शपूर्णमासाभ्यां यजेत'' इत्यादि । तत्र **सन्देहः** नित्याग्निहोत्र एव मासरूपो गुणो विधीयते, अथ कर्मान्तरमिति । अग्निहोत्रशब्देन नित्याग्निहोत्रस्योपस्थापनात् तस्य च प्राप्तत्वात् तदनुवादेनाप्राप्तो मासरूपो गुणो विधीयत इति **प्राप्ते**,

'उपसद्भिश्चरित्वा' इत्युक्तोपसदां नित्याग्निहोत्रे अभावेन तासां मासस्य च द्वयोरपि विधौ 'अग्निहोत्रं जुहोति इति यत्तदुपिसद्भिश्चरित्वा' इति 'मासम्' इति चान्वयेन वाक्यभेदप्रसङ्गेन तदुप-स्थापनायोगात्, अयनप्रकरणे तस्याप्रकृतत्वात्, अनुपादेयदेशकालनिमित्तान्यतमरूपगुणे सति पूर्व-कर्मानुपस्थापनाच्च, प्रकरणान्तरात् गुणद्वयविशिष्टं कर्मान्तरमग्निहोत्रनामकं विधीयते । तत्राम्ना

व्यवहारकरणं तु तद्धर्माणामतिदेशार्थमिति सप्तमे वक्ष्यते। गुणाधिकरणवैषम्यं **शास्त्रदीपिकादौ** ज्ञेयम्। तथा च **सूत्रम्, प्रकरणान्तरे** पूर्वकर्मासन्निधौ **प्रयोजनान्यत्वं** 'प्रयुज्यते अनेन' इति प्रयोजनं कर्म, तदन्यत्वमिति।

फलन्तु, अग्निहोत्रस्य न सत्रमध्येऽनुष्ठानं **पूर्वपक्षे**। तदनङ्गत्वात्। **सिद्धान्ते तु** तदङ्गत्वेन विधानात् तत्रानुष्ठानम्।

इत्येकादशं मासाग्निहोत्रादीनां क्रत्वन्तरताधिकरणम्

अथ द्वादशमाग्नेयादिकाम्येष्ट्यधिकरणम्

फलं चाकर्मसन्निधौ ॥ २४ ॥

पूर्ववैषम्येण शङ्कनात् **सङ्गतिः**। 'आग्नेयमष्टाकपालं निर्वपेद्रुक्कामः' इत्यनारभ्य श्रूयते। रुक्कामः तेजस्काम इत्यर्थः। अत्र **सन्देहः** दर्शपूर्णमासगताऽग्नेयानुवादेन फलसम्बन्धो विधीयते, अथ फलविशिष्टं कर्मान्तरमिति।

आग्नेयानुवादेन फलसम्बन्धविधिरिति **प्राप्तम्**। कुतः? वाक्येन आग्नेये फलसम्बन्धस्य प्रतीतेः। न च पूर्वोक्तमासाग्निहोत्रन्यायेन कर्मान्तरत्वम्, वैषम्यात्। युक्तं पूर्वत्र अयनमारभ्याधीतत्वेन अन्य-प्रकरणपठिततया कर्मान्तरत्वम्। इह त्वनारभ्याधीतत्वात् प्रकरणमेव नास्ति, कुतोऽन्यप्रकरण-पाठन्यायेन कर्मान्तरत्वम्। किञ्चानुपादेयो मासोऽग्निहोत्रानुष्ठानेन सम्पादनानर्हः। फलन्तूपादेयत्वा-दाग्नेयानुष्ठानेन सम्पादनार्हमिति।

सिद्धान्तस्तु प्रकरणान्तराभावेऽपि तस्यासन्निधिकृतत्वेन असन्निधेरेव कर्मान्तरप्रयोजकत्वेन, अत्र दार्शपौर्णमासिकाग्नेयस्यासन्निधानात् तद्बलात्, फलस्यापि उद्देश्यत्वेन मासस्येवानुपादेयत्वात् तदनु-वादेन कर्मान्तरविधिरिति। एवम् 'अग्नीषोमीयमेकादशकपालं निर्वपेद्ब्रह्मवर्चसकामः' 'ऐन्द्राग्न-मेकादशकपालं निर्वपेत्प्रजाकामः' इत्यादिकाम्येष्टिकाण्डपठितकाम्येष्टिष्वपि **संशयपूर्वपक्षसिद्धान्ता** ध्येयाः। तथा च **सूत्रम्, फलञ्चाकर्मसन्निधौ** इति। कर्मसन्निध्यभावे **फलं च** कर्मभेदकं स्यादिति। **फलन्तु**, आग्नेयस्य विकृतित्वाभावाद्व्यहकालता **पूर्वपक्षे**। **सिद्धान्ते तु** सद्यस्कालतेति। वक्ष्यते च द्व्यहकालता षष्ठे **'अभ्युदये कालापराधादिति'** पञ्चमपादाद्ये नये।

इति द्वादशमाग्नेयादिकाम्येष्ट्यधिकरणम्

अथ त्रयोदशमवेष्टेरन्नाद्यफलकत्वाधिकरणम्

सन्निधौ त्वविभागात् फलार्थेन पुनःश्रुतिः ॥ २६ ॥

पूर्वमसन्निधौ सति कर्मान्तरमित्युक्तम् । अत्र तु सन्निधौ सत्यपि कर्मान्तरमिति पूर्वोक्तस्य प्रत्युदाहरणतयेदमारभ्यते । ''समे दर्शपूर्णमासाभ्यां यजेत'' इति ''पौर्णमास्यां पौर्णमास्या यजेत'' इति ''अमावास्यायां अमावास्या यजेत'' इति 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' इति देशकाल-निमित्तानि दर्शपूर्णमासयोः श्रुतानि । तथा तत्रैव 'स्विष्टकृतं यजति' इति विहितस्विष्टकृद्यागस्य सन्निधौ स्विष्टकृद्यागहविःसंस्कारो विधिवाक्यशेषे 'शेषात् स्विष्टकृते समवद्यति' इति वाक्ये श्रुतः । तथा 'आग्नेयोऽष्टाकपालः पुरोडाशो भवति' इत्यादिनोक्तामवेष्टिनामकेष्टिं प्रकृत्य 'एतयाऽन्नाद्यकामं याजयेत्' इति फलं श्रुतम् ।

तत्र **सन्देहः** देशकालनिमित्तसंस्कारफलसम्बद्धकर्मपराण्येतानि वाक्यानि सन्निहितकर्मापेक्षया कर्मान्तरविधिपराणि उत सन्निहिते कर्मणि देशादिसम्बन्धमात्रविधिपराणीति ।

तत्र देशकालादेरनुपादेयत्वेन तदुद्देशेन कर्मण एवोपादेयतया विधेयतापत्तेः, यदाग्नेयादिवाक्ये विहितस्य दर्शस्य पुनर्विधानायोगाद्देशादिसम्बद्धकर्मान्तरविधिपराण्येतानि वाक्यानि इति **प्राप्ते** देशादेरनुपादेयत्वेनाविधेयत्वेपि प्रकृतसन्निहितप्रत्यभिज्ञया कर्मैक्यप्रतीतेः सन्निहिते कर्मणि देशादि-सम्बन्धस्याप्राप्तस्य विधिपराण्येतानि वाक्यानीति **सिद्धान्तः** । तथा च **सूत्रम्, सन्निधौ** प्रत्यभि-ज्ञाबलात् **अविभागात्** अभेदात् फलादिसम्बन्धार्थैव **पुनःश्रुतिः**, न कर्मान्तरविधानार्थेति ।

फलन्तु, नामातिदेशात् प्रसिद्धदर्शपूर्णमासादिधर्मककर्मान्तरानुष्ठानं **पूर्वपक्षे** । **सिद्धान्ते** तु प्रसिद्धदर्शपूर्णमासादेरेव निमित्तादावनुष्ठानमिति ।

इति त्रयोदशमवेष्टेरन्नाद्यफलकत्वाधिकरणम्

अथ चतुर्दशमाग्नेयद्विरुक्तेः स्तुत्यर्थताधिकरणम्

आग्नेयस्तूक्तहेतुत्वादभ्यासेन प्रतीयेत ॥ २७ ॥

(अविभागात्तु कर्मणा द्विरुक्तेर्न विधीयते ॥ २८ ॥ अन्यार्था वा पुनःश्रुतिः ॥ २९ ॥)

अत्र पूर्ववैषम्येण शङ्कनात्सङ्गतिः । दर्शपूर्णमासयोः 'यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इति कालद्वययुक्तमाग्नेयस्यैकं वाक्यम् । 'यदग्नेयोऽष्टाकपालोऽमावास्यायां भवति' इति एककालयुक्तमपरं वाक्यम् । तत्र कालद्वययुक्ताऽग्नेयापेक्षया एककालयुक्तमाग्नेयं कर्मान्तरमुत तस्यैवानुवाद इति **सन्देहः** ।

पूर्वपक्षस्तु, युक्तं पूर्वत्र कर्मान्तरपरत्वाभावेऽपि देशादिसम्बन्धविध्यर्थतया वाक्यसार्थक्यसम्भवेन प्रकृतकर्मानुवादत्वम् । इह तु कालद्वययुक्तवाक्योक्ताऽग्नेयस्य एककालयुक्तवाक्ये अनुवादत्वे वाक्यवैयर्थ्यापातेन कर्मविधेरेवोपेयत्वाद्विहितस्य विधानायोगात् अभ्यासेन समिदादिवत् कर्मान्तरमिति । तदुक्तं **सूत्रे, आग्नेयस्त्वभ्यासेन** भिन्न एव **प्रतीयेत** । कुतः ? अभ्यासे कर्मभेदकत्वहेतोः **एकस्यैवं** इत्यत्रोक्तत्वादिति ।

सिद्धान्तस्तु प्रत्यभिज्ञाबलात् आग्नेयस्यैकत्वे सिद्धे सति एककालवाक्यस्यानुवादकत्वोपपत्तेः । न चानुवादो व्यर्थः । 'नासोमयाजी सन्नयेत्' इत्युक्तत्वेनासोमयाजिनो दर्शे सान्नाय्याभावेन तं प्रति 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्' इति विहितैन्द्राग्नस्तुत्यर्थत्वात् । 'अमावास्यायामग्निमात्रदैवत्योऽपि यागः प्रशस्तः, किमुत इन्द्राग्नदैवत्यः' इत्यैन्द्राग्नस्तुतिरुन्नेया । **फलम्, पूर्वपक्षे** अमावास्यायामाग्नेयद्वयस्यानुष्ठानम् । **सिद्धान्ते तु** एकस्यैवेति ।

इति चतुर्दशमाग्नेयद्विरूक्तेः स्तुत्यर्थताधिकरणम्

इति भाट्टसङ्ग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य- श्रीराघवेन्द्रयतिसार्वभौमकृते

द्वितीयाध्यायस्य तृतीयः पादः

अस्मिन् पादे अधिकरणानि १४ सूत्राणि २९

आदितः " ८७ " २५७

अथ द्वितीयाध्यायस्य चतुर्थः पादः

अथ प्रथमं यावज्जीविकाग्निहोत्राधिकरणम् (सूत्राणि १-७)

एवं त्रिपाद्यां शब्दान्तरादिप्रमाणषट्केन कर्मणां स्वरूपभेदे सिद्धे, अत्रपादे तेषां प्रयोगभेदश्चिन्त्यत इति तदानन्तर्यमस्य ज्ञेयम् ।

यावज्जीविकोऽभ्यासः कर्मधर्मः प्रकरणात् ॥ १ ॥

(कर्तुर्वा श्रुतिसंयोगात् ॥ २ ॥ लिङ्गदर्शनाच्च कर्मधर्मे हि प्रक्रमेण नियम्येत, तत्रानर्थकमन्यत्स्यात् ॥ ३ ॥ अपवर्गं च दर्शयति, कालश्चेत्कर्मभेदः स्यात् ॥ ४ ॥ अनित्यत्वात्तु नैवं स्यात् ॥ ५ ॥ विरोधश्चापि पूर्ववत् ॥ ६ ॥ कर्तुस्तु नियमात्कालशास्त्रं निमित्तं स्यात् ॥ ७ ॥)

'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इति काम्यप्रयोगं विधाय पठ्यते 'यावज्जीवं दर्शपूर्णमासाभ्यां यजेत' इति । तत्र **सन्देहः** किं काम्यस्यैव कर्मणो यावज्जीवनकालमावृत्तिलक्षणोऽभ्यासो नाम गुणो विधीयते, अथ उत्पत्तिवाक्यावगतं कर्मस्वरूपं स्वर्गकामवाक्येन फल इव यावज्जीवनवाक्येन जीवने निमित्ते पुरुषार्थतया विधीयत इति ।

पूर्वपक्षस्तु काम्यस्यैव कर्मणो यावज्जीवनकालमभ्यासरूपगुणविधिरेवायम् । काम्यदर्शपूर्णमासप्रकरणादिति । तथा च **सूत्रम्, यावज्जीवमभ्यासः कर्मणः** काम्यस्य दर्शपूर्णमासादेः **धर्मः** स्यात् । **प्रकरणात्** प्रकरणानुग्रहबलात् इति ।

सिद्धान्तस्तु यावज्जीवशब्दस्य जीवनवाचिनः काले, यजतिशब्दस्याऽवृत्तिलक्षणाभ्यासरूपगुणे च लक्षणापत्तेः, मुख्यार्थे सम्भवति प्रकरणमात्रेण मुख्यार्थत्यागायोगात्, जीवने निमित्ते पुरुषस्य प्रत्यवायपरिहाराय दर्शपूर्णमासप्रयोगो विधीयत इति ।

फलन्तु, पूर्वपक्षे स्वर्गकामनावतैव यावज्जीवं दर्शपूर्णमासावावर्तनीयाविति काम्यस्यैव प्रयोगः । **सिद्धान्ते** तु कामनाभावेऽपि निमित्ते सति प्रत्यवायपरिहारार्थं कार्याविति नित्यस्य प्रयोगान्तरस्य विधिरिति ज्ञेयम् ।

इति प्रथमं यावज्जीविकाग्निहोत्राधिकरणम् (सूत्राणि १-७)

अथ द्वितीयं सर्वशाखाप्रत्ययैकताधिकरणम् (सूत्राणि ८-३२)

नामरूपधर्मविशेषपुनरुक्तिनिन्दाशक्तिसमाप्तिवचनप्रायश्चित्तान्यार्थदर्शनाच्छाखान्तरेषु कर्मभेदः स्यात् ॥ ८ ॥

(एकं वा संयोगरूपचोदनाख्याविशेषात् ॥ ९ ॥ न नाम्ना स्यादचोदनाभिधानत्वात् ॥ १० ॥ सर्वेषाञ्चैककर्म्यं स्यात् ॥ ११ ॥ कृतकञ्चाभिधानम् ॥ १२ ॥

एकत्वेऽपि परम् ॥ १३ ॥ विद्यायां धर्मशास्त्रम् ॥ १४ ॥ आग्नेयवत्पुनर्वचनम् ॥ १५ ॥ अद्विर्वचनं वा श्रुतिसंयोगाविशेषात् ॥ १६ ॥ अर्थासन्निधेश्च ॥ १७ ॥ न चैकं प्रति शिष्यते ॥ १८ ॥ समाप्तिवच्च सम्प्रेक्षा ॥ १९ ॥ एकत्वेपि पराणि निन्दाऽशक्तिसमाप्तिवचनानि ॥ २० ॥ प्रायश्चित्तं निमित्तेन ॥ २१ ॥ प्रक्रमाद्वा नियोगेन ॥ २२ ॥ समाप्तिः पूर्ववत्त्वाद्यथाज्ञाते प्रतीयेत ॥ २३ ॥ लिङ्गमविशिष्टं सर्वशेषत्वान्न हि तत्र कर्मचोदना तस्माद्द्वादशाहस्याऽहारव्यपदेशः स्यात् ॥ २४ ॥ द्रव्ये चाचोदितत्वाद्विधीनामव्यवस्था स्यान्निर्देशाव्द्यवतिष्ठेत तस्मान्नित्यानुवादः स्यात् ॥ २५ ॥ विहितप्रतिषेधात्पक्षेऽतिरेकः स्यात् ॥ २६ ॥ सारस्वते विप्रतिषेधाद्यदेति स्यात् ॥ २७ ॥ उपहव्येऽप्रतिप्रसवः ॥ २८ ॥ गुणार्था वा पुनःश्रुतिः ॥ २९ ॥ प्रत्ययश्चापि दर्शयति ॥ ३० ॥ अपि वा क्रमसंयोगाद्विधिपृथक्त्वमेकस्यां व्यवतिष्ठेत ॥ ३१ ॥ विरोधिना त्वसंयोगादैककर्म्येऽतत्संयोगाद्विधीनां सर्वकर्मप्रत्ययः स्यात् ॥ ३२ ॥)

प्रागुक्तस्य अभ्यासनामधेयप्रकरणान्तरगुणनिमित्तकर्मभेदस्येहापवादकरणादस्यान्ते निवेश इत्याहुः । काठककालापककाण्वमाध्यन्दिनतैत्तिरीयासु श्रुताग्निहोत्रादिकर्म प्रतिशाखं भिद्यते, अथ सर्वशाखास्वेकमेव कर्मेति सन्देहः ।

पूर्वपक्षस्तु प्रतिशाखं भिद्यत इति । कुतः? काठकमग्निहोत्रं कालापकमग्निहोत्रं इत्यादिनामभेदात्, 'ऐन्द्राग्नमेकादशकपालम्' इति कचिच्छाखायां, कचिच्च 'ऐन्द्राग्नं द्वादशकपालं' इत्युक्त्या द्रव्यात्मकगुणपर्यायरूपभेदात्, अश्वमेधवाक्यान्यधीयानैरश्वघासो दीयते नान्यैरित्यश्वघासदानादानरूपधर्मभेदात्, एकत्र शाखायामाम्नातस्य कर्मणोऽन्यत्राप्याम्नानेनाभ्यासपर्यायात् पुनःश्रवणात्, उदितानुदितहोमनिन्दाश्रवणात्, सर्वशाखोक्ताङ्गोपसंहारास्याशक्यत्वात्, एकेऽन्यत्र चयनसमाप्तिमन्येऽन्यत्रेति समाप्तिवचनभेदात्, उदितानुदितहोमयोः पृथक्प्रायश्चित्तविधानात्, ''उपहव्योऽनिरुक्तोऽग्निष्टोमो यज्ञः, रथन्तरसामा'' इत्येकस्यां शाखायां ''उपहव्योऽनिरुक्त उक्थ्यो यज्ञो बृहत्सामा'' इत्यपरस्यां शाखायां श्रुतमिति रथन्तरबृहत्सामरूपान्यार्थवचनात्, शाखान्तररूपप्रकरणान्तराच्चेति सूत्रोक्तैर्हेतुभिः । न हि कर्मैकत्वपक्षे अविशेषपुनःश्रवणरूपाभ्यासः नामधेयादिभेदः शाखान्तराख्यप्रकरणान्तरं वा द्वादशकपालत्वैकादशकपालत्वादिगुणभेदो वा युक्त इति ।

सिद्धान्तस्तु अभ्यासलक्षणपुनरुक्त्यादिहेतुभिर्हि कर्मणो विधानमात्रं सिध्यति, न पुनस्तद्भेदोऽपि। तद्भेदस्तु एकस्यां शाखायां विहितस्य पुनः शाखान्तरे विधानान्यथानुपपत्त्या हि कल्प्यः। तच्च पुनर्विधानं पुरुषान्तरं प्रत्युपपन्नं सन्न कर्मभेदकम्। यथैकशाखागतमग्निहोत्रादिवाक्यमेकस्य पुरुषस्य विहितमेवान्यस्यापि विधत्ते न कर्मान्तरमेवमत्राप्यध्येतृभेदात्तान्प्रति सर्वाण्येव वाक्यान्येकमेव कर्म विदधति, न कर्मान्तरमिति।

फलन्तु, पूर्वपक्षे शाखान्तरोक्ताङ्गकलापोपसंहारेण न शाखान्तरोक्तकर्मानुष्ठानम्। **सिद्धान्ते तु** सर्वशाखोदितसर्वाङ्गोपसंहारेणानुष्ठानं ज्ञेयम्। **सूत्रार्थः** पूर्वपक्षोपन्यासेन व्यक्तः।

इति द्वितीयं सर्वशाखाप्रत्ययैकताधिकरणम् (सूत्राणि ८-३२)

इति भाट्टसङ्ग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्यश्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते द्वितीयाध्यायस्य चतुर्थः पादः

अस्मिन् पादे अधिकरणानि २ सूत्राणि ३२

आदितः " ९९ " २८९

अथ भाट्टसङ्ग्रहे तृतीयोऽध्यायः

अथ प्रथमे प्रतिपदाधिकरणे प्रथमं वर्णकम्

॥ हरिः ॐ ॥ पूर्वाध्याये कर्मणां भेदो निरूपितः। अत्र त्वध्याये तेषां शेषशेषिभावः श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यारूपैः षड्भिः प्रमाणैर्निरूप्यते। भिन्नानामेव हि कर्मणां शेषशेषित्वशब्दितमङ्गाङ्गित्वं सम्भवतीत्यस्याध्यायस्य पूर्वाध्यायेन हेतुहेतुमद्भावरूपा **सङ्गतिः**। तथा च **सूत्रम्**

अथातः शेषलक्षणम् ॥ १ ॥

अथ कर्मभेदोत्त्यनन्तरं **अतः** कर्मभेदस्य शेषशेषित्वनिरूपणं प्रति हेतुत्वात् **शेषलक्षणम्** आरभ्यत इति **सूत्रार्थः**। अत्र शेषशेषिलक्षणमिति वाच्ये लाघवात् शेषलक्षणोक्त्या 'तं प्रति अयं शेषी' इति सुज्ञानमिति शेषलक्षणमित्येव प्रत्यज्ञायीति ज्ञेयम्। शेषलक्षणमारभ्यं न वेति **सन्देहः**। लोके क्रियाकारकान्वयस्य व्युत्पन्नतया तदतिरिक्तशेषशेषिभावान्वयस्यात्यन्तमप्रसिद्धत्वेन तद्व्युत्पादनायोगान्नारभ्यं शेषलक्षणमिति **प्राप्ते** 'गामानय' इत्यादिक्रियाकारकान्वये द्वयोः पदार्थयोः प्राधान्ये गुणत्वे वा अन्योन्यान्वयानर्हतया गुणप्रधानभावेनैवान्वयस्य वाच्यतया क्रियाकारकान्वये गुणप्रधानशब्दितशेष-

शेषिभावरूपान्वयस्यान्तर्भावेणाप्रसिद्धत्वाभावेन व्युत्पादनार्हत्वादारम्भणीयं शेषलक्षणमिति **सिद्धान्तः** इति अस्य सूत्रस्य वर्णक**मेके** वर्णयन्ति ।

इति प्रथमे प्रतिपदाधिकरणे प्रथमं वर्णकम्

अथ प्रथमे प्रतिपदाधिकरणे द्वितीयं वर्णकम्

अपरे तु पूर्वपक्षस्यातिमन्दतया नात्र पूर्वपक्षादिकं युक्तम् । किन्तु श्रोतृमनःसमाधानाय कः शेषः ? केन हेतुना शेषः ? शेषस्य शेषिणा सह अन्वयबोधने कानि श्रुत्यादीनि प्रमाणानि ? इत्यादिवक्ष्यमाणार्थप्रदर्शनमात्रपरमिदं सूत्रमित्याहुः । अत्र श्रुत्यादिस्वरूपन्तु,

श्रुत्यादिषट्प्रमाणस्वरूपलक्षणविभागनिरूपणम्

श्रुतिः शब्दोऽनपेक्षः सा विध्युक्तिविनियोगकृत् ।
विनियोक्त्री त्रिधा भिन्ना तुल्यशब्दादिरूपतः ॥
सर्वभावगता शक्तिर्लिङ्गमित्यभिधीयते ।
वाक्यन्तु पदसङ्घातमात्रं विद्वद्भिरुच्यते ॥
इतिकर्तव्यताऽऽकांक्षा प्रक्रिया द्विविधा हि सा ।
स्थानं तुल्यप्रदेशत्वं पाठानुष्ठानतो द्विधा ॥
समाख्या यौगिकी संज्ञा लौकिकी वैदिकी च सा ।

इति न्यायरत्नमालोक्तदिशा ज्ञेयम् ।

उदाहरणमेतेषां तत्र तत्र भविष्यति ।
अथापि मन्दबुद्धीनामत्रैवेषत्प्रदर्श्यते ॥

श्रुतिप्रमाणोदाहरणम्

तथा हि, लिङादिश्रुतिर्विधात्री । इन्द्रादिश्रुतिरभिधात्री । विनियोक्त्र्यपि एकप्रत्ययरूपा एकपदरूपा विभक्तिरूपा चेति **त्रिधा ।**

तत्राऽद्या यथा । 'पशुना यजेत' इत्यत्र पशुनेति **तृतीया ।** तया हि स्वोक्तकरणत्वं प्रति स्वोक्तैकत्वस्य शेषतोक्ता । चतुर्थाद्यपादे 'तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात्' (४-१-११) इति षष्ठाधिकरणे तथैवोक्तेः ।

द्वितीया तु यजेतेति पदम् । तेनेह प्रत्ययोक्तां भावनां प्रति प्रकृत्युक्तयागस्य शेषता भाति । **'द्रव्याणां कर्मसंयोगे गुणत्वेनाभिसम्बन्धः**(६-१-१) इति षष्ठाद्यनये तथोक्तेः ।

तृतीयाऽपि शेषित्वबोधिका शेषत्वबोधिका चेति द्विविधा । **तत्राद्या यथा**। 'व्रीहीन् प्रोक्षति' इत्यादौ **द्वितीया। 'तानि द्वैधं गुणप्रधानभूतानि'** (२-१-६) इति द्वितीयाद्यपादीयचतुर्थादिनये तथोक्तेः ।

चतुर्थी तु 'मैत्रावरुणाय दण्डं प्रयच्छति' इत्यादौ ज्ञेया । **'प्रासनवन्मैत्रावरुणाय दण्डप्रदानं कृतार्थत्वात्'** (४-२-१६) इति चतुर्थद्वितीयपादीयषष्ठनये तथोक्तेः । शेषत्वबोधिका यथा । 'अरुणया क्रीणाति' इत्यादौ **तृतीया। 'अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात्'** (३-१-१२) इति अत्रैव पादे अग्रे तथाऽभिधानात् ।

'मूलतः शाखां परिवास्योपवेषं करोति' इत्यादौ **पञ्चमी । 'शाखायां तत्प्रधानत्वादुपवेषेण विभागः स्याद्वैषम्यं तत्'** (४-२-८) इति चतुर्थद्वितीयपादीयतृतीयनये शाखामूलस्य परिवासन-शब्दितच्छेदनापादनतया छेदनसाध्यमग्रं प्रति शेषत्वोक्तेः । 'वेद्यां हवींष्यासादयति' इत्यत्र **सप्तमी । 'प्रकरणविशेषादसंयुक्तं प्रधानस्य'** (३-७-१) इति एतदध्यायसप्तमपादीयाऽद्यनये अङ्गप्रधान-सर्वहविरधिकरणतया वेद्याः शेषत्वस्य वेद्यामिति सप्तम्या व्युत्पादनात् ।

एवं **षष्ठ्यपि** शेषित्वबोधिका शेषत्वबोधिका चेति **द्विरूपा । तत्राद्या** 'राजन्यवसिष्ठादीनां नाराशंसो द्वितीयः प्रयाजः तनूनपादन्येषाम्' इत्यत्र वसिष्ठादीन् स्वामित्वेनोद्दिश्य तादर्थ्येन नाराशंसादि विधीयत इति षष्ठे **सन्निपातेऽवैगुण्यात्प्रकृतिवत्तुल्यकल्पा यजेरन्** (६-६-१) इति षष्ठपादीया-द्यनयेऽभिधानात् ।

द्वितीया तु 'यजमानस्य याज्या' इत्यत्र याज्याविशेषे यजमानः कर्तृतया तदङ्गत्वेन विधीयत इति **'याज्यापनयेनोपनीतो भक्षः प्रवरवत्'** (३-५-४४) इति एतदध्यायपञ्चमपादीयत्रयोदशनये व्युत्पाद-नात् । **प्रथमा तु** प्रातिपदिकमात्रे विधानात् न शेषित्वस्य शेषत्वस्य वा बोधिकेति ज्ञेयम् ।

लिङ्गप्रमाणोदाहरणम्

सामर्थ्यं **लिङ्गम् । तद्द्विविधम्** । शब्दगतमर्थप्रकाशकत्वरूपमर्थगतञ्चेति । **तत्राद्यं यथा** 'बर्हिर्देवसदनं दामि' इत्यादिमन्त्रस्य लवनप्रकाशनसामर्थ्यरूपलिङ्गाल्लवनशेषता **तदर्थशास्त्रात्** (१-३-३१) इति आद्याध्यायतृतीयपादीयमन्त्राधिकरणे व्यक्ता ।

द्वितीयन्तु, अथातो धर्मजिज्ञासा इत्यत्र 'स्वाध्यायोऽध्येतव्यः' इत्युक्ताध्ययनस्य अर्थज्ञानजनन-शक्तिरूपेणार्थसामर्थ्येनार्थज्ञाने विनियोगो दर्शितः।

वाक्यप्रमाणोदाहरणम्

पदसङ्घातो **वाक्यम्। तद्द्विविधम्** मन्त्रवाक्यं ब्राह्मणवाक्यञ्चेति। **तत्राऽद्येन** 'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां' इत्यस्य निर्वापे विनियोगः। तत्र हि 'अग्नये जुष्टं निर्वपामि' इत्युत्तरभागस्य लिङ्गान्निर्वापे विनियोगे स्थिते 'देवस्य त्वा' इत्यादिपूर्वभागस्य तथा लिङ्गरहितस्यापि तदेकवाक्यतया समभिव्याहृतत्वादेव कथञ्चिन्निर्वापप्ररोचनार्थतया निर्वापविशेषणी-भूतार्थप्रकाशकस्य सतस्तत्रैव विनियोग इति **अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः स्यात्तत्रा-चोदितमप्राप्तं चोदिताभिधानात्** (९-१-३६) इति नवमाध्यायाद्यपादीयैकादशाधिकरणे दर्शितम्।

द्वितीयेन 'यजेत स्वर्गकामः' इत्यत्र यागस्य स्वर्गं प्रति शेषता। न ह्यत्र यागेनेति तृतीया वा स्वर्गमिति द्वितीया वाऽस्ति। किन्तु समभिव्याहारादेव साध्यसाधनताधीः। तथैव षष्ठाद्यपादे स्वर्गकामाधिकरणे व्युत्पादनात्।

प्रकरणप्रमाणोदाहरणम्

इतिकर्तव्यताऽऽकांक्षा प्रकरणम्। तद्द्विविधम्। महाप्रकरणमवान्तरप्रकरणञ्चेति। तत्र आद्येन प्रयाजादेर्दर्शपूर्णमासादिशेषता अत्रैव तृतीयपादे **असंयुक्तं प्रकरणादितिकर्तव्यतार्थित्वात्** (३-३-११) इति प्रकरणाधिकरणे दर्शिता।

द्वितीयेन 'अभिक्रामम् जुहोति' इत्यादिवाक्यविहिताभिक्रमणादेः प्रयाजादिशेषता **कर्तृगुणे तु कर्मसमवायात्** (३-१-१९) इति एतत्पादीयनवमाधिकरणे दर्शिता।

स्थानप्रमाणोदाहरणम्

तुल्यप्रदेशत्वं **स्थानम्**। तद्द्विविधं पाठसादेश्यमनुष्ठानसादेश्यञ्चेति।

आद्यमपि **द्वेधा**। यथासङ्ख्याम्नानं सन्निध्याम्नानञ्चेति। **तत्राद्या** तु आग्नेयाग्नीषोमीयानु-मन्त्रणमन्त्रयोः 'अग्नेरहं देवयज्ययाऽन्नादो भूयासम्' 'अग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासम्' इत्यनयोर्मध्ये पठितस्य 'दब्धिरस्य दब्धो भूयासममुं दभेयम्' इति मन्त्रस्याऽग्नेयाग्नीषोमीययागयोर्मध्ये

अनुष्ठेयोपांशुयाजशेषता **'क्रमश्च देशसामान्यात्'** (३-३-१२) इति अत्रैव तृतीयपादीयक्रमाधिकरणे वक्ष्यते । सन्निध्याम्नानात्तु सान्नाय्यपात्रसन्निधौ पठितस्य शुन्धध्वमिति मन्त्रस्य सान्नाय्यपात्र-शुन्धनशेषता अत्रैव तृतीयपादे बलाबलोक्तिप्रस्तावे स्थानसमाख्याधिकरणे दर्शयिष्यते ।

अनुष्ठानसादेश्यात्तु ज्योतिष्टोमे पशुधर्माणामग्नीषोमीयपशुशेषता **'तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात्'** (३-६-१८) इति अत्रैव षष्ठपादीयसप्तमेऽधिकरणे वक्ष्यते ।

समाख्याप्रमाणोदाहरणम्

समाख्या यौगिकी संज्ञा । सा **द्विविधा** । लौकिकी वैदिकी चेति । तत्रावधातादिपदार्थे आध्वर्यवादिसंज्ञा **लौकिकी** । तया तेष्वध्वर्य्वादेस्तत्कर्तृत्वेन शेषता **आख्या चैवं तदर्थत्वात्** (३-३-१३) इति अत्रैव तृतीयपादे षष्ठेऽधिकरणे वक्ष्यते । होतृचमसादिसमाख्या **वैदिकी** । तया होत्रादेश्चमसभक्षणशेषता **चमसेषु समाख्यानात्संयोगस्य तन्निमित्तत्वात्** इति पञ्चमपादीयाधिकरणे अत्रैव वक्ष्यत इति श्रुत्यादिस्वरूपविभागोदाहरणानि ज्ञेयानि ।

इति प्रथमं प्रतिपदाधिकरणम्

अथ द्वितीयं शेषलक्षणाधिकरणम्

शेषः परार्थत्वात् ॥ २ ॥

अत्र कः शेषः? केन हेतुना शेषः ? इति पूर्वत्र प्रतिज्ञातं श्रुत्यर्थाभ्यामुच्यत इत्य**वसरसङ्गतिः** । 'व्रीहिभिर्यजेत' इत्यादौ व्रीह्यादिकं यागं प्रति **शेषः** । कुतः ? **परार्थत्वादिति** हेतुः । 'श्रौतोऽर्थो यः परार्थः स शेषः' इति स्वरूपन्त्वर्थात्सिध्यतीति ।

अत्रैके पूर्वोत्तरपक्षावाहुः । शेषत्वं निरूपणार्हमुत नेति **सन्देहे** नेति **प्राप्तम्** । तथा हि । किं तच्छेषत्वं ? अविनाभूतत्वं वा, प्रयुक्तत्वं वा, अधिकतया विहितत्वं वा, विध्यन्तभागविहितत्वं वा, उपकारकत्वं वा । नाद्यः । आग्नेयादिषड्यागानामन्योन्यमङ्गतापत्तेः ।

न द्वितीयः । 'पुरोडाशकपालेन तुषानुपवपति' इत्यत्र तुषधारणं प्रति शेषस्यापि कपालस्य पुरोडाशप्रयुक्तत्वेन तुषोपवापाप्रयुक्तत्वस्य चतुर्थे **अर्थाभिधानकर्म च भविष्यता संयोगस्य तन्निमित्त-त्वात्तदर्थो हि विधीयते'** (४-१-२६) इत्यत्र वक्ष्यमाणत्वेनाव्याप्तेः ।

न तृतीयः । प्रयाजाद्यङ्गेषु प्रत्येकं प्रधानापेक्षया आधिक्यविधानाभावेनाव्याप्तेः ।

न चतुर्थः । विध्यादिभागेऽविहितानां पलाशशाखाछेदनादीनामङ्गतानापत्तेः ।

न पञ्चमः । प्रधानकर्मणामप्यङ्गानुष्ठानोपकारकत्वेनाङ्गतापत्तेः इति ।

सिद्धान्तस्तु अविनाभूतत्वादेर्दुष्टत्वेपि परोद्देशेन प्रवृत्तत्वरूपपारार्थ्याख्यस्य शेषत्वस्य निर्दुष्टत्वेन परार्थः शेष इति निरूपणार्हमेव शेषत्वमिति । **फलन्तु** प्रयाजादेरङ्गत्वसिद्धिः ।

इति द्वितीयं शेषलक्षणाधिकरणम्

अथ तृतीयं शेषलक्ष्याधिकरणम् (सूत्राणि ३-६)

द्रव्यगुणसंस्कारेषु बादरिः ॥ ३ ॥

(कर्माण्यपि च जैमिनिः फलार्थत्वात् ॥ ४ ॥ फलञ्च पुरुषार्थत्वात् ॥ ५ ॥ पुरुषस्य कर्मार्थत्वात् ॥ ६ ॥)

अत्र शेषत्वस्य विषयोक्त्या कः शेषः ? इत्ययमंशः प्रपञ्च्यत इति पूर्व**सङ्गति**र्ज्ञेया । सन्ति क्रतुषु व्रीह्यादिद्रव्याणि, आरुण्यादयो गुणाः, अवघातादिसंस्काराः । तथा दर्शपूर्णमासादिकर्माणि, तत्फलानि स्वर्गादीनि, तत्कामाश्च पुरुषाः । तत्र **सन्देहः** किं द्रव्यगुणसंस्कारेष्वेव शेषत्वमुत कर्मफलपुरुषेष्वपीति । **पूर्वपक्षस्तु** उपकारकत्वमेव शेषत्वम् । तच्च दृष्टार्थानां द्रव्यगुणसंस्काराणामेव युक्तम् । द्रव्यस्य क्रियानिवर्तकत्वात् । गुणस्य क्रियासाधनपरिच्छेदकत्वात् । संस्कारस्य तद्योग्यतापादकत्वात् । कर्मादेस्तूपकारकत्वं दुरुपपादम् । 'यागेन स्वर्गम्' इति फलं प्रत्युपकारकत्वबोधकतृतीयादेरश्रवणात्, आशुतरविनाशिनः कर्मणः फलोपकारकत्वायोगाच्च । फलपुरुषयोश्च कर्म प्रति प्राधान्यान्न शेषत्वम् । अतो द्रव्यादिष्वेव तदिति **बादरि**राचार्य आहेति ।

सिद्धान्तस्तु पारार्थ्यमेव शेषत्वम् । नोपकारकत्वम् । पूर्वाधिकरणोक्तदोषदुष्टत्वात् । तच्च पारार्थ्यं यागादिष्वप्यस्तीति कर्मादेरप्यस्ति शेषत्वम् । न च पारार्थ्यस्य बोधकशब्दाभावात्तदपि न शेषत्वमिति युक्तम् । षष्ठाद्यस्वर्गकामाधिकरणसिद्धान्ते पारार्थ्यस्य विधिगम्यतताया वक्ष्माणत्वात् । तथा च कर्मणः फलशेषत्वं, फलस्य काम्यतया पुरुषशेषत्वं, पुरुषस्य तु कर्तृतया कर्मशेषत्वमिति द्रव्यादिष्विव कर्मादिष्वपि शेषत्वं **जैमिन्याचार्यो** मन्यत इति । तथा **च सूत्राणि, कर्माण्यपि जैमिनिः फलार्थत्वादिति, फलञ्च पुरुषार्थत्वादिति, पुरुषस्य कर्मार्थत्वादिति** । व्यक्तः सूत्रार्थः ।

इति तृतीयं शेषलक्ष्याधिकरणम् सूत्राणि (३-६)

अथ तुरीयं निर्वापादीनां व्यवस्थितविषयताधिकरणम् (सूत्राणि ७-२०)

तेषामर्थेन सम्बन्धः ॥ ७ ॥

(विहितस्तु सर्वधर्मः स्यात्संयोगतोऽविशेषात्प्रकरणाविशेषाच्च ॥ ८ ॥ अर्थलोपादकर्म स्यात् ॥ ९ ॥ फलं तु सह चेष्टया शब्दार्थोऽभावाद्विप्रयोगे स्यात् ॥ १० ॥)

एवं कः शेषः ? केन हेतुना शेषः ? इति द्वयस्य विवरणेन शेषस्वरूपे ज्ञाते सति अत्र श्रुत्या शेषस्य शेषिणा अन्वयरूपविनियोगप्रकारश्चिन्त्यत इति पूर्वेण हेतुहेतुमद्भावरूपाऽस्य **सङ्गतिः** । स्वरूपज्ञानान्तरमेव प्रकारस्य चिन्त्यत्वात् । दर्शपूर्णमासयोर्हि व्रीहिधर्मा अवघातप्रोक्षणादयः, आज्यधर्मा उत्पवनावेक्षणादयः, सान्नाय्यधर्मा दोहनादयः । तत्र **सन्देहः** किमेते धर्मा अव्यवस्थया सर्वत्र कार्या उत यथासंयोगं यागव्यवस्थयेति ।

पूर्वपक्षस्तु अवघातोत्पवनादिधर्माणां फलापूर्वप्रयुक्तत्वेन व्रीह्यादिवस्तुस्वरूपप्रयुक्तत्वाभावात् फलापूर्वस्य चैकत्वात् तदर्था धर्माः सर्वे सर्वत्र साङ्कर्येणानुष्ठातव्या इति । **सिद्धान्तस्तु** फलापूर्वस्यैकत्वेऽप्याग्नेयाग्नीषोमीयादियागजन्यावान्तरापूर्वाण्यपि द्वितीयाद्यपादे अपूर्वनये प्रतिपादितानि । तेषु पुरोडाशद्रव्यकयागजन्यापूर्वं व्रीहिधर्माणां प्रयोजकम् । एवमाज्यधर्माणां सान्नाय्यधर्माणाञ्च तत्तद्द्रव्यकयागजन्यावान्तरापूर्वाण्येव प्रयोजकानि । प्रत्यासन्नत्वात् । न तु फलापूर्वम् । तस्य व्यवहितत्वात् । तथा च प्रयोजकावान्तरापूर्वाणां व्यवस्थिततया तत्प्रयुक्ता धर्मा अपि व्यवस्थिताः । न चैवमपि प्रकरणाविशेषात् पुनः साङ्कर्यं धर्माणां शङ्क्यम् । दृष्टार्थानामवघातादीनामाज्यादौ फलाभावादेवादृष्टार्थतापत्त्या व्यवस्थोपपत्तेः । अदृष्टार्थानामपि प्रोक्षणादीनां 'व्रीहीन् प्रोक्षति' 'आज्यमवेक्षते' इति द्वितीयाश्रुत्या प्रकरणाद्बलीयस्या व्यवस्थापितत्वात् इति । तथा च **सूत्रम्, तेषामवघातादीनां अर्थेन** दृष्टप्रयोजनवशेन व्यवस्थया **सम्बन्ध** इति । **फलन्तु, पूर्वोत्तरपक्षयोः** अव्यवस्थाव्यवस्थाभ्यां धर्माणां अनुष्ठानं व्यक्तम् ।

इति तुरीयं निर्वापादीनां व्यवस्थितविषयताधिकरणम् (सूत्राणि ७-१०)

अथ पञ्चमं स्फ्यादीनां संयोगानुसारेण व्यवस्थितत्वाधिकरणम्

द्रव्यश्चोत्पत्तिसंयोगात्तदर्थमेव चोद्येत ॥ ११ ॥

अत्र पूर्ववैषम्येण शङ्कनात् **सङ्गतिः**। अत्र श्रुत्या विनियोग उच्यते। दर्शपूर्णमासयोः श्रूयते ''स्फ्यश्च, कपालानि च, अग्निहोत्रहवणी च, शूर्पञ्च, कृष्णाजिनञ्च, शम्या चोलूखलञ्च, मुसलञ्च, दृषञ्चोपला चैतानि वै दश यज्ञायुधानि'' इति। तथा ''स्फ्येनोद्धन्ति, कपालेषु श्रपयति, अग्निहोत्रहवण्या हवींषि निर्वपति, शूर्पेण विविनक्ति, कृष्णाजिनमधस्थादुलूखलस्यावस्तृणाति, शम्यायां दृषदमुपदधाति, उलूखलमुसलाभ्यामवहन्ति, दृषदुपलाभ्यां पिनष्टि'' इति। **स्फ्यशब्देन** खड्गाकारकाष्ठमुच्यते। **अग्निहोत्रहवणी** नाम निर्वापसाधनकाष्ठपात्रम्। **शम्या** तु शूलाकारं काष्ठम्। तत्र **सन्देहः** स्फ्यादिषु येन येन यद्यदस्मिन् प्रकरणे कर्तुं शक्यते तेन तेन तत् सर्वं कार्यमुत यथा श्रुतमुद्धननाद्येवेति। **पूर्वपक्षस्तु** युक्तं पूर्वत्रावघातादीनां अदृष्टार्थतापत्त्या यथासंयोगं व्यवस्थेति। स्फ्यादीनान्तु यथासामर्थ्यं नियमेऽप्यदृष्टार्थत्वाभावात्, आयुधपदस्य साधनवाचितया यज्ञायुधशब्देनोक्तयज्ञसाधनत्वस्य साक्षाद्यज्ञेऽसम्भवेन तदङ्गनिष्पादकत्वेनैव निर्वाह्यत्वादविशेषाद्यथासामर्थ्यं सर्वाङ्गेषु विनियोगः। 'स्फ्येनोद्धन्ति' इति एकैकक्रियासम्बन्धोक्तिस्तु एकदेशानुवादशब्दितावयुत्यानुवाद इति।

सिद्धान्तस्तु यथासामर्थ्यमव्यवस्थया अनेकत्र स्फ्यादीनां विनियोगे 'स्फ्येनोद्धन्ति' इत्यादिविशेषसंयोगबोधकबहुवाक्यानां वैयर्थ्यापत्तेः, अनुवादे फलाभावात्, अव्यवस्थापक्षेऽन्येनाप्युद्धननसम्भवेन नित्यप्राप्त्यभावेनानुवादत्वायोगाच्च, पाक्षिकानुवादत्वे नित्यवच्छ्रवणविरोधात्। अत एव तानि वाक्यानि विधायकान्येव। यज्ञायुधवाक्यं तु उद्धननादिवाक्यप्राप्तार्थत्वात् 'यज्ञायुधानि सम्भरन्ति' इत्यासादनविधानोपयोगायानुवादकमिति, यथासंयोगं स्फ्यादेर्व्यवस्थया विनियोग इति। तदुक्तं **सूत्रे** निर्वापादिसंस्कारवत्स्फ्यादिद्रव्यञ्च येन संयुक्तं **तदर्थमेव चोद्येत**। कुतः ? उत्पत्तौ 'स्फ्येनोद्धन्ति' इत्यादौ उद्धननादिना **संयोगादिति**। **फलन्तु, पूर्वोत्तरमतयोर**व्यवस्थाव्यवस्थाभ्यामनुष्ठानं व्यक्तम्।

इति पञ्चमं स्फ्यादीनां संयोगानुसारेण व्यवस्थितत्वाधिकरणम्

अथ षष्ठमारुण्यादिगुणानामसङ्कीर्णताधिकरणम्

अर्थैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यात् ॥ १२ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात् **सङ्गतिः**। यद्वा पूर्वत्र 'स्फ्येन' इत्यादितृतीयाश्रुत्या द्रव्यस्य विनियोगः उक्तः। अत्र तु गुणस्येति **सङ्गतिः**। ज्योतिष्टोमे 'अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति' इति श्रुतम्। अरुणाशब्दोऽत्राऽकृत्यधिकरणन्यायेन गुणमात्रवाची। तत्र स किं वाक्यात् पृथक्कृतः प्रकरणेन क्रत्वङ्गसर्वद्रव्येषु निविशते, उत क्रीणातिना सम्बध्य तदङ्गः सन् एकहायन्यां निविशत इति **सन्देहः**।

पूर्वपक्षस्तु युक्तः स्फ्यादेर्द्रव्यस्य व्यवस्थया उद्धननादावेकैकत्र विनियोगः । 'स्फ्येनोद्धन्ति' इत्यादिविशेषसंयोगबोधकबहुवाक्यानां वैय्यर्थ्यरूपहेतोः । इह 'क्रयेणैवारुण्यगुणस्य सम्बन्धो नान्येन' इति व्यवस्थापकहेतोरभावात् । न च 'अरुणया' इति वाक्यमेव व्यवस्थाहेतुरति युक्तम् । आरुण्य-गुणस्य तृतीयाश्रुत्या करणकारकत्वेनावगतस्यामूर्तत्वेन क्रयसाधनत्वायोगेन क्रीणातिना अन्वया-सम्भवात् । तस्माद्वाक्यात् पृथग्भूतप्रातिपदिकार्थोऽरुणिमा तृतीयया प्राकरणिकानेककरणद्रव्याण्यनूद्य तत्परिच्छेदकतया विधीयते 'यानि ज्योतिष्टोमसाधनद्रव्याणि तानि सर्वाण्यरुणानि कर्तव्यानि' इति । **यद्वा** अरुणाप्रातिपदिकमेव लक्षणया प्राकरणिकद्रव्यपरं सत् तृतीयायुक्तत्वेन करणतया तान्यनूद्य तत्र गुणविधिपरं सेत्स्यतीति ।

सिद्धान्तस्तु तृतीयाश्रुत्या 'क्रीणाति' इत्युक्तक्रयं प्रति अवगतकरणभावस्याऽरुण्यगुणस्यामूर्तत्वेन साक्षात्क्रियासाधनत्वायोगेऽपि द्रव्यपरिच्छेदमुखेन तत् सम्भवति । 'आरुण्यगुणपरिच्छिन्नेन द्रव्येण क्रयं कुर्यात्' इत्येवं श्रुत्यैव गुणस्य क्रयैकवाक्यत्वे सम्भवति वाक्यभेदस्य लक्षणाश्रयणस्य वा अयोगात् । एवं च गुणस्य क्रयार्थत्वे सिद्धे अस्य तदीयैकहायनीद्रव्ये निवेशः । न वासःप्रभृतिद्रव्ये निवेशः । तेषां क्रयान्तरसधनत्वादिति । तथा च **सूत्रम्, अर्थैकत्वे** एकवाक्यतासम्भवस्थले **द्रव्य-गुणयोः** मिथोऽन्वयनियमः **स्यात्** । कुतः ? **ऐककर्म्यात्** क्रयरूपैककर्मार्थत्वादिति । **फलन्तु, पूर्वपक्षे** यज्ञाङ्गद्रव्यमात्रमरुणं सम्पाद्यम् । **सिद्धान्ते** तु एकहायनी गौरेवेति ।

इति षष्ठमारुण्यादिगुणानामसङ्कीर्णताधिकरणम्

अथ सप्तमं ग्रहसम्मार्जनाधिकरणम् (सूत्राणि १३-१५)

एकत्वयुक्तमेकस्य श्रुतिसंयोगात् ॥ १३ ॥

(सर्वेषां वा लक्षणत्वादविशिष्टं हि लक्षणम् ॥ १४ ॥ चोदिते तु परार्थत्वा-द्यथाश्रुति प्रतीयेत ॥ १५ ॥)

अत्र पूर्वसिद्धान्तन्यायेन शङ्कनादापवादिकी **सङ्गतिः** । ज्योतिष्टोमे श्रूयते 'दशापवित्रेण ग्रहं सम्मार्ष्टि' इति । **दशापवित्रं** नाम कम्बळखण्डमित्येके । वासःखण्डमित्यपरे । तत्र ग्रहमित्यत्रैक-वचनोक्तमेकत्वं विवक्षितं न वेति **सन्देहः** ।

पूर्वत्राऽरुण्यगुणेन परिच्छिन्नस्य द्रव्यस्य क्रयसाधनत्वमिव इहाप्येकत्वसङ्ख्यारूपगुणेन

परिच्छिन्नस्य ग्रहस्य सम्मार्गकर्मत्वमवगम्यमानं न हातुं शक्यम्। **'तत्रैकत्वमयज्ञाङ्गमर्थस्य गुणभूतत्वात्** (४-१-११) इति चतुर्थाऽद्यपादे पञ्चमनये वक्ष्यमाणदिशा 'पशुना यजेत' इत्यत्र उपादेयगतपश्वेकत्वस्येवोद्देश्यगतग्रहैकत्वस्यापि विवक्षितत्वादेकस्यैव सम्मार्गशब्दितं शोधनं, न सर्वग्रहाणामिति **प्राप्तम्**। तदुक्तं **सूत्रे,** एकत्वयुक्तमेकत्वसमभिव्याहृतं कर्म **एकस्यैव स्यात्**। कुतः ? **श्रुतिसंयोगात्** द्वितीयाश्रुत्या एकेनैव संयोगादिति।

ग्रहस्य सम्मार्गं प्रति गुणत्वे हि प्रतिगुणं प्रधानाऽवृत्तेः प्रयोजनाभावान्न सर्वत्र सम्मार्गः स्यात्। न चैवम्। द्वितीयाश्रुत्या ग्रहस्य सम्मार्गं प्रति प्राधान्यावगमेन 'प्रतिप्रधानं गुणस्याऽवृत्तिः' इति न्यायेन 'यावन्तो ग्रहाः सोमे तावत्सु सम्मार्गः' इति निश्चये सति, ग्रहे इयत्तापरिच्छेदकस्यानाकांक्षितत्वात्तत्परिच्छेदकैकत्वसङ्ख्या न विवक्षिता। विवक्षापक्षे च 'ग्रहं संमृज्यात्, स चैकः' इति वाक्यभेदाऽपत्तेः। पशोस्तु यागं प्रति गुणत्वादस्ति तत्र 'कियता पशुना' इति परिच्छेदकाऽकांक्षेति वैषम्यादेकत्वस्य तत्र विवक्षायामपि नात्र तथेति 'सर्वग्रहेषु सम्मार्गः' इति **सिद्धान्तः**। **फलन्तु** एकत्रानेकत्र सम्मार्गः **पूर्वोत्तरपक्षयोः** इति व्यक्तम्।

इति सप्तमं ग्रहसम्मार्जनाधिकरणम् (सूत्राणि १३-१५)

अथाष्टमं चमसादौ सम्मार्गाद्यप्रयोगाधिकरणम् (सूत्रे १६-१७)

संस्काराद्वा गुणानामव्यवस्था स्यात्॥ १६॥

(व्यवस्था वाऽर्थस्य श्रुतिसंयोगात्, तस्य शब्दप्रमाणत्वात्॥ १७॥)

पूर्वन्यायेन शङ्कनात् **सङ्गतिः**। 'ग्रहं सम्मार्ष्टि' इत्यत्र एकत्ववद्ग्रहत्वमप्यविवक्षितमुत नेति **सन्देहे** 'सम्मार्ष्टि' इत्यनेन सम्मार्गस्य सोमावसेकनिर्हरणप्रयोजनकतया 'सोमपात्राणां सम्मार्गः' इत्यवगमे, पुनः कस्य ? इत्याकांक्षानुदयाच्चमसानामपि सोमपात्रत्वादेकत्ववद्ग्रहत्वमप्यविवक्षितमेव। किञ्च ग्रहेषु सम्मार्गः सोमापूर्वीयत्वप्रयुक्तः, न ग्रहत्वप्रयुक्तः। तच्च चमसेष्वप्यविशिष्टमिति ग्रेहत्वाविवक्षया चमसेष्वपि स्यादिति **प्राप्तम्**। आह च **सूत्रकारः, गुणानां** सम्मार्गादीनां **अव्यवस्था स्यात्**। चमसेष्वप्यनुष्ठानं स्यात्। कुतः ? **संस्कारात्** सोमावसेकनिर्हणसंस्कारत्वादिति।

सिद्धान्तस्तु एकत्वविवक्षायां वाक्यभेदस्येव ग्रहत्वविवक्षायां वाक्यभेदरूपबाधकस्याभावात् ग्रहश्रुत्यवगतग्रहत्वस्याविवक्षा न युक्ता। यागस्यैकत्वेन प्रधानापूर्वस्यैकत्वेप्यनेकधा अभ्यस्यमानस्यैव

फलहेतुतया प्रत्यभ्यासमवान्तरापूर्वभेदात् तत्तदपूर्वीयत्वप्रयुक्तः सम्मार्गो व्रीहिष्ववावघातवत् ग्रहेष्वेव प्राप्त इति, न चमसेषु कार्य इति। फलन्तु व्यक्तम्।

इत्यष्टमं चमसादौ सम्मार्गाद्यप्रयोगाधिकरणम् (सूत्रे १६-१७)

अथ नवमं सप्तदशारत्नितायाः पशुधर्मताधिकरणम्

आनर्थक्यात्तदङ्गेषु ॥ १८ ॥

अत्र पूर्ववैषम्येण शङ्कनात्सङ्गतिः। वाजपेये 'सप्तदशारत्निर्वाजपेयस्य यूपो भवति' इति श्रुतम्। सप्तदशारत्नित्वं वाजपेयाङ्गम्, उत यूपद्वारा वाजपेयगतपश्वङ्गं इति **सन्देहः**।

तत्र वाजपेयस्याव्यवधानेन श्रवणात् प्रधानकर्मत्वात् प्रकरणबलाच्च वाजपेयाङ्गं सप्तदशारत्नित्वं, न यूपद्वारा पश्वङ्गम्। उक्तहेतुत्रयान्यतमस्याप्यभावात्। वाजपेयशब्दस्य वाजपेयाङ्गपशुयागपरत्वे लक्षणा-प्रासङ्गाच्च। सप्तदशारत्नित्वस्य साक्षात्कर्मण्ययोगेऽपि तदङ्गषोडशिनामकग्रहरूपपात्रद्वारा कर्माङ्गं भविष्यति। यूपशब्दश्च ऊर्ध्वत्वसारूप्याद्ग्रहपरः स्यात्। पूर्वत्र ग्रहश्रुतिविवक्षायामवाक्यभेदावान्तरा-पूर्वभेदरूपहेत्वोरिव यूपश्रुतिविवक्षायां हेत्वभावात्, प्रत्युताविवक्षायामेव हेतूनामुक्तेश्चेति **प्राप्ते**,

अभिधीयते। 'सप्तदशारत्निर्यूपः' इति सामानाधिकरण्याद्वाजपेयशब्दस्य सम्बन्धसामान्यवाचि-षष्ठ्यन्ततया परम्परासम्बन्धेन 'वाजपेयाङ्गपश्वङ्गं यूपः' इति लक्षणां विनैव पशुयागपरत्वेन सन्निधानादेरविरोधात् यूपपदस्य गौणवृत्त्यनापत्तेश्च यूपद्वारा पश्वङ्गं सप्तदशारत्नित्वमिति **सिद्धान्तः**। तथा च **सूत्रम्, आनर्थक्यात्** प्रधानान्वयबाधात् विधीयमानो धर्मस्तदङ्गेष्वतरतीति। **फलन्तु, पूर्वपक्षे** सप्तदशारत्निपरिमाणो ग्रहः कार्य इति। **सिद्धान्ते** यूप इति।

इति नवमं सप्तदशारत्नितायाः पशुधर्मताधिकरणम्

अथ दशममभिक्रमणादीनां प्रयाजमात्राङ्गताधिकरणम् (सूत्रे १९-२०)

भाष्याभिमतं वर्णकम्

कर्तृगुणे तु कर्मासमवायाद्वाक्यभेदः स्यात् ॥ १९ ॥

(साकांक्षं त्वेकवाक्यं स्यादसमाप्तं हि पूर्वेण ॥ २० ॥)

अत्र पूर्ववैषम्येण **शङ्कनात्सङ्गतिः**। दर्शपूर्णमासौ प्रकृत्य प्रयाजसमीपे श्रूयते 'अभिक्रामं जुहोत्यभिजित्यै' इति। तत्र अभिक्राममिति आभीक्ष्ण्ये णमुल् इति भृशार्थकणमुलन्तपदोक्तमाहवनीयस्याभितः सञ्चरणं किं प्रयाजकर्त्राऽन्वेति, उत कृत्स्नप्राकरणिककर्त्रेति **सन्देहः**।

पूर्वपक्षस्तु युक्तं पूर्वत्र यूपश्रुतिवशात् प्रधानान्वयप्रकरणानुग्रहयोरनादरणम्। **इह तु प्रधानान्वयानादरो न युक्तः**। जुहोतिनोक्तप्रयाजक्रियया कारकस्यैवान्वयार्हतया अभिक्रमणरूपक्रियाया **अमूर्तरूपायाः** कारकत्वाभावेन तदन्वयायोगात्, वाक्यात् पृथग्भूतमभिक्रमणं प्रयाजादिकमिव **प्रकरणेन** दर्शपूर्णमासाङ्गतया गृहीतं सत् सामर्थ्याद्दर्शपूर्णमासकर्त्रा तत्संस्कारकतया अन्वेतीत्युपपत्तेरिति। **तथा च सूत्रम्, कर्तृगुणे** कर्तृसंस्काररूपे अभिक्रमणे विधेये सति **वाक्यभेदः स्यात्** तद्वाक्यगतजुहोतित्यागेन प्राकरणिककर्मान्वयात् भिन्नवाक्यता स्यात्। कुतः? अमूर्तत्वेन प्रकृत**कर्मासमवायादिति**।

सिद्धान्तस्तु क्रियात्वेनाभिक्रमणस्य जुहोतिनोक्तप्रयाजरूपक्रियानन्वये दर्शपूर्णमासरूपप्रधानक्रियान्वयोऽपि न स्यात्। प्रकरणबलेन प्रधानान्वितं सत् तत्कर्तृसंस्कारद्वारा तदुपकारकं चेत् प्रयाजान्वयेऽपि तथा स्यात्। अतस्सन्निधिबलात् प्रयाजकर्त्रैवान्वेतीति। एतच्च **यथाभाष्यं** वर्णकं ज्ञेयम्।

इति दशमेऽधिकरणे भाष्याभिमतं वर्णकम्

अथ दशमेऽधिकरणे वार्तिकाभिमतं वर्णकम्

वार्तिके तु प्रागुक्तावेव **विषयसंशयौ**। **पूर्वोत्तरपक्षहेतुमात्रभेदः**। सन्निधानादपि दर्शपूर्णमासप्रकरणस्य बलवत्त्वात्, अवान्तरप्रकरणस्य चाभावात्, महाप्रकरणेन प्राकरणिकेषु दर्शपूर्णमासाङ्गसर्वहोमेष्वभिक्रमणं निविशतीति **प्राप्तम्**। तदुक्तं **सूत्रे, कर्तृगुणे** अभिक्रमणे अवान्तरप्रकरणाभावेन प्रकृतप्रयाज**कर्मासमवायात्** प्रयाजवाक्यैकवाक्यत्वाभावरूपो **वाक्यभेदः स्यादिति**।

'समिधो यजति' इत्यादिप्रयाजानां गुणकीर्तनमध्ये अभिक्रमणस्याऽम्नानेन तस्य ''समानयत उपभृतः'' इति पूर्वत्र 'यो वै प्रयाजानां मिथुनं वेद' इत्युत्तरत्र च प्रयाजसम्बन्धिवाक्यैः सन्दष्टत्वेनावान्तरप्रकरणं प्रयाजानामस्तीति कल्पनात्तेन प्रयाजाङ्गमभिक्रमणमिति **सिद्धान्तः**। **फलन्तु, पूर्वपक्षे** दार्शपौर्णमासिकसर्वहोमाङ्गमभिक्रमणम्। **सिद्धान्ते तु** प्रयाजमात्राङ्गमिति।

इति दशममभिक्रमणादीनां प्रयाजमात्राङ्गताधिकरणम् (सूत्रे १९-२०)

अथैकादशमुपवीतस्य प्राकरणिकाङ्गताधिकरणम्

सन्दिग्धे तु व्यवायाद्वाक्यभेदः स्यात् ॥ २१ ॥

अत्र पूर्वसिद्धान्तन्यायेन शङ्कनात्सङ्गतिः । दर्शपूर्णमासप्रकरणे 'विश्वरूपो वै त्वाष्ट्रः' इत्यस्मिन् प्रपाठके सप्तमेऽनुवाके 'प्र वो वाजा इत्यन्वाह' इत्यादिसामिधेनीर्विधाय, 'त्रिः प्रथमामन्वाह, 'त्रिरुत्तमाम्' इति त्रिरनुवचनरूपतद्गुणान् अष्टमे चानुवाके आर्षेयवरणादिगुणांश्च विधाय, नवमे निविन्नामकान् ''अग्ने महाँ असि' 'ब्राह्मण' 'भारत' 'देवेद्धो' 'मन्विद्धः' इत्यादिकान् मन्त्रान् विधाय, दशमे 'एकविंशतिमनुब्रूयात् प्रतिष्ठाकामस्य' इत्यादिना काम्यसामिधेनीविकल्पान् विधाय, एकादशेऽनुवाके 'निवीतं मनुष्याणां, प्राचीनावीतं पितॄणां, उपवीतं देवानां, उपव्ययते देवलक्ष्ममेव तत्कुरुते' इत्युपवीतं विधाय, पुनश्च 'अन्तराऽनूच्यँ सदेवत्वाय' इति क्रौञ्चमन्द्रस्वरयोः अन्तरास्वरेणानु वचनं कार्यमित्यादयः सामिधेनीगुणाः श्रूयन्ते । अग्निसमिन्धकत्वात्सामिधेनीति ऋङ्नाम । 'यन्निविद्भिर्न्यवेदयत् तन्निविदां निवित्त्वम्' इति निर्वचनादिध्मप्रक्षेपसमिद्धाग्निसम्बोधनरूपमन्त्रा **निविद** इत्युच्यन्ते । **उपवीतं** नम शीतवातातपपीडानिवृत्त्यर्थत्वेन दृष्टार्थं वासोविन्यासविशेषरूपम् । तत्रोपवीतं किं सामिधेनीनामङ्गमुत दर्शपूर्णमासाङ्गमिति **सन्देहः** ।

'त्रिः प्रथमाम्' इत्यादिना पूर्वत्र 'अन्तराऽनूच्यँ' इत्यादिनोत्तरत्र च सामिधेनीगुणश्रवणेन पूर्वत्रैव सन्दंशेन सामिधेनीनामवान्तरप्रकरणकल्पनात्तेन सामिधेन्यङ्गमुपवीतमिति **प्राप्ते**,

सिद्धान्तः निविन्नामकमन्त्रविनियोजकेन 'अग्ने महाँ असीत्याह' इत्यादिवाक्येन सामिधेनी-प्रकरणस्य विच्छेदान्न तदङ्गत्वं युक्तम् । **न च** निविदामपि सामिधेन्यङ्गतया न व्यवधायकत्वमिति शङ्क्यम् । निविदां लिङ्गेनाग्न्यङ्गत्वावगमात् । न चैवं निविदङ्गमस्त्विति शङ्क्यम् । उपवीतस्याभितो निविद्धर्माश्रवणेन तासामवान्तरप्रकरणाभावात् । न च सन्निधानात् काम्यसामिधेनीनामङ्गता शङ्क्या । सन्निधितो दर्शपूर्णमासप्रकरणस्य बलवत्वात् । तस्मादिह पूर्वन्यायाभावान्महाप्रकरणेन दर्शपूर्ण-मासाङ्गम् । तथा च **सूत्रम्** निविद्भिः **व्यवायात्** व्यवधानात्' सामिधेनीप्रकरणानुवर्तने **सन्दिग्धे, वाक्यभेदः स्यात्** । 'उपव्ययत' इत्यस्य सामिधेनीवाक्यैकवाक्यता न स्यादिति । **फलन्तु** सामिधे-न्यङ्गत्वदर्शपूर्णमासाङ्गत्वे **पूर्वोत्तरपक्षयोरिति** व्यक्तम् ।

इत्येकादशमुपवीतस्य प्राकरणिकाङ्गताधिकरणम्

अथ द्वादशं गुणानां मिथोऽसम्बन्धाधिकरणम्

गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात् स्यात् ॥ २२ ॥

पूर्ववैषम्येण शङ्कनात् सङ्गतिः । आधानप्रकरणे दारुपात्रं होमार्थवच्छ्रूयते 'वारणो यज्ञावचरो, वैकङ्कतो यज्ञावचरः' इति । यज्ञोऽवचर्यते अनुष्ठीयत इति यज्ञावचरो यज्ञपात्रम् । जातावेकवचनम् । **वारणवैकङ्कतशब्दौ** दारुविशेषविकारवाचिनौ । तानि किमाधानाङ्गपवमानेष्ट्यङ्गम्, उत **सर्वयज्ञाङ्गं इति सन्देहः** ।

उपवीतस्य सामधेन्यङ्गत्वाभावेऽपि वारणादिपात्राणि प्रकरणेनाऽधानेऽन्वितानि सन्ति तत्र प्रयोजनाभावात् 'आनर्थक्यात्तदङ्गेषु' इत्युक्तन्यायात् तदङ्गपवमानेष्टिद्रव्यभूतेषु त्रिषु हविष्षु निविशन्त इति **प्राप्तम्** । आधानस्य द्वितीयासंयुक्ताग्निसंस्कारतया फलवत्त्वेन तत्सन्निधौ 'प्रजापतिर्वाचः सत्यमपश्यत्' इत्यनुवाके 'त्रीणि हर्वींषि निर्वपति, अग्नये पवमानाय अग्नये पावकाय अग्नये शुचये' इत्याम्नाता नामफलानां पवमानेष्टीनां 'फलवत्सन्निधावफलं तदङ्गम्' इति न्यायेनाऽधानाङ्गत्वादिति ।

सिद्धान्तस्तु अग्निमुद्दिश्याऽधानं यथा विहितं तथा पवमानहर्वींष्यपि । 'यदाहवनीये जुहोति, तेन सोऽस्याभीष्टः प्रीतः' इति पवमानेष्टिसन्निधावाम्नातस्याहवनीयस्य द्वितीयार्थसप्तम्यन्ताऽहवनीयपदबोध्यस्योद्देशेन पवमानहविर्होमविधानादग्निसंस्कारत्वेन बिहितानां पवमानेष्टीनामाधानेन सह नास्त्यङ्गाङ्गिभावः । किन्तु समप्राधान्यमेवेति विनियोजकप्रकरणाभावात् 'यज्ञावचरः' इति वाक्येन दर्शपूर्णमासादिसर्वयज्ञाङ्गानि पात्राणीति । तथा हि **सूत्रम्, गुणानां** पवमानहविषां **परार्थत्वात्** अग्न्यर्थत्वेनाऽधानसमत्वात् **असम्बन्धः** आधानेन अङ्गत्वेन सम्बन्धो न स्यादिति । **फलन्तु,** पवमानेष्ट्यङ्गत्वसर्वयज्ञाङ्गत्वरूपं **पूर्वोत्तरपक्षयोः** ।

इति द्वादशं गुणानां मिथोऽसम्बन्धाधिकरणम्

अथ त्रयोदशं वार्त्रघ्न्यधिकरणम्

मिथश्चाऽनर्थसम्बन्धः ॥ २३ ॥

अत्र पूर्वन्यायेन शङ्कनात् **सङ्गतिः** । दर्शपूर्णमासयोः 'अग्नीषोमाभ्यामाज्यभागौ यजति' इत्याग्नेयः सोम्यश्चाज्यभागौ विहितौ । तयोः क्रमेणानुवाक्यायुगलद्वयमाम्नातम् 'अग्निर्वृत्राणि जङ्घनत् द्रविणस्यु-

र्विपन्यया । समिद्धः शुक्र आहुतः' इत्याग्नेयी ऋक्, 'त्वं सोमासि सत्पतिः त्वं राजोत वृत्रहा । त्वं भद्रो असि क्रतुः' इति सौमी ऋगित्येकं युगलम् । 'अग्निः प्रत्नेन जन्मना शुम्भानस्तन्वं स्वाम् । कविर्विप्रेण वावृधे' इत्याग्नेयी ऋक्, 'सोमगीर्भिष्ट्वा वयं वर्धयामो वचोविदः । सुमृलीको न आविश' इति सौमीत्यपरं युगलम् । तत्राऽद्यद्वितीये वृत्रहशब्दवत्त्वाद्वार्त्रघ्न्यावित्युच्येते । तृतीयचतुर्थे वृधिधातुनिष्पन्नशब्द-वत्त्वाद्वृधन्वत्यावित्युच्येते । तत्रान्यद्वचनं 'वार्तघ्नी पौर्णमास्यामनूच्येते, 'वृधन्वती अमावास्यायाम्' इति । वार्त्रघ्न्यौ वृधन्वत्यौ इत्यर्थः । तत्र किमेतच्चतुष्टयं दर्शपूर्णमासाङ्गं, उत आज्यभागाङ्गमिति **सन्देहः** ।

पूर्वपक्षस्तु पूर्वत्राधानप्रकरणादवगम्यमानाधानाङ्गत्वस्य 'यज्ञावचरः' इति वाक्येन यथा बाधस्तथे हापि क्रमपाठेन आज्यभागाङ्गतया विहितानामपि मन्त्राणां तदङ्गताबाधेन 'वार्त्रघ्नी पौर्णमास्यां' 'वृधन्वती अमावास्यायाम्' इति वाक्याभ्यां क्रमापेक्षया प्रबलाभ्यां मन्त्राणां दर्शपूर्णमासाङ्गतावगमात् तदङ्गमेव मन्त्राः, नाज्यभागाङ्गम् । न च वाक्ययोः पौर्णमास्यादिशब्दौ कालपरौ, न कर्मवचनाविति वाच्यम् । कालस्यास्मरणीयत्वेन मन्त्राकांक्षाविरहतया कर्मपरावित्यवश्यमुपेयत्वादिति ।

सिद्धान्तस्तु वाक्यात् प्रधानाङ्गत्वे सत्याग्नेयीयुगलस्य कथञ्चित् तत्राङ्गत्वयोगेऽपि न सौम्या-युगलस्य तद्युक्तम् । सोमस्य तत्रादेवतात्वात् । अग्नीषोमीयेप्यग्निसहितस्य देवतात्वेन केवलसोमस्य तदभावात् दर्शे सर्वथाऽनन्वयाच्च ससम्युक्ताधारत्वबलात् कालपरौ पौर्णमास्यमावास्याशब्दौ, न कर्मपरौ । तस्मादाज्यभागयोरव्यवस्थया प्राप्तयोर्मन्त्रयुगलयोर्व्यवस्थार्थं वाक्यमिति । **सूत्रं चैवम्** पुरोनुवाक्यारूपाणां मन्त्राणां **मिथो**भूतानां युगलीभूतानां प्रधानकर्मभिः सह देवताप्रकाशनरूपार्थद्वारा सम्बन्धो नेति ।

फलन्तु, **पूर्वपक्षे** प्रधानाङ्गत्वेनानुष्ठानं मन्त्राणाम् । **सिद्धान्ते** तु व्यवस्थया आज्यभागाङ्गत्वे-नानुष्ठानमिति ।

इति त्रयोदशं वार्त्रघ्न्यधिकरणम्

अथ चतुर्दशं हस्तावनेजनादीनां कृत्स्नप्राकरणिकाङ्गताधिकरणम् (सूत्रे २४-२५)

आनन्तर्यमचोदना ॥ २४ ॥

(वाक्यानाञ्च समाप्तत्वात् ॥ २५ ॥)

अत्रापि पूर्वन्यायेन शङ्कनात् **सङ्गतिः**। दर्शपूर्णमासयोः प्रकरणे श्रूयते 'हस्ताववनेनिक्ते' 'उलपराजिं स्तृणाति' इति। उलपानां तृणविशेषाणां राजिं पक्तिं वेद्यामास्तृणातीत्यर्थः। तद्धस्तावनेजनमास्तरणमात्राङ्गमुत करिष्यमाणसर्वकर्माङ्गमिति **सन्देहः**।

यथा हि पूर्वत्रानुवाक्यानां यथासङ्ख्याम्नानरूपक्रमेणाऽज्यभागान्वयस्तथा अत्राप्यानन्तर्यलक्षण-क्रमप्रमाणेन हस्तावनेजनरूपहस्तसंस्कारस्याऽनन्तरश्रुतोलपराज्यास्तरणमात्राङ्गत्वमिति **प्राप्ते**

अभिधीयते अवनेजनं हि हस्तसंस्कारः। संस्कृतौ च हस्तौ सर्वकर्मानुष्ठानयोग्यावित्येतादृश-सामर्थ्यरूपलिङ्गेन दर्शपूर्णमासप्रकरणेन च आनन्तर्यरूपक्रमस्य बाधेन करिष्यमाणसर्वकर्माङ्गं हस्तावनेजनम्, नास्तरणमात्राङ्गम्। एवं ज्योतिष्टोमे 'मुष्टीकरोति' 'वाचं यच्छति' 'दीक्षितमावेदयति' इति श्रुतमुष्टीकरणवाक्यमनयोः मनःप्रणिधानार्थयोः 'अदीक्षिष्टायं ब्राह्मणः' इति देवेभ्यो मनुष्येभ्यश्चाऽवेदनरूपदीक्षितावेदनस्याङ्गत्वमानन्तर्यादिति **प्राप्ते** लिङ्गप्रकरणाभ्यां सर्वकर्माङ्गता ज्ञेया। तथा च **सूत्रम्, आनन्तर्यं** सन्निध्याम्नानं **अचोदना** अङ्गत्वे प्रमाणं न भवतीति।

फलन्तु यदा प्रमादादिना हस्तावनेजनादिकमकृत्वा आस्तरणादिकमनुष्ठाय पश्चात्तदकरणं स्मर्यते तदा तदकरणप्रायश्चित्तमेव कार्यं **पूर्वपक्षे**। **सिद्धान्ते तु** विपर्यासप्रायश्चित्तमपि कृत्वा पुनरुत्तर-कर्मवैगुण्याय हस्तावनेजनादिकं कार्यमिति।

इति चतुर्दशं हस्तावनेजनादीनां कृत्स्नप्राकरणिकाङ्गताधिकरणम् (सूत्रे २४-२५)

अथ पञ्चदशं चतुर्धाकरणादीनामाग्नेयमात्राङ्गताधिकरणम् (सूत्रे २६-२७)

शेषस्तु गुणसंयुक्तः साधारणः प्रतीयेत मिथस्तेषामसम्बन्धात्॥ २६॥

(व्यवस्था वाऽर्थसंयोगाल्लिङ्गस्यार्थेन सम्बन्धाल्लक्षणार्था गुणश्रुतिः॥ २७॥)

अत्रापि पूर्वन्यायेन शङ्कनात् **सङ्गतिः**। दर्शपूर्णमासयोराग्नेयाग्नीषोमीयैन्द्राग्नपुरोडाशाः श्रुताः। तत्र 'आग्नेयं चतुर्धा करोति' इति श्रुतं चतुर्धाकरणं किं पुरोडाशत्रयस्यापि, उत आग्नेयस्यैवेति **सन्देहः**। यथा हि पूर्वत्र हस्तावनेजनादेरसङ्कोचेन सर्वकर्माङ्गता तथेहापि आग्नेयवदग्निसम्बन्धस्य अग्नीषोमीयैन्द्राग्नयोरपि पुरोडाशयोः सत्त्वात्तयोरपि चतुर्धा करणम्। सङ्कोचे हेत्वभावात् इति **प्राप्तम्। सूत्रं चैवम्, गुणसंयुक्तः** अग्न्याद्युपलक्षणयुक्तः चतुर्धाकरणादिः **शेषो**ऽग्नीषोमीयादि**साधारण एव प्रतीयेत**। कुतः? **तेषां** गुणानां शेषाणाञ्च **मिथः** सम्बन्धविशेषाभावादिति।

सिद्धान्तस्तु 'अग्नेर्ढक्' इति देवतार्थे विहिततद्धितान्तोऽयमाग्नेयशब्दो नाग्निसम्बन्धमात्रार्थः। अग्निश्च केवलो द्विदैवत्ययोः पुरोडाशयोर्न देवतेति देवतात्वेनाग्निसम्बन्धस्य द्विदैवत्यपुरोडाशयोर्न मुख्यत्वमिति मुख्याग्नेयस्यैव चतुर्धाकरणमिति।

फलन्तु, पूर्वपक्षे त्रयाणां चतुर्धाकरणम्। **सिद्धान्ते** त्वेकस्यैवेति व्यक्तम्॥

इति पञ्चदशं चतुर्धाकरणादीनामाग्नेयमात्राङ्गताधिकरणम् (सूत्रे २६-२७)

इति भाट्टसङ्ग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते तृतीयाध्यायस्य प्रथमः पादः
अस्मिन् पादे अधिकरणानि १५ सूत्राणि २७
आदितः '' १०४ '' ३१६

अथ तृतीयाध्यायस्य द्वितीयः पादः

अथ प्रथमं मुख्ये विनियोगाधिकरणम् (सूत्रे १-२)

॥ ॐ ॥ श्रुतिलिङ्गादिषु पूर्वपूर्वस्योत्तरोत्तरं प्रत्युपजीव्यत्वस्योत्तरपादे वक्ष्यमाणत्वादुपजीव्यश्रुति-विनियोगस्य पूर्वाध्यायौ प्राधान्येनोक्तत्वादिदानीमत्र पादे श्रुत्युपजीवकेन लिङ्गेन विनियोगो निरूप्यत इति पादयोरर्थभेदः पौर्वापर्यञ्च।

अर्थाभिधानसंयोगान्मन्त्रेषु शेषभावः
स्यात्तस्मादुत्पत्तिसम्बन्धोऽर्थेन नित्यसंयोगात्॥ १॥

(संस्कारकत्वादचोदिते न स्यात्॥ २॥)

'बहिर्देवसदनं दामि' इत्यादिमन्त्रोऽर्थप्रकाशनेनैव क्रत्वङ्गमित्युक्तं मन्त्राधिकरणे। अयञ्च मन्त्रो देवानां सदनं आश्रयभूतं बर्हिः दामि 'दा लवने' इति धातोः 'लुनामि' इति बर्हिर्लवनप्रतिपादन-सामर्थ्यरूपलिङ्गेन लवने विनियुज्यते। तत्र किं मन्त्रो मुख्यार्थमेव प्रकाशयन् विनियुज्यते, अथ गौणमप्यर्थमिति **सन्देहः**।

बर्हिःशब्देन काशकुशादिदर्भरूपमुख्यार्थस्येव वेद्यास्तरणसाधनोलपादितृणविशेषरूपगौणार्थ-स्याप्यनुष्ठेयतया स्मरणावश्यम्भावात् मुख्यार्थस्य लवने गौणार्थस्य लवने चोभयत्र विनियोगः। एवं मन्त्रान्तरस्याप्युभयत्र विनियोगो ध्येय इति **पूर्वपक्षः**।

सिद्धान्तस्तु मन्त्रस्य गौणार्थप्रकाशनशक्तौ सत्यामपि मुख्यार्थानुपपत्त्यादिप्रमाणान्तरे सत्येव गौणार्थप्रतीतिः, नान्यथा । मुख्यार्थस्तु शब्दस्वाभाव्यादेव झटिति प्रतीयत इति मुख्यार्थ एव विनियोगो, न गौणे । सति तु मानान्तरे गौणेऽपि विनियोग इति । तथा च **सूत्रम् अर्थाभिधान-संयोगात्** अर्थाभिधानरूपात् सम्बन्धात् **मन्त्रेषु क्रतुशेषभावः स्यात्** । **तस्मादुत्पत्त्या** प्रथमावगतेन मुख्यार्थेन **सम्बन्धः** । कुतः ? **मुख्यार्थस्य नित्यसंयोगात्** इति ।

फलन्तु, बर्हिरादिमन्त्रस्य गौणोलपादितृणलवनादावपि विनियोगः **पूर्वपक्षे । सिद्धान्ते तु दर्भल-**वनादिमात्र एवेति ।

अत्र **भाष्यवार्तिकयोः** शब्दस्य मुख्यार्थादन्यो गौणार्थो नास्तीति **पूर्वपक्षं,** मुख्यार्थगुण-योगनिमित्तको गौणोऽप्यर्थोऽस्तीति **सिद्धान्तमु**त्सूत्रमेवैतदधिकरणमुपोद्घातत्वेन कृत्वा पश्चाद्गौण-मुख्यविनियोगविचारः कृतः ।

इति प्रथमं मुख्ये विनियोगाधिकरणम् (सूत्रे १-२)

अथ द्वितीयमैन्द्र्या गार्हपत्ये विनियोगाधिकरणम् (सूत्रे ३-४)

वचनात्त्वयथार्थमैन्द्री स्यात् ॥ ३ ॥

(गुणाद्वाऽप्यभिधानं स्यात्सम्बन्धस्याशास्त्रहेतुत्वात् ॥ ४ ॥)

मुख्यार्थ एव विनियोगः इत्यस्यात्रापवादादापवादिकी **सङ्गतिः** । अग्निचयनप्रकरणे '**निवेशनः** सङ्गमनो वसूनामित्यैन्द्र्या गार्हपत्यमुपतिष्ठते' इति श्रूयते । 'कदा चन स्तरीरसि' इति केचन शाखिनः पठन्ति । 'निवेशनः सङ्गमनो वसूनां विश्वा रूपाऽभिचष्टे शचीभिः । देव इव सविता सत्यधर्मेन्द्रो न तस्थौ समरे पथीनां' इत्यत्रान्ते इन्द्रपदश्रवणादियमैन्द्री ऋक् । **अयमर्थः, निवेशनः** प्रतिष्ठितः **वसूनां** प्रजापश्वादीनां **सङ्गमनः** प्रापकः **इन्द्रः शचीभिः** स्वप्रेयसीभिः सह **विश्वा** विश्वानि **रूपा** रूपाणि वसूनि **अभिचष्टे** प्रकाशयति । किञ्च **सविता देव इव सत्यधर्मा** अत एव **पथीनां** पलायमानानां शत्रूणां **समरे** न तस्थिवानिति । 'निवेशनः' इति वा 'कदा चन स्तरीरसि नेन्द्र' इति वा ऐन्द्री ऋक् किं मुख्यार्थे विनियुज्यते, गौणार्थे वेति **सन्देहः** ।

पूर्वपक्षस्तु पूर्वाधिकरणन्यायेन मुख्यार्थभूतेन्द्रप्रकाशन एव विनियुज्यते, न गौणे । ब्राह्मणगत-

गार्हपत्यशब्दस्य यागसाधनत्वसाम्यात् गौण्या वृत्त्या 'गृहपतेर्यजमानस्यायं स्वामी' इत्यर्थे तद्धितान्तत्वेन वा इन्द्रपरत्वसम्भवादिति ।

सति मानान्तरे गौणार्थेऽपि विनियोग इति पूर्वोक्तत्वादिह च वचनेन गार्हपत्याङ्गत्वस्य स्पष्टत्वाद्वचनबलात् गार्हपत्ये विनियोगः । मन्त्रलिङ्गस्य विनियोजकवचनस्य चाविरोधायावश्यं क्वचिद्गौणार्थत्वे कल्पनीये प्राप्तार्थके मन्त्र एवेन्द्रपदस्य गार्हपत्ये गौणत्वं न्याय्यम् । न त्वप्राप्तार्थके ब्राह्मणवाक्ये । तस्माद्यागसाधनत्वसाम्येन वा लक्षणया वा हविराद्यैश्वर्ययोगेन वा इन्द्रपदस्य गार्हपत्ये वृत्त्युपगमो युक्त इति सिद्धान्तः । तथा च सूत्रम्, ऐन्द्री इन्द्रसम्बन्धिनी ऋक् वचनात् अयथार्थं यथाश्रुतार्थो यथा न भवति तथा स्यात् इति । फलन्त्विन्द्रोपस्थानं पूर्वपक्षे । सिद्धान्ते तु गार्हपत्यस्येति ज्ञेयम् ।

इति द्वितीयमैन्द्र्या गार्हपत्ये विनियोगाधिकरणम् (सूत्रे ३-४)

अथ तृतीयमाह्वानविनियोगाधिकरणम् (सूत्राणि ५-९)

तथाऽऽह्वानमपीति चेन्न कालविधिश्चोदितत्वात् ॥ ५-६ ॥

(गुणाभावात् ॥ ७ ॥ लिङ्गाच ॥ ८ ॥ विधिकोपश्चोपदेशे स्यात् ॥ ९ ॥)

पूर्वन्यायेन शङ्कनात्सङ्गतिः । दर्शपूर्णमासयोः श्रूयते 'हविष्कृदेहीति त्रिरवघ्नन्नाह्वयति' इति । देवानामर्थे या हविः करोति सा यजमानपत्नी हविष्कृत् उच्यते । 'हे हविष्कृत् एहि आगच्छ' इति त्रिवारमवघातं कुर्वन्नध्वर्युः पत्नीमाह्वयतीत्यर्थः । किमयं 'हविष्कृदेहि' इति मन्त्रोऽवघाते विनियुज्यतेऽथाह्वाने । अवहन्तिश्च काललक्षणार्थ इति सन्देहः ।

'वचनात्त्वयथार्थं' इति पूर्वोक्तन्यायेनेहापि वचनात् हविस्साधनत्वरूपहविष्कृद्गुणयोगात् गौणेऽप्यवघातरूपेऽर्थे हविष्कृच्छब्दस्य वृत्तिसम्भवेनावघातेऽयं मन्त्रो विनियुज्यते 'हविष्कृदेहि इत्यवघ्नन्' इति । 'आह्वयति' इत्यस्य तु 'एहिशब्दमुच्चारयति' इत्यर्थ इति प्राप्ते,

अवघातोद्देशेन मन्त्रस्य विधाने त्रिरित्युक्तत्रिवारमभ्यासस्यापि विधेयतया 'अवघ्नन् इति यत् तत् हविष्कृदेहीति मन्त्रं उच्चारयन्, त्रिरुच्चारयन्निति वाक्यभेदप्रसङ्गात् । न च क्वचिच्छाखायां मन्त्रस्य त्रिः पाठात् पाठप्राप्तानुवादस्त्रिरित्यतो न वाक्यभेद इति युक्तम् । क्वचिद्द्विः क्वचित्सकृदपि पाठेन पाक्षिकानुवादत्वप्राप्त्या नित्यवच्छ्रवणविरोधात् । अतोऽवघ्नन्नित्यस्य काललक्षणया 'अवहननकाले

हविष्कृदेहीति त्रिराह्वयति' इति हविष्कृदाह्वनरूपमुख्यार्थ एव विनियोगः । कालस्तु अवघातकाल एव सहायार्थमाह्वानमित्यर्थतः प्राप्तत्वान्न विधेयः । मन्त्रोऽपि सामर्थ्यरूपलिङ्गवशादेवाऽह्वाने प्राप्त इत्यप्राप्तत्रिरभ्यासस्यैव विधिः 'अवघातकाले हविष्कृदेहीति यदाह्वयति तत् त्रिः' इति । वचनगतावघातपदे काललक्षणा चानुवादत्वान्न दोष इति **सिद्धान्तः** । तथा च **सूत्रम्**, यथा वचनादैन्द्री गार्हपत्यार्था **तथा आह्वान**मन्त्रोऽप्यवघातार्थ इति चेन्न । **कालविधिः** अवघातकाले त्रिरभ्यासविधिः । अवघातस्य वाक्यान्तरेण **चोदितत्वात्** इति ।

फलन्तु, पूर्वपक्षे नानाबीजेष्ववघातावृत्त्या मन्त्राऽवृत्तिः । **सिद्धान्ते तु** आदौ त्रिराहूतायाः पत्न्याः सान्निध्यात् पुनराह्वानानपेक्षणान्न मन्त्राऽवृत्तिरिति ।

इति तृतीयमाह्वानविनियोगाधिकरणम् (५-२)

अथ तुरीयमग्निविहरणादिप्रकाशकमन्त्रविनियोगाधिकरणम्

तथोऽत्थानविसर्जने ॥ १० ॥

अत्र विशेषशङ्कां कृत्वा पूर्वन्यायातिदेशादातिदेशिकी **सङ्गतिः** । ज्योतिष्टोमे श्रूयते 'उत्तिष्ठन्नाहाग्नीदग्नीन्विहर' इति । तथा 'व्रतं कृणुतेति वाचं विसृजति' इति । हे **अग्नीत्** अग्नीन्धक इत्याग्नीध्रं सम्बोध्य 'अग्नीन्विहर' इत्युत्तिष्ठन्नध्वर्युराहेत्यर्थः । सायंसमये वाङ्नियमेन स्थिते यजमाने, उदितेषु नक्षत्रेषु, **व्रतं** पयोयवाग्वादिकं **कृणुत** कुरुत इत्युक्त्वा वाचं विसृजतीत्यर्थः ।

तत्र **सन्देहः** उत्थानमुद्दिश्य अग्नीदिति मन्त्रोऽङ्गत्वेन विधीयते व्रतं कृणुतेति च मौनत्यागात्मनि वाग्विसर्गे, उतोभयोरपि काललक्षणार्थता 'उत्थानकाले वाग्विसर्जनकाले चेमौ मन्त्रावुच्चारयेत्' इति ।

पूर्वपक्षस्तु 'उत्तिष्ठन्नाह' इत्यादिवचनादुत्थानवाग्विसर्गार्थाविमौ मन्त्रौ । न चात्र पूर्वोक्तावघातशब्दवदुत्थानवाग्विमोकशब्दौ काललक्षकौ । तत्कालयोरवघातकालवदर्थप्राप्त्यभावेन विधेयत्वे सति विधौ लक्षणाया अन्याय्यत्वादिति ।

सिद्धान्तस्तु मन्त्रोद्देशेन उत्थानादिकालोऽङ्गत्वेन विधीयते 'उत्थानकाले वाग्विसर्जनकाले च अग्नीदित्यादिमन्त्रानुच्चारयेत्' इति । उत्थानादिप्रकाशनशक्तिविधुरस्योत्थानादौ विनियोगायोगात् । वचनन्तु काललक्षणार्थमिति । **सूत्रं** चैवम्, यथाऽवघातः काललक्षणार्थः **तथोत्थानविसर्जने** अपि काललक्षणार्थे इति ।

फलन्तु, पूर्वपक्षे प्रैषत्वाभावादाध्वर्यवसमाख्यया अध्वर्युरेव विहरणादिकर्तृत्वम्। सिद्धान्ते तु प्रैषत्वात् प्रैषेषु च पराधिकारात् (३-८-२२) इति अष्टमे पादे वक्ष्यमाणनयात् समाख्या-बाधेनाऽग्नीध्रादेः कर्तृत्वमिति।

इति तुरीयमग्निविहरणादिप्रकाशकमन्त्रविनियोगाधिकरणम्

अथ पञ्चमं सूक्तवाकस्य प्रस्तरप्रहरणाङ्गताधिकरणम् (सूत्राणि ११-१४)

सूक्तवाके च कालविधिः परार्थत्वात् ॥ ११ ॥

(उपदेशो वा याज्याशब्दो हि नाकस्मात् ॥ १२ ॥ स देवतार्थस्तत्संयोगात् ॥ १३ ॥ प्रतिपत्तिरिति चेत् स्विष्टकृद्वदुभयसंस्कारः स्यात् ॥ १४ ॥)

पूर्वन्यायेन शङ्कनात् **सङ्गतिः**। दर्शपूर्णमासयोः 'सूक्तवाकेन प्रस्तरं प्रहरति' इति श्रुतम्। तदर्थः, सुष्ठूक्तानां आज्यभागाद्यनूयाजान्तेषु यागेषूद्दिष्टानामग्न्यादिदेवतानां वाचकेन 'इदं द्यावापृथिवी भद्रम-भूत्' इत्यादिना 'नमो देवेभ्यः' इत्यन्तेन मन्त्रेण **प्रस्तरं** स्रुग्धारणाद्युपयुक्तदर्भमुष्टिमाहवनीये प्रक्षिपतीति।

तत्र **सन्देहः** प्रस्तरप्रहरणस्य सूक्तवाकस्य च कालार्थः सम्बन्धः, उत सूक्तवाकः प्रस्तर-प्रहरणाङ्गत्वेनोपदिश्यत इति।

पूर्वपक्षस्तु सूक्तवाकस्य 'अग्निरिदं हविरजुषत' इत्यादिना अनुष्ठितदेवताप्रकाशनेन कृतार्थत्वात् प्रहरणस्य च स्रुग्धारणादिनानाकर्मोपयुक्तप्रस्तरस्य प्रतिपत्तिरूपसंस्कारत्वेन प्रयोजनवत्त्वादन्योन्य-मङ्गाङ्गित्वापेक्षाभावात् पूर्वत्रेव कालार्थः सम्बन्धः। तत्र चानूयाजयाज्यानन्तरं सूक्तवाकस्य पाठेन पाठक्रमात्तस्य निर्ज्ञातकालत्वेन सूक्तवाकशब्दो लक्षणया कालपरः 'सूक्तवाकपाठकाले अध्वर्युः प्रस्तरं प्रहरेत्' इति। तथा च **सूत्रम्, सूक्तवाके** सूक्तवाकवाक्ये **कालार्थः** सम्प्रयोगविधिः। सूक्तवाकस्य प्रस्तरस्य च **परार्थत्वेन** कृतार्थतयाऽङ्गाङ्गित्वाभावादिति।

सिद्धान्तस्तु, सूक्तवाकेनेति तृतीयाश्रुत्या तस्य प्रहरणं प्रत्यङ्गत्वावगमात्, श्रुतिविनियुक्त-मन्त्राङ्गत्वबलादेव तदभिधेयदेवतासम्बन्धस्य प्रहरणेऽपि कल्पनेन देवतोद्देशेन द्रव्यत्यागरूपतापत्त्या यागरूपत्वादुपपन्नमिष्टदेवताप्रकाशनं कुर्वत एव सूक्तवाकस्य प्रहरणाङ्गत्वमिति।

फलन्तु प्रस्तरहोमस्य मन्त्रप्रक्षेपांशाभ्यां देवताद्रव्यसंस्काररूपस्यापि त्यागांशेनादृष्टार्थत्वस्यापि सत्त्वात् प्रस्तरनाशेऽपि द्रव्यान्तरेणादृष्टार्थं होमः कार्यः इति।

इति पञ्चमं सूक्तवाकस्य प्रस्तरप्रहरणाङ्गताधिकरणम् (सूत्राणि ११-१४)

अथ षष्ठं सूक्तवाकानामर्थानुसारेण विनियोगाधिकरणम् (सूत्राणि १५-१८)

कृत्स्नोपदेशादुभयत्र सर्ववचनम् ॥ १५ ॥

(यथार्थं वा शेषभूतसंस्कारात् ॥ १६ ॥ वचनादिति चेत् ॥ १७ ॥ प्रकरणाविभागादुभे प्रति कृत्स्नशब्दः ॥ १८ ॥)

वचनात् सूक्तवाकस्य प्रहरणाङ्गत्वे स्थिते, अत्र विशेषचिन्तनात् **सङ्गतिः**। सूक्तवाकः सर्वोपि पौर्णमास्याममावास्यायाञ्च प्रयोक्तव्यः, उत यथासामर्थ्यं विभज्य विनियोज्य इति **सन्देहः**।

पूर्वपक्षस्तु सूक्तवाकशब्दस्य 'इदं द्यावापृथिवी भद्रमभूत्' इत्यादिसमस्तानुवाकवाचित्वेनाध्येतॄणां प्रसिद्धेः पर्वद्वये कृत्स्नोप्यनुवाक आवर्तनीयः। तत्र तत्रासमवेतदेवताप्रकाशनसमर्थभागस्य प्रयोगो व्यर्थ इति चेद्वचनबलाददृष्टार्थत्वेन सार्थक्यादिति। तथा च **सूत्रम्, कृत्स्नोपदेशादुभयत्र सर्ववचनमिति।**

सिद्धान्तस्तु समवेतदेवताप्रकाशनसामर्थ्यरूपलिङ्गेन कृत्स्नविषयकसूक्तवाकसमाख्याया बाधेन प्रयोजनवशाद्विभज्य विनियोगः। न हीन्द्राग्न्यादिपदानां पौर्णमास्यां प्रयोजनमस्ति। नाप्यग्नीषोमादिशब्दानाममावास्यायां प्रयोजनमस्ति। यत्तु वचनाददृष्टार्थत्वमिति तन्न। सूक्तवाकशब्दस्य 'सुष्ठूक्तमिष्टं वक्ति' इत्यवयवव्युत्पत्त्या प्रागिष्टदेवताप्रकाशनमात्रवचनत्वात्। अतो यस्मिन् प्रयोगे यावत्यो देवता इष्टास्तावद्देवतापदानां प्रयोगो नान्यदेवतापदानामिति। **फलन्तु** कृत्स्नाकृत्स्नप्रयोगानुष्ठानं व्यक्तम्

इति षष्ठं सूक्तवाकानामर्थानुसारेण विनियोगाधिकरणम् (सूत्राणि १५-१८)

अथ सप्तमं काम्ययाज्यानुवाक्यानां काम्यमात्राङ्गताधिकरणम्

लिङ्गक्रमसमाख्यानात्काम्ययुक्तं समाम्नानम् ॥ १९ ॥

अत्र पूर्वन्यायेन शङ्कनाद्वा, पूर्वं लिङ्गस्य विनियोजकत्वमुक्तम्। तच्च मानान्तरसापेक्षस्यैव, न निरपेक्षस्येति चिन्तनाद्वा **सङ्गतिः**। काम्येष्टिकाण्डे हि 'ऐन्द्राग्नमेकादशकपालं निर्वपेत्' इत्यादयः

काम्येष्टय उक्ताः । तथा 'काम्ययाज्यानुवाक्याकाण्डम्' इति समाख्यातं मन्त्रकाण्डमाम्नातम् । तत्र मन्त्रकाण्डे 'इन्द्राग्नी रोचना दिवः' इत्यादयो मन्त्रा ऐन्द्राग्नादीष्टिक्रमेणाऽऽम्नाताः । तत्र किमिमे मन्त्रा यथासामर्थ्यं सर्वेष्वेतद्देवतेषु काम्याकाम्यकर्मसु विनियोज्यन्ते, उत एतास्वेव काम्यास्विष्टिषु यथाक्रमं वा इति सन्देहः ।

पूर्वपक्षस्तु लिङ्गस्य श्रुतिवन्निरपेक्षस्यैव विनियोजकत्वाद्यथासामर्थ्यं सर्वत्र विनियोगः । न चैवं क्रमसमाख्याविरोधः । लिङ्गात्तयोर्दुर्बलत्वात् । यथा हि पूर्वत्र सूक्तवाकशब्दगतावयवशक्तिबलाल्लिङ्गादध्येतृप्रसिद्धकृत्स्नानुवाकविषयकसमाख्याबाधस्तथाऽत्रापि लिङ्गाद्याज्ञिकप्रसिद्धकाम्यमन्त्रकाण्डमितिसमाख्यादेर्बाधसम्भवादिति ।

सिद्धान्तस्तु देवतास्वरूपमात्रप्रकाशनरूपलिङ्गमात्रेण कर्माङ्गत्वं न ज्ञातुं शक्यम् । किन्तु कर्मापूर्वसाधनभूतप्रकाशनेनैव । तच्च कर्मसम्बन्धबोधकप्रमाणे सति । तस्मात् समाख्याबलान्मन्त्रकाण्डकर्मकाण्डयोः सम्बन्धावगतिवशेन मन्त्रकर्मणोरपि सामान्येन सम्बन्धे ज्ञाते विशेषतस्तस्मिन् प्रथमे कर्मण्ययं प्रथमो मन्त्र इति क्रमादवगम्यते । पश्चाल्लिङ्गाद्विनियोग इत्युपजीव्यत्वात्क्रमसमाख्ययोर्न लिङ्गेन बाधः शक्य इति यथाक्रममेतास्वेवेष्टिषु विनियोगः । न चैन्द्राग्नेष्टावैन्द्राग्नो मन्त्रो, न वैश्वानरादिरिति लिङ्गादेव ज्ञायत इति वाच्यम् । 'ऐन्द्राग्नमेकादशकपालं निर्वपेद् भ्रातृव्यवान्' इति द्वितीयेष्टावपि प्राप्तिनिरासाय क्रमस्यावश्यापेक्षणादिति । तथा च **सूत्रम्, काम्येनैन्द्राग्नादिकर्मणा युक्तं याज्यानुवाक्याकाण्डस्याऽऽम्नानं,** न सर्वकर्मयुक्तम् । कुतः ? **लिङ्गक्रमसमाख्यानात्** । द्वन्द्वैकवद्भावः । क्रमसमाख्यानुगृहीताल्लिङ्गादिति । **फलन्तु** काम्यनित्ययोः कर्मणोर्विनियोगः **पूर्वपक्षे** । **सिद्धान्ते** तु काम्य एवेति व्यक्तम् ।

इति सप्तमं काम्ययाज्यानुवाक्यानां काम्यमात्राङ्गताधिकरणम्

अथाष्टममाग्नीध्रोपस्थाने प्रकृतानां मन्त्राणां विनियोगाधिकरणम् (सूत्राणि २०-२३)

अधिकारे च मन्त्रविधिरतदाख्येषु शिष्टत्वात् ॥ २० ॥

(तदाख्यो वा प्रकरणोपपत्तिभ्याम् ॥ २१ ॥ अनर्थकश्चोपदेशः स्यादसम्बन्धात्फलवता ॥ २२ ॥ सर्वेषाञ्चोपदिष्टत्वात् ॥ २३ ॥)

अत्र सामान्यसम्बन्धसापेक्षलिङ्गविनियोजकत्वप्रसङ्गेन श्रुतेरपि सति सम्भवे सामान्यसम्बन्ध-मन्यतः सिद्धमपेक्ष्य विशेषमात्रपरत्वविचारात् प्रासङ्गिकी **सङ्गतिः** । ज्योतिष्टोमे श्रूयते 'आग्नेय्या आग्नीध्रमुपतिष्ठते, ऐन्द्र्या सदः, वैष्णव्या हविर्धानीम्' इति । तत्र **आग्नीध्र**नामकमण्टपविशेषस्य आग्नेय्योपस्थानं यया कयाचित्प्रकृतया अप्रकृतया वा, अथ प्रकृतयैवेति **सन्देहः** ।

पूर्वपक्षस्तु 'अग्निर्देवता यस्या ऋचः सा आग्नेयी' इत्यवयवशक्त्या सर्वासामग्निसम्बन्धिनीनामृचा-माग्नेयीपदेनाभिधानात्, 'अग्न आयाहि वीतये' इत्यादिकया प्रकरणपठितया वा दाशतयीगतया वा यया कयाचिदुपस्थानम् । एवमैन्द्र्येत्यादावपीति । तदुक्तं **सूत्रे, अधिकारे** प्रकरणे आग्नेय्या आग्नीध्रम्' इत्यादिर्यो **मन्त्रविधिः** सः **अतदाख्येषु** प्रकरणेऽनाम्नातेषु चकारादाम्नातेषु च विषये स्यात् । कुतः? **शिष्टत्वात्** आग्नेय्येत्यविशेषणोक्तत्वात् इति ।

सिद्धान्तस्तु अप्रकृतमन्त्रविधिपक्षे आग्नेय्यादीनामृचामाग्नीध्राद्युपस्थानशेषत्वं तत्कृतोपस्थानस्य ज्योतिष्टोमापूर्वौपयिकव्यापारसाधनता चेत्युभयविधानाद्गौरवम् । क्रतुप्रकरणपठितानान्तु क्रत्वपूर्वौपयिक व्यापारसाधनत्वस्य तत्प्रकरणपाठादेव सिद्धेः, कोऽसौ व्यापारः? इति विशेषाकांक्षायामाग्नीध्राद्युप-स्थानरूप इति विशेषमात्रविधाने लाघवमिति प्रकृताभिरेवाग्नेय्यादिभिराग्नी- ध्रादिमण्टपोपस्थानमिति । **फलन्तु** प्रकृताभिरेवोपस्थानमिति व्यक्तम् ।

इत्यष्टममाग्नीध्रोपस्थाने प्रकृतानां मन्त्राणां विनियोगाधिकरणम् (सूत्राणि २०-२३)

अथ नवमं भक्षमन्त्राणां यथालिङ्गं ग्रहणादौ विनियोगाधिकरणम् (सूत्रे २४-२५)

लिङ्गसमाख्याभ्यां भक्षार्थताऽनुवाकस्य ॥ २४ ॥

(तस्य रूपोपदेशाभ्यामपकर्षोऽर्थस्य चोदितत्वात् ॥ २५ ॥)

सामान्यसम्बन्धमपेक्ष्य लिङ्गं विनियोजकमित्यस्य क्वचिदपवादोऽप्यस्तीत्यत्रोच्यते इति **सङ्गतिः** । ज्योतिष्टोमेषु हुतस्य सोमरसस्य शेषभक्षणं विहितं 'अभिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि सोमं भक्षयन्ति' इति । तस्मिन् भक्षणे ग्रहणावेक्षणनिगिरणसम्यग्जरणरूपाश्चत्वारो व्यापारा भक्षानुवाकसंज्ञके भक्षमन्त्रे समाम्नाताः । 'भक्षेहि मा विश दीर्घायुत्वाय शन्तनुत्वाय रायस्पोषाय वर्चसे सुप्रजास्त्वाय । एहि वसो पुरोवसो प्रियो मे हृदोऽस्यश्विनोस्त्वा बाहुभ्यां सख्यासम् । नृचक्षसं त्वा देव सोम सुचक्षा अवख्येषम् । हिन्व मे गात्रा हरिवो गणान्मे मा वितीतृषः । शिवो मे सप्तर्षीनुपतिष्ठस्व मा

मेऽवाङ्नाभिमतिगाः । मन्द्राभिभूतिः केतुर्यज्ञानां वाग्जुषाणां सोमस्य तृप्यतु । वसुमद्गणस्य रुद्र-वद्गणस्य आदित्यवद्गणस्य सोमदेव ते मतिविदः प्रातःसवनस्य माध्यन्दिनस्य सवनस्य तृतीयस्य सवनस्य गायत्रछन्दसस्त्रिष्टुप्छन्दसो जगतीछन्दसोऽभिष्टुत इन्द्रपीतस्य नराशँसपीतस्य पितृपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि'' इति ।

तत्र किं सर्वोऽपि भक्षानुवाकः सोमभक्षणे विनियुज्यते, उत 'एहि वसो' इत्यादिः सख्यासम्' इत्यन्तस्तद्ग्रहणे, 'नृचक्षसम्' इत्यादिः 'अवख्येषम्' इत्यन्तस्तद्दर्शने, 'हिन्व' इत्यादिः 'गाः' इत्यन्त-स्तस्य सम्यग्जरणे, इतरः सर्वानुवाको भक्षणे इति सन्देहः ।

हिन्वेति मन्त्रस्यार्थः, 'हे हरिवः सोम मे गात्राणि हिन्व प्रीणय । गणान् इन्द्रियाणि मा वितीतृषः वितृष्णानि मा कुरु । शिवस्सन् मे सप्तर्षीन् चक्षुर्द्वयनासाद्वारद्वयश्रोत्रद्वयाऽस्यान् उपतिष्ठस्व व्याप्नुहि । मे नाभिमवाक् नाभेरधस्ता मातिगाः' इति ।

पूर्वपक्षस्तु भक्षणवद्ग्रहणादिकं न साक्षाद्विहितम् । किन्तु भक्षणं ग्रहणादिना विना न सम्भव-तीत्यर्थतः प्राप्तम् । 'मन्त्रश्च क्रत्वर्थत्वेन विहितमेवार्थं प्रकाशयति' इत्यविहिते ग्रहणादौ मन्त्रस्य विनियोगायोगात् कृत्स्नोप्यनुवाकः 'सख्यासम्' 'अवख्येषम्' इत्यादेर्लक्षणया भक्षणप्रकाशनसामर्थ्य-कल्पनेन भक्षण एव विनियुज्यते । तथा च **सूत्रम्, भक्षानुवाकस्य समस्तस्य भक्षार्थतैव** । कुतः ? **लिङ्गसमाख्याभ्यां** 'भक्षे हि' 'भक्षयामि' इत्यादिलिङ्गात्, भक्षानुवाक इति समाख्यानाच्चेति ।

सिद्धान्तस्तु ग्रहणादेः साक्षाद्विधानाभावेऽपि भक्षविधिनैवार्थात्कर्तव्यतया प्राप्तत्वाद्यथासामर्थ्यं विभज्य विनियोग इति । **फलन्तु** कृत्स्नाकृत्स्नविनियोग इति व्यक्तम् ।

इति नवमं भक्षमन्त्राणां यथालिङ्गं ग्रहणादौ विनियोगाधिकरणम् (सूत्रे २४-२५)

अथ दशमं मन्द्राभिभूतिरित्यादेरेकमन्त्रताधिकरणम्

गुणाभिधानान्मन्द्रादिरेकमन्त्रः स्यात्तयोरेकार्थसंयोगात् ॥ २६ ॥

पूर्वोक्तस्यात्रापवादात् **सङ्गतिः** । प्रागुक्ते भक्षानुवाके मन्द्रेत्यादिस्तृप्यत्वित्यन्तो भागस्तृप्तौ विनियुज्यते वसुमद्गणस्येत्यादिर्भक्षयामीत्यन्तोंऽशो भक्षणे, उत मन्द्रादिर्भक्षयामीत्यन्त एक एव मन्त्रो भक्षणे विनियुज्यते इति **सन्देहे** पूर्ववद्यथासामर्थ्यं विभज्य विनियोग इति **प्राप्ते**,

भक्षणानुनिष्पादिन्यास्तृप्तेर्व्यापारान्तरत्वाभावेन स्मृत्यनपेक्षतया स्मारकमन्त्रापेक्षाभावात्तत् प्रकाशनेऽदृष्टार्थतैव स्यात् । तृप्तिविशिष्टभक्षणप्रकाशने तूत्साहजननेन दृष्टार्थता स्यात् । तस्माल्लैङ्गिक-विनियोगादेकवाक्यतापन्नवाक्यबलेन भक्षण एव विनियोग इति **सिद्धान्तः** । तदाह **सूत्रकारः**, **मन्द्रादिस्तृप्तिरूपगुणाभिधानाद्वसुमद्गणस्येत्यादिना** **एकमन्त्रःस्यात्** **तयोर्द्वयोरंशयोस्तृप्तिविशिष्ट-भक्षणरूपैकार्थाभिधायकत्वादिति** ।

फलन्तु, पूर्वपक्षे वसुमद्गणस्येत्याद्यंशे वर्णभ्रंशे वसुमद्गणस्येत्यारभ्यैवोच्चरणीयम् । **सिद्धान्ते** मन्द्राभिभूतिरित्याद्यारभ्येति ज्ञेयम् ।

इति दशमं मन्द्राभिभूतिरित्यादेरेकमन्त्रताधिकरणम्

अथैकादशमिन्द्रपीतस्येत्यादिमन्त्राणां विनियोगाधिकरणम् (सूत्रे २७-२८)

लिङ्गविशेषनिर्देशात्समानविधानेष्वनैन्द्राणाममन्त्रत्वम् ॥ २७ ॥

(यथादेवतं वा तत्प्रकृतित्वं हि दर्शयति ॥ २८ ॥)

अत्र प्रासङ्गिकी सङ्गतिः । ज्योतिष्टोमे सन्त्यैन्द्राण्यनैन्द्राण्यनेकदैवत्यानि प्रदानानि । तेषु शेषे भक्षणीये लिङ्गसमाख्याभ्यां भक्षमन्त्रस्य विनियोगे स्थिते ''वसुमद्गणस्य सोमदेव ते मतिविदः प्रातस्सवनस्य गायत्रछन्दस इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि' इति प्रातःसवनीय-भक्षणमन्त्रः किमैन्द्रस्यैव भक्षणे प्रयोज्य उतान्येषामपीति । यदा त्वन्येषां तदा किमूहेन, अथ यथाश्रुत एवेति त्रेधा **सन्देहः** ।

पूर्वपक्षस्तु इन्द्रपीतस्येत्यस्य इन्द्रेण पीतस्य सोमस्य शेषं भक्षयामीत्यर्थः । तथा च सति अस्य मन्त्रस्य इन्द्रप्रदानशेषभक्षण एव समर्थत्वात्तत्रैवायं मन्त्रो विनियुज्यते । न तु मैत्रावरुणादिशेषभक्षणे । अतोऽमन्त्रकमेव तद्भक्षणमित्येकः । तथा च **सूत्रम्** । **अनैन्द्राणां अमन्त्रत्वम्** । कुतः ? इन्द्रपीतस्येति **लिङ्गविशेषनिर्देशात्** । ऊहेन समन्त्रत्वमस्त्वित्यत उक्तं ॥ **समानविधानेष्विति** ॥ ऐन्द्राणामनैन्द्राणां च 'सोमेन यजेत' इति तुल्यविधानत्वेन कर्मैक्यात् प्रकृतिविकृतिभावायोगादिति ।

इन्द्रपीतस्येति पदस्य अन्यत्रासमर्थत्वेपि मित्रावरुणपीतस्येत्यादिरूपेणोहे सति तत्सामर्थ्यं सेत्स्यति । न च ज्योतिष्टोमाख्यकर्मैक्यात् प्रकृतिविकृतिभावाभावेन नोह इति वाच्यम् । कर्मभेद इव शेषभक्षणभेदेऽप्यूहसम्भवान्मन्त्रवदेवान्यदपि भक्षणमिति **द्वितीयः** ।

इत्येकादशमिन्द्रपीतस्येत्यादिमन्त्राणां विनियोगाधिकरणम् (सूत्रे २७-२८)

अथ द्वादशमभ्युन्नीतसोमभक्षणाधिकरणम् (सूत्राणि २९-३१)

इतः परं परमसिद्धान्ते वक्तव्ये एतत्पक्षप्रयोजनतया छन्द इत्यादिसूत्रात्पूर्वं कृत्वाचिन्तया अधिकरणपञ्चकमारभ्यते।

पुनरभ्युन्नीतेषु सर्वेषामुपलक्षणं द्विशेषत्वात्॥ २९॥

(अपनयाद्वा पूर्वस्यानुपलक्षणम्॥ ३०॥ ग्रहणाद्वाऽपनयः स्यात्॥ ३१॥)

ज्योतिष्टोमे सन्ति दश चमसाः। ब्रह्मोद्गातृयजमानहोतृसंज्ञकानां मध्यतःकारिणां चत्वारश्चमसाः। मैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्ट्राग्नीध्रसंज्ञकानां होतृकशब्दितानां पञ्च। अच्छावाकस्यैकः। तत्र मध्यतःकारिणां चतुर्भिश्चमसैरिन्द्रमुद्दिश्य द्विर्होतव्यम्। होतृकाणां तु चमसैः पञ्चभिरिन्द्रमेवोद्दिश्य सकृद्धोमं विधायाभक्षितेषु सशेष्वेव तेषु द्रोणकलशात्सोमं पुनरानीय मित्रावरुणेन्द्रमरुत्पत्नी-वत्त्वष्ट्रग्न्यादिभ्यो देवतान्तरेभ्यो हुत्वा भक्ष्यते। अच्छावाकचमसस्तु भक्षोत्तरकालमानेष्यते। तत्र होतृकाणां चमसेष्विन्द्रस्य मित्रावरुणादीनां च शेषोऽस्ति। तस्मिन् भक्ष्यमाणे **सन्देहः** मित्रा-वरुणपीतस्येत्येवोहः कार्यः, उत इन्द्रमित्रावरुणपीतस्येति।

पूर्वपक्षस्तु इन्द्रपीतशेषस्याप्युपादाने हि इन्द्रपीतस्य मित्रावरुणपीतस्य सोमस्य शेषं भक्षया-मीत्यर्थः स्यात्। न च तत्र इन्द्रपीतसोमस्य शेषोऽस्ति। अभ्युन्नीतस्य पूर्वतनशेषेण सह मित्रा-वरुणादिभ्यो दत्तत्वेन तेभ्यो दत्तशेषस्य इन्द्रसम्बन्धाभावान्मित्रावरुणपीतस्येत्येवोहः कार्य इति।

सिद्धान्तस्तु द्रोणकलशादानयनं करिष्यमाणं मित्रावरुणादियागार्थमिति बुध्या आनीयमानस्यैव मित्रावरुणादिदेवतासम्बन्धावगमेन पूर्वशेषस्य इन्द्रदेवतासम्बन्धानपायात् इन्द्रमित्रावरुणपीतस्ये-त्येवोहः कार्य इति। तथा च **सूत्रम्**। **पुनरभ्युन्नीतेषु** हुत्वा भक्ष्यमाणेषु पूर्वदेवतानामभ्युन्नीतदेवतानां **चोपलक्षणत्वम्**। कुतः? भक्ष्यमाणस्य **द्विशेषत्वादि**ति। **फलन्तु** इन्द्रपदानुपादानोपादाने।

इति द्वादशमभ्युन्नीतसोमभक्षणाधिकरणम् (सूत्राणि २९-३१)

अथ त्रयोदशं पात्नीवतशेषभक्षणे इन्द्रादीनामनुपलक्षणाताधिकरणम् (सूत्रे ३२-३३)

पात्नीवते तु पूर्ववत्॥ ३२॥

(ग्रहणाद्वाऽपनीतं स्यात्॥ ३३॥)

पूर्वोक्तापवादादापवादिकी **सङ्गतिः**। सन्ति ज्योतिष्टोम ऐन्द्रवायवादयो द्विदेवत्या ग्रहाः। तेषां हुतशेषीभूताः सम्पाता आदित्यस्थालीमागत्य ततोप्याग्रयणस्थाल्यां प्रक्षिप्यन्ते। तस्यामाग्रयणः सोमोऽस्ति। तत्र श्रूयते 'उपांशु पात्रेणाऽग्रयणात् पात्नीवतं गृह्णाति' इति। तस्मिन् पात्नीवते देवतायै हुतशेषे भक्षणीये **सन्देहः** किमिन्द्रवायुपत्नीवत्पीतस्येत्यूहः कार्यः उत पत्नीवत्पीतस्येत्येवेति।

पूर्वत्रेवाऽग्रयणमात्रस्यैव पात्नीवतत्वेनान्यस्य तत्संसृष्टस्य द्विदैवत्यशेषस्यापात्नीवतत्वेन पूर्वदेवता सम्बन्धानपायात् इन्द्रवायुपत्नीवत्पीतस्येत्यूहः कार्य इति **प्राप्तम्**। तदुक्तं **सूत्रे, पात्नीवते तु पूर्ववत्** इति।

सिद्धान्तस्तु, 'पात्नीवतमाग्रयणात्' इति आग्रयणस्यापादानतया निर्देशेन आग्रयणांशवत् अनाग्रयणमपि तत्संसृष्टं द्विद्वैवत्यं ततोऽपेतं पात्नीवतमेवेति पूर्वदेवतासम्बन्धापायात् पत्नीवत्पीतस्येत्येवोहः कार्य इति। **फलन्तु,** प्राशनकाले बुद्ध्या आग्रयणांशमात्रस्य निष्कर्षानिष्कर्षाविति ज्ञेयम्।

इति त्रयोदशं पात्नीवतशेषभक्षणे इन्द्रादीनामनुपलक्षणताधिकरणम् (सूत्रे ३२-३३)

अथ चतुर्दशं पात्नीवतशेषभक्षे त्वष्टुरनुपलक्षणीयताधिकरणम् (सूत्रे ३४-३५)

त्वष्टारं तूपलक्षयेत्पानात् ॥ ३४ ॥

(अतुल्यत्वात्तु नैवं स्यात् ॥ ३५ ॥)

अत्र पूर्ववैषम्येण शङ्कनात् **सङ्गतिः**। भक्षमन्त्रे हि पत्नीवत्पीतस्येत्यूहः कार्य इत्युक्तम्। तत्र पत्नीवत्त्वष्टृपीतस्येति त्वष्टाप्युपलक्षणीयः, उत नेति **सन्देहः**।

पूर्वत्र इन्द्रवाय्वोरुपलक्षणे बीजाभावेनानुपलक्षणेऽपीह ''अग्ना इ पत्नीवाः सजूर्देवेन त्वष्ट्रा सोमं पिब स्वाहा' इति पात्नीवतहविर्होमाङ्गमन्त्रेण 'हे पत्नीवन्नग्ने त्वष्टा देवेन सजूः सह सोमं पिब' इत्यर्थकेन पात्नीवते त्वष्टुरपि पानावगमाद्देवतायाः पानाभावेन त्वष्टुः पानलिङ्गेन देवतात्वावगमात् पत्नीवत्त्वष्टृपीतस्येत्युपलक्षणीयस्त्वष्टापीत्याह **सूत्रकारः ॥ त्वष्टारं तूपलक्षयेदिति ॥ एवं प्राप्ते अभिधीयते,** सोमपेनाग्निना त्वष्टुः सहभावश्रवणेप्यग्नेरिव पातृत्वं न निश्चेतुं शक्यते।

सहैव दशभिः पुत्रैर्भारं वहति गर्दभी।

इत्यादौ पुत्राणां वोढृत्वादृष्टेः। येन देवतात्वं त्वष्टुरपि पत्नीवत इव विज्ञायेत। 'पात्नीवतमाग्रयणाद्गृह्णाति' इति विधिवाक्ये तद्धितप्रत्ययेन निरपेक्षस्यैव पत्नीवतो देवतात्वावगमेन मान्त्र-

वर्णिक्या त्वष्टृरूपदेवतया बाधविकल्पसमुच्चयानामयोगाच्च त्वष्टुरदेवतात्वान्नोपलक्षणीयस्त्वष्टेति पत्नीवत्पीतस्येत्येवोहः कार्य इति। **फलन्तु** त्यागे त्वष्टुरप्युद्देश्यत्वं **पूर्वपक्षे। सिद्धान्ते** तु नेति व्यक्तम्।

इति चतुर्दशं पात्नीवतशेषभक्षे त्वष्टुरनुपलक्षणीयताधिकरणम् (सूत्रे ३४-३५)

अथ पञ्चदशं पात्नीवतशेषभक्षे त्रयस्त्रिंशतामनुपलक्षणाधिकरणम्

त्रिंशच्च परार्थत्वात् ॥ ३६ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात् **सङ्गतिः**। पात्नीवतस्य होमे याज्यामन्त्रः श्रूयते 'ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः। पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमावह मादयस्व' इति। **अस्यार्थः,** ऐभिरित्यत्र आ एभिरिति विभागः। हे अग्ने एभिस्त्रयस्त्रिंशता देवैः सह अर्वाक् इह आयाहि। कथं ? सरथं क्रियाविशेषणम्। एकरथाधिरूढस्सन्निति यावत्। यद्वा यतस्तवाश्वा विभवो बहवः, अतो नानारथं यथा भवति तथा नानारथानधिष्ठाय आयाहीत्यर्थः। आगत्य च तान् पत्नीवतस्त्रयस्त्रिंशतो देवान् अनुष्वधं अनुप्रदानं आवह मादयस्व तर्पय चेति। तत्र **सन्देहः** शेषे भक्षयितव्ये भक्षमन्त्रे पत्नीवदग्नित्रयस्त्रिंशत्पीतस्येति त्रयस्त्रिंशद्देवा अप्युपलक्ष्या, उत नेति।

पूर्वपक्षस्तु पूर्वत्र त्वष्टुः सहभावमात्रत्वेनापातृतया देवतात्वं नेति तस्यानुपलक्षणेऽपीह मादयस्वेति तेषामग्निना माद्यत्वश्रवणेन सोमरसपातृत्वप्रतीत्या देवतात्वावगमात्तेप्युपलक्ष्या इति। **यत्तु शास्त्रदीपिकायां,** त्रयस्त्रिंशद्देवानामेव देवतात्ववचनं तत्त्वतिशयार्थम्। न त्वग्नेरदेवतात्वाभिप्रायम्। 'अग्ना इ पत्नीव' इति होमाङ्गमन्त्रे पत्नीवच्छब्दसामानाधिकरण्येन, तस्यापि 'पात्नीवतमाग्रयणात्' इति विधिवाक्ये पात्नीवतशब्देन देवतात्वस्य स्पष्टं प्रतीतेः।

सिद्धान्तस्तु अग्नेर्यजमानद्रव्येण अन्यमादयितृत्वायोगात् आत्मने दत्तेनैव द्रव्येण देवतान्तरमादयितृत्वस्य वाच्यत्वाद्यजमानोद्दिष्टस्यैव देवतात्वादग्नेरेव देवतात्वं नान्येषामिति। पात्नीवतमिति वाक्ये पत्नीवानग्निर्देवतास्येत्येव विग्रहो न पत्नीवन्तस्त्रयस्त्रिंशतोपि देवा देवता अस्येत्यपि। तथा च तत्र तच्छेषाभावाद्भक्षमन्त्रे तेऽपि नोपलक्ष्या इति। तथा च **सूत्रम्। त्रिंशच्च** त्र्यधिकत्रिंशद्देवा अपि त्वष्टृवन्नोपलक्ष्याः। कुतः? **परार्थत्वात्** चोदनानुरोधित्वान्मन्त्रस्य। तस्यां च पत्नीवतोऽग्नेरेव देवतात्वप्रतीतेरिति। **फलन्तु** पात्नीवतयागे त्रयस्त्रिंशतो देवानां उद्देश्यत्वानुद्देश्यत्वे।

इति पञ्चदशं पात्नीवतशेषभक्षे त्रयस्त्रिंशतामनुपलक्षणाधिकरणम्

अथ षोडशं भक्षणे अनुवषट्कारदेवताया अनुपलक्षणाधिकरणम्

अनुवषट्कारश्च कर्तृवत् ॥ ३७ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात् सङ्गतिः । अनुवषट्काराख्यः सोमशेषद्रव्यकप्रतिपत्तियागः । स च 'सोमस्याग्ने वीहीत्यनुयजति' इति सोमग्रहणयागाद्यानन्तर्यविशिष्टो मन्त्रविशिष्टश्च विधीयते । स च विकृतावतिदेशतः प्राप्तोऽनुष्ठीयते । तत्र विकृतौ सोमशेषे भक्षणीये सति भक्षमन्त्रे मन्त्रवर्णप्राप्तानुवषट्कारदेवताऽग्निरुपलक्षणीय उत नेति सन्देहे त्रयस्त्रिंशतो देवतात्वाभावेनानुपलक्षणेऽपि मन्त्रवर्णोक्ताग्नेरनुवषट्कारदेवतात्वाविवादात्सोऽप्युपलक्षणीय इति प्राप्ते,

प्रकृतावसावग्निर्विद्यमानोऽपि भक्षमन्त्रे नोपलक्षितः । प्रधानयागदेवतैवेन्द्र उपलक्षित इति विकृतावपि प्रधानयागदेवतैवोपलक्ष्या न गुणकर्मभूतानुवषट्कारदेवताऽग्निरपि इति **सिद्धान्तः** । तथा च **सूत्रम्** । **अनुवषट्कारश्च** अनुवषट्कारदेवताग्निश्च नोपलक्षणीयः । **कर्तृवत्** अग्निदत्तसोमपानकर्तृत्रिंशद्देवतावदिति ।

फलन्तु, पूर्वपक्षेऽनुवषट्कारयागस्य गुणकर्मत्वानभ्युपगमेनानुवषट्कारयागात् पूर्वं सोमापचारे सोमान्तरसम्पादनेन सोऽनुष्ठेयः । सिद्धान्ते तु प्रतिपत्तिकर्मत्वात् सोमापचारे न पुनः सोमसम्पादनमिति ज्ञेयम् ॥

इति षोडशं भक्षणे अनुवषट्कारदेवताया अनुपलक्षणताधिकरणम्

अथ सप्तदशमनैन्द्राणाममन्त्रकभक्षणाधिकरणम्

छन्दःप्रतिषेधश्च सर्वगामित्वात् ॥ ३८ ॥

एवं सोमपात्राणां प्रकृतिविकृतिभावमुपेत्य अनैन्द्रेषूहेन समन्त्रकं भक्षणमित्युक्तेऽर्थे, कस्योहः? कस्य न ? इति पञ्चभिर्नयैर्विचार्य अतः परमनैन्द्रशेषभक्षणममन्त्रकमेवेति पक्षं स्थापयितुं, ऊहेन समन्त्रकं भक्षणमिति प्रागुक्तद्वितीयपूर्वपक्षस्य **उत्तरमुच्यते** । यत्त्वनैन्द्राणमूहेन समन्त्रकं भक्षणमिति तन्न युक्तम् । सोमपात्राणां प्रकृतिविकृतिभावे सत्येवं स्यात् । न चैवम् । 'सोमेन यजेत' इत्युत्पत्तौ श्रुतः सोमः कर्माङ्गम् । न प्रदानविशेषस्य । स एव च सोमः सर्वप्रदानेष्वभ्यस्यत इति सर्वाण्यपि प्रदानानि समप्रधानानीति प्रकृतिविकारभावाभावादूहो नेत्यनैन्द्राणां शेषभक्षणममन्त्रकमिति । तथा च

सूत्रम् । सोमस्य सर्वगामित्वात् सर्वप्रदानसाधारण्यादनूहः । न च षोडशिपात्रस्थशेषभक्षणे 'अनुष्टुप्छन्दसः इति षोडशिनि भक्षणमन्त्रं नमयति' इति गायत्रछन्दस इति भक्षमन्त्रे षोडशिन्यनुष्टुप्छन्दसः इत्यन्यथामन्त्रोच्चारणविधिलिङ्गेनान्यत्राप्यूहेन भाव्यमिति वाच्यम् । तस्य तृतीयसवनस्थत्वेन जगतीछन्दस्त्वे प्राप्ते तत्प्रतिषेधोऽयमिति ।

इति सप्तदशमैन्द्राणाममन्त्रकभक्षणाधिकरणम्

अथाष्टादशमैन्द्राग्नशेषभक्षणस्यामन्त्रकताधिकरणम् (सूत्रे ३९-४०)

ऐन्द्राग्ने तु लिङ्गभावात् स्यात् ॥ ३९ ॥

(एकस्मिन् वा देवतान्तराद्विभागवत् ॥ ४० ॥)

अनैन्द्राणाममन्त्रकं भक्षणमित्येतदेव त्रिभिरधिकरणैर्विचार्यते । अत्रेन्द्रपदोपादानेन शङ्कनात् **सङ्गतिः** । 'ऐन्द्राग्नं गृह्णाति' इत्यस्ति ज्योतिष्टोमे ऐन्द्राग्नस्सोमः । तत्र शेषे भक्षणीये **सन्देहः** ऐन्द्राग्नशेषभक्षणं समन्त्रकमुतामन्त्रकमिति ।

पूर्वपक्षस्तु, इन्द्राग्निभ्यां पीतः सोम इन्द्रेणापि पीत इति इन्द्रपदरूपलिङ्गबलात्समन्त्रकमैन्द्राग्नशेषभक्षणम् । तदुक्तं **सूत्रे** ॥ **ऐन्द्राग्ने त्वित्यादि** ॥

सिद्धान्तस्तु, नवमे वक्ष्यमाणदेवताधिकरणन्यायेनाशरीरस्येन्द्रस्य पानायोगात् पीतपदेन दानलक्षणायां 'इन्द्रपीतस्य' इति मन्त्रस्य 'इन्द्राय दत्तसोमस्य' इत्यर्थः स्यात् । न चात्र यजमान इन्द्रमुद्दिश्य दत्तवान् । किन्तु इन्दाग्नी उद्दिश्य । तस्माद्दानं मिश्रविषयं, मन्त्रस्तु न मिश्रविषय इत्यमन्त्रकमैन्दाग्नभक्षणमिति ॥

इत्यष्टादशमैन्द्राग्नशेषभक्षणस्यामन्त्रकताधिकरणम् (सूत्रे ३९-४०)

अथैकोनविंशं गायत्रछन्दसः इत्यादिमन्त्रविनियोगाधिकरणम् (सूत्रे ४१-४२)

छन्दश्च देवतावत् ॥ ४१ ॥

(सर्वेषु वाऽभावादेकछन्दसः ॥ ४२ ॥)

अत्र पूर्वन्यायेन शङ्कनात्सङ्गतिः । भक्षमन्त्र एव गायत्रछन्दस इन्द्रपीतस्येति श्रूयते । तत्र 'गायत्रमेव छन्दो यस्य' इति विग्रहे गायत्र्याद्येकछन्दस्क एव सोमे गायत्रछन्दस इति मन्त्रः प्रयोज्यः, उत छन्दोन्तरयुतेऽपीति **सन्देहः** ।

पूर्वपक्षस्तु इन्द्रपीतस्येति मन्त्रः केवल एवैन्द्रे प्रयोज्यो न देवतान्तरयुक्ते इति पूर्वोक्तनीत्या गायत्र्यादिछन्दोपि न छन्दोन्तरयुते सोमे प्रयोज्यः। किन्तु केवलतद्युक्त एवेति। तदुक्तं **सूत्रे ॥ छन्दश्च देवतावदिति ॥**

सिद्धान्तस्तु एकछन्दस्कसोमस्य क्वचिदपि सवनेऽभावात् एवकारं विना गायत्रं छन्दो यस्येति बहुव्रीहेश्छन्दोन्तरयुतेऽपि समानत्वान्नानाछन्दस्केऽपि सोमे गायत्रछन्दसस्त्रिष्टुप्छन्दस इत्यादिरूपेणैव प्रयोज्यो मन्त्र इति। **फलन्तु** व्यक्तम्।

इत्येकोनविंशं 'गायत्रछन्दसः' इत्यादिमन्त्रविनियोगाधिकरणाम् (सूत्रे ४१-४२)

अथ विंशमेकादशाधिकणोपसंहाराधिकरणम्

सर्वेषां वैकमन्त्र्यमैतिशायनस्य भक्तिपानत्वात् सवनाधिकारो हि ॥ ४३ ॥

ऊहनिरासेनानैन्द्रेष्वमन्त्रकं भक्षणमित्यवान्तरसिद्धान्तः कृतः। अधुनाऽत्र **परमसिद्धान्त** उच्यते। इन्द्रपीतस्येत्यत्र तत्पुरषत्वे ह्यनैन्द्रेष्वस्य मन्त्रस्यासामर्थ्यादमन्त्रकमनैन्द्रशेषभक्षणं स्यात्। न चैवम्। इन्द्रपीतस्येत्यत्र पूर्वपदस्य 'बहुव्रीहौ प्रकृत्या पूर्वपदम्' (पा. सू. ६-२-१) इत्युक्तप्रकृतिस्वरत्वेन 'इन्द्रेण पीतः सोमो यस्मिन् सवने' इति बहुव्रीहित्वात्। तत्पुरुषत्वे 'समासस्य' (पा. सू. ६-१-२२३) इति सूत्रेण अन्तोदात्ततापत्त्या सर्वस्यानुदात्तत्वप्राप्तेरिन्द्रपदस्योदात्तता न स्यात्। तथा च 'इन्द्रेण पीतस्य सवनस्य सम्बन्धिनं सोमं भक्षयामि' इत्यर्थसम्पत्तेरनैन्द्राणामपीन्द्रपीतसवनसम्बन्धितया यथाश्रुतमन्त्रस्यानैन्द्रशेषभक्षणेऽपिं सामर्थ्यसत्त्वाद्यथाम्नातमन्त्रयुक्तमेवानैन्द्रशेषभक्षणमिति। तथा चाह **सूत्रकारः, सर्वेषामैन्द्रानैन्द्रप्रदानानामैकमन्त्र्यम्।** सर्वेष्वपीन्द्रपीत इत्यनूहित एव मन्त्रः प्रयोज्य इति यावत्। कुतः ? **हि यस्मात् सवनाधिकारः** 'प्रातस्सवनस्य' इत्यधिकृत्यायमिन्द्रपीतस्येति मन्त्र उक्तः अतः 'इन्द्रेण पीतः सोमो यस्मिन् सवने तदिन्द्रपीतम्' इति सवनस्य विशेषणमेतदिन्द्रपीतपदम्। न तत्पुरुषेण सोमस्य। कुतः ? **भक्तिपानत्वात्।** इन्द्राय दत्तस्य हुताहुतसमुदायस्य इदानीमभावेन पानस्य भाक्तत्वप्रसङ्गादिति। **फलन्तु,** यथाम्नातमन्त्रपूर्वकमेव सर्वशेषभक्षणमिति।

इति विंशमेकादशाधिकरणोपसंहाराधिकरणम्

इति भाट्टसङ्ग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थश्रीपादशिष्यश्रीराघवेन्द्रतीर्थयतिसार्वभौमविरचिते

तृतीयाध्यायस्य द्वितीयः पादः

अस्मिन् पादे अधिकरणानि २० सूत्राणि ४३

आदितः " १२४ " ३५९

अथ तृतीयाध्यायस्य तृतीयः पादः

अथ प्रथममुच्चैस्त्वादीनां वेदधर्मताधिकरणम् (सूत्राणि १-८)

हरिः ॐ पूर्वपादे लिङ्गेन विनियोगश्चिन्तितः । अत्र पादे लिङ्गोपजीविना वाक्येन तदुपजीवि-प्रकरणादिना च विनियोगश्चिन्त्यत इति **पादसङ्गतिः** ।

श्रुतेर्जाताधिकारः स्यात् ॥ १ ॥

(वेदो वा प्रायदर्शनात् ॥ २ ॥ लिङ्गाच्च ॥ ३ ॥ धर्मोपदेशाच्च न हि द्रव्येण सम्बन्धः ॥ ४ ॥ त्रयीविद्याख्या च तद्विदि ॥ ५ ॥ व्यतिक्रमे यथाश्रुतीति चेत् ॥ ६ ॥ न सर्वस्मिन्निवेशात् ॥ ७ ॥ वेदसंयोगान्न प्रकरणेन बाध्येत ॥ ८ ॥)

ज्योतिष्टोमे हि ''प्रजापतिरकामयत प्रजाः सृजेयेति । स तपोऽतप्यत । तस्मात्तेपानात्त्रयो देवा असृज्यन्त, अग्निर्वायुरादित्यः । ते तपोऽतप्यन्त । तेभ्यस्तेपानेभ्यस्त्रयो वेदाऽसृज्यन्त । अग्नेर्ऋग्वेदो वायुना यजुर्वेद आदित्यात्सामवेदः'' इत्युपक्रम्य श्रूयते । 'उच्चैर्ऋचा क्रियते, उच्चैस्साम्ना, उपांशु यजुषा' इति । **भाष्ये** 'प्रजापतिर्वा इदमेक आसीत् । स तपोऽतप्यत' इत्युपक्रमः पठितः । **शास्त्रदीपिकायां** प्रजापतिरित्यादिरुपक्रम उक्तः ।

तत्र 'उच्चैर्ऋचा' इत्यादिवाक्ये **सन्देहः** किमुपसंहारगतऋगादिशब्द उपक्रमस्थमन्त्रब्राह्मण-समुदायरूपवेदपदानुसाराद्दगादिवेदपरः, उतैकैकमन्त्रवाचकोपसंहारस्थऋगादिपदानुसारेणोपक्रमस्थ-वेदशब्द एकैकऋगादिमन्त्रपर इति ।

तत्रोपक्रमोपसंहारयोरेकवाक्यत्वायैकविषयकत्वेऽवश्यम्भाविनि प्रथमश्रुतस्यार्थवादस्याप्रधानत्वात्, भूतार्थत्वेनानुवादत्वात्, विध्युद्देशस्य प्रधानत्वादप्राप्तार्थत्वात् तदनुरोधेनोपक्रमार्थवादगतो वेदशब्दो लक्षणया वेदैकदेशमन्त्रपरो नेतव्य इति, उच्चैस्त्वादयो धर्मा ऋगादिमन्त्रधर्माः । ऋगादिमन्त्रेण ऋग्वेद पठितेन यजुर्वेदपठितेन वा यदनुष्ठीयते तदुच्चैरिति, यजुर्मन्त्रेण यदनुष्ठीयते तदुपांशु इति । तथा च **सूत्रम्**, उच्चैस्त्वादिधर्मो जाताधिकारो मन्त्रविषयो भवेत् । कुतः ? श्रुतेः, मन्त्रवाचिऋगादि-पदश्रवणादित्येवं **प्राप्ते**,

सिद्धान्त्यते, विध्युद्देशस्य प्रधानत्वाप्राप्तविषयत्वयोः सत्त्वेऽपीहोपक्रमे वेदपदश्रवणेन सञ्जात-विरोधितया स्वार्थानिर्णायकत्वात्, उपक्रमस्य चासञ्जातविरोधितया स्वार्थनिर्णायकत्वेन लब्धात्म-

कत्वात्तदनुरोधेनोपसंहारस्थऋगादिशब्दोप्यात्मलाभार्थं तदविरोधाय ऋगादिवेदपरो, न वेदैकदेशमन्त्रपर इति । तथा च **सूत्रम् ॥ वेदो वा प्रायदर्शनादिति ॥** वाशब्दः पूर्वपक्षनिरासकः । विध्युद्देशगतऋगादिशब्दार्थो **वेदो** भवेत् । कुतः ? **प्रायदर्शनात् ॥** तथैवोपक्रमदर्शनादिति । तदेवमुपक्रमोपसंहारैकवाक्यताबलेन निर्णयाद्वाक्यविनियोगोऽयम् ।

फलन्तु, पूर्वपक्षे यजुर्वेदेन विनियुक्तानामृचामुच्चैस्त्वमिति । **सिद्धान्ते** तु उपांशुत्वमिति ज्ञेयम् ।

इति प्रथममुच्चैस्त्वादीनां वेदधर्मताधिकरणम् (सूत्राणि १-८)

अथ द्वितीयमाधाने गानस्योपांशुताधिकरणम् (भाष्यकारीयं वर्णकम्)

गुणमुख्यव्यतिक्रमे तदर्थत्वान्मुख्येन वेदसंयोगः ॥ ९ ॥

पूर्वत्र सामान्यतः उच्चैस्त्वादेर्वेदधर्मत्वे सिद्धे, अत्र विशेषचिन्तनात्सङ्गतिः । एकत्र वेदे प्रधानं विधीयते, अन्यस्मिन् अङ्गानि । यथा यजुर्वेदे 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्याधानं विहितम् । तदङ्गानि तु वारवन्तीयादिसामानि सामवेदे 'य एवं विद्वान् वारवन्तीयं गायति, य एवं विद्वान् यज्ञायज्ञीयं गायति, य एवं विद्वान्वामदेव्यं गायति' इति । तत्र वारवन्तीयादेः सामवैदिकस्वरः, उत याजुर्वैदिक इति **सन्देहे** प्रधानविधिनिबन्धनस्वरस्य प्रधानवाक्यैकवाक्यतापेक्षित्वेन विलम्बितत्वात्सामवेदनिबन्धन एव स्वरोऽन्यानपेक्षितया शीघ्रं प्रतीयत इति स एव कार्य इति **प्राप्ते,**

सिद्धान्तितम्, 'अङ्गप्रधानधर्मविरोधे प्रधानधर्मानुग्रहस्यैव न्याय्यत्वात् अङ्गप्रधानयुक्तापूर्वभावना प्रधानविधिनैव विधीयते' इति सप्तमाद्ये वक्ष्यमाणत्वेन प्रधानविधिनैवाऽङ्गनां विहितत्वेन तदविरोधाय प्रधानस्वर एवोपांशुत्वमङ्गानां, न सामवेदस्वर उच्चैस्त्वमिति । तथा च **सूत्रकारः, गुणमुख्यव्यतिक्रमे** अङ्गप्रधानधर्मविरोधे **मुख्येन** मुख्यानुरोधेन अङ्गेषु **वेदसंयोगो** वैदिकस्वरसंयोगः स्यात् । कुतः ? **तदर्थत्वात्** अङ्गानां प्रधानार्थत्वेन प्रधानानुग्रहस्यैव न्याय्यत्वादिति । **फलन्तु** प्रधानस्वरानुष्ठानम् ।

वार्तिककारीयं वर्णकम्

एतद्भाष्यकारीयमधिकरणशरीरं **अङ्गगुणविरोधे च तादर्थ्यात्** इति द्वादशाध्यायद्वितीयाधिकरणेन गतार्थम् । वारवन्तीयसामादिरूपाङ्गविधेर्याजुर्वैदिकत्वेनोदाहरणञ्चायुक्तमिति दूषयित्वा **वार्तिककारो**ऽन्यथोक्तवान् । यस्य मन्त्रस्य वेदान्तरे पाठो वेदान्तरे विनियोगविधिः, यथा वारवन्तीयादेः सामवेदे पाठो यजुर्वेदे विनियोगस्तत्र **सन्देहः** यत्र पाठस्तद्वेदनिमित्तकस्वरोऽथ विनियोगवेदनिबन्धन इति ।

पूर्वपक्षस्तु यत्र वेदे मन्त्रस्याऽम्नानं तत्रैव प्रथमावगतिशब्दिता मन्त्रस्योत्पत्तिः । उत्पन्नस्य हि विनियोग इति, यत्रोत्पत्तिस्तद्वेदस्वर एव प्रथमभावित्वाद्युक्तो, न विनियोजकवेदस्वरः । विलम्बितत्वात् इति **प्राप्ते,**

उत्पत्तिविधिप्राधान्येनोत्पत्तिवेदनिमित्तकस्वरस्य प्रथमोपस्थितत्वेऽप्युत्पत्तिमात्रेण प्रयोज्यत्वासिद्धेः प्रयोज्यतयाऽवधारितस्यैव स्वरापेक्षित्वात्तदवधारणस्य विनियोगाधीनत्वाद्विनियोगो यत्र तद्वेदस्वर एवोपांशुत्वं युक्तमिति **सिद्धान्तः** । तन्मते **सूत्रार्थस्तु गुण** उत्पत्तिविधिः । **मुख्यो** विनियोगविधिः । तयोर्व्यतिक्रमे वेदभेदेनाऽम्नाने मुख्येन विनियोगविध्यनुरोधेन **तद्वेदस्वरसंयोग** एव स्यात् । न तूत्पत्तिविधिवेदस्वरसंयोगः । कुतः ? **तदर्थत्वात्** । उत्पत्तिविधेर्विनियोगविध्यर्थत्वात् इति । तदुक्तं वार्तिके,

गुणे स्वरूपतो धर्मः प्रधानद्वारतोऽपरः ।
अत्र स्यात्तत्र विज्ञेयं गुणधर्मस्य बाधनम् । इति ॥

इति द्वितीयमाधाने गानस्योपांशुताधिकरणम्

अथ तृतीयं ज्योतिष्टोमस्य याजुर्वैदिकताधिकरणम्

भूयस्त्वेनोभयश्रुति ॥ १० ॥

पूर्वसूत्रे गुणमुख्येति मुख्यपदेन प्रधानविधेः प्रसक्तत्वेनेहापि प्रधानकर्मविधौ चिन्ता क्रियत इति **सङ्गतिः** । यद्वा यत्र प्रधानविधिस्तत्स्वरो ग्राह्य इति पूर्वत्रोक्ताविह कुत्र प्रधानकर्मणो विधिः ? क्व न ? इति चिन्तनात्**सङ्गतिः** । 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इति यजुर्वेदे सामवेदे च श्रूयते ।

तत्र **सन्देहः**, किमुभयत्र विधिः, उत यजुर्वेद एव विधिः, सामवेदे तु गुणविध्यर्थमनुवाद इति । एकत्रैवेत्यत्र नियामकाभावादुभयत्र विधिरिति **प्राप्ते,**

'सोमेन यजेत' इति सोमद्रव्यस्य 'ऐन्द्रवायवं गृह्णाति' इतीन्द्रादिदेवतायाश्च यजुर्वेदे श्रवणेन इतरव्यावृत्तकर्मस्वरूपस्य तत्रावगतिसम्भवेन तत्रैव निराकाङ्क्षतया तत्रैव विधिपर्यवसानम् । सामवेदे तु स्तोत्रादिगुणविधानार्थमनुवाद इति **सिद्धान्तः** । तथा च **सूत्रम्,** उभयत्र श्रुतिः श्रवणं यस्य कर्मणः **तदुभयश्रुति** वेदद्वये श्रूयमाणं कर्म, द्रव्यदेवतादिरूप**भूयस्त्वेन** विधेयतया निर्णेतव्यमिति । **फलन्तु, पूर्वपक्षे** विकल्पेन वेदद्वयस्वरेणानुष्ठानम् । **सिद्धान्ते तु** यजुर्वेदेन यदनुष्ठीयते तदुपांशु इत्युक्तदिशोपांशुस्वरेणैवेति ।

इति तृतीयं ज्योतिष्टोमस्य याजुर्वैदिकताधिकरणम्

अथ तुरीयं प्रकरणस्य विनियोजकताधिकरणम्

असंयुक्तं प्रकरणादितिकर्तव्यतार्थित्वात् ॥ ११ ॥

पूर्वत्र वाक्यविनियोगचिन्तां तत्प्रसङ्गप्राप्तस्वरचिन्ताञ्च त्रिभिर्नयैः कृत्वा अधुना वाक्योपजीवि-प्रकरणेन विनियोगश्चिन्त्यत इति **सङ्गतिः** । दर्शपूर्णमासौ प्रकृत्य श्रूयते 'समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति' इति ।

तत्र **सन्देहः** किमेते समिधादयः प्रयाजा दर्शपूर्णमासयोरङ्गं न वेति । दर्शपूर्णमासयोरेव शेषत्वे विनियोजकश्रुत्यादित्रयान्यतमप्रमाणाभावात्, फलाकाङ्क्षाणामपि समिधादीनां स्वर्गफलकत्वेन निराकाङ्क्षत्वसम्भवादिति **प्राप्ते**

'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यस्य 'दर्शपूर्णमासाख्यकर्मणा स्वर्गं कुर्यात्' इत्यर्थकतया यागेन स्वर्गसम्पादनप्रकारस्यानिर्ज्ञाततया कथं ? इतीतिकर्तव्यताकाङ्क्षाया दर्शपूर्णमासकर्मणः सत्त्वात्समिधादेश्च फलासंयुक्तत्वेन प्रयोजनाकाङ्क्षायाः फलान्तरकल्पनादपि क्रतूपकाररूपदृष्टफल-कल्पनस्य लघुत्वात्प्रधानस्येतिकर्तव्यताकाङ्क्षारूपप्रकरणवशात्प्रयाजादीनां दर्शपूर्णमासाङ्गत्वमिति **सिद्धान्तः** । एवं च **सूत्रम्**, **असंयुक्तं** श्रुतिलिङ्गवाक्यैरविनियुक्तं **प्रकरणा**द्विनियुज्यते । कुतः ? प्रधानस्येति**कर्तव्यतार्थित्वा**दिति ।

फलन्तु, **पूर्वपक्षे** समिधादेर्विश्वजिदादिवत्फलकल्पनात्पृथक्फलकामेनानुष्ठानम् । **सिद्धान्ते** तु दर्शाद्यर्थमेवेति ज्ञेयम् ।

इति तुरीयं प्रकरणस्य विनियोजकताधिकरणम्

अथ पञ्चमं क्रमस्य विनियोजकताधिकरणम्

क्रमश्च देशसामान्यात् ॥ १२ ॥

अत्र प्रकरणोपजीविना स्थानप्रमाणेन विनियोगश्चिन्त्यत इति **सङ्गतिः** । अध्वर्युकाण्डे प्रधाना-न्याग्नेयोपांश्वग्नीषोमीयानि कर्माणि क्रमेण श्रुतानि । याजमाने च तस्मिन्नेव क्रमे 'अग्नेरहं देवयज्य-याऽन्नादो भूयासम्' इति 'दब्धिरस्य दब्धो भूयासममुं दभेयम्' इति 'अग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासम्' इति क्रमेणानुमन्त्रणमन्त्राः श्रुताः । तत्राद्यन्तयोर्लिङ्गादाग्नेयाग्नीषोमीययागाङ्गत्वमविवादमिति मध्यमन्त्र एव किमयमुपांशुयाजाङ्गमुताऽग्नेयादित्रितयाङ्गमिति **सन्देहः** ।

दब्धिरसीति मन्त्रस्य 'त्वं दब्धिरसि दाहकोऽसि। अहमदब्धोऽदग्धो भूयासम्। त्वया अमुं शत्रुं दभेयं दहेयं' इत्यर्थप्रतिपादनसामर्थ्यरूपलिङ्गस्य इतिकर्तव्यताकाङ्क्षारूपप्रकरणस्य चाऽग्नेयादित्रितयसाधारण्यादुपांशुयाजमात्राङ्गत्वकल्पकयोः श्रुतिवाक्ययोरभावात् यथासङ्ख्याम्नानरूपक्रमशब्दितस्थानस्य चाप्रमाणत्वात्त्रितयाङ्गम्, न तूपांशुयाजमात्रस्याङ्गमिति **प्राप्ते,**

कर्मविधिक्रमेण मन्त्राम्नानं तेन सह सम्बन्धं विनाऽनुपपन्नं सत् समानदेशत्वरूपं क्रमशब्दितं स्थानमपि विनियोगे प्रमाणमिति वाच्यम्। आद्यन्तकर्मणोराद्यन्तमन्त्राभ्यां लैङ्गिकविनियोगेन समन्त्रतया निराकाङ्क्षत्वेन मध्ये पठितोपांशुयाजकर्मणो मन्त्राकाङ्क्षा न केनापि निवृत्तेति तद्बलेन तुल्यदेशत्वरूपं स्थानमुपांशुयाजाङ्गतया दब्धिरसीति मन्त्रं विधत्त इत्युपांशुयाजमात्राङ्गमयं मन्त्र इति **सिद्धान्तः**। तथा च **सूत्रम्, देशसामान्यात्** यः **क्रमः** समानदेशत्वरूपं क्रमशब्दितं स्थानं विनियोजकमिति। **फलन्तु,** मन्त्रस्योपांशुयाज एव प्रयोगो, नान्यत्राऽग्नेयादौ विकल्पेन प्राप्तिरिति।

इति पञ्चमं क्रमस्य विनियोजकताधिकरणम्

अथ षष्ठं समाख्याया विनियोजकताधिकरणम्

आख्या चैवं तदर्थत्वात्॥ १३॥

अत्र स्थानप्रमाणोपजीविना समाख्यारूपप्रमाणेन विनियोग उच्यते इति **सङ्गतिः**। दर्शपूर्णमासयोरग्न्यन्वाधानादय आध्वर्यवत्वेन सामिधेन्यनुवचनादयो हौत्रत्वेन सोमयागे स्तोत्रादय औद्गात्रत्वेन समाख्याताः। ते किमध्वर्युप्रभृतिभिरेव कार्याः, उतानियमेन येन केनचिदिति **सन्देहः**।

श्रुतिलिङ्गवाक्यप्रकरणस्थानेष्वन्यतमस्यापि नियामकस्याभावात्समाख्यायाश्च विधिप्रत्ययहीनत्वेनाविधायकतया विधिनिबन्धननियमायोगादनियमेन येन केनचिद्यत्किञ्चित्कार्यमिति **प्राप्ते,**

सिद्धान्त्यते, अध्वर्योरिदमाध्वर्यवं इति सम्बन्धनिमित्तकाऽध्वर्यवादिवैदिकसमाख्या अग्न्यन्वाधानादिपदार्थैरसति सम्बन्धेऽनुपपन्नाः सत्यः सम्बन्धमवगमयन्ति। स च सम्बन्धः कर्तॄणां कार्यापेक्षत्वात्पदार्थानाञ्च कर्त्रपेक्षत्वात्समाख्यया च मिथः उपस्थितानां योग्यतया क्रियाकर्तृभावरूप एव सिद्ध्यति। तच्च प्रयोगविधिर्विधत्त इति विधिनिबन्धननियमसिद्धिरिति। **सूत्रार्थस्तु, आख्या** समाख्या च **एवं** विनियोजिकैव। कुतः? **तदर्थत्वात्**। अर्थशब्दः प्रयोजनपरः। शेषशेषिभावबोधनप्रयोजनकत्वात्समाख्याया इति। **फलन्तु** नियमेन तैस्तैरेव तेषां तेषामनुष्ठानम्।

इति षष्ठं समाख्याया विनियोजकताधिकरणम्

अथ सप्तमं श्रुतेर्लिङ्गापेक्षया प्राबल्याधिकरणम्

श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये परदौर्बल्यमर्थविप्रकर्षात् ॥ १४ ॥

पूर्वत्र श्रुत्यादिषट्कस्य विनियोगे प्रामाण्यमुक्तम् । अत्र तेषां श्रुत्यादीनां विरोधे प्राबल्यदौर्बल्ये चिन्त्येते इति **सङ्गतिः** । अयं हि **सूत्रस्यार्थः, श्रुत्यादीनां समवाये परस्य दौर्बल्यं** विनियोगरूपार्थं प्रति **विप्रकर्षात्** व्यवधानादिति । तत्रादौ श्रुतिलिङ्गयोश्चिन्त्यते । 'ऐन्द्र्या गार्हपत्यमुपतिष्ठते' इति श्रूयते । तत्र 'कदा चन स्तरीरसि नेन्द्र सश्चसि दाशुषे' इत्यैन्द्र्या ऋचा इन्द्रस्य गार्हपत्यस्य च विकल्पेनोपस्थानमथ समुच्चयेनोपस्थानं, यद्वेन्द्रस्यैवाथ गार्हपत्यस्यैवेति **सन्देहः** ।

पूर्वपक्षस्तु ऐन्द्र्येति तृतीयाश्रुत्या गार्हपत्योपस्थानशेषत्वस्य, मन्त्रे च 'हे इन्द्र कदाचिदपि घातुको नासि, हविर्दात्रे प्रीयसे च' इति मन्त्रलिङ्गबलादिन्द्रोपस्थानशेषत्वस्य च प्रतीत्या श्रुतिलिङ्गयोर्विरोधे सति द्वयोः प्रमाणत्वाविशेषाद्व्रीहियववद्वकल्प **इत्येकः** । उपस्थानं प्रति इन्द्रगार्हपत्ययोः प्रधानत्वात् उपस्थानस्य च गुणत्वात् प्रतिप्रधानं गुणावृत्तिरिति न्यायेनोपस्थानावृत्त्या श्रुतिलिङ्गयोः समुच्चय इति **द्वितीयः** । श्रुतिर्विनियुंजाना वस्तुसामर्थ्यमनुसृत्य विनियुङ्क्ते । अन्यथा 'वह्निना सिञ्चेत्' इत्यपि विनियुज्येत । अतः उपजीव्यत्वेन लिङ्गस्य प्रबलत्वात् इन्द्र एवोपस्थेयः । न चैन्द्र्या गार्हपत्योपस्थापने सामर्थ्यमस्ति । येन तत्रापि विनियोगः स्यात् इति **तृतीयः** ।

सिद्धान्तस्तु मन्त्रस्य गार्हपत्ये मुख्यसामर्थ्याभावेऽपि **'वचनात्त्वयथार्थमैन्द्री स्यात्'** इत्यधिकरणे **'गुणाद्वाप्यभिधानं स्यात्'** इति गुणसूत्रोक्तदिशा गौणसामर्थ्यस्य सम्भवादशक्तिकृत-प्रतिबन्धाभावान्निर्विघ्ना **श्रुतिः** शीघ्रं गार्हपत्ये मन्त्रं विनियुङ्क्ते । **लिङ्गन्तु** न साक्षाच्छेषत्वस्य शेषित्वस्य वा बोधकम् । अशब्दत्वात् । **अशब्दमनपेक्षमिति, चोदनालक्षणोऽर्थो धर्मः** इत्युक्तेश्च शब्दोप-स्थापितार्थस्यैवोपादेयत्वात् । किन्तु मन्त्रस्य शेषत्ववाचिनीमिन्द्रस्य शेषित्ववाचिनीं च 'इन्द्रमन्त्रेण इन्द्रमुपतिष्ठते' इति श्रुतिं कल्पयित्वैवेति विप्रकृष्यते । अतो लिङ्गेन श्रुतिकल्पनावसर एव प्रत्यक्षश्रुत्या गार्हपत्ये झटिति विनियोगेन तद्बाधान्न लिङ्गस्य विनियोगावकाशः । **सूत्रयोजना तु,** विरुद्धयोः श्रुतिलिङ्गयोरेकत्र **समवाये** मेलने सति **परस्य** लिङ्गस्य **दौर्बल्यम्** । कुतः ? **अर्थस्य** विनियोगाख्यस्य श्रुतिकल्पनया **विप्रकर्षादिति** । एतच्च शब्दगतसामर्थ्यरूपलिङ्गस्य श्रुतिविरोधे उदाहरणम् । अर्थगत-सामर्थ्यरूपलिङ्गस्य श्रुतिविरोधे उदाहरणन्तु **विहारो लौकिकानामर्थं साधयेत्प्रभुत्वात्** इति द्वादश-तृतीयपादीयाद्यनये गार्हपत्याद्यग्नयः सामर्थ्यरूपलिङ्गात्पाकादि- लौकिककार्याणामप्यङ्गमिति **प्राप्ते**

'गार्हपत्ये हवींषि श्रपयति' इति 'आहवनीये जुहोति' इति 'दक्षिणाग्रावन्वाहार्यं पचति' इति प्रत्यक्ष श्रुतिनिर्दिष्टैरेव प्रयोजनैर्निराकाङ्क्षत्वान्न लौकिककार्यार्थता लिङ्गात्कल्पयितुं युक्तेति वक्ष्यमाणत्वाज्ज्ञेयम्।

इति सप्तमं लिङ्गापेक्षया श्रुतेः प्राबल्याधिकरणम्।

अथाष्टमं वाक्यापेक्षया लिङ्गप्राबल्याधिकरणम्

लिङ्गवाक्ययोरेकत्र समाविष्टयोर्विरोधे वाक्यदौर्बल्यमर्थ- विप्रकर्षाज्ज्ञेयम्। तद्यथा, 'स्योनं ते सदनं करोमि, घृतस्य धारया सुशेवं कल्पयामि, तस्मिन्सीद, अमृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्य-मानः' इति दर्शपूर्णमासयोः श्रुते वाक्ये 'हे पुरोडाश, ते स्योनं सुखकरं सदनमाश्रयं करोमि। घृतस्य धारया सुशेवं सुखसेव्यं च कल्पयामि। हे व्रीहीणां मेध सारभूत सुमनस्यमानः सुमनाः सन् अमृते नाशरहिते तस्मिन् सदने सीद उपविश, प्रतितिष्ठ स्थिरो भव' इत्येवंविधार्थप्रतिपादनसामर्थ्यरूप-लिङ्गबलेन कल्पयाम्यन्तः सदनकरणे, तस्मिन्नित्याद्यंशः प्रतिष्ठापन इति विभज्य विनियोक्तव्यः, उत सर्वोपि मन्त्रः सदनकरणे पुरोडाशस्थापने च विनियोज्य इति **सन्देहः**।

पूर्वपक्षस्तु, सम्भवत्येकवाक्यत्वे वाक्यभेदकल्पनाऽयोगात् तस्मिन्निति पूर्वोक्तसापेक्षतच्छब्दैनैक-वाक्यत्वप्रतीतेस्तद्बलेन सर्वोप्ययं मन्त्रः सदनकरणे प्रतिष्ठापने चोभयत्र विनियोज्य इति।

सिद्धान्तस्तु, पूर्वत्र हि श्रुतिरेव साक्षाद्विनियोक्त्री, अन्यत्तु तद्द्वारा इत्युक्तम्। श्रुतेर्विनियोज-कत्वमपि सामर्थ्यमनुसृत्यैवेत्यप्युक्तम्। एवञ्चैकवाक्यताबलात्सर्वस्योभयत्र विनियोगपक्षे पूर्वार्धस्य उत्तरार्धोक्तप्रतिष्ठापनरूपार्थप्रकाशने उत्तरार्धस्य पूर्वार्धोक्तसदनकरणरूपार्थप्रकाशने च मुख्यसामर्थ्या-भावेन 'कृत्स्नेन मन्त्रेण सदनं कुर्यात्' इति 'कृत्स्नेन मन्त्रेण पुरोडाशस्थापनं कुर्यात्' इति विनियोजक-श्रुतिकल्पनाऽयोगात्सहकारिभूतं यादृशतादृशं गौणसामर्थ्यं कल्पयित्वैवोक्तरूपश्रुतिं प्रकल्प्य कृत्स्नस्यो-भयत्र विनियोगः कल्प्य इति वाक्यस्य विनियोगरूपोऽर्थो व्यन्तरित इति विप्रकृष्टः। मुख्यसामर्थ्य-रूपलिङ्गस्य तु 'कल्पयाम्यन्तेन सदनं कुर्यात्' 'तस्मिन् इत्याद्यंशेन तु पुरोडाशस्थापनं कुर्यात्' इति साक्षाच्छ्रुतिकल्पनेन विनियोगरूपोऽर्थः सन्निकृष्ट इति वाक्येन लिङ्गकल्पनावसर एव मुख्यलिङ्गेन श्रुतिकल्पनया मन्त्रस्य विभज्य विनियोगः कृत इति निराकाङ्क्षतया वाक्यस्य न विनियोगकल्पनावसर इति लिङ्गेन वाक्यस्य बाध इति। **अर्थसामर्थ्यरूपलिङ्गाद्वाक्यस्य दौर्बल्यन्तु, फलार्थत्वात्तु कर्मणः शास्त्रं सर्वाधिकारं स्यात्** इति षष्ठाद्यपादीयद्वितीयाधिकरणे ध्येयम्। तत्र हि 'स्वर्गकामो यजेत, इति

स्वर्गफले यागं विनियुंजानं वाक्यमन्धपङ्ग्वादीनामपि स्वर्गकामनावत्त्वात् तान् प्रत्यपि विनियुङ्क्ते इति तेषामपि यागेऽधिकार इति **प्राप्ते,**

साङ्गस्य क्रतोः पुरुषैः सम्बन्धादङ्गे चाऽज्यावेक्षणविष्णुक्रमणादावन्धपङ्ग्वादेरसामर्थ्यात्सामर्थ्यानुरोधेनानन्धादीनेव स्वर्गकामान् प्रति यागं स्वर्गे विनियुङ्क्ते इत्यनन्धादेरेवाधिकारो नान्यस्येति लिङ्गेन वाक्यस्य सङ्कोचरूपबाधस्य वक्ष्यमाणत्वात् इति।

इत्यष्टमं वाक्यापेक्षया लिङ्गप्राबल्याधिकरणम्।

अथ नवमं प्रकरणापेक्षया वाक्यप्राबल्याधिकरणम्

वाक्यप्रकरणयोरप्यर्थसन्निकर्षविप्रकर्षाभ्यां प्राबल्यदौर्बल्ये ज्ञेये। **तथा हि,** दर्शपूर्णमासयोः 'अग्नीषोमाविदं हविरजुषेतां, अवीवृधेतां महो ज्यायोऽक्रातां' 'इन्द्राग्नी इदं हविरजुषेतां' इत्यादरूपः सूक्तवाक आम्नातः। तत्र 'अग्नीषोमौ' इत्ययमंशः पौर्णमास्यां, 'इन्द्राग्नी' इत्ययमंशोऽमावास्यायां प्रयोज्य इत्यतीतपादे **कृत्स्नोपदेशा**दितिनयेऽभिहितम्। अत्र तु अग्नीषोमैन्द्राग्नीपदयोरुत्तरौ इदं हविरित्याद्यंशौ किं प्रकरणबलात् पर्वद्वयेऽपि प्रयोज्यौ, उत अग्नीषोमपदादुत्तरांशस्तदेकवाक्यताबलात्पौर्णमास्यां, इन्द्राग्नीपदस्योत्तरांशोऽमावास्यायां इति **सन्देहे,**

प्रधानकर्मप्रकरणे पठितस्य सर्वस्य प्रधानार्थत्वात्प्रधानदर्शपूर्णमासकर्मण इतिकर्तव्यताकाङ्क्षारूपप्रकरणेन अग्नीषोमादिपदद्वयात्तदुत्तरांशद्वयं पौर्णमास्यां प्रयुज्यमानाग्नीषोमपदैकवाक्यतया प्रयोक्तव्यम्। तथाऽमावास्यायामपि इन्द्राग्नीपदैकवाक्यतया प्रयोज्यमिति **प्राप्ते,**

एकैकांशस्य तदुत्तरपठितस्य तत्तद्देवतावाचिपदेनैकवाक्यता तत्तत्समभिव्याहारादेव सिद्धा। तत एव च तत्तद्देवताप्रकाशनसामर्थ्यमपि सिद्धमिति 'अनेन मन्त्रभागेन पौर्णमास्यां प्रस्तरं प्रहरेत्' 'इन्द्राग्नी इत्याद्यंशेन चामावास्यायां' इति श्रुतिकल्पनेन वाक्यस्य विनियोगरूपोऽर्थः सन्निकृष्टः। द्व्यन्तरितत्वात्। अंशद्वयस्याग्नीषोमपदेन इन्द्राग्नीपदेन वा एकवाक्यता न सिद्धेति तां कल्पयित्वा, तत्तद्देवताप्रकाशनसामर्थ्यस्य तत्तद्देवतावाचिपदादुत्तरत्र पठितस्य सत्त्वेपि अंशान्तरस्य तदसत्त्वेन तत्तद्देवताप्रकाशनसामर्थ्यं चांशान्तरस्य प्रकल्प्य, पश्चाद्विनियोजकश्रुतिकल्पनमिति त्र्यन्तरितत्वात् प्रकरणस्य विनियोजकत्वरूपोऽर्थो विप्रकृष्टः। तथा च प्रकरणेन सामर्थ्यरूपलिङ्गकल्पनावसर एव वाक्येन लिङ्गद्वारा श्रुतिकल्पनया मन्त्रभागस्य विनियोगसिद्धेर्निराकाङ्क्षतया न प्रकरणेनैकवाक्यतालिङ्गयोः कल्पनाद्वारा श्रुतिकल्पनावकाश इति वाक्येन प्रकरणस्य बाध इति।

इति नवमं प्रकरणापेक्षया वाक्यप्राबल्याधिकरणम्

अथ दशमं स्थानपेक्षया प्रकरणप्राबल्याधिकरणम्

एवं **प्रकरणस्थान**योरपि सन्निकर्षविप्रकर्षाभ्यां प्राबल्यदौर्बल्ये ज्ञेये । **तथा हि,** राजसूये बहवः पश्चिष्टिसोमयागाः । **प्रकरणशब्दसामान्यादिति** चतुर्थान्त्यपादीयाद्यनये वक्ष्यमाणदिशा समप्रधान-भूताश्च ते । तत्राभिषेचनीयाख्यसोमयागसन्निधौ विदेवनशौनःशेपोपाख्यानादयः केचन पदार्थाः 'अक्षैर्दीव्यति' 'शौनःशेपमाख्यापयति' इति श्रुताः । शुनःशेपविषयमाख्यानं बह्वृचब्राह्मणे पठितं शौनःशेपम् । तत्र ते पदार्थाः किं प्रकरणात् राजसूयाङ्गं, उत सन्निधानादभिषेचनीयस्येति **सन्देहः** ।

आकाङ्क्षारूपप्रकरणस्यापि सन्निध्यधीनतया बलवताऽत्यन्तसान्निध्येनाभिषेचनीयस्याङ्गमेते विदेवनादय इति **प्राप्ते,**

राजसूयस्याङ्गाकाङ्क्षारूपप्रकरणं विदेवनादिवाक्यानां प्रधानवाक्यैकवाक्यतां कल्पयित्वा, तदुपकार कत्वसामर्थ्यं च प्रकल्प्य, 'विदेवनादिपदार्थैं राजसूयमुपकुर्यात्' इति श्रुतिकल्पनया शीघ्रं प्रधाने विदेवनादीनङ्गतया बोधयति । सन्निधिस्तु अभिषेचनीये विशिष्याऽकाङ्क्षामुत्थाप्य, अभिषेचनीय-वाक्येनैकवाक्यतां कल्पयित्वा, तदुपकारसामर्थ्यरूपं लिङ्गं च प्रकल्प्य, पश्चाच्छ्रुतिकल्पनेन अभिषेच-नीये विनियुङ्क्ते इति चतुरन्तरितत्वात् स्थानस्य विनियोजकत्वं विप्रकृष्टमिति प्रकरणात् सन्निधिरूप-स्थानस्य बाध इति **सिद्धान्तः** ।

एतच्च पाठसन्निधिरूपस्थानदौर्बल्यमुक्तम् । अनुष्ठानसन्निधिरूपस्थानदौर्बल्यन्तु अत्रैव षष्ठ-पादीयाष्टमनये **दोहयोः कालभेदादसंयुक्तं श्रुतं स्यात्** इत्यत्र बोध्यम् । तत्र हि 'ऐन्द्रं दध्यमावास्यायां' 'ऐन्द्रं पयोऽमावास्यायां' इत्युत्पन्नयागयोर्दधि पूर्वेद्युः सायं दोहेनानुष्ठीयते । पूर्वेद्युरुपक्रान्तं दधि उत्तरेद्युरभिनिर्वर्तत इति दध्नो दिनद्वयसाध्यत्वाद्दोहधर्माश्च शाखाहरणादयः पूर्वेद्युरनुष्ठीयन्ते । ततश्च तेषामनुष्ठानसादेश्याद्दध्यर्थत्वे **प्राप्ते** प्रकरणाविशेषादुभयार्थत्वमित्युक्तेरिति ।

इति दशमं स्थानापेक्षया प्रकरणप्राबल्याधिकरणम्

अथैकादशं समाख्यापेक्षया स्थानप्राबल्याधिकरणम्

स्थानसमाख्ययोर्विरोधेऽपि सन्निकर्षविप्रकर्षाभ्यां प्राबल्यदौर्बल्ये ज्ञेये । **तथा हि,** पौरोडाशिक-मिति समाख्यायुक्ते दर्शपूर्णमासकाण्डे सान्नाय्यपात्रप्रकाशकानां 'मातरिश्वनो घर्मोसि' इत्यादिमन्त्राणां सन्निधौ पठितः शुन्धनप्रकाशकः 'शुन्धध्वं दैव्याय कर्मणे देवयज्याया' इति मन्त्रः किं पुरोडाशपात्र-

शुन्धनाङ्गं, उत सान्नाय्यपात्रशुन्धनाङ्गमिति **सन्देहे** समाख्यया पुरोडाशकाण्डे प्रोक्तानां उलूखल-मुसलजुह्वादीनामपि शोधनेऽङ्गमिति **प्राप्ते,**

सिद्धान्तः, पौरोडाशिकमिति समाख्यायां प्रकृत्या पुरोडाशस्य प्रत्ययेन काण्डस्योक्त्या तयो-स्सम्बन्धस्य,

पाकं हि पचिरेवाह कर्तारं प्रत्ययोप्यकः ।
पाकयुक्तः पुनः कर्ता वाच्यो नैकस्य कस्यचित् ॥

इति **वार्तिकोक्तदिशा** केनाप्यवाच्यत्वात् केवलं तयोः समभिव्याहारात् 'अस्त्यनयोः कश्चि-त्सम्बन्धः' इति पुरोडाशकाण्डयोः सम्बन्धसामान्यं कल्पनीयम् । ततश्च तत्र पठितपुरोडाशपात्राणां मन्त्राकाङ्क्षा कल्प्या । ततश्च मन्त्राणां पुरोडाशपात्रवाक्यानाश्चैकवाक्यता । ततश्च तत्प्रकाशन-सामर्थ्यरूपलिङ्गं कल्प्यम् । ततश्च 'अनेन मन्त्रेण पुरोडाशपात्राणां शुन्धनं कुर्यात्' इति श्रुतिः कल्प्येति पञ्चान्तरितं समाख्याया विनियोजकत्वम् । स्थानस्य तु सान्नाय्यपात्रशुन्धनसन्निधिः प्रत्यक्ष इत्या-काङ्क्षादिचतुष्टयमात्रं कल्प्यमिति चतुरन्तरितं विनियोजकत्वमिति स्थानप्रमाणेन समाख्याया बाधा-त्सान्नाय्यपात्रशुन्धनाङ्गं 'शुन्धध्वं' इति मन्त्र इति । तदुक्तं **वार्तिके**

एकद्वित्रिचतुःपञ्च श्रुत्यन्तरणकारितम् ।
श्रुत्यर्थं प्रति वैषम्यं लिङ्गादीनामपीष्यते ॥ इति ॥

एवं यथासूत्रं श्रुत्यादिषु द्वयोर्द्वयोर्विरुद्धयोः समावेशे परदौर्बल्यं प्रदर्शितम् । अव्यवहितानां श्रुतिलिङ्गादीनां पूर्वपूर्वपेक्षया दौर्बल्ये सिद्धे व्यवहितानां वाक्यादीनामनुक्तिसिद्धम् । तच्च विवृतं **गुरुपादैर्न्यायाध्वदीपिकायाम् ।**

इत्येकादशं समाख्यापेक्षया स्थानप्राबल्याधिकरणम्

अथ द्वादशं बाधयोग्यताधिकरणम्

पूर्वपूर्वस्योत्तरोत्तरप्रमाणमूलप्रतिषेधकत्वेनाप्राप्तबाधोऽयम् । सामान्यविशेषत्वादिषु तु प्राप्तबाध इति विवेक्तव्यम् ।

इति द्वादशं बाधयोग्यताधिकरणम्

अथ त्रयोदशं द्वादशोपसत्ताया अहर्गणाङ्गताधिकरणम् (सूत्रे १५-१६)

अहीनो वा प्रकरणाद्गौणः ॥ १५ ॥

(असंयोगात्तु मुख्यस्य तस्मादपकृष्येत ॥ १६ ॥)

एवं श्रुत्यादीनां विरोधे परदौर्बल्योक्तावत्र विरोध एव क्वास्ति ? क्व न? इति चिन्तनात्**सङ्गतिः**। तत्र श्रुत्यादिभिः प्रकरणस्य विरोधभावाभावौ अप्रकरणेत्युत्तरपादीयसूत्रात्प्रागष्टादशभिर्नयैश्चिन्त्येते । पूर्वं श्रुत्या प्रकरणस्य विरोधसदसद्भावौ त्रिभिर्नयैश्चिन्त्येते। ज्योतिष्टोमे 'तिस्र एव साह्नस्योपसदो द्वादशाहीनस्य' इति श्रुतम्। दीक्षादिनेभ्य ऊर्ध्वं सोमाभिषवात्पूर्वं कर्तव्या होमा **उपसदः**। एकेनाह्ना निष्पाद्यत्वात् साह्नो ज्योतिष्टोमः। तस्य त्र्युपसत्त्वं तावदङ्गम्। द्वादशोपसत्त्वमपि तदङ्गमुताहर्गणस्येति **सन्देहः**।

प्रकरणबलात्तदपि तस्यैवाङ्गम्। न चाहीनस्येति षष्ठीश्रुतिविरोधः। ज्योतिष्टोमस्य सर्वसोमयागप्रकृतित्वेन सर्वेषामङ्गानां तत्रोपदेशे सति तदुपदेशहीनविकृतीनामिव हीनत्वाभावेनाहीनशब्दस्य ज्योतिष्टोमपरत्वोपपत्तेः। एवञ्च त्र्युपसत्त्वद्वादशोपसत्त्वयोर्विकल्प इति **प्राप्तम्**। तथा च **सूत्रम्, अहीनो**ऽहीनशब्दः **प्रकरणात्** ज्योतिष्टोमे गौणः अहीनत्वगुणनिमित्तक इति।

सिद्धान्तस्तु, अहर्गणस्यैवाङ्गम्। न साह्नस्येति। कुतः ? साह्नस्येति अहीनस्येति शब्दभेदादर्थभेदस्य स्फुटत्वात्। द्विरात्रत्रिरात्राद्यहर्गणे अहीनशब्दस्य रूढत्वेन 'न हीयत इति अहीनः' इति योगेन स्वरविशेषेण च साह्नपरत्वायोगात्। अहीनशब्दो हि मध्योदात्तः पठ्यते। 'न हीयत' इति योगे तस्य नञ्तत्पुरुषत्वेन 'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः' (पा. सू ६-२-२) इति सूत्रेण अव्ययाख्यनञः पूर्वपदस्योदात्ताख्यप्रकृतिस्वरत्वान्वाख्यानादाद्युदात्तः स्यात्। रूढ्या अहर्गणार्थत्वे तु 'अह्नः खः क्रतुसमूहे' इति विहितस्य खप्रत्ययस्य 'आद्युदात्तश्च' इति सूत्रेण आद्युदात्तत्वात् तत्स्थाने प्राप्तस्य ईनादेशस्य आयन्नादिषूपदेशिवद्वचनं स्वरसिध्यर्थमित्यनुशासनबलात् प्रत्ययवद्भावादाद्यवर्णस्य ईकारस्योदात्तत्वसिध्या मध्योदात्तत्वं भवति। अतोऽहीनशब्दस्य अहर्गणपरत्वात् तत्परषष्ठीश्रुत्या तत्सम्बन्धावगमात् द्वादशोपसत्त्वमहर्गणाङ्गमेवेत्यहीनस्येति श्रुत्या प्रकरणस्य विरोधात् तया प्रकरणं बाधित्वा अहर्गणे उत्कृष्यते 'द्वादशाहीनस्य' इत्ययमंश इति। तथा च **सूत्रम्, असंयोगात्तु मुख्यस्य तस्मादपकृष्येत** इति। **तस्मा**ज्ज्योतिष्टोमात् द्वादशोपसत्त्वं द्वादशाहाद्यहर्गणे **अपकृष्येत**। सर्वप्रकृतितया **मुख्यस्य** ज्योतिष्टोमस्याहीनशब्देन **असंयोगा**दिति। **फलन्तु,** ज्योतिष्टोमे त्र्युपसत्त्वद्वादशोपसत्त्वयोर्न विकल्प इति।

इति त्रयोदशं द्वादशोपसत्ताया अहर्गणाङ्गताधिकरणम् (सूत्रे १५-१६)

अथ चतुर्दशं कुलायादौ प्रतिपदोरुत्कर्षाधिकरणम् (सूत्राणि १७-१९)

द्वित्वबहुत्वयुक्तं वाऽचोदनात्तस्य ॥ १७ ॥

(पक्षेणार्थकृतस्येति चेत् ॥ १८ ॥ न प्रकृतेरेकसंयोगात् ॥ १९ ॥)

अत्र पूर्ववैषम्येण शङ्कनात्सङ्गतिः । ज्योतिष्टोमे श्रुतं 'युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात्, एते असृग्रमिन्द्रव इति बहुभ्यो यजमानेभ्यः' इति । युवं हि इत्यादिकामृचं द्विकर्तृके यागे प्रतिपदं शस्त्रप्रथमां कुर्यात्, 'एते' इति मन्त्रं बहुयजमानके यागे शस्त्रस्यादिभूतां कुर्यादिति तदर्थः ।

तत्र **सन्देहः** किमेतन्मन्त्रद्वयस्य प्राथम्यं ज्योतिष्टोमप्रयोगे कार्यं, उत द्विबहुयजमानकेषु कुलायाहीनादिषूत्क्रष्टव्यमिति ।

पूर्वपक्षस्तु, पूर्वत्राहीनस्येति श्रुत्या प्रकरणबाधेनोत्कर्षेपीह द्वयोरित्यादिद्विबहुश्रुतिभ्यां न प्रकरणस्य बाधेन प्रतिपत्त्वस्य कुलायादिषूत्कर्षो युक्तः । **'सर्वशक्तौ प्रवृत्तिः स्यात्'** इति षष्ठतृतीयपादीयाद्यनये नित्ये कर्मणि अशक्तिकृताङ्गत्यागस्य वक्ष्यमाणत्वात् ज्योतिष्टोमस्य च 'वसन्ते वसन्ते ज्योतिषा यजेत' इति वीप्सया नित्यत्वेन द्वादशशतदक्षिणादानादावसामर्थ्येनैको यदि न शक्नुयात्तदा अङ्गान्तरवदेकत्वं विहाय द्वौ बहवो वा यजेरन्निति, तदाश्रयणेन प्रतिपद्विधानस्य ज्योतिष्टोम एव युक्तत्वादिति ।

सिद्धान्तस्तु, अशक्याङ्गत्यागेप्युपादेयस्य त्यागो नानुपादेयस्य देशकालादेरिति षष्ठ एव वक्ष्यमाणत्वेनैकत्वस्याप्यनुपादेयतया त्यागायोगाद्यजमानद्वित्वादेर्ज्योतिष्टोमे अभावेन द्विबहुश्रुतिभ्यां प्रकरणबाधेन कुलायादिषु प्रतिपत्त्वस्योत्कर्षः । श्रूयते च 'एतेन राजपुरोहितौ सायुज्यकामौ यजेयाताम्' इति 'एको द्वौ बहवो वा अहीनेन यजेरन्' इति कुलायाहीनयोः द्विबहुकर्तृकत्वम् । तथा 'एतेनैव द्वौ याजयेत्, त्रीन् याजयेत्' इति यागान्तरे व्यादिकर्तृकत्वमिति । तथा च **सूत्रम्, द्वित्वबहुत्वयुक्तं** प्रतिपद्विधानमृत्कृष्यते । **तस्य** द्वित्वस्य बहुत्वस्य च प्रकृतावचोदनादिति । **फलन्तु,** कुलायादौ मन्त्रप्राथम्यस्य निवेशो न ज्योतिष्टोम इति ।

इति चतुर्दशं कुलायादौ प्रतिपदोरुत्कर्षाधिकरणम् (सूत्राणि १७-१९)

अथ पञ्चदशं जाघन्या अनुत्कर्षाधिकरणम् (सूत्राणि २०-२३)

जाघनी चैकदेशत्वात् ॥ २० ॥

(चोदना वाऽपूर्वत्वात् ॥ २१ ॥ एकदेश इति चेत् ॥ २२ ॥ न प्रकृतेर-शास्त्रनिष्पत्तेः ॥ २३ ॥)

अत्र पूर्वसिद्धान्तन्यायेन शङ्कनात्सङ्गतिः । दशपूर्णमासयोः 'पत्नीसंयाजान् यजति' इति विहितपत्नीसंयाजान् प्रकृत्य 'जाघन्या पत्नीः संयाजयन्ति' इति श्रुतम् । 'चत्वारः पत्नीसंयाजाः' इति वाक्येन आहुतिचतुष्टयात्मके कर्मणि तृतीयाऽऽहुतेर्देवपत्नीदेवताकत्वेन तद्वारा चतुष्टयस्यापि पत्नी-संयाजनामेति 'पत्नीसंयाजान् यजति' इत्युक्तम् । जाघनीनाम पशोः जघनप्रदेशभवो मांसखण्डविशेषः । तत्र **सन्देहः**, जाघन्याः प्रकरणादुत्कर्ष उत नेति ।

पूर्वपक्षस्तु, जाघन्युद्देशेन ह्यत्र पत्नीसंयाजाः संस्कारत्वेन विधीयन्ते । सा च पशुयाग एव । न दर्शपूर्णमासयागे । एवञ्च पूर्वत्र यथा द्वित्वबहुत्वयोः प्रकृतकर्मासंयोगात्तत्संयुक्तयोः प्रतिपदोरुत्कर्ष-स्तथा जाघन्या अपि प्रकृतकर्मासंयोगात्तत्संयुक्तस्य 'पत्नीः संयाजयन्ति' इत्यस्यापि प्रकरणादुत्कृष्य पशुयागे निवेशः कार्य इति । तथा च **सूत्रम्, जाघनीशब्दस्यैकदेशवचनत्वात्** जाघनीयुक्तं पत्नी-संयाजविधानं पशावुत्कृष्यत इति ।

सिद्धान्तस्तु जाघन्युद्देशेन तत्संस्कारतया पत्नीसंयाजविधौ हि स्यादुत्कर्षः । न चैवम् । जाघन्येति तृतीयया 'यत्पत्नीः संयाजयन्ति तज्जाघन्या' इति पत्नीसंयाजानुवादेन साधनतया विधानात्, दर्शपार्णमासयागे पशोरभावेन जाघन्या असत्त्वेपि क्रयादिना सम्पादयितुं शक्यत्वान्न प्रकरणादस्योत्कर्ष इति । **फलन्तु**, प्रकरण एव जाघन्या निवेशः ।

इति पञ्चदशं जाघन्या अनुत्कर्षाधिकरणम् (सूत्राणि २०-२३)

अथ षोडशं सन्तर्दनस्य संस्थानिवेशाधिकरणम् (२४-३१)

सन्तर्दनं प्रकृतौ क्रयणवदनर्थलोपात् स्यात् ॥ २४ ॥

(उत्कर्षो वा ग्रहणाद्विशेषस्य ॥ २५ ॥ कर्तृतो वा विशेषस्य तन्निमित्तत्वात् ॥ २६ ॥ क्रतुतो वाऽर्थवादानुपपत्तेः स्यात् ॥ २७ ॥ संस्थाश्च कर्तृवद्धारणार्था-विशेषात् ॥ २८ ॥ उक्थ्यादिषु वाऽर्थस्य विद्यमानत्वात् ॥ २९ ॥ अविशेषा-त्स्तुतिर्व्यर्थेति चेत् ॥ ३० ॥ स्यादनित्यत्वात् ॥ ३१ ॥)

एवं पूर्वत्र प्रकरणस्य श्रुत्या विरोधभावाभावौ विचार्याधुना वाक्येन विरोधोऽस्ति न वेति बहुभिर्नैयैश्चिन्त्यते। ज्योतिष्टोमे 'हनू वा एते यज्ञस्य यदधिषवणे' इत्युक्ते सोमाभिषवाधारभूते औदुम्बरफलके प्रकृत्य, 'न सन्तृणत्त्यसन्तृण्णे हि हनू' इत्यसन्तर्दनं विधाय, पुनः श्रुतम् 'अथो खलु दीर्घसोमे सन्तृद्येद्धृत्या' इति। न सन्तृणत्ति न संश्लेषयेत्। सन्तृद्येत् संश्लिष्टे कुर्यात्। धृत्यै दार्ढ्यार्थमित्यर्थः। **दीर्घसोमो** विकृतियागविशेषः। तस्य दीर्घत्वं दीर्घकालकर्तव्यत्वादिना ज्ञेयम्।

तत्र **पञ्चधा सन्देहः,** सन्तृद्येदित्युक्तसन्तर्दनस्य दीर्घयजमानकर्तृके ज्योतिष्टोमे निवेशः, उत दीर्घादीर्घकर्तृकज्योतिष्टोममात्रे। यद्वा द्विरात्रादिषूत्कर्षेण निवेशः, अथ उक्थ्यादिज्योतिष्टोमसंस्थासु, किं वा संस्थासु द्विरात्रादिषु चेति।

पूर्वपक्षस्तु, दीर्घसोमशब्दस्य 'दीर्घस्य सोमः' इति व्युत्पत्त्या दीर्घयजमानके ज्योतिष्टोमे वृत्तिसम्भवात्, प्रकरणात् सन्तर्दनस्य ज्योतिष्टोमे निवेशः। न चैवं 'न सन्तृणत्ति' इत्युक्तासन्तर्दनविरोधः। द्वादशान्त्यपादे 'क्रयणेषु तु विकल्पः स्यादेकार्थत्वात्' (१२-४-५) इति नये पूर्वपक्षे वक्ष्यमाणदिशा 'वाससा क्रीणाति, धेन्वा क्रीणाति' इत्यादिवाक्योक्तक्रयाणामिव विकल्पेन द्वयोरप्युपपत्तेरित्येकः। तत्पुरुषापेक्षया कर्मधारयप्राबल्यस्य षष्ठाद्यपादान्त्ये निषादस्थपत्यधिकरणे वक्ष्यमाणत्वेन दीर्घसोमपदस्य कर्मधारयत्वोपगमेऽपीष्टिपशुरूपकर्मापेक्षया कर्मबाहुल्येन ज्योतिष्टोमस्य दीर्घसोमत्वसम्भवेन पूर्ववद्विकल्पेन तत्रैव निवेश इति **द्वितीयः**। तथा च **सूत्रम्, सन्तर्दनं क्रयणवत्** विकल्पेन **प्रकृतौ स्यात्** दीर्घसोमशब्दा**र्थस्य लोपाभावा**दिति। इष्टिपशुरूपकर्मापेक्षया सोमयागमात्रस्य दीर्घत्वेन दीर्घपदव्यावर्त्यस्य ह्रस्वसोमयागस्याभावेन ज्योतिष्टोमपरत्वे दीर्घत्वरूपसोमविशेषणवैयर्थ्यम्। तदवैयर्थ्याय 'दीर्घसोमे सन्तृद्येद्धृत्या' इति वाक्यबलात् प्रकरणबाधेन द्विरात्रादिषु सोमग्रहबाहुल्ययुक्तेषु दीर्घसोमत्वसम्भवेन तत्रोत्कर्षोऽस्येति **तृतीयः**। द्विरात्रादिष्वपि प्रकृतितो दशमुष्टित्रिपर्वसोमस्यैव प्राप्त्या तावत एवाभिषवेणाधिकस्याभिषवाभावात् धृत्या इति वाक्यशेषवैयर्थ्यं स्यात्। अतस्तदवैयर्थ्याय बहुसोमग्रहयुक्तासु ज्योतिष्टोमसंस्थासूक्थ्याद्यासु निवेश इति **चतुर्थः**।

सिद्धान्तस्तु, अविशेषेण ज्योतिष्टोमादधिकग्रहानुष्ठानयुक्तेषु द्विरात्रादिषु संस्थासु चोभयत्र निवेशः। न च चोदकेन त्रिपर्वदशमुष्टिसोमस्यैव प्राप्तेः प्रदेयबाहुल्याभावेनौपदेशिकप्रदानबाहुल्यासिद्धिरिति शङ्क्यम्। 'अवशिष्टानंशून् समूहति' इति प्रकृतावशिष्टानामंशूनामुपसमूहवचनेन तेषां च परिमाणाभावात् यावदपेक्षितानां चोदकेन प्राप्तानां प्राप्त्या प्रदेयबाहुल्यस्यापि सम्भवादिति। **केचित्तु,** अविप्रतिपन्नदीर्घकालानुष्ठानेषु सत्राहीनेषूत्कर्ष इत्याहुः। **फलन्तु,** 'दीर्घसोमे सन्तृद्येत् धृत्या' इत्यस्योत्कर्षेण ज्योतिष्टोमे न विकल्पः। किन्तूत्कृष्टस्थल एवानुष्ठानमिति॥

इति षोडशं सन्तर्दनस्य संस्थानिवेशाधिकरणम् (सूत्राणि २४-३१)

अथ सप्तदशं प्रवर्ग्यनिषेधाधिकरणम् (सूत्रे ३२-३३)

संख्यायुक्तं क्रतोः प्रकरणात् स्यात् ॥ ३२ ॥

(नैमित्तिकं वा कर्तृसंयोगाल्लिङ्गस्य तन्निमित्तत्वात् ॥ ३३ ॥)

पूर्ववैषम्येण शङ्कनात्**सङ्गतिः** । ज्योतिष्टोमे 'पुरस्तादुपसदां प्रवर्ग्यं प्रवृणक्ति' इत्याम्नाय 'न प्रथमयज्ञे प्रवृंज्यात्' इति श्रुतो निषेधः किं ज्योतिष्टोमाङ्गमुत तदीयप्रथमप्रयोगाङ्गमिति **सन्देहः** ।

पूर्वपक्षस्तु, यज्ञशब्दस्य यागवाचित्वात् प्रथमपदस्य तद्विशेषणतया यागनामत्वे सिद्धे प्रकरणात् 'एष वा व प्रथमो यज्ञो यज्ञानां यज्ज्योतिष्टोमः' इति श्रुत्यन्तरे प्रथमयज्ञपदस्य ज्योतिष्टोमपद-सामानाधिकरण्याच्च 'य एतेनानिष्ट्वाऽथान्येन यजेत गर्ते पतितमेव तज्जीर्येत, प्र वा मीयते' इति वचनेन प्रथमप्रयुज्यमानत्वरूपप्रथमपदप्रवृत्तिनिमित्तसत्त्वाच्च ज्योतिष्टोमनामत्वमेवावगम्यते । एवं च पूर्वत्र वाक्यविरोधात् सन्तर्दनस्य प्रकृतक्रत्वनन्वयेऽपीह प्रवर्ग्यनिषेधवाक्यस्योक्तदिशा प्रकरणाविरोधात् ताभ्यां ज्योतिष्टोमाङ्गं प्रवर्ज्यनिषेध इति । तदाह **सूत्रकारः,** एकत्व**सङ्ख्यावाचिप्रथमशब्दयुक्तं** प्रवर्ग्यप्रतिषेधनं **क्रतोरङ्गं स्यात् प्रकरणा**दिति ।

सिद्धान्तस्तु, प्रथमद्वितीयादिशब्दानां क्रियावृत्तिरूपप्रयोगे मुख्यतया तद्विषयतया क्रतावुपचारात् मुख्ये सम्भवत्यौपचारिकस्य ग्रहणायोगात्, एष वा वेति, य एतेनेति च वाक्ययोरर्थवादत्वेनाक्लृप्तशक्ति-कल्पनाऽसमर्थत्वादादौ श्रुतप्रथमपदस्य लक्षणाङ्गीकारादपि चरमश्रुतयज्ञपदस्य क्रतौ मुख्यस्य प्रयोग-लक्षणाङ्गीकारस्यैवोचितत्वाच्च वाक्यात्प्रकरणबाधेन ज्योतिष्टोमीयप्रथमप्रयोगस्याङ्गं प्रवर्ग्यनिषेधः । न तु ज्योतिष्टोमस्य । ननु अग्निष्टोमात्यग्निष्टोमोक्थ्यातिरात्रषोडश्याप्तोर्यामवाजपेयरूपसप्तसंस्थायुक्ते ज्योतिष्टोमे अग्निष्टोमसंस्थाकप्रथमप्रयोगेऽयं निषेधः पर्यवस्यति । 'य एतेनानिष्ट्वा' इति वाक्यस्थै-तच्छब्देन अग्निष्टोमस्य परामर्श इति पञ्चमस्य तृतीये पादे **य एतेन इत्यग्निष्टोमः प्रकरणात्** (५-३-३७) इत्यत्र वक्ष्यमाणत्वेन तस्यैव प्रथमानुष्ठानं प्राप्तम् । तत्र विधिश्च 'अग्निष्टोमे प्रवृणक्ति' इति श्रूयते इति चेत् एवं हि 'कामं तु योऽनूचानः श्रोत्रियः स्यात् तस्य प्रवृंज्यात्' इति वचनात् अग्निष्टोमस्य प्रथमप्रयोगे अनूचानस्य नित्यं प्रवर्ग्यानुष्ठानमन्येषामननुष्ठानमित्यधिकारिभेदेन व्यवस्थितविकल्पेन विधिनिषेधयोरुपपत्तिरिति । **फलन्तु,** अग्निष्टोमसंस्थाकस्य प्रथमप्रयोगे व्यवस्थया अनुष्ठानाननुष्ठाने ।

इति सप्तदशं प्रवर्ग्यनिषेधाधिकरणम् (सूत्रे ३२-३३)

अथाष्टाशं पौष्णपेषणस्य विकृतौ विनियोगाधिकरणम्

पौष्णं पेषणं विकृतौ प्रतीयेताऽचोदनात्प्रकृतौ ॥ ३४ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात्**सङ्गतिः**। दर्शपूर्णमासौ प्रकृत्य 'पूषा प्रपिष्टभागोऽदन्तको हि' इति श्रुतम्। तत्र पूषभागसम्बन्धि पेषणं पूषेतिवाक्योक्तं प्रकरणे निविशते, अथ दर्शपूर्णमासविकृतावुत्कृष्यत इति **सन्देहे,** पूर्वत्र विरोधेन वाक्यात्प्रकरणबाधो युक्तः। अत्र तु न तथा। प्रकृते दर्शपूर्णमासयागे पूषदेवताया अभावेऽपि अग्न्यादेरेव यजमानपोषकत्वेन पूषशब्दार्थत्वोपपत्त्या वाक्यप्रकरणयोरविरोधात्प्रकृतावेव निवेशान्नोत्कर्ष इति **प्राप्ते,**

रूढ्या पूषशब्दमुख्यार्थस्य पूष्णोऽलाभे हि कथञ्चिदमुख्यार्थाश्रयणादग्न्याद्यर्थत्वं कल्प्यम्। अस्ति तु विकृतौ मुख्यः पूषेति वाक्यात्प्रकरणबाधेन पूषदैवत्यायां विकृतावुत्कर्षः पौष्णपेषणस्येति **सिद्धान्तः**। तदाह **सूत्रकारः, पौष्णं पेषणं विकृतौ** पूषदैवत्यायां **प्रतीयेत**। कुतः ? **प्रकृतौ** दर्शपूर्णमासयागे पूष्णो**ऽचोदनाद**विधानादिति। एवमधिकरणशरीरं भाष्येऽभिधाय पूर्वन्यायेनैव अत्राप्युत्कर्षसिद्ध्या गतार्थत्वमाशङ्क्योत्तरविवक्षया पौष्णं पेषणमिति सूत्रं प्रस्तावितमित्युक्तम्। पूषदैवत्यस्य विकृतौ विनिवेश इत्यस्यासिद्धौ पूषदैवत्यविकृतिमात्रे वा चरुद्रव्यकपूषदैवत्यमात्रे वा इति विशेषचिन्ताया अनवसरादिति ॥

इत्यष्टादशं पौष्णपेषणस्य विकृतौ विनियोगाधिकरणम्

अथैकोनविंशं पौष्णपेषणस्य चरावेव निवेशाधिकरणम् (सूत्राणि ३५-३८)

तत्सर्वार्थमविशेषात् ॥ ३५ ॥

(चरौ वाऽर्थोक्तं पुरोडाशेऽर्थविप्रतिषेधात्पशौ स्यात् ॥ ३६ ॥ चरावपीति चेत् ॥ ३७ ॥ न पक्तिनामत्वात् ॥ ३८ ॥)

पूर्वं सामान्यत उक्तस्यात्र विशेषचिन्तायाः **सङ्गतिः**। पूर्वत्र पूषदैवत्यायां विकृतौ पेषणस्य निवेश इत्युक्तम्। पूषदैवत्यविकृतयश्च 'पौष्णं चरुं निर्वपेत्' इति 'पौष्णं पशुमालभेतान्नकामः' इति 'पशुमालभ्य पुरोडाशं निर्वपति' इति च चरुद्रव्यकाः पशुद्रव्यकाः पुरोडाशद्रव्यकाश्च सन्ति। तत्र किं सर्वत्र निवेशः, उत चरुद्रव्यकायामेवेति **सन्देहे,** विशेषहेतोरदर्शनात् सर्वत्रेति **प्राप्तम्**। तथाऽह **सूत्रे,** तत्पेषणं **सर्वार्थमविशेषादिति**।

सिद्धान्तस्तु, पुरोडाशे पेषणस्य चोदकेनैव प्राप्तत्वात्पशौ 'हृदयस्याग्रेऽवद्यति' इत्यादिना विहित हृदयाद्याकृतिविनाशप्रसङ्गान्न तयोः पेषणम् । चरौ तु तदविघातकमिति तत्रैव निविशते । चरुशब्दस्योदने प्रसिद्धावपि पिष्टचरावपि पाकविशेषेण चरुशब्दप्रयोगात् । तत्र चोदकप्राप्तमपि फलाभावान्निवर्तमानं पेषणं प्रतिप्रसूयत इति चरुद्रव्यकविकृतावेव पेषणस्य निवेश इति । **फलन्तु,** चरावेव पेषणानुष्ठानम् ।

इत्येकोनविंशं पौष्णपेषणस्य चरावेव निवेशाधिकरणम् (सूत्राणि ३५-३८)

अथ विंशं पौष्णपेषणस्यैकदैवत्ये निवेशाधिकरणम् (सूत्राणि ३९-४६)

एकस्मिन्नेकसंयोगात् ॥ ३९ ॥

(धर्मप्रतिषेधाच्च ॥ ४० ॥ अपि वा सद्वितीये स्याद्देवतानिमित्तत्वात् ॥ ४१ ॥ लिङ्गदर्शनाच्च ॥ ४२ ॥ वचनात्सर्वपेषणं तं प्रति शास्त्रवत्त्वादर्थाभावाद्धि चरावपेषणं भवति ॥ ४३ ॥ एकस्मिन्वाऽर्थधर्मत्वादैन्द्राग्नवदुभयोर्न स्यादचोदितत्वात् ॥ ४४ ॥ हेतुमात्रमदन्तत्वम् ॥ ४५ ॥ वचनं परम् ॥ ४६ ॥)

पूर्वत्र चरावेव पेषणमिति स्थिते कस्मिंश्चराविति विशेषचिन्तनात्सङ्गतिः । राजसूये केवलपूषदैवत्यश्चरुरस्ति, 'पौष्णं चरुं, श्यामो दक्षिणा' इति । अन्यसहितपूषदैवत्यश्चास्ति 'ऐन्द्रापौष्णश्चरुर्भवति' इति । तत्र **सन्देहः,** किमुभयत्रापि पेषणं, उत केवलपूषदैवत्य एवेति ।

पूर्वपक्षस्तु, पेषणस्य देवताप्रयुक्तत्वाद्द्विदैवत्येऽपि पूषदेवतायाः सत्त्वात्तत्रापि पेषणमिति । **सिद्धान्तस्तु,** देवताया निष्फलत्वेन फलवद्यागप्रयुक्तत्वस्यैव वाच्यत्वात्, इह च 'पूषा प्रपिष्टभागः' इत्युपत्तिवाक्ये भागशब्देन 'भग सेवायां' इति धातुनिष्पन्नेन सेव्यद्रव्यस्याभिधानात्, 'प्रपिष्टः भागः स्वोद्देशेन त्याज्यो यस्य' इति प्रपिष्टभागपदेन द्रव्यदेवतासम्बन्धप्रतीत्या यागस्योपादानात्, यागो द्विदैवत्यश्चेद्देवतात्वस्य तत्र व्यासक्तत्वेन पूषमात्रदैवत्ययागपरेण प्रपिष्टभागपदेन न व्यपदेष्टुं शक्यते 'आग्नेयं चतुर्धा करोति' इत्यत्र आग्नेयशब्देनैन्द्राग्नमिव । यथा वा ऐन्द्राग्नो ग्रह इन्द्रपीतपदेन न व्यपदेष्टुं शक्यते तद्वत् । तस्मात्पूषमात्रदेवताकयागापूर्वप्रयुक्तत्वस्य विधिवाक्ये प्रतीत्या द्विदैवत्ये तदभावात्

केवलपूषदैवत्ये चरावेव निवेशः पेषणस्येति । तथा च **सूत्रम्, एकस्मिन्नेकदैवत्ये** यागे पेषणं स्यात् । पूष्णा **एकेनैव संयोग**श्रवणादिति । **फलन्तु,** पूषैकदैवत्यचरावेव पेषणमिति व्यक्तम् ।

इति विंशं पौष्णपेषणस्यैकदैवत्ये निवेशाधिकरणम् (सूत्राणि ३९-४६)

इति श्रीभाट्टसङ्ग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्यश्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते तृतीयाध्यायस्य तृतीयः पादः

अस्मिन् पादे अधिकरणानि २० सूत्राणि ४६

आदितः " १४४ " ४०५

अथ तृतीयाध्यायस्य चतुर्थः पादः

अथ प्रथमं निवीतस्यार्थवादत्वाधिकरणम् (सूत्राणि १-९)

पूर्वत्र वाक्यपादे वाक्यादेर्विनियोक्तृत्वं सबलाबलमुक्तम् । तद्विरोधभावाभावौ क्वचित्किञ्चिदुक्तौ । अत्र तु निवीतपादे श्रुत्यादित्रितयस्यैव प्रकरणेन विरोधसदसद्भावौ चिन्त्येते इति पूर्वपादानन्तर्यमस्येति ज्ञेयम् । न चैवमर्थैक्यात्पादभेदायोगः । क्रत्वर्थपुरुषार्थत्वविचारात् पादभेदो ध्येयः ।

निवीतमिति मनुष्यधर्मः शब्दस्य तत्प्रधानत्वात् ॥ १ ॥

(अपदेशो वाऽर्थस्य विद्यमानत्वात् ॥ २ ॥ विधिस्त्वपूर्ववान्स्यात् ॥ ३ ॥ स प्रायात्कर्मधर्मः स्यात् ॥ ४ ॥ वाक्यशेषत्वात् ॥ ५ ॥ तत्प्रकरणे यत्तत्संयुक्तमविप्रतिषेधात् ॥ ६ ॥ तत्प्रधाने वा तुल्यवत्प्रसङ्ख्यानादितरस्य तदर्थत्वात् ॥ ७ ॥ अनुवादो वा प्रकरणात् ॥ ८ ॥ विधिना चैकवाक्यत्वात् ॥ ९ ॥)

दर्शपूर्णमासयोः श्रूयते 'निवीतं मनुष्याणां, प्राचीनावीतं पितॄणां, उपवीतं देवानां, उपव्ययते देवलक्ष्ममेव तत्कुरुते' इति । निवीतमुत्तरीयस्य मध्यदेशे बन्धनम् । प्राचीनावीतमपसव्यतया वासोधारणम् । उपवीतन्तु सव्यतयोत्तरीयधारणम् । तत्र विधावसति साधनत्वावगत्यसम्भवात् प्रवृत्त्यसिद्धिरित्यौदुम्बराधिकरणोक्तन्यायेन निवीतमित्यस्योपव्ययत इत्येतद्विधिं प्रत्यर्थवादत्वसिद्धावपि कृत्वाचिन्तयेदं **विचार्यते** । विधिपक्षे किमयं पुरुषधर्मः कर्मधर्मो वा । आद्येऽपि किं शुद्धपुंधर्मः क्रतुयुक्तपुंधर्मो वा । कर्मधर्मत्वेऽपि प्राकरणिकसर्वकर्मशेषः, उत तत्प्रकरण एव मनुष्यप्रधानेऽन्वाहार्यदानादिकर्मणि, किं वा प्रकरणादन्यत्र अतिथिपूजादिकर्मणि इति **पञ्चधा सन्देहः** ।

पूर्वपक्षस्तु, 'द्वादशाहीनस्य' इत्यत्रेव मनुष्याणामिति षष्ठीश्रुत्या प्रकरणबाधेन शुद्धपुंधर्मतया पुरुषार्थत्वेन विधीयते **इत्येकः**। तथा **च सूत्रम्, निवीतमिति मनुष्यधर्मः स्यात्, शब्दस्य तत्प्रधानत्वादिति** । श्रुतिप्रकरणयोरविरोधसम्भवे श्रुत्या प्रकरणबाधायोगात् क्रतुयुक्तपुरुषधर्मः यथा लोहितोष्णीषादिकं क्रतुयुक्तपुरुषधर्मस्तद्वदिति **द्वितीयः** । प्राचीनावीतादिशुद्धक्रतुधर्मप्रायपाठात् प्रकरणबलाच्च प्रयाजादिवच्छुद्धक्रतुधर्मः । मनुष्यपदन्तु कर्तृसम्बन्धानुवाद इति **तृतीयः** । पित्रादिप्रधानकर्मार्थप्राचीनावीतादिप्रायपाठविरोधापातात् अनुवादानर्थक्यात् प्राकरणिकयत्किञ्चित्कर्मार्थत्वेऽपि प्रकरणाविरोधाच्च प्रकरणे यन्मनुष्योद्देश्यकमन्वाहार्यदानादि तस्य धर्म इति **चतुर्थः**। प्रायपाठादेव हि प्राचीनावीतादेः स्वतन्त्रपितृदेवोद्देश्यककर्मविषयत्वात्तद्वत्स्वतन्त्रमनुष्योद्देश्यकातिथ्यादिकर्मणि निवीतविधिः। मनुष्याणामिति श्रुत्या प्रकरणबाधश्च न दोष इति **पञ्चमः**।

सिद्धान्तस्तु, आद्यपक्षे फलकल्पनाप्रसङ्गात्, सर्वेष्वपि पक्षेषु प्रतीतविध्येकवाक्यत्वभङ्गापत्तेः, प्रथमान्त्यपक्षयोः प्रकरणविरोधापत्तेश्च अर्थवादत्वमेव पूर्वोक्तं ज्याय इति । **फलन्तु**, उपवीतस्तावकत्वमेव।

इति प्रथमं निवीतस्यार्थवादत्वाधिकरणम् (सूत्राणि १-९)

अथ द्वितीयमुपवीतस्य दर्शपूर्णमासाङ्गताधिकरणम् (सूत्रे १०-११)

उपवीतं लिङ्गदर्शनात्सर्वधर्मः स्यात् ॥ १० ॥

(न वा प्रकरणात्तस्य दर्शनम् ॥ ११ ॥)

पूर्वत्र निव्यानस्योपव्यानविध्येकवाक्यत्वोक्तौ तत्प्रसङ्गादुपव्यानमेवात्र चिन्त्यत इति वा श्रुति प्रकरणयोर्विरोधचिन्तानन्तरं लिङ्गप्रकरणयोः सञ्चिन्त्यत इति वा **सङ्गतिः** । दर्शपूर्णमासयोः 'उपव्ययत' इति श्रुतमुपवीतं **किं** सर्वस्य दैवकर्मणोऽङ्गं, उत दर्शपूर्णमासयोरेवेति **सन्देहः** ।

मृताग्निहोत्रे 'प्राचीनावीती दोहयेत्, यज्ञोपवीती हि देवेभ्यो दोहयति' इति देवाग्निहोत्रे सिद्धवदुपवीतानुवादेन लिङ्गेन प्रकरणं बाधित्वा सर्वदैवकर्मार्थत्वमेव स्वीकार्यम्। प्रकरणाद्दर्शपूर्णमासमात्राङ्गत्वे अग्निहोत्रे उपवीतानुवादो न युक्तः स्यात्। देवेभ्य इति वाक्यं दर्शपूर्णमासस्थस्यैवोपवीतस्यानुवाद इत्युक्तौ न लिङ्गविरोध इति तु न युक्तम्। तस्य विप्रकृष्टत्वात्। तत्र 'देवेभ्यः' इत्युक्तबहुवचनायोगाच्च। अग्निहोत्रे **तु** अग्निसूर्यप्रजापत्यभिप्रायं बहुवचनमुपपन्नमिति अग्निहोत्रगतस्यैवायमनुवाद इति सर्वार्थमुपवीतमिति **प्राप्तम्**। तथाऽऽह **सूत्रकारः, उपवीतं लिङ्गदर्शनात्सर्वधर्मः स्यादिति**।

सिद्धान्तस्तु, प्रकरणाद्दर्शपूर्णमासाङ्गमुपवीतम् । न च लिङ्गविरोधः । अनुवादस्य यथाप्राप्ति वर्णनीयत्वात् उपव्यानस्य प्रकरणबलेन दर्शपूर्णमासयोरेव प्राप्तेस्तदनुवाद एवायं पूर्ववाक्योक्तप्राचीनावीतस्तुत्यर्थ इत्युपपत्तेः । बहुवचनं प्रकृतिविकृतिदेवताभिप्रायं युक्तमिति ।

फलन्तु, पूर्वपक्षे कर्मान्तरेऽप्युपवीतवैकल्ये श्रुतसर्वप्रायश्चित्तानुष्ठानम् । **सिद्धान्ते** तु स्मार्तं हरिस्मरणमेव कार्यमिति । अत्र **वार्तिके** षट्सूत्राणि भाष्ये न लिखितानि इत्युक्तम् । दृश्यन्ते च तानि भाष्यपुस्तकेषु । तत्कथमुक्तमिति चिन्त्यम् ।

इति द्वितीयमुपवीतस्य दर्शपूर्णमासाङ्गताधिकरणम् (सूत्रे १०-११)

अथ तृतीयमुपवीतस्य विधित्वाधिकरणम्

विधिर्वा स्यादपूर्वत्वात् ॥ १२ ॥

पूर्वाक्षेपेण शङ्कनात्सङ्गतिः । 'उपव्ययते' इति किं विधिरुतानुवाद इति **सन्देहे,** पूर्वत्रोपवीतं दर्शपूर्णमासाङ्गतया विधीयत इत्युक्तमयुक्तम् । विधित्वस्यैवाभावात् । 'नित्योदकी नित्ययज्ञोपवीती' इति स्मृतित एवोपव्यानस्य प्राप्तेरिति **प्राप्ते,**

विधिरेवायं नानुवादः । स्मृतितः पुरुषार्थतया प्राप्तावपि क्रत्वर्थतया प्राप्त्यभावेनापूर्वत्वादिति **सिद्धान्तः । व्यक्तः सूत्रार्थः ।** यद्यप्यत्र 'उपव्ययते' इत्यस्य वासोविषयत्वेन भाष्यादावुक्तेर्ब्रह्मसूत्रविषयस्मृत्या अनुवादत्वोक्तिरयुक्ता तथापि 'उपव्ययते' इत्यस्यापि ब्रह्मसूत्रविषयतैवास्तु इत्यभिप्रेत्य **वार्तिकादा**विदमुक्तमिति ज्ञेयम् ।

फलन्तु, पूर्वपक्षे उपवीताभावेऽपि क्रतोरवैगुण्यम् । **सिद्धान्ते** तु वैगुण्यात्सर्वप्रायश्चित्तानुष्ठानम् । **उपवीतमिति विधिर्वेति** च द्वयमेकाधिकरणतया वा योज्यम् ।

तथा हि, उपवीतं सर्वकर्मार्थमुत दर्शपूर्णमासार्थमिति **सन्देहे,** स्मृतिप्राप्तानुवादः । स्मृतिश्चाविशेषेण स्थितेति सर्वकर्मार्थतया प्राप्तमनूद्यत इति **प्राप्ते,** क्रत्वर्थत्वपुरुषार्थत्वभेदाद्विधिरिति **सिद्धान्तः ।**

विधिर्वेति सूत्रस्य वर्णकान्तरम्

विधिर्वेति सूत्रस्य वर्णकान्तरन्तु, मृताग्निहोत्रे यज्ञोपवीतीतिवाक्ये श्रुतमुपवीतं दैवाग्निहोत्राङ्गतया विधीयते, उत दर्शपूर्णमासादिषु प्राप्तस्योपवीतस्य पूर्ववाक्योक्तप्राचीनावीतस्तुत्यर्थमनुवाद इति **सन्देहे,**

'प्राचीनावीती दोहयेत्' इति मृत्यवस्थापन्नाग्निहोत्राङ्गतया प्राचीनावीतं विधायाऽम्नातस्य 'यज्ञोपवीती' इति वाक्यस्य औचित्याज्जीवदवस्थापन्नाग्निहोत्रप्रयोगाङ्गोपवीतविषयताऽवगम्यते । तच्चाप्राप्तत्वादनुवादसरूपस्यापि हिशब्दस्य त्यागेन विधित्वमेव युक्तमिति अपर्यवसितमिदं तावत्स्थितम् ।

इति तृतीयमुपवीतस्य विधित्वाधिकरणम्

अथ चतुर्थमुपवीतोदगग्रत्वयोरनुवादताधिकरणम् (सूत्रे १३-१४)

उदक्त्वश्चापूर्वत्वात् ॥ १३ ॥

(सतो वा लिङ्गदर्शनम् ॥ १४ ॥)

पूर्वत्राप्राप्तत्वादुपवीतविधिवत् उदगग्रत्वस्याप्यप्राप्तत्वाद्विधिरित्यवान्तर**सङ्गति**लाभलोभात्पूर्वाधिकरणसिद्धान्तोक्तेः पूर्वं मध्ये एतद्विचार्यते । मृताग्निहोत्र एव 'ये पुरोऽदञ्चो दर्भास्तान् दक्षिणाग्रान् स्तृणीयात्' इति श्रुते वाक्ये 'ये पुरोदञ्चः' इत्युक्तमुदगग्रत्वं किं विधिरुतानुवाद इति **सन्देहे**, प्राप्त्यभावात्, यच्छब्दस्यापि 'ये पुरा जीवदवस्थायां दर्भास्ते उदञ्चः कार्याः' इति व्यवहितकल्पनयोपपत्तेर्वाक्यभेदेन विधिरेवोदक्त्वस्य । 'दक्षिणाग्रान् स्तृणीयात्' इति मृतावस्थायां वाक्यान्तरमिति **प्राप्तम् ।** तथा च **सूत्रम्, उदक्त्वश्च** यथोपवीतम**पूर्वत्वाद्वि**धीयत इत्युक्तमेवमुदगग्रत्वश्चा**पूर्वत्वाद्वि**धीयत इति ।

एवं **प्राप्ते** यच्छन्दोपबन्धात्, 'दक्षिणाग्रान् स्तृणीयात्' इति विध्यन्तरैकवाक्यत्वात्, 'अग्रवन्त्युदगग्राणि' इति स्मृतितः प्राप्तत्वाच्चायमनुवादो न विधिरिति । पूर्वत्र स्थितस्य पूर्वपक्षस्यो**त्तरमुच्यते ।** प्रसिद्धार्थकहिशब्देनानुवादत्वावगमात्, प्राचीनावीतविधिशेषत्वात्, दर्शपूर्णमासादितः प्राप्तिसम्भवाच्च, प्राचीनावीतस्तुत्यर्थेनायमनुवाद इति । **केचित्तु,** यज्ञोपवीतीति वाक्यं उदगग्रवाक्यञ्च पूर्वनये एकत्रैवोदाहृत्य विधित्वेन पूर्वपक्षयित्वा विध्यन्तरशेषत्वादिना अनुवाद इति सिद्धान्तयन्ति ।

इति चतुर्थमुपवीतोदगग्रत्वयोरनुवादताधिकरणम् (सूत्रे १३-१४)

अथ पञ्चमं समिद्धारणस्य विधिताधिकरणम्

विधिस्तु धारणेऽपूर्वत्वात् ॥ १५ ॥

अत्र प्रागुक्तस्यापवादादापवादिकी सङ्गतिः । मृताग्निहोत्र एव 'अधस्तात्समिधं धारयन्ननुद्रवेत्,

उपरि हि देवेभ्यो धारयति' इति श्रूयते। पित्र्यं हविर्होतुं गार्हपत्यदेशादाहवनीयदेशं प्रति हविर्नयनकाले स्रुचोऽग्निहोत्रहवण्या अधस्तात्समिधं धारयन् गच्छेत्। देवार्थं हविर्नयनकाले उपरि हि धारयतीति तदर्थः। तत्रोपरिधारणं जीवदग्निहोत्रे विधीयते, उतानूद्यत इति **सन्देहे,** हिशब्दोपबन्धादिपूर्वोक्तन्यायेन अधस्तात्समिद्धारणस्तुत्यर्थमनूद्यत इति **प्राप्तम्।**

सर्वमभ्यर्हितं द्रव्यमाच्छाद्यैव देशान्तरं नेतव्यमित्याचारतो हविराच्छादनस्य प्राप्त्या केनेत्याकाङ्क्षायां हस्तादिनाप्याच्छादनसम्भवेपि उपरि समिद्धारणं विधीयमानमाच्छादनार्थं सत् नियमाद्दृष्टार्थं भवति 'समिधैव प्रच्छादयेत्' इति। सा चोपरि धार्यमाणा प्रच्छादनक्षमा नान्यथेति प्राप्तमुपरि धारणमिति।

सिद्धान्तस्तु, आचारादाच्छादनस्य प्राप्तत्वेपि समिधा आच्छादनस्य सर्वथा प्राप्त्यभावात् 'स्रुग्दण्डे समिधमुपगृह्यानुद्रवति' इति श्रवणेन दण्डप्रदेशे धार्यमाणस्य हविराच्छादनाक्षमत्वात् अप्राप्तत्वात् हिशब्दत्यागेन विधिरेवायमुपरि धारणस्येति। तथा च **सूत्रम्॥ विधिस्त्वित्यादि॥** निगदव्याख्यानमेतत्।

फलन्तु, पूर्वपक्षे समिद्धविष उपरि धारणीया। **सिद्धान्ते** तु स्रुग्दण्डस्योपरीति ज्ञेयम्।

इति पञ्चमं समिद्धारणस्य विधिताधिकरणम्

अथ षष्ठं दिग्विभागस्यार्थवादताधिकरणम्

दिग्विभागश्च तद्वत्सम्बन्धस्यार्थहेतुत्वात्॥ १६॥

अत्र पूर्वन्यायेन शङ्कनात्सङ्गतिः। ज्योतिष्टोमे 'प्राचीनवꣳशं करोति' इति विहितं प्रागग्रवंशयुक्त-मण्टपविशेषं प्रकृत्य श्रूयते 'देवमनुष्या दिशो व्यभजन्त। प्राचीं देवा दक्षिणां पितरः प्रतीचीं मनुष्या उदीचीं रुद्रा इति। यत्प्राचीनवꣳशं करोति, देवलोकमेव तद्यजमान उपावर्तते' इति। तत्र देवपितृ-रुद्राणां षष्ठे वक्ष्यमाणदिशा कर्मानधिकारेण तत्र सन्देहानुदयात् 'प्रतीचीं मनुष्याः' इत्यत्र **सन्देहः, किं** प्रतीचीभजनं मनुष्यधर्मः कर्मधर्मो वा। मनुष्यधर्म इत्यत्रापि शुद्धमनुष्यधर्म उत क्रतुयुक्तमनुष्यधर्मः। कर्मधर्म इत्यत्रापि प्राकरणिकक्रतुधर्मः यद्वा प्रकरण एव मनुष्योद्देश्यककर्मपरः किं वा मनुष्योद्देश्यक-स्वतन्त्रातिथिपूजादिकर्मधर्मः इति **पञ्चधा सन्देहे,** निवीताधिकरण इव पञ्चसु पक्षेषु **प्राप्तेषु,**

सिद्धान्तः, पुरुषार्थत्वे फलकल्पनात् प्राचीनवंशविध्येकवाक्यत्वात् प्रकरणाविरोधाच्च अर्थवाद-त्वमेव युक्तमिति। **विशेषशङ्का तु,** 'निवीतं मनुष्याणां' इत्यत्र स्तुतिरपि न सम्यगुन्मीलति। विधि-

त्वन्तु दूरे । इह तु व्यभजन्तेति अनेककर्तृकोपाख्यानरूपपुराकल्पार्थवादभेदेन प्रशंसाऽवगम्यत इति, तया विधिकल्पनं सुशकमिति । तन्निवृत्त्यर्थमिदमधिकरणमित्याहुः ।

सूत्रार्थस्तु, दिशः प्रतीच्या मनुष्यकर्तृको यो **विभागः** सोऽपि **तद्वत्** निवीतवदर्थवादो विज्ञेयः । कुतः ? **सम्बन्धस्य** सुखसम्बन्धस्य स्तुतिरूपार्थहेतुत्वादिति । मनुष्याः प्रायेण पूर्वाह्णे व्याप्रियन्ते । ते च तदा आदित्यं पृष्ठतः कृत्वा सुखं व्याप्रियन्त इति प्रतीचीप्राप्तिरित्यर्थवादत्वमाहुः ।

इति षष्ठं दिग्विभागस्यार्थवादताधिकरणम्

अथ सप्तमं परुषि दितादीनामर्थवादताधिकरणम्

परुषि दितपूर्णघृतविदग्धं च तद्वत् ॥ १७ ॥

अत्र विशेषशङ्कां कृत्वा पूर्वोक्तन्यायस्यैवातिदेशादातिदेशिकी **सङ्गतिः ।** दर्शपूर्णमासयोः पिण्डपितृयज्ञे 'पर्व प्रतिलुनाति' इत्यत्र श्रुतम् 'यत्परुषि दितं तद्देवानां, यदन्तरा तन्मनुष्याणां, यत्समूलं तत्पितॄणां, समूलं बर्हिर्भवति व्यावृत्त्या' इति । परुषि पर्वणि । दितं 'दो अवखण्डने' खण्डितं लूनमिति यावत् । ज्योतिष्टोमे च 'उप बिलाद्दूह्णाति' इत्यत्र श्रुतं 'यत्पूर्णं तन्मनुष्याणां, उपर्यधो देवानां, अधः पितॄणां' इति । तथा तत्रैव दीक्षार्थाभ्यङ्गे श्रूयते 'घृतं देवानां, मस्तु पितॄणां, निष्पक्वं मनुष्याणां, तद्वा एतत्सर्वदैवत्यं यन्नवनीतं, यन्नवनीतेनाभ्यंक्ते सर्वा एव देवताः प्रीणाति' इति । मस्तु दधिभवं मण्डम् । निष्पक्वं शिरसि प्रक्षेप्तुं ईषद्विलीनं नवनीतम् । तथा दर्शपूर्णमासयोः पुरोडाशश्रपणे श्रूयते 'यो विदग्धः स नैर्ऋतः, योऽशृतः स रौद्रः, यः शृतः स दैवः, तस्मादविदहता श्रपयितव्यं सदेवत्वाय' इति । विदग्धोऽत्यन्तपक्वः । अशृतोऽपक्वः । शृतः पक्वः । अत्र मनुष्येतरेषां कर्मानधिकारात् मनुष्यसंयुक्तवाक्य एव पूर्वत्रेव पञ्चधा **सन्देहे,**

पञ्चपक्षाणामपि **प्राप्तिमुक्त्वा** 'समूलं बर्हिर्भवति' इत्यादिविध्येकवाक्यत्वादिना अर्थवादत्व**मवसेयम् ।** अगतार्थत्वाय **विशेषाशङ्का तु** 'निवीतादौ मनुष्यसम्बन्धः फलकल्पनाभयान्निरस्तः । इह तु बर्हिरादीनां क्रियार्थत्वात्, तस्याश्च फलवत्त्वं सिद्धमेवेति न कल्प्यम् । नियमादृष्टमात्रं तु कल्प्यम् । न निवीतवत् अत्यन्ताप्राप्तविधानेनादृष्टस्वर्गादीत्येवंरूपा' इति । **फलन्तु,** विधेयस्तवनमेव । सूत्रं व्याख्यातप्रायम् ।

इति सप्तमं परुषि दितादीनामर्थवादताधिकरणम्

अथाष्टमं अनृतवदननिषेधस्य क्रतुधर्मताधिकरणम् (सूत्रे १८-१९)

अकर्म क्रतुसंयुक्तं संयोगान्नित्यानुवादः स्यात् ॥ १८ ॥

(विधिर्वा संयोगान्तरात् ॥ १९ ॥)

पूर्ववैषम्येण शङ्कनात्सङ्गतिः । दर्शपूर्णमासप्रकरणे 'नानृतं वदेत्' इति श्रुतोऽनृतनिषेधः किं शुद्धपुरुषधर्मो विधीयते उत क्रतुयुक्तपुरुषधर्मोऽनूद्यते, किं वा शुद्धक्रतुधर्मानुवादः यद्वा शुद्धक्रतुधर्मविधिरिति **चतुर्धा सन्देहः ।**

पूर्वपक्षस्तु, पूर्वत्र अन्तरादीनां पुरुषधर्मत्वाभावेऽपीह अनृतनिषेधस्य तत्सम्भवाच्छुद्धपुरुषधर्मविधिः । तथा हि 'वदेत्' इत्याख्यातस्य 'लः कर्मणि च' इत्यादिसूत्रेण कर्तरि विहितस्य कर्तृवाचितया तदुक्तः कर्ता प्रकृत्यर्थवदनं प्रति शेषिभूत इत्यनृतवदनस्य पुरुषार्थतया तन्निषेधस्यापि तथात्वेन आख्यातश्रुत्या प्रकरणबाधेन पुरुषार्थोऽनृतवदनप्रतिषेधो विधीयते । 'सत्यमेव वदेन्नानृतम्' इति स्मार्तनिषेधस्तूक्तश्रुतिमूल इति न श्रुतेरनुवादकत्वमापादयितुमल**मित्येकः** । आख्यातश्रुतेः प्रकरणस्य चाविरोधाय क्रतुयुक्तपुरुषधर्मोऽयं 'कर्म कुर्वाणोऽनृतं वर्जयेत्' इति । अयं च निषेधोऽनुवाद एव । न विधीयते। स्मृत्यैव पुरुषस्य उपनयनप्रभृत्यामरणं निषिद्धमनृतवचनम् । तन्मध्यवर्तिनोदर्शपूर्णमासयोरपि तत एव वर्जनस्य प्राप्तत्वात् । अस्मिन् पक्षे स्मृतेर्भिन्नविषयत्वेन क्रतुमध्यगतश्रुतिमूलत्वाभावादिति **द्वितीयः** । आख्यातेन भावनोच्यते । न कर्ता । अनन्यलभ्यस्यैव शब्दार्थत्वात् । कर्ता तु तदविनाभूतोऽर्थात्प्रतीयत इति कर्तृवाचिश्रुत्यभावात् केवलप्रकरणेन प्रयाजादिवदारादुपकारकः शुद्धक्रतावेव निविशते । स च निषेधः सार्वत्रिकस्मार्तनिषेधस्य क्रतावपि प्राप्तत्वादनूद्यत इति **तृतीयः ।** तदाह **सूत्रे, क्रतुसंयुक्तं** क्रतुप्रकरणपठितं **अकर्म** अनृतवदनरूपकर्मनिषेधः **नित्यानुवादः स्यात् ।** कुतः ? उपनयनकाल एव 'नानृतं वदेत्' इति स्मृतेः पुरुष**संयोगा**वगमादिति ।

सिद्धान्तस्तु, स्मार्तनिषेधस्य पुरुषार्थतया क्रतुगतनिषेधस्य क्रत्वर्थत्वेन संयोगभेदात् स्मार्तनिषेधस्य पुरुषप्रत्यवायपरिहारकस्य क्रतावप्राप्तेः, क्रताववैगुण्यसम्पादकस्य क्रतुमध्यगतानृतवदननिषेधस्याप्राप्तत्वादपूर्वः क्रत्वर्थोऽनृतवचनप्रतिषेधो विधीयत इति । तथा च **सूत्रम्, विधिर्वा संयोगान्तरादिति ।**

फलन्तु, आद्यपक्षे अनृतवदनेऽपि क्रतोरवैगुण्यान्न तन्निमित्तप्रायश्चित्तम् । द्वितीयपक्षेपि तथा । पक्षद्वयेऽपि पुरुषार्थातिक्रमनिमित्तं प्रायश्चित्तम् । तृतीयचतुर्थयोस्तु क्रतुभ्रेषप्रायश्रित्तमित्याहुः ।

इत्यष्टममनृतवदननिषेधस्य क्रतुधर्मताधिकरणम् (सूत्रे १८-१९)

अथ नवमं जञ्जभ्यमानधर्माणां प्रकरणे निवेशाधिकरणम् (सूत्राणि २०-२२)

अहीनवत्पुरुषधर्मस्तदर्थत्वात् ॥ २० ॥

(प्रकरणविशेषाद्वा तद्युक्तस्य संस्कारो द्रव्यवत् ॥ २१ ॥ व्यपदेशादपकृष्येत ॥ २२ ॥)

पूर्वत्र श्रुतिप्रकरणयोर्विरोधभावाभावौ चिन्तितौ । अत्र तु वाक्यप्रकरणयोरिति वा पूर्ववैषम्येण शङ्कनाद्वा **सङ्गतिः** । दर्शपूर्णमासयोः 'प्राणो वै दक्षः । अपानः क्रतुः । तस्माज्जञ्जभ्यमानो ब्रूयात् 'मयि दक्षक्रतू' इति । प्राणापानावेवाऽत्मनि सन्धत्ते' इति श्रूयते । गात्रविनामेन विदारितमुखः पुरुषो **जञ्जभ्यमानः** । जृम्भमाण इति यावत् । तस्य वाक्येन प्रतीयमानमन्त्रवचनं किं शुद्धपुरुषधर्मः किं वा क्रतुयुक्तपुरषसंस्कारः क्रतोरेवाङ्गमिति **सन्देहः** ।

पूर्वपक्षस्तु, पूर्वत्र अनृतवचनस्य पुरुषसंयोगाश्रवणेनापुरुषार्थत्वेऽपीह 'मयि दक्षक्रतू' इति वचनस्य जञ्जभ्यमानपुरुषसंयोगस्य वाक्येन प्रतीतेः, वाक्यस्य च प्रकरणाद्बलवत्त्वात्तद्बलात्पुरुषार्थमिदं वचनम् । न च फलकल्पनादोषः । 'प्राणापानावेवाऽत्मनि सन्धते' इति वाक्यशेषेणैव फललाभादिति । तथा च **सूत्रम्,** मन्त्रवचनं **पुरुषधर्मः** स्यात् । कुतः ? जञ्जभ्यमान इति शानचोक्तेन कर्त्रा सम्बन्धाद्वाक्यतः **पुरुषार्थत्वावगमात्** । न चैवं प्रकरणबाधः । 'द्वादशाहीनस्य' इत्यत्रेव वाक्येन प्रकरणबाधस्य न्याय्यत्वादिति ।

सिद्धान्तस्तु, क्रतावपि जञ्जभ्यमानपुरुषसम्भवात् वाक्यप्रकरणयोरविरोधेन क्रतुयुक्तपुरुषसंस्कारद्वारा क्रत्वर्थमेव मन्त्रवचनमिति न फलान्तरकल्पनम् । वर्तमानापदेशरूपवाक्यशेषस्य न फलार्थत्वमपीति । **फलन्तु, पूर्वपक्षे** न क्रतुवैगुण्यनिमित्तकं वचनम् । **सिद्धान्ते** तु तन्निमित्तमिति ।

इति नवमं जञ्जभ्यमानधर्माणां प्रकरणे निवेशाधिकरणम् (सूत्राणि २०-२२)

अथ दशमं अवगोरणनिषेधादीनां पुमर्थताधिकरणम्

शंयौ च सर्वपरिदानात् ॥ २३ ॥

अत्र पूर्वन्यायेन शङ्कनात्सङ्गतिः । दर्शपूर्णमासयोः श्रुतं 'यो ब्राह्मणायावगुरेत्तं शतेन यातयात्, तस्माद्ब्राह्मणाय नावगुरेत्' इति । अवगुरेत् अवज्ञां कुर्यात् । तं शतसंवत्सरेण भोग्यां यातनां

अनुभावयेदित्यर्थः। तत्र नावगुरेदिति प्रतिषेधः क्रत्वर्थः पुरुषार्थो वा इति **सन्देहे,** पूर्वत्र यथा जञ्जभ्यमानमन्त्रवचनस्य फलरहितस्य फलवद्दर्शपूर्णमासप्रकरणेन तदङ्गं मन्त्रवचनमित्युक्तम् एवमिहाऽपि ब्राह्मणावज्ञाशब्दितावगोरणनिषेधस्य क्रत्वङ्गत्वमिति **प्राप्ते,**

युक्तं पूर्वत्र वाक्यशेषस्थप्राणापानधारणस्य प्रागेव सिद्धतया वर्तमानापदेशतया च साध्यत्वाप्रतीतेः फलत्वायोगेन प्रकरणात् फलवत्क्रत्वङ्गत्वम्। इह तु 'हेतुहेतुमतोर्लिङ्' इत्युक्तलिङर्थ एव 'लिङर्थे लेट्' इति सूत्रेण विहितलेडन्तेन 'यातयात्' इत्यनेन शतसंवत्सरभोग्ययातनायाः साध्यत्वावगमात् तादृशनरकपरिहारस्य फलत्वसम्भवात् पुरुषार्थ एवावगोरणप्रतिषेध इति प्रकरणादुत्कर्ष एवास्य वाक्यस्य **युक्त** इति। तदाह **सूत्रे, शंयौ** शंयुपदोपेते वाक्ये शंयुना परिपाल्येभ्यः सर्वब्राह्मणेभ्यः 'यो ब्राह्मणाय' इति वरपरीदानात् अपगोरणनिषेधः सर्वपुरुषधर्म इति ज्ञायत इत्यर्थः। एवमत्राऽ**ख्यायिका,** देवा यज्ञस्य कर्तारमलभमाना बृहस्पतेः पुत्रं शंयुनामानमूचुः। तेन पुनः 'श्रद्धया यजमानस्य यागफलं मे स्यात्' इति वरे याचिते, तैश्च दत्ते, पुनः 'ममेदमस्तु' मत्परिपाल्यानां किं वरं दीयते ? इति पृष्टैर्देवैः 'यो ब्राह्मणाय' इत्यादिकमुक्तमिति। **फलन्तु,** ब्राह्मणावगोरणे यजमानादिना कृते क्रतुवैगुण्यं **पूर्वपक्षे। सिद्धान्ते** तु पुरुषाणामेव प्रत्यवाय इति।

इति दशमं अवगोरणनिषेधादीनां पुमर्थताधिकरणम्

अथैकादशं मलवद्वासःसंवादनिषेधाधिकरणम् (सूत्रे २४-२५)

प्रागपरोधान्मलवद्वाससः ॥ २४ ॥

(अन्नप्रतिषेधाच्च ॥ २५ ॥)

अत्र पूर्ववैषम्येण शङ्कनात्सङ्गतिः। दर्शपूर्णमासप्रकरणे 'मलवद्वाससा न संवदेत्' इति श्रुतो रजस्वलया संवादप्रतिषेधः किं क्रत्वर्थोऽथ पुरुषार्थ इति **सन्देहे,** प्रागवगोरणप्रतिषेधस्य सर्वपुरुषापेक्षितप्रत्यवायपरिहारार्थत्वावगत्या पुरुषार्थत्वोक्तावपीह ऋतुमत्या पत्न्या संवादस्य क्रतावपि सम्भवेन प्रकरणात् रजस्वलासंवादप्रतिषेधः क्रत्वर्थ इति **प्राप्ते**

'यस्य व्रत्येऽहन् पत्न्यनालम्भुका स्यात्तामपरुध्य यजेत' इति 'व्रतदिवसे अस्पृश्या स्यात्तां दूरीकृत्य यजेत' इति वचनेन सर्वस्मादपि क्रतुव्यापारान्निवृत्तया रजस्वलया क्रतौ संवादस्य अप्रसक्ततया तत्र निषेधायोगात् बहिस्तु स्वातन्त्र्येण प्रवर्तमानपुरुषस्य तया संवादप्रसक्तिसम्भवेन तत्रैव निषेधोऽर्थवानिति पुरुषार्थोयं प्रतिषेध इति **सिद्धान्तः।**

सूत्रञ्चैवम् ॥ प्रागित्यादि ॥ स्पष्टः **सूत्रार्थः** । **फलन्तु, पूर्वपक्षे** क्रतुवैगुण्यपरिहारः । **सिद्धान्ते तु,** पुरुषस्य प्रत्यवायपरिहार इति ।

इत्येकादशं मलवद्वासःसंवादनिषेधाधिकरणम् (सूत्रे २४-२५)

अथ द्वादशं सुवर्णधारणादीनां पुरुषधर्मताधिकरणम् (सूत्राणि २६-३०)

अप्रकरणे तु तद्धर्मस्ततो विशेषात् ॥ २६ ॥

(अद्रव्यत्वात्तु शेषः स्यात् ॥ २७ ॥ वेदसंयोगात् ॥ २८ ॥ द्रव्यसंयोगाच्च ॥ २९ ॥ स्याद्वाऽस्य संयोगवत्फलेन सम्बन्धस्तस्मात्कर्मैतिशायनः ॥ ३० ॥)

अत्रापि पूर्ववैषम्येण शङ्कनात्**सङ्गतिः** । अनारभ्य श्रूयते 'तस्मात्सुवर्णं हिरण्यं भार्यम् । सुवर्ण एव भवति । दुर्वर्णोऽस्य भ्रातृव्यः' इति । प्रकरणस्य श्रुत्यादिना विरोधभावाभावचिन्तारूप-महापेटिकायामनारभ्याधीतवाक्यचिन्तापेटिका षड्भिर्नयैः प्रसङ्गात्क्रियत इति ज्ञेयम् । तत्र **सन्देहः,** शोभनवर्णोपेतहिरण्यधारणं किं क्रत्वङ्गतया विधीयते, अथ पुरुषार्थतयेति । आद्येऽपि किं क्रतरोरारादुपकारकाङ्गमुत सन्निपात्यङ्गं, किं वा सुवर्णशब्दितशोभनवर्णतामात्रविधानमिति ।

पूर्वपक्षस्तु, पूर्वत्र ऋतुमतीसंवादस्य क्रतावप्रसक्त्या तन्निषेधस्य अक्रत्वर्थत्वेऽपीह शोभनवर्णोपेत-हिरण्यधारणस्य वैदिकक्रियारूपत्वेन क्रतुस्मारकत्वसम्भवादारादुपकारकतया क्रत्वङ्गमेव धारणम् । पुरुषार्थत्वपक्षे फलकल्पनाप्रसङ्गादित्येकः । भार्यमित्यनेन भृञो 'ऋहलोर्ण्यत्' इति कर्मार्थकण्य-प्रत्ययान्तेन विहितधारणरूपक्रियां प्रति हिरण्यस्य कर्मत्वप्रतीत्या प्राधान्यावगमात् क्रतुगतहिरण्यानु-वादेन तस्य धारणरूपसंस्कारो विधीयते । न च धारणं सुवर्णता चेत्युभयविधाने वाक्यभेद इति शङ्क्यम् । विशिष्टविधाववाक्यभेदात् इति **द्वितीयः** । सुवर्णताविशिष्टधारणविधेरपि गौरवदुष्टत्वात् 'हिरण्यं हस्ते भवति' इति क्रतौ विहितहिरण्यधारणानुवादेन लाघवात् सुवर्णतामात्रं विधीयत इति **तृतीयः** ।

सिद्धान्तस्तु, यद्धि प्रकरणे श्रुतं तद्धि नियमेन क्रतुस्मारकम् । इदञ्चानारभ्याधीतम् । न च हिरण्यं जुह्वादिवत् क्रत्वव्यभिचारि येन क्रतुस्मारकं स्यात् । लोकेऽपि हिरण्यसम्भवात् ।

न च संस्कार्यत्वान्यथानुपपत्त्या क्रतुनिवेशो धार्यहिरण्यस्य भविष्यति । लोके तस्यानुपयोगादिति वाच्यम् । क्रतावप्यनुपयोगात् । क्रतावुपयोगोऽपि कल्प्यत इति चेत् । क्रतूपयोगेन संस्कार्यत्वं, तेन च

क्रतूपयोग इत्यन्योन्याश्रयापत्तेः । अतः क्रतौ नियन्तुमशक्यत्वात्पुरुषार्थमिदं धारणम् । न च फल-कल्पनादोषः । 'सुवर्ण एव भवति, दुर्वर्णोऽस्य भ्रातृव्यः' इत्यर्थवादरूपवाक्यशेषोक्तफललाभादिति । तथा च **सूत्रम्, अप्रकरणे** प्रकरणादन्यत्र पठ्यमानं हिरण्यधारणं **तद्धर्मः** शुद्धपुरुषधर्मः स्यात् । कुतः ? **ततः** प्रकरणपठितादस्य **विशेषादिति** ।

फलन्तु, आर्थवादिकफलाय शोभनवर्णोपेतहिरण्यधारणम् ।

इति द्वादशं सुवर्णधारणादीनां पुरुषधर्मताधिकरणम् (सूत्राणि २६-३०)

अथ त्रयोदशं जयादीनां वैदिककर्माङ्गताधिकरणम् (सूत्राणि ३१-३३)

शेषोऽप्रकरणेऽविशेषात्सर्वकर्मणाम् ॥ ३१ ॥

(होमास्तु व्यवतिष्ठेरन्नाहवनीयसंयोगात् ॥ ३२ ॥ शेषश्च समाख्यानात् ॥ ३३ ॥)

क्रत्वर्थपुरुषार्थचिन्ताप्रसङ्गादनारभ्यवादः पूर्वत्र प्रस्तावितः । तत्प्रसङ्गादिहाप्यनारभ्याधीतवाक्य एव चिन्ता क्रियत इति **सङ्गतिः** । अनारभ्य श्रूयते 'येन कर्मणेर्त्सेत् तत्र जयां जुहुयात्, राष्ट्रभृतो जुहोति, अभ्यातानान् जुहोति' इति । 'चित्तश्च स्वाहा' इत्यादयो **जयाख्या** होमाः । 'ऋताषाट्' इत्यादयो **राष्ट्रभृतः** । 'अग्निर्भूतानाम्' इत्यादयो **अभ्यातानाः** । **ईर्त्सेत्** ऋद्धिमिच्छेदिति कर्मसमृध्यर्थ-तया वाक्येनावगताः । ते किमविशेषतो लौकिकवैदिकसर्वकर्माङ्गमुत आहवनीये कर्तव्यानां वैदिक-कर्मणामेवेति **सन्देहः** ।

पूर्वपक्षस्तु वैदिककर्मणेव लौकिककृष्यादिकर्मणाऽपि ऋद्धेरिष्यमाणत्वात्, सङ्कोचे हेत्वभावात्, जयादिहोमाः सर्वाङ्गम् । न च 'यदाहवनीये जुहोति' इति होममात्रस्य आहवनीये होतव्यत्वोक्त्या कृष्यादौ आहवनीयो नेति न तदङ्गं ते इति वाच्यम् । जयादयो होमत्वादेवाऽहवनीयप्रयोजका इति तदर्थमाहवनीयं प्रणीय तेषु हूयमाना न दुष्यन्तीति कृष्यादावप्यवैगुण्यात्सर्वार्था जयादय इति । तथा च **सूत्रम्, अप्रकरणे** पठितो जयादिर**विशेषात् सर्वकर्मणां शेषः** स्यादिति ।

सिद्धान्तस्तु, एवमुक्तदिशा आहवनीयाभावकृतवैगुण्याभावेऽपि प्रधानदेशभिन्नदेशत्वकृतवैगुण्यं त्वस्त्येव 'क्षेत्रादौ कृष्यादिप्रधानकर्म क्रियते, जयादयस्त्वाहवनीये' इति । वैदिककर्ममात्राङ्गत्वे तु प्रधानकर्मसमानदेशत्वमस्तीति ये आहवनीये कर्तव्यास्तन्मात्राङ्गं जयादय इति । **फलन्तु,** वैदिककर्मण्येवानुष्ठानं जयादेरिति व्यक्तम् ।

इति त्रयोदशं जयादीनां वैदिककर्माङ्गताधिकरणम् (सूत्राणि ३१-३३)

अथ चतुर्दशं वैदिकाश्वप्रतिग्रह इष्टिकर्तव्यताधिकरणम् (सूत्रे ३४-३५)

दोषात्त्विष्टिर्लौकिके स्याच्छास्त्राद्धि वैदिके न दोषः स्यात् ॥ ३४ ॥

(अर्थवादो वाऽनुपपातात्तस्माद्यज्ञे प्रतीयेत ॥ ३५ ॥)

अत्र पूर्ववैषम्येण शङ्कनात्सङ्गतिः। काम्येष्टिकाण्डे अनारभ्य श्रूयते 'यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणांश्चतुष्कपालान् निर्वपेत्' इति। **प्रतिगृह्णीयात्** प्रतिग्राहयेत् इत्यन्तर्णीतर्णिच्। दद्यादित्यर्थ इत्यनन्तरमेव वक्ष्यते।

तत्र त्रेधा **सन्देहः**, किमियं वारुणेष्टिर्मित्रादिभ्यः स्नेहेन कृते लौकिकेऽश्वदाने निमित्ते पुरुषार्थतया विधीयते, उत वैदिके ज्योतिष्टोमपौण्डरीकादिकर्माङ्गभूतेऽश्वदाने निमित्ते क्रत्वर्थतया विधीयते, अथोभयत्रेति।

पूर्वत्र प्रधानसादेश्यरूपलिङ्गेनाविशेषप्रवृत्तवाक्यसङ्कोचेऽपीह तत्सङ्कोचे हेत्वभावात्सर्वार्थैवेष्टिरित्येकः **पूर्वः पक्षः**।

'स एवैनं वरुणपाशान्मुञ्चति' इति वाक्यशेषाद्दोषनिर्हरणार्थेयमिष्टिरवगम्यते। दोषश्च लौकिकाश्वदाने। 'न केसरिणो ददाति' इति स्मृत्या मित्रदायादादिभ्यः प्रीत्या क्रियमाणलौकिकाश्वदानस्य निषेधात्। तदनुष्ठाने प्रायश्चित्तरूपेयमिति **द्वितीयः**। तथा च **सूत्रम्**, इयं **वारुणेष्टिः लौकिके**ऽश्वदाने **स्यात्**। कुतः ? **दोषात्** 'वरुणो वा एतं गृह्णाति योऽश्वं गृह्णाति' इति वरुणग्रहशब्दितजलोदरग्रस्तत्व रूपदोषश्रवणात्। गृह्णातीत्यस्य दद्यादिति व्याख्यास्यमानत्वात्। **न तु वैदिके**। 'गौश्चाश्वश्च' इति ज्योतिष्टोमे, 'उत्तमेऽहन्यश्वसहस्रं दक्षिणा' इति पौण्डरीके च **शास्त्रस्य सत्त्वेन, हि यस्माद्दोषो न स्यादिति**।

सिद्धान्तस्तु, दोषश्रवणाद्धि तन्निर्घातार्थतयेयमिष्टिरुच्यते। न चाश्वदाने जलोदराख्यदोष प्रत्यक्षेण वैद्यशास्त्रेण वा अवगतः। अतो दोषस्यादर्शनात् 'वरुणो वा एतम्' इत्यादिरर्थवादो वारुणेष्टिविधेरित्यश्वदानस्य वैदिकक्रियात्वसाम्याद्वैदिकाश्वदाननिमित्तेयमिष्टिः। अस्ति च वैदिकाश्वदानं 'वडवा दक्षिणा' इति। एवञ्च क्रतुफलेनैव फलवत्त्वान्न पृथक्फलकल्पनादोषोपि। पुरुषार्थत्वे तु फलं कल्प्यं स्यादिति। तदाह **सूत्रकारः, अर्थवादो वा अनुपपातात् तस्माद्यज्ञे प्रतीयेत** इति। **अनुपपातात्** दोषस्यादर्शनादित्यर्थः। **फलन्तु**, क्रत्वीयाश्वदाननिमित्ततयाऽनुष्ठानमिष्टेरिति।

इति चतुर्दशं वैदिकाश्वप्रतिग्रह इष्टिकर्तव्यताधिकरणम् (सूत्रे ३४-३५)

अथ पञ्चदशं दातुर्वारुणीष्टयधिकरणम् (सूत्रे ३६-३७)

अचोदितश्च कर्म भेदात् ॥ ३६ ॥

(सा लिङ्गादार्त्विजे स्यात् ॥ ३७ ॥)

पूर्वाक्षेपेणात्र शङ्कनादाक्षेपिकी वा प्रसक्तचिन्तनात्प्रासङ्गिकी वा **सङ्गतिः** । 'यावतोऽश्वान् प्रतिगृह्णीयात्' इति पूर्वोदाहृतवाक्ये श्रुता वारुणेष्टिः किं दातुरुत प्रतिगृहीतुरिति **सन्देहः** ।

पूर्वपक्षस्तु, 'प्रजापतिर्वरुणायाश्वमनयत् । स स्वां देवतामार्च्छत् । स पर्यदीर्यत । स एतं वारुणं चतुष्कपालमपश्यत् । तं निरवपत् । ततो वै स वरुणपाशादमुच्यत' इत्युपक्रमे, **अनयत्, दत्तवान्, स** तु दाता प्रजापतिः, **स्वकीयां वरुणदेवतां** जलोदररोगप्रदां प्राप्तवान्, तेन च रोगेणायं ग्रस्तः प्रजापतिः **परिदीर्णो** भूत्वा, रोगशान्त्यर्थं ध्यानेनेमामिष्टिं दृष्ट्वाऽनुष्ठाय च रोगादमुच्यतेति दातुरिति प्रतीतावपि विध्युद्देशस्य प्रधानत्वात् तत्र च 'प्रतिग्रह्णीयात्' इति प्रतिगृहीतुः प्रतीतेस्तदनुरोधेनोपक्रम-गतोऽर्थवादः 'दातुस्तावदस्ति, किमु प्रतिगृहीतुः' इत्येवंरूपेण नेतव्य इति प्रतिगृहीतुरेव दान-निमित्तेयमिष्टिरिति, प्रागुक्तं न युक्तमिति । तथा च **सूत्रम्,** वारुणेष्टिरूपं **कर्म** दातुर**चोदितम्** । कुतः ? प्रतिगृहीतुर्दातृतो **भेदा**दिति ।

सिद्धान्तस्तु, श्रुतेर्जाताधिकारः स्यादिति पूर्वपादाद्यनयोक्तदिशाऽसञ्जातविरोधित्वेन प्रबलोप-क्रमगतार्थवादानुरोधेन विध्युद्देशगतमपि 'प्रतिगृह्णीयात्' इत्येतत् 'प्रतिग्राहयेत्' इत्येवमन्तर्भावित-णिजर्थपरतया व्याख्येयमिति दातुरेवेयमिष्टिरिति । तदुक्तं **सूत्रे ॥ सा लिङ्गादार्त्विजे स्यादिति ॥ सा** वारुणेष्टिः । **आर्त्विजे** 'ऋत्विजामयं स्वामी' इत्यार्त्विजो यजमानस्तस्मिन् तद्दानकर्तरि, **स्यात्** । कुतः ? **लिङ्गात्** सामर्थ्यादित्यर्थः । क्रत्वङ्गत्वात् क्रतुकर्तैवास्य कर्तेति सामर्थ्यं ज्ञेयम् । न च तेनैवेदं गतार्थम् । तत्र ऋगादिशब्दानां 'ऋग्भिः प्रातः' इत्यादौ वेदविषये बहुलं दृष्टाः प्रयोगाः । गृह्णातिस्तु दातृव्यापारे न क्वचिद्दृष्ट इति, न तत्परत्वेन व्याख्यातुं शक्यत इति विशेषाशङ्क्या अस्योत्थानादिति ।

फलन्तु, कत्रैवानुष्ठेयेष्टिरिति ।

इति पञ्चदशं दातुर्वारुणीष्टयधिकरणम् (सूत्रे ३६-३७)

अथ षोडशं वैदिकपानव्यापदधिकरणम् (सूत्रे ३८-३९)

पानव्यापच्च तद्वत् ॥ ३८ ॥

(दोषात्तु वैदिके स्यादर्थात्तु लौकिके न दोषः स्यात् ॥ ३९ ॥)

अत्र पूर्ववैषम्येण शङ्कनात्सङ्गतिः । अनारभ्य श्रूयते 'सोमेन्द्रं चरुं निर्वपेच्छ्यामाकं सोमवामिनः' इति । अत्र **सन्देहः**, किं लौकिके सोमे रसायनाद्यर्थं पीते वान्ते च पुमर्थतयेयमिष्टिरुत वैदिके क्रत्वर्थतयेति ।

पूर्वपक्षस्तु, पूर्वत्र लौकिकाश्वदानस्य जलोदराख्यदोषहेतुत्वे मानाभावेन फलकल्पनागौरवेण चेष्टिं प्रत्यनिमित्तत्वेऽपीह पुनः 'एष वा इन्द्रियेण वीर्येण व्यृध्यते यः सोमं वमति' इति स्ववाक्यश्रुतेन्द्रियवीर्यनाशरूपदोषहेतुत्वस्य प्रत्यक्षसिद्धत्वेन अर्थात्तत्समाधानस्य फलत्वसिद्धेः फलकल्पनागौरवाभावाल्लौकिकं वमनमिष्टेर्निमित्तमिति पुमर्थेयमिष्टिः । वैदिके तु पानमात्रस्य शास्त्रार्थत्वाद्वमनेपि न कश्चिद्दोष इति । तथा च **सूत्रम्, पानस्य** सोमपानस्य **व्यापच्च** वमनेन नाशश्च **तत्** अश्वप्रतिग्रहेष्ट्यधिकरणपूर्वपक्षवत् लौकिकमेवेष्टिनिमित्तमिति ।

सिद्धान्तस्तु, लोके धातुसाम्यार्थिनो वमनायैव सोमपानेन तत्र वमनस्य दोषाहेतुत्वात् । वेदे तु 'हिन्व मे गात्रा हरिवः' इत्यनेन मन्त्रेण 'मे नाभिमवाङ् माऽतिगाः' इति जरयितुं सोमशेषः प्रतिपत्तितया पीयत इति जरणपर्यन्तस्य शास्त्रार्थत्वाद्वमनेन तस्य नाशे क्रतुवैगुण्यप्राप्तेस्तत्समाधानार्था सती प्रायश्चित्तरूपेयमिष्टिः क्रत्वङ्गमिति क्रतुफलेनैव फलवत्त्वान्न पृथक्फलकल्पनादोष इति । **फलन्तु** क्रत्वङ्गतयाऽनुष्ठानम् ।

इति षोडशं वैदिकपानव्यापदधिकरणम् (सूत्रे ३८-३९)

अथ सप्तदशं सौमेन्द्रचरोर्यजमानपानव्यापद्विषयताधिकरणम् (सूत्राणि ४०-४२)

तत्सर्वत्राविशेषात् ॥ ४० ॥

(स्वामिनो वा तदर्थत्वात् ॥ ४१ ॥ लिङ्गदर्शनाच्च ॥ ४२ ॥)

सामान्यतो यागीयवमननिमित्तेयमिष्टिरिति स्थिते अत्र विशेषचिन्तनाद्वा प्रासङ्गिकी वा **सङ्गतिः** । 'सोमेन्द्रं चरुं निर्वपेत्' इति श्रुतेष्टिः किं यजमानवमननिमित्ता उत ऋत्विग्वमननिमित्तापीति **सन्देहे**, विशेषाश्रवणादुभयवमननिमित्तेयं सोमेन्द्रेष्टिरिति **प्राप्तम्** । तथा च **सूत्रम्** । तत् सोमेन्द्रं कर्माविशेषात् याजमाने आर्त्विजे च वमने **सर्वत्र** स्यादिति ।

सिद्धान्तस्तु, 'यो वमति स निर्वपति' इति निर्वप्तुर्वमनं चरुनिमित्तम् । निर्वप्ता यजमानो न ऋत्विक् । अतो यजमानवमननिमित्तेयमिष्टिरिति । तदाह **सूत्रकारः ॥ स्वामिनो वा तदर्थत्वादिति ॥ फलन्तु,** यजमानवमननिमित्तानुष्ठानम् ।

इति सप्तदशं सौमेन्द्रचरोर्यजमानपानव्यापद्विषयताधिकरणम् (सूत्राणि ४०-४२)

अथाष्टादशं आग्नेयाष्टाकपालचरोर्व्द्यवदानमात्रस्य होतव्यताधिकरणम् (सूत्राणि ४३-४७)

भाष्यकारीयं वर्णकम्

सर्वप्रदानं हविषस्तदर्थत्वात् ॥ ४३ ॥

(निरवदानात्तु शेषः स्यात् ॥ ४४ ॥ उपायो वा तदर्थत्वात् ॥ ४५ ॥ कृतत्वात्तु कर्मणः सकृत्स्याद्द्रव्यस्य गुणभूतत्वात् ॥ ४६ ॥ शेषदर्शनाच्च ॥ ४७ ॥)

एवमप्रकरणेत्यारभ्य षड्भिर्नयैरनारभ्यचिन्तापेटिकां समाप्याधुनैतदारभ्याऽपञ्चमपादसमाप्ति हविःशेषचिन्ता प्रारभ्यते । पूर्वत्र वमनस्य हविःशेषविषयत्वेन तस्यैतच्चिन्ताप्रसञ्जकत्वात् । तत्रादौ शेषभावाभावौ चिन्त्येते । दर्शपूर्णमासप्रकरणे 'आग्नेयोऽष्टाकपालः' इति श्रुतम् । तत्राष्टाकपाल-पुरोडाशस्य शेषोऽस्त्युत नेति **सन्देहः** ।

अष्टाकपालशब्दितस्य कृत्स्नपुरोडाशावयविन एव आग्नेय इति तद्धितेन देवतासम्बधोक्तेः, अत्यक्तस्य तत्सम्बन्धायोगात्, देवतोद्देशेन त्यक्तस्य सर्वस्य होतव्यत्वान्नास्ति तस्य शेषः । न चैवं 'द्विर्हविषोऽवद्यति' इति वाक्यशेषोक्तद्विरवदानविरोधः शङ्क्यः । 'यत्सर्वं जुहोति तद्द्विरवदाय' इत्युपपत्तेः । तदाह **सूत्रे, सर्वस्य** पुरोडाशस्य **प्रदानं** न्याय्यम् । सर्वस्यैव **हविष** आग्नेय इति तद्धितेन **अग्न्यर्थत्वादिति** । स्विष्टकृदिडाप्राशित्रहरणादिशेषकार्याणि तु हविरन्तरं सम्पाद्य कर्तव्यानीति **प्राप्तम्** ।

सिद्धान्तस्तु, 'आग्नेयस्य पुरोडाशस्य मध्यादङ्गुष्ठपर्वमात्रमवदानं तिरश्चीनमवद्यति' इति कल्प-सूत्रोक्त्याऽङ्गुष्ठपर्वपरिमाणस्यैव द्विः खण्डयित्वा देवतायै दातव्यत्वात्, तावतैव अग्निदैवत्ययाग-साधनतारूपाग्नेयत्वस्य प्रदेयव्द्यवदानप्रकृतिद्रव्यतया पुरोडाशप्रकृतितया व्रीहीणामिवोपपत्तेः, द्व्यवदान-मात्रस्यैव होतव्यत्वादस्ति शेष इति । तथा च **सूत्रम् ॥ निरवदानात्तु शेषः स्यादिति ॥ निष्कृष्य किञ्चिदवदानादस्ति शेष इत्यर्थः** ।

फलन्तु, पूर्वपक्षे शेषकार्यार्थं हविरन्तरानुष्ठानम् । सिद्धान्ते तु हुतशेषस्य प्रतिपत्तिमात्रत्वात् शेषनाशे हविरन्तरासम्पादनम् ।

वार्तिककारीयं वर्णकम्

वार्तिककारस्तु, प्रदेयव्यवदानद्वारा तत्प्रकृतिद्रव्यत्वेनाऽग्नेयत्वं पुरोडाशस्येति **भाष्योक्तमयुक्तम्** । परम्परयाऽऽग्नेयत्वे मानाभावात् । असति प्रमाणे साक्षादेवाऽग्नेयत्वं कृत्स्नपुरोडाशस्य स्यात् । एवं च हविरन्तरे देवतासम्बन्धिनोऽशेषस्यपि प्रायेण होमदर्शनादस्यापि तथात्वमिति **प्राप्ते,**

वाक्यशेषोक्तव्यवदानवशात्तन्मात्रस्यैव होमो न सर्वस्य । एवञ्च 'शेषात्स्विष्टकृते समवद्यति' इत्यत्र शेषपदं स्वरसम् । सर्वस्यैवाग्नये दत्ततयाऽऽग्नेयत्वेनैकदेशस्य होमशिष्टस्याऽग्नेयशेषत्वादिति । न चाग्नये दत्तस्य स्विष्टकृदादिदेवतान्तरस्य दाने आचारविरोध इति शङ्क्यम् । प्रत्यक्षश्रुत्या आचारबाधात् **इत्याहुः ।**

इत्यष्टादशमाग्नेयाष्टाकपालचरोर्व्यवदानमात्रस्य होतव्यताधिकरणम् (सूत्राणि ४३-४७)

अथैकोनविंशं सर्वशेषैः स्विष्टकृदनुष्ठानाधिकरणम् (सूत्राणि ४८-५१)

अप्रयोजकत्वादेकस्मात्क्रियेरन् शेषस्य गुणभूतत्वात् ॥ ४८ ॥

(संस्कृतत्वाच्च ॥ ४९ ॥ सर्वेभ्यो वा कारणाविशेषात्, संस्कारस्य तदर्थत्वात् ॥ ५० ॥ लिङ्गदर्शनाच्च ॥ ५१ ॥)

शेषकार्यार्थं शेषोऽस्तीति स्थिते, कस्माद्धविषः शेषः सम्पाद्यः ? इति चिन्तनात्प्रासङ्गिकी **सङ्गतिः** । स्विष्टकृदादिशेषकार्याणि किमेकस्माद्धविःशेषात् कार्याणि ? किं वा आग्नेयादिहविस्त्रयशेषैः कार्याणि ? इति **सन्देहे,** 'शेषात्स्विष्टकृते समवद्यति' इति शास्त्रस्याऽग्नेयादिहविषां मध्ये यत्किञ्चिद्धविःशेषणानुष्ठानेप्युपपत्तेर्न सर्वैः शेषकार्याणामनुष्ठानमिति **प्राप्तम्** । तदाह **सूत्रे, एकस्मादेव** हविषः शेषकार्याणि **क्रियेरन्** । कुतः ? **शेषस्य** स्विष्टकृदादिकं प्रति **गुणभूततया** संस्कार्यत्वाभावेन तदप्रयोजकत्वादिति ।

स्विष्टकृदादीनि न शेषद्रव्यकप्रधानकर्माणि । तथात्वे हि एकेनापि शेषद्रव्येण स्विष्टकृदादिकर्मसिद्धेर्न सर्वहविःशेषैः कृत्यमस्ति । न चैवम् । उपयुक्तहविःशेषसंस्कारार्थं प्रतिपत्तित्वेन स्विष्टकृदादे-

र्विधानात् । तत्रैकस्यैव प्रतिपत्तावन्यस्य तदभावेन क्रतुवैगुण्यापत्तेराग्नेयाग्नीषोमीयादिहविःशेषैरपि स्विष्टकृदादिशेषकार्याणि कर्तव्यानीति **सिद्धान्तः** । तथा च **सूत्रम्** ॥ **सर्वेभ्यो वा कारणाविशेषात्संस्कारस्य तदर्थत्वादिति** ॥ प्रतिपत्तिकारणाविशेषात् संस्कारस्य द्रव्यार्थत्वात् **सर्वेभ्यो हविः-शेषेभ्यः** शेषकार्याणि कार्याणीत्यर्थः । **फलन्तु**, सर्वहविर्भ्यः शेषस्याऽदानं व्यक्तम् ।

इत्येकोनविंशं सर्वशेषैः स्विष्टकृदनुष्ठानाधिकरणम् (सूत्राणि ४८-५१)

अथ विंशं प्राथमिकशेषात्स्विष्टकृदनुष्ठानाधिकरणम् (सूत्रे ५२-५३)

एकस्माच्चेद्याथाकाम्यमविशेषात् ॥ ५२ ॥

(मुख्याद्वा पूर्वकालत्वात् ॥ ५३ ॥)

कृत्वाचिन्तयेदमारभ्यते । पूर्वाधिकरणे पूर्वपक्षे ह्येकस्मादेव हविषः शेषकार्याणि कर्तव्यानी-त्युक्तम् । तत्र यस्मात्कस्माद्धविषः शेषमुद्धृत्य शेषकार्याणि कर्तव्यानि, उत मुख्याद्धविष इति **सन्देहे, सूत्रम्** ॥ **एकस्मादिति** ॥ अविशेषाद्यथेच्छमेकस्माच्छेषोद्धार इत्येवं **प्राप्ते,**

सिद्धान्तसूत्रम् ॥ **मुख्याद्वा पूर्वकालत्वादिति** ॥ मुखे भवं **मुख्यं** प्राथमिकम् । तत एव शेषोद्धारो नान्यतः । कुतः ? **पूर्वकालत्वात्** मुख्यानुष्ठानकाले शेषकार्याणामपि कर्तव्यतया बुद्धिस्थत्वात्, तदनुरोधेन ततः शेषे स्थापिते ततः शेषकार्यसिद्धौ नान्यतः पश्चात्कालीनाच्छेषस्योद्धार इति । **फलन्तु** मुख्याच्छेषोद्धारः ।

इति विंशं प्राथमिकशेषात्स्विष्टकृदनुष्ठानाधिकरणम् (सूत्रे ५२-५३)

अथैकविंशं पुरोडाशविभागस्य भक्षार्थताधिकरणम् (सूत्राणि ५४-५७)

भक्षश्रवणाद्दानशब्दः परिक्रये ॥ ५४ ॥

(तत्संस्तवाच्च ॥ ५५ ॥ भक्षार्थो वा द्रव्ये समत्वात् ॥ ५६ ॥ व्यादेशाद्दान-संस्तुतिः ॥ ५७ ॥)

अत्र पूर्ववैषम्येण शङ्कनात्सङ्गतिः । आग्नेयं चतुर्धा कृत्वा, चतुर्धा कृतस्य पुरोडाशशेषस्य भागान्

यजमान एवं निर्दिशेत् ''इदं ब्रह्मणः, इदं होतुः इदमध्वर्योः, इदमग्नीधः'' इति। हविर्भागसमर्पणमृत्विजां यथेष्टविनियोगयोग्यत्वाय आनत्यर्थमुत तच्छेषद्रव्यसंस्कारतया भक्षणार्थमिति **सन्देहे**, युक्तं पूर्वत्र हविःशेषः संस्कार्यतया स्विष्टकृदर्थ इति। तस्य प्रतिपत्तित्वात्। एतत्समर्पणन्तु न संस्कार्यतया भक्षणार्थम्। भक्षणस्याश्रवणात्। कर्मकारेभ्यो ऋत्विभ्यो भृतिदानेन तान् परिक्रेतुमेव। क्रयश्च तदङ्गीकारानुसारेण स्वल्पेनापि युक्त इति स्वकीया भागास्तैरिच्छयोपयोक्तुं शक्या इति **प्राप्तम्**। तदाह **सूत्रकारः ॥ भक्षाश्रवणाद्दानशब्दः परिक्रय इति ॥**

सिद्धान्तस्तु, 'अग्नये जुष्टं निर्वपामि' इति कृत्स्नस्य हविषो देवतार्थं सङ्कल्पितत्वेन तत्र यजमानस्य ऋत्विक्तुल्यतया स्वामित्वाभावेनायुक्तः परिक्रयः। भक्षणन्तु प्रतिपत्त्यर्थत्वाद्युक्तम्। अवशिष्टस्य यः कोप्युपयोगः **प्रतिपत्तिः**। पुरोडाशस्य भक्षणार्हत्वात् भक्षणेन कर्मकरणोत्साहजननाच्च भक्षणार्थमिदं समर्पणमिति। **फलन्तु, पूर्वपक्षे** ऋत्विजां यथेष्टविनियोगयोग्यत्वम्। **सिद्धान्ते** तु ब्रह्मादिभिरेव भक्षणीयमिति।

इत्येकविंशं पुरोडाशविभागस्य भक्षार्थताधिकरणम् (सूत्राणि ५४-५७)

इति श्रीभाट्टसङ्ग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य-
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते तृतीयाध्यायस्य चतुर्थः पादः
अस्मिन् पादे अधिकरणानि २१ सूत्राणि ५७
आदितः '' १६५ '' ४६२

अथ तृतीयाध्यायस्य पञ्चमः पादः

अथ प्रथमं ध्रुवाज्यादिभिः स्विष्टकृदादिशेषाननुष्ठानाधिकरणम् (सूत्राणि १-१२)

पूर्वपादान्ते चतुर्धा कृतपुरोडाशार्पणस्य प्रतिपत्तिरूपभक्षणार्थत्वोक्त्या बुद्धिस्थानि शेषकार्याणि उपांशुयाजाज्यादपि कर्तव्यानि न वेत्यत्र पादे चिन्तनात्पूर्वानन्तर्यमस्य पादस्येति ज्ञेयम्।

(आज्याच्च सर्वसंयोगात् ॥ १ ॥ कारणाच्च ॥ २ ॥ एकस्मिन् समवत्तशब्दात् ॥ ३ ॥ आज्ये च दर्शनात्स्विष्टकृदर्थवादस्य ॥ ४ । अशेषत्वात्तु नैवं स्यात्सर्वदानादशेषता ॥ ५ ॥ साधारण्यान्न ध्रुवायां स्यात् ॥ ६ ॥ अवत्तत्वाच्च जुह्वां तस्य च होमसंयोगात् ॥ ७ ॥ चमसवदिति चेत् ॥ ८ ॥ न चोदनाविरोधाद्धविःप्रकल्पन-

त्वाच्च ॥ ९ ॥ उत्पन्नाधिकारात्सति सर्ववचनम् ॥ १० ॥ जातिविशेषात्परम् ॥ ११ ॥ अन्त्यमनेकार्थे ॥ १२ ॥)

स्विष्टकृदादिकार्याणि किमुपांशुयाजद्रव्यरूपाज्यशेषात्कर्तव्यानि, उत नेति **सन्देहे,** 'शेषात्स्विष्टकृते समवद्यति' इत्यादिना विहितानां स्विष्टकृदादीनां प्रकरणाविशेषेण सर्वप्रदानहविःशेषान्वयादुपांशुयाजाज्यशेषादपि तानि कर्तव्यानीति **प्राप्तम्** । तदाह **सूत्रकारः,** आज्यादुपांशुयाजाज्यद्रव्यादपि शेषकार्याणि कर्तव्यानि । कुतः ? स्विष्टकृदादेः प्रकरणाविशेषेण सर्वप्रदानहविःशेषसंयोगात् । 'सर्वेभ्यो हविर्भ्यः समवद्यति' इति सर्वसंयोगाच्चेति ।

सिद्धान्तस्तु, किमुपांशुयाजादिसर्वयज्ञार्थतया ध्रुवायां स्थितादाज्यादुपांशुयाजार्थं जुह्वां गृहीते यदवशिष्टं ध्रुवायामाज्यं ततः शेषकार्याणि कार्यणीत्याशयः उत ध्रवातो जुह्वां गृहीत्वा हुतावशिष्टं यत्ततः कर्तव्यानीति । नाद्यः । तस्य पश्चाद्धाविपुरोडाशशेषप्रतिपत्त्यर्थं स्विष्टकृदुपस्तरणाभिधारणोपयोगितया कृतकार्यत्त्वाभावेन प्रतिपत्त्यनर्हत्वात् । नान्त्यः । तस्याशेषस्यापि होमेन शेषाभावात् । अतो नाज्याच्छेषकार्याणीति । **फलन्तु** उपांशुयाजद्रव्यशेषादन्यहविःशेषेण शेषकार्याणीति ।

इति प्रथमं ध्रुवाज्यादिभिः स्विष्टकृदादिशेषाननुष्ठानाधिकरणम् (सूत्राणि १-१२)

अथ द्वितीयं साकंप्रस्थायीये शेषकर्माननुष्ठानाधिकरणम्

साकंप्रस्थायीये स्विष्टकृदिडं च तद्वत् ॥ १३ ॥

अत्राऽतिदेशिकी **सङ्गतिः** । दर्शपूर्णमासप्रकरणे 'साकंप्रस्थायीयेन यजेत पशुकामः' इति विहिते कर्मणि श्रूयते 'अग्नीधे स्रुचौ प्रदाय सह कुम्भीभिरभिक्रामन्नाह' इति । तत्र स्विष्टकृदादिशेषकार्याणि कार्याणि न वेति **सन्देहः** । पूर्वत्रोपांशुयाजाऽज्यशेषाभावेन शेषकार्याभावेऽपि साकंप्रस्थायीयस्य सान्नाय्यविकृतित्वात् तत्र च शेषकार्यसत्त्वादिहापि प्रकृतिवच्छब्देन शेषकार्याणि स्युः । न च शेषाभावः । चतसृभिर्दधिपयःकुम्भीभिः सहाऽहवनीयदेशेऽभिक्रमणमात्रस्य श्रवणेन कुम्भीभिर्होमस्याश्रवणादिति वाच्यम् । प्रकृताविव जुह्वां कुम्भीभ्योऽवदाय होतव्यतया हुतशेषस्य सत्त्वादिति **प्राप्ते,**

'अग्नीधे स्रुचौ प्रदाय' इति होमार्थजुहूपभृतौ स्रुचौ विहाय कुम्भीभिरभिक्रमणं श्रूयमाणं कुम्भीनामेव होमार्थतामवगमयतीति कुम्भीभिरेव दधिपयसोर्होमे सति कुम्भीमात्रावशेषेण पूर्वत्रेव हविःशेषा-

भावान्नास्ति शेषकार्यमिति **सिद्धान्तः** । **सूत्रं** चैवम् । स्विष्टकृदिडमिति द्वन्द्वैकवद्भावः । स्विष्टकृदादिशेषकार्यं साकंप्रस्थायीयेऽपि कर्मणि तद्वदुपांशुयाजे यथा शेषाभावान्नास्ति तथेति । **फलन्तु,** शेषकार्यानुष्ठानम् ।

इति द्वितीयं साकंप्रस्थायीये शेषकार्याननुष्ठानाधिकरणम्

अथ तृतीयं सौत्रामण्यां शेषकार्याननुष्ठानाधिकरणम् (सूत्रे १४-१५)

सौत्रामण्याश्च ग्रहेषु ॥ १४ ॥

(तद्वच्च शेषवचनम् ॥ १५ ॥)

पूर्वत्रेवात्राप्यातिदेशिकी **सङ्गतिः** । सौत्रामणिनामके यागे आश्विनसारस्वतैन्द्राः पयोग्रहाः सुराग्रहाश्च सन्ति । तत्र स्विष्टकृदादिशेषकार्याणि कर्तव्यानि न वेति **सन्देहे,** पयोग्रहस्य सान्नाय्यविकारत्वात् सुराग्रहस्यौषधपुरोडाशविकारत्वात् तेष्वपि चोदकाबाधायावदायैव होमः कार्य इति शेषसत्त्वात् कार्याणि शेषकार्याणीति **प्राप्ते**

'यथागृहीतान् ग्रहान् ऋत्विज उपाददते, उत्तरेऽग्नौ पयोग्रहान् जुह्वति, दक्षिणेऽग्नौ सुराग्रहान्' इति वाक्ये यथागृहीतानामेव होमार्थं ऋत्विग्भिरुपादानस्य यथोपात्तानामेव होमस्य चोपदेशेनाऽतिदेशिकस्य बाधान्नास्ति शेष इति पूर्वत्रेव न शेषकार्याणीति **सिद्धान्तः** ।

न च 'उच्छिनष्टि, न सर्वं जुहोति' इत्यवशेषयितव्यत्वश्रवणादस्ति शेष इति शङ्क्यम् । 'ब्राह्मणं परिक्रीणीयादुच्छेषणस्य पातारं, यदि ब्राह्मणं न विन्देत वल्मीकवपायामवनयेत्' इत्यन्यत्र तस्योपयोगोक्तेः । तथा हि **सूत्रम्,** सौत्रामण्यां च न शेषकार्यमिति । **फलन्तु,** शेषकार्यलोपः ।

इति तृतीयं सौत्रामण्यां शेषकार्याननुष्ठानाधिकरणम् (सूत्रे १४-१५)

अथ चतुर्थे सर्वपृष्ठेष्टौ स्विष्टकृदिडादीनां सकृदनुष्ठानाधिकरणम् (सूत्रे १६-१७)

द्रव्यैकत्वे कर्मभेदात्प्रतिकर्म क्रियेरन् ॥ १६ ॥

(अविभागात्तु शेषस्य सर्वान्प्रत्यविशिष्टत्वात् ॥ १७ ॥)

शेषकार्याणामेवमपवादोक्तावपोदितादन्यत्र सर्वत्रापि सकृदेवानुष्ठानं, किं वा क्वचिदसकृदपीति चिन्तनात्प्रासङ्गिकी **सङ्गतिः**। 'य इन्द्रियकामो वीर्यकामः स्यात् तमेतया सर्वपृष्ठया याजयेत्' इति विहितायामिष्टौ षडिन्द्रा एवं श्रूयन्ते ''इन्द्राय राथन्तराय निर्वपति, इन्द्राय बार्हताय, इन्द्राय वैरूपाय, इन्द्राय वैराजाय, इन्द्राय शाकराय, इन्द्राय रैवताय'' इति। तत्रैकोऽपीन्द्रः पृष्ठस्तोत्रेषु षट्सु विहितानां षण्णां रथन्तरादिसाम्नां सम्बन्धेन विशेष्यमाणः षोढा भिद्यते। तासामिन्द्रदेवतानां षण्णामिष्टीनामेक एव पुरोडाशो विधीयते 'द्वादशकपालः पुरोडाशो भवति वैश्वदेवत्वाय' इति 'समन्तं पर्यवद्यति' इति 'समन्तं पर्यवदाय प्रदानानि क्रियन्ते' इति। तत्र किं प्रतिकर्म भेदेन स्विष्टकृदाद्यर्थमवदेयमुत सकृदेवेति **सन्देहः**।

देवताभेदेन प्रदानभेदेन च कर्मणां भेदे सति तेषां प्रत्येकमेवेतिकर्तव्यताकांक्षायां प्रत्येकमेव चोदकेनेतिकर्तव्यताप्राप्तेः स्विष्टकृदिडादिशेषकार्यं पृथक्पृथक्कर्तव्यमिति **प्राप्तम्**। तथा च **सूत्रम्,** स्विष्टकृदादि **प्रतिकर्म क्रियेरन्**। द्रव्यैकत्वेऽपि प्रतिकर्म भेदादिति।

सिद्धान्तस्तु, सर्वेषु प्रदानेषु कृतेषु योऽवशिष्टः पुरोडाशः स सर्वशेष इति ततोऽवदाने सर्वे कृतार्था भवेयुरिति सकृदेव शेषकार्यं कर्तव्यमिति। तदाह **सूत्रकारः॥ अविभागात्तु शेषस्य सर्वान् प्रत्यविशिष्टत्वादिति॥ फलन्तु,** सकृदेवावदानमिति व्यक्तम्।

इति चतुर्थं सर्वपृष्ठेष्टौ स्विष्टकृदिडादीनां सकृदनुष्ठानाधिकरणम् (सूत्रे १६-१७)

अथ पञ्चममैन्द्रवायवग्रहे निःशेषभक्षणाधिकरणम्

भाष्यकारीयं वर्णकम्

ऐन्द्रवायवे तु वचनात्प्रतिकर्म भक्षः स्यात्॥ १८॥

पूर्ववद्द्रव्यैक्यान्न शेषकार्यावृत्तिरिति शङ्कनात्**सङ्गतिः**। ज्योतिष्टोमेऽस्त्यैन्द्रवायवो ग्रहः। तस्य शेषभक्षः सकृदुतासकृदिति **सन्देहे,** पूर्वत्रेवात्र संस्कार्यस्य सोमरूपद्रव्यस्यैकत्वात्सकृदेव शेषकार्यरूपो भक्ष इति **प्राप्ते**

'द्विरैन्द्रवायवस्य भक्षयति, द्विर्ह्येतस्य वषट्करोति' इति वचनात् द्विर्भक्षरूपं शेषकार्यमिति

सिद्धान्तः । तथा च सूत्रम् ॥ ऐन्द्रेत्यादि ॥ प्रतिकर्म प्रतिप्रदानमित्यर्थः । शिष्टं व्यक्तम् । फलन्तु, शेषकार्यस्य भक्षस्याऽवृत्तिरिति स्फुटम् ।

वार्तिककारीयं वर्णकान्तरम्

अत्र वचने सति पूर्वपक्षस्यानुदयात् नाधिकरणान्तरं भाष्योक्तं युक्तम् । किन्तु द्विर्भक्षणे द्विःप्रदानस्य 'द्विर्ह्येतस्य वषट्करोति' इति हेतुत्वकथनात् प्रत्यैन्द्रप्रदानं शेषकार्यं षोढा आवर्तनीयमिति पूर्वत्र शङ्कायां हेतुवन्निगदाधिकरणन्यायेन अर्थवादत्वान्न तस्य हेतुसमर्पकत्वमिति वक्तुं पूर्वशेषतयेदं सूत्रं योज्यमित्याहुः ।

इति पञ्चममैन्द्रवायवग्रहे निःशेषभक्षणाधिकरणम् ।

अथ षष्ठं सामे शेषभक्षणाधिकरणम् (सूत्राणि १९-२२)

सोमेऽवचनाद्भक्षो न विद्यते ॥ १९ ॥

(स्याद्वाऽन्यार्थदर्शनात् ॥ २० ॥ वचनानि त्वपूर्वत्वात्तस्माद्यथोपदेशं स्युः ॥ २१ ॥ चमसेषु समाख्यानात्संयोगस्य तन्निमित्तत्वात् ॥ २२ ॥)

पूर्वाक्षेपेण शङ्कनात्सङ्गतिः । सोमयागे बहवो ग्रहाश्चमसाः पुरुषाश्च सन्ति । तत्र शेषभक्षो नास्त्युतास्तीति । अस्तीति पक्षे किं सर्वत्र सर्वेषामविशेषेण भक्षणं, किं वा यत्र यस्य प्रत्यक्षवचनमस्ति तस्य तत्र भक्ष उत समाख्यावषट्कारहोमाभिषवप्रत्यक्षवचनैर्भक्ष इति **सन्देहः ।**

पूर्वपक्षस्तु, यद्ग्रहान् जुहोति, यच्चमसान् जुहोति' इति ग्रहाद्युद्देशेन होमविधानेन कृत्स्नस्यापि होतव्यत्वात् कुम्भीष्विव न शेषोस्ति । 'अल्पं जुहोति' इति वचनाच्छेषसत्त्वेऽपि भक्षणे वचनाभावान्नास्ति भक्षणम् । तथा च **सूत्रम् ॥ सोमेऽवचनाद्भक्षो न विद्यते** इति ॥ एवञ्चैन्द्रवायवे भक्षस्यैवाभावेन पूर्वत्र तस्य द्विर्भक्षणोक्तिरयुक्तेत्येकः । अल्पहोमविधानावगतशेषस्यासति भक्षे 'पुरस्तादैन्द्रवायवं भक्षयति' इति विशेषविधानमन्यथाऽनुपपन्नं भक्षं गमयत्, स्थालीपुलाकन्यायेनाविशेषात्सर्वत्र सर्वेषां भक्षमनुमापयतीति **द्वितीयः** । अल्पहोमवचनेन शेषस्यावगमेऽपि न नियमतो भक्षणमेव तस्य प्रतिपत्तिरित्यत्र मानमस्ति । पुरस्तादिति वचनं तु पौरस्त्यगुणविशिष्टभक्षणविधिपरं सत् न सर्वत्र सर्वेषां भक्षणं प्रापयितुमलम् । अतो यत्रैन्द्रवायवादावध्वर्य्वादिर्भक्षणं श्रुतं तत्र तस्य भक्ष इति **तृतीयः** ।

सिद्धान्तस्तु, सत्यं यस्य यत्र भक्षः श्रुतस्तस्य तत्र भक्षणमिति । किन्तु श्रवणमेव न भक्षनियमे प्रमाणम् । किन्तु समाख्यावचनवषट्कारहोमाभिषवा अपि । **तथा हि,** प्रैतु होतुश्चमसः, प्र ब्रह्मणः, प्रोद्गातॄणां, प्र यजमानस्य, प्रैतु सदस्यानाम्' इत्यत्र श्रुतसमाख्या होत्रादेः सर्वत्र षष्ठ्यन्तेष्वनुवृत्तचमसस्य च न स्वस्वामिसम्बन्धनिमित्ता । यजमानस्यैव यागस्य कार्यत्वात् । नापि होमक्रियानिमित्ता । तेषां होमाकर्तृत्वात् । अतो होत्रादिभिः 'चम्यते भक्ष्यते अत्र' इति भक्षणसम्बन्धनिमित्ता समाख्येति समाख्यया भक्षनियमो ज्ञेयः । तथा च **सूत्रम् ॥ चमसेषु समाख्यानादिति ॥ फलन्तु,** होत्रादेश्चमसेष्वेव भक्षसिद्धिः ।

इति षष्ठं सोमे शेषभक्षणाधिकरणम् (सूत्राणि १९-२२)

अथ सप्तममुद्गातॄणां मतभेदेन ससुब्रह्मण्यानामपसुब्रह्मण्यानां वा भक्षाधिकरणम् (२३-२६)

उद्गातृचमसमेकस्य श्रुतिसंयोगात् ॥ २३ ॥

(सर्वे वा सर्वसंयोगात् ॥ २४ ॥ स्तोत्रकारिणां वा तत्संयोगाद्बहुश्रुतेः ॥ २५ ॥ सर्वे तु वेदसंयोगात्कारणादेकदेशे स्यात् ॥ २६ ॥)

पूर्वत्र चमसिनां समाख्यया भक्षमुक्त्वा वषट्कारादिभिर्भक्षमग्रे विवक्षुरधुना समाख्यानिमित्तभक्षचिन्तैवात्र **क्रियते ।** 'प्रोद्गातॄणां' इति पूर्वोक्तवाक्ये उद्गातृप्रातिपदिकानुरोधेन तस्यैकस्यैवोद्गातृचमसे भक्ष उत प्रत्ययार्थबहुत्वानुरोधादन्येषामपि । अन्येषामपीत्यत्र किं सर्वेषामृत्विजां, किं वा असुब्रह्मण्यानामेकस्तोत्रयोगिनामुद्गातृप्रस्तोतृप्रतिहर्तॄणां त्रयाणां छन्दोगानां, यद्वा ससुब्रह्मण्यानां छन्दोगानां चतुर्णामिति **सन्देहः ।**

पूर्वपक्षस्तु, उद्गीथशब्दवाच्यसामभक्तेरूद्गातर्युद्गातृशब्दस्य रूढत्वात् 'अदितिः पाशान् प्रमुमोक्तु' इत्यत्रेव 'गुणे त्वन्याय्यकल्पना' इति नावमिकाधिकरणन्यायेन प्रधानप्रातिपदिकानुरोधात्प्रत्ययार्थाविवक्षयोद्गातुरेकस्यैव तत्र भक्ष **इत्येकः पक्षः ।** तथा च **सूत्रम्, उद्गातृचमसमेक** उद्गाता भक्षयेत् । तस्यैकस्यैव प्रोद्गातृचमस प्रति **श्रुत्या संयोगादिति ।** पाशमन्त्रे 'प्रमुमोक्तु' इत्युक्तमोचनक्रियान्वययोग्यस्य प्राकरणिकस्य कस्यचित्पाशप्रातिपदिकलक्षणीयस्याभावेन तत्र प्रत्ययास्वारस्येऽपीहोद्गातृप्रातिपदिकेन लक्षणया प्राकरणिकसर्वर्त्विग्ग्रहणेन प्रत्ययस्वारस्यसम्भवे सर्वथाबाधायोगात्सर्वर्त्विजां

तत्र भक्ष इति **द्वितीयः** । उद्गीथप्रस्तावप्रतिहारान् सामभागानुद्गातृप्रस्तोतृप्रतिहर्तारः प्रयोगकाले उत्कर्षेण गायन्तीत्यवयवयोगेन वचनवृत्त्यैव त्रयाणां ग्रहणे सति प्रातिपदिकप्रत्यययोर्द्वयोरपि सम्भवे लक्षणाऽयोगाच्छन्दोगानां त्रयाणां भक्ष इति **तृतीयः** । योगादूरूढेर्बलवत्त्वेन रूढ्या एक एवोद्गातृपदेन प्रतीयत इति बहुवचनोपपत्तये लक्षणाया अवश्यम्भावे प्रस्तोतृप्रतिहर्त्रोः प्रत्यासत्तिरिव सुब्रह्मण्यस्यापि सामवेदाध्यायित्वेन सुब्रह्मण्याह्वाने तदीयकर्मण्यप्युद्गातृत्वसमाख्यासत्त्वाच्च प्रत्यासत्तिभावेन ससुब्रह्मण्यानां चतुर्णां भक्ष इति **सिद्धान्त** इति **भाष्यकारः** ।

वार्तिककारीयं वर्णकम्

वार्तिककारस्तु, एकस्तोत्रसम्बन्धः सदसि सन्निधानं कर्मसु व्याप्रियमाणत्वश्चेत्येवमन्तरङ्गप्रत्यासत्तेस्त्रयाणामेव भावेन सुब्रह्मण्यस्य त्रितयान्यतमस्याप्यभावादपसुब्रह्मण्यानां त्रयाणामेव भक्ष इति **सिद्धान्तितवान्** । **फलन्तु**, चतुर्णां त्रयाणां वा मतभेदेन भक्षणम् ।

इति सप्तममुद्गातॄणां मतभेदेन ससुब्रह्मण्यनामपसुब्रह्मण्यानां वा भक्षाधिकरणम् (सूत्राणि २३-२६)

अथाष्टमं ग्रावस्तुतोपि सोमभक्षाधिकरणम् (सूत्राणि २७-३०)

ग्रावस्तुतो भक्षो न विद्यते अनाम्नानात् ॥ २७ ॥

(हारियोजने वा सर्वसंयोगात् ॥ २८ ॥ चमसिनां वा सन्निधानात् ॥ २९ ॥ सर्वेषां तु विधित्वात्तदर्था चमसिश्रुतिः ॥ ३० ॥)

उक्तः समाख्यया भक्षः । अधुना वाचनिको भक्षश्चिन्त्यत इत्यवसरसङ्गतिः । 'हरिरसि हारियोजनः' इत्यनेन मन्त्रेण गृह्यमाणो ग्रहो **हारियोजनः** । तत्र वचनम् 'यथाचमसमन्यांश्चमसान् चमसिनो भक्षयन्ति, अथैतस्य हारियोजनस्य सर्व एव लिप्सन्ते' इति । 'लिप्सन्ते' इत्यस्य लक्षणया भक्षयन्तीत्यर्थः । तत्र हारियोजनग्रहे होतृगणमध्ये चतुर्थतया स्थितस्य ग्रावस्तुन्नामकस्य भक्षोऽस्त्युत नेति **सन्देहः** ।

पूर्ववाक्ये चमसिनां सन्निधानादुत्तरवाक्ये सर्वशब्देन तेषामेव वाच्यत्वेनाचमसिनो ग्रावस्तुतो नास्ति भक्ष इति **प्राप्तम्** । तथा च **सूत्रम्** ॥ **ग्रावस्तुत** इत्यादि ॥

सिद्धान्तस्तु, अथशब्देन एवकारेण च चमसिमात्रपरत्वशङ्कां सर्वशब्दस्यापोद्य वाक्येन विहितसर्वभक्षणस्य सन्निधिरूपस्थानप्रमाणेन सङ्कोचायोगात्सर्वशब्देन ग्रावस्तुतोऽपि ग्रहणादस्ति तस्यापि तत्र भक्ष इति । **फलन्तु,** ग्रावस्तुतो भक्षसिद्धिः ।

इत्यष्टमं ग्रावस्तुतोपि सोमभक्षणाधिकरणम् (सूत्राणि २७-३०)

अथ नवमं वषट्करणस्य भक्षनिमित्तताधिकरणम्

वषट्काराच्च भक्षयेत् ॥ ३१ ॥

समाख्यावचनाभ्यां भक्ष उक्तः । अधुना अवसरप्राप्तो वषट्काराद्भक्ष उच्यते इति **सङ्गतिः ।** 'वषट्कर्तुः प्रथमभक्षः' इति श्रुते वाक्ये वषट्कारो भक्षे निमित्तमुत नेति **सन्देहे,** होतुरेव वषट्कर्तृत्वात् तस्य च 'होतुश्चमसः' इति समाख्यया भक्षणं प्राप्तमेवेति वषट्कर्तृकं यद्भक्षणमिति वषट्कर्तृकत्व-विशिष्टभक्षणानुवादेन प्राथम्यमात्रमत्राप्राप्तं विधीयत इति न वषट्कारस्य भक्षणनिमित्ततापरमिदं वाक्यमिति **प्राप्ते,**

विशिष्टानुवादस्य गौरवदुष्टत्वात् 'प्रथमभक्षः' इत्यस्य समस्तपदत्वेन 'यो भक्षः सः प्रथमः' इत्येवं विधातुमयोग्यत्वात्, प्राथम्यविशिष्टं भक्षणमत्र विधीयत इति तस्मिन् भक्षणे वषट्कारोऽपि निमित्तमिति **सिद्धान्तः** । तदाह **सूत्रे, वषट्काराच्च भक्षयेदिति** । **फलन्तु,** वषट्कारनिमित्तं भक्षणं सर्वत्रादौ कृत्वा पुनः समाख्यानिमित्तमपि भक्षणं कार्यमिति ।

इति नवमं वषट्करणस्य भक्षनिमित्तताधिकरणम्

अथ दशमं होमाभिषवयोर्मिलितयोर्भक्षनिमित्तताधिकरणम्

होमाभिषवाभ्याञ्च ॥ ३२ ॥

अवसरप्राप्तं होमाभिषवयोर्भक्षनिमित्तत्वमत्रोच्यत इति **सङ्गतिः** । एवं हि श्रूयते 'हविर्धाने ग्रावभिरभिषुत्याऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्ति' इति । तत्र होमाभिषवयोर्भक्षनिमित्तत्वमस्त्युत नेति **सन्देहः ।**

'हविर्धाने' इत्यादिवाक्यस्य भक्षानुवादेन गुणविधित्वसम्भवेन होमाभिषवनिमित्तकापूर्वभक्षण-विधिपरत्वाभावान्न निमित्तं होमाभिषवाविति **प्राप्ते**

अभिषवो हविर्धानं ग्रावाणो वा वचनान्तरप्राप्तत्वान्न विधीयन्ते। नाप्यभिषवस्य होमात्प्रागभावः। अनभिषुत्य सोमरसेन होतुमशक्यतया अर्थप्राप्तत्वात्तस्य। नाप्याहवनीये होमः। 'आहवनीये जुहोति' इत्यनारभ्यविधिनैव प्राप्तेः।

नापि प्रत्यग्गमनम्। आहवनीयात्पाश्चात्याद्धविर्धानादपि पाश्चात्ये सदसि भक्षविधायकाद्वाक्यान्तरादेवार्थतः प्राप्तेः। नापि क्रमः। तस्याप्यर्थादेव सिद्धेः। अनभिषुतस्य होमायोगात्, अहुतस्य च भक्षणरूपप्रतिपत्त्यर्थं प्रत्यङ्नयनासम्भवात्, अनीतस्य च सदसि स्थितैर्भक्षणायोगात्। नापि होमाभिषवयोर्भक्षाङ्गत्वं विधीयते। अपूर्वार्थस्य होमस्य सोमसंस्कारार्थस्याभिषवस्य च द्रव्यप्रतिपत्त्यर्थ भक्षाङ्गत्वविधानायोगात्। अतो होमाभिषवोभयनिमित्तकं भक्षान्तरमेव विधीयते इति भवत्येव होमाभिषवौ मिलितावपरं भक्षे एकं निमित्तमिति **सिद्धान्तः**।

तदाह सूत्रकारः, होमाभिषवाभ्याञ्चेति। भक्षयेदित्यनुषङ्गः। **फलं**, होत्रादिचमसेष्वपि होमाभिषवकर्तुरध्वर्योर्भक्षप्राप्तिः। केवलाभिषवादिकर्तुरुन्नेत्रादेर्न भक्ष इति।

इति दशमं होमभिषवयोर्मिलितयोर्भक्षनिमित्तताधिकरणम्

अथैकादशं वषट्कर्त्रादीनां चमसे सोमभक्षाधिकरणम् (सूत्राणि ३३-३५)

प्रत्यक्षोपदेशाच्चमसिनामव्यक्तः शेषे ॥ ३३ ॥

(स्याद्वा कारणाभावादनिर्देशश्चमसानां कर्तुस्तद्वचनत्वात् ॥ ३४ ॥ चमसे चान्यदर्शनात् ॥ ३५ ॥)

प्रागुक्तभक्षहेतूनामिह बाधसमुच्चयचिन्तनात्प्रासङ्गिकी **सङ्गतिः**। 'प्रैतु होतुश्चमसः, प्र ब्रह्मणः, प्रोद्गातॄणां' इत्यत्र किं समाख्यया चमसिनामेव भक्ष, उत वषट्कर्तुर्होमाभिषवकत्रोर्होत्र- ध्वर्योरप्यस्ति भक्ष इति **सन्देहे,** समाख्यायाश्चमसैकविषयत्वेन निरवकाशत्वात् वषट्कारस्य होमसहिताभिषवस्य च भक्षनिमित्तस्य ग्रहशेषे भक्षप्रापकत्वेनापि सम्भवेन सावकाशत्वात्, शेषप्रतिपत्तेश्चैकेनैव भक्षणेन सिद्धेश्चमसाख्यया वषट्कारादिनिमित्तद्वयप्राप्तभक्षस्य बाधान्नास्ति चमसेषु तयोर्भक्ष इति **प्राप्तम्**। तदुक्तं **सूत्रे, प्रत्यक्षोपदेशात्** 'होतुश्चमसः' इत्यादिना विशिष्योपदेशात् **चमसिना**मेव चमसेषु भक्षः। नान्यस्य। **अव्यक्तः** वषट्कारादिसामान्यविधिस्तु चमसिनोऽनवकाशः **शेषे** भविष्यतीति।

सिद्धान्तस्तु, 'वषट्कर्तुः प्रथमभक्षः' इति वचनेन 'हविर्धाने ग्रावभिरभिषुत्य' इत्यादिवचनेन च विहितयोर्वषट्कारहोमाभिषवनिमित्तभक्षयोः कल्प्यविधिकसमाख्यया बाधायोगात् समाख्यायाश्च अनवकाशत्वेन ताभ्यां बाधायोगात् सर्वैः शेषस्य भक्षसम्भवादस्ति तयोरपि चमसेषु भक्ष इति भक्षहेतूनां समुच्चयो नान्यतरेणान्यस्य बाध इति। **फलन्तु**, त्रयाणामपि चमसेषु भक्षणसिद्धिः।

इत्येकादशं वषट्कत्रादीनां चमसे सोमभक्षाधिकरणम् (सूत्राणि ३३-३५)

अथ द्वादशं होतुः प्रथमभक्षाधिकरणम् (सूत्राणि ३६-३९)

एकपात्रे क्रमादध्वर्युः पूर्वो भक्षयेत् ॥ ३६ ॥

(होता वा मन्त्रवर्णात् ॥ ३७ ॥ वचनाच्च ॥ ३८ ॥ कारणानुपूर्व्याच्च ॥ ३९ ॥)

सिद्धेऽनेकेषामेकपात्रभक्षणेऽत्र क्रमश्चिन्त्यत इति **सङ्गतिः**। तत्र किमध्वर्युरादौ भक्षयेदुत वषट्कर्तेति **सन्देहे**, अध्वर्युहस्त एव पात्रस्यावस्थानात्स एव पूर्वं भक्षयेत्। 'वषट्कर्तुः' इति वचनन्तु भक्षमात्रविधिपरम्। प्रथमपदं त्वध्ययनमात्रोपयोगि। तस्यापि विधाने वाक्यभेदापत्तेः। चमसिभ्यः प्राथम्यापेक्षया वा सङ्कोचेन तदुपपत्तेरित्येवं **प्राप्तम्**। तदाह **सूत्रे, एकपात्रे** त्वनेकेषां भक्षप्राप्तावध्वर्युः **पूर्वो भक्षयेत्**। कुतः ? **क्रमात्** तस्य स्वहस्तस्थितसोमत्वेन सन्निधिरूपक्रमादिति।

अविशेषेण प्रवृत्तवचनस्य पात्रसन्निधानरूपन्यायमात्रेण चमस्यपेक्षया प्रथममिति सङ्कोचायोगात्, विशिष्टविधौ वाक्यभेदानापत्तेः, 'होतेव नः प्रथमः पाहि' इति वाक्ये होता यथा अस्मत्तः पूर्वं भक्षयित्वा शेषप्रदानेनास्मान् पालितवानेवं त्वमपि पाहि' इत्यध्वर्युं प्रति ऋत्विजां प्रार्थनाश्रवणरूप-लिङ्गदर्शनाच्च वषट्कर्तुः प्रथमं भक्ष इति **सिद्धान्तः**। **फलन्तु**, वषट्कर्तुः प्रथमभक्ष इति व्यक्तम्।

इति द्वादशं होतुः प्रथमभक्षाधिकरणम् (सूत्राणि ३६-३९)

अथ त्रयोदशं भक्षस्यानुज्ञापूर्वकत्वाधिकरणम्

वचनादनुज्ञातभक्षणम् ॥ ४० ॥

पूर्वं वषट्कर्तुरादौ भक्षणमित्युक्तम्। तत्रोत्तरौ भक्षयितारावनुज्ञाप्य भक्षयेदननुज्ञाप्यैव वेति चिन्तनात्सङ्गतिः। अनुज्ञानपूर्वकभक्षणानुष्ठाने गौरवादननुज्ञाप्येति प्राप्ते 'तस्मात्सोमो नानुपहूतेन

पेयः' इति मन्त्रेऽनुपहूतेन अननुज्ञातेन न पातव्य इत्युक्तेर्वचनादनुज्ञाप्य भक्षयेदिति **सिद्धान्तः** । व्यक्तः **सूत्रार्थः** । वचने सति चिन्ताया अनुदयाद्वचनस्थोऽपहूतशब्देनानुज्ञानमुच्यत इति दर्शयितुं उत्तरचिन्तार्थमेवेदं सूत्रमित्याहुः ।

इति त्रयोदशं भक्षस्यानुज्ञापूर्वकत्वाधिकरणम्

अथ चतुर्दशं वैदिकवचनेनानुज्ञापनाधिकरणम्

तदुपहूत उपह्वयस्वेत्यनेनानुज्ञापयेल्लिङ्गात् ॥ ४१ ॥

अनुज्ञाप्य भक्षयितव्यमिति स्थिते तदनुज्ञापनं लौकिकेन शब्देन वैदिकेन वेति **सन्देहे,** लाघवाल्लौकिकेनेति **प्राप्ते,** 'उपहूत उपह्वयस्व' इत्ययं मन्त्रो लिङ्गेन अनुज्ञापने विनियुज्यत इति मन्त्रवाक्येनैवानुज्ञापनमिति । तदाह **सूत्रकारः,** तत् यतोऽनुज्ञाप्य भक्षणीयं ततः **'उपहूत उपह्वयस्व'** इति **मन्त्रेणैव अनुज्ञापयेत्** । कुतः ? लिङ्गात् अस्य मन्त्रस्य अनुज्ञापनप्रकाशनसामर्थ्यरूपलिङ्गकत्वादिति । एतदप्युत्तरचिन्तार्थं प्राप्तिसूत्रम् ।

इति चतुर्दशं वैदिकवचनेनानुज्ञापनाधिकरणम् ।

अथ पञ्चदशं वैदिकवचनेन प्रतिवचनाधिकरणम् ।

तत्रार्थात्प्रतिवचनम् ॥ ४२ ॥

मन्त्राम्नानबलाद्वैदिकोक्त्याऽनुज्ञाप्य भक्षणीयमित्युक्ते तस्यैव मन्त्रस्य विनियोगोऽत्र चिन्त्यत इति **सङ्गतिः** । पूर्वोक्तमन्त्रे हि 'उपहूतः' इत्यंशः 'अनुज्ञातोसि' इत्यर्थकतया अनुज्ञाप्रकाशनशक्त आदौ श्रुतः । 'उपह्वयस्व' इत्ययमंशस्तु 'अनुज्ञां देहि' इत्यर्थकतया अनुज्ञापनप्रतिपादने शक्तः पश्चात्पठितः ।

तत्र **सन्देहः,** वाक्यभङ्गमकृत्वा सर्वोपि मन्त्रोऽनुज्ञानुज्ञापनयोरन्यतरत्र विनियोज्योऽन्यतरत्र लौकिकः शब्दः, उतोऽभयत्र सर्वोपि मन्त्रः, किं वा लिङ्गवशाद्विभज्येति ।

अनुज्ञापनपूर्वकत्वादनुज्ञाया मन्त्रयोश्च तद्विपरीतत्वान्न विभज्य विनियोज्यः । तस्मात्समस्तोयमन्यतरत्रोऽभयत्र वा विनियोज्य इति प्राप्तम् । तदाह **सूत्रे तत्र** वैदिके प्रश्ने सर्वस्य विनियोगे अर्थाल्लौकिकं **प्रतिवचनमिति** ।

लिङ्गेनैक वाक्यतां बाधित्वा विभज्य विनियोज्यः । तत्रापि पाठक्रमादनुज्ञा पूर्वं प्रकाश्यमाना निष्फला सती अदृष्टार्था स्यात् । अनुज्ञापनपूर्वकत्वादनुज्ञायाः । तस्मादर्थक्रमेण पाठक्रमं बाधित्वा पश्चात्पठितोपि 'उपह्वयस्व' इत्यंशः प्रश्नसमत्वात्पूर्वभाविन्यनुज्ञापने प्रयोज्यः । पूर्वपठितोपि 'उपहूतः' इत्यंशः प्रत्युत्तरसमानत्वात् पश्चादनुज्ञायां प्रयोज्य इति **सिद्धान्तः** ।

इति पञ्चदशं वैदिकवचनेन प्रतिवचनाधिकरणम्

अथ षोडशमेकपात्राणामनुज्ञापनाधिकरणम्

तदेकपात्राणां समवायात् ॥ ४३ ॥

प्रकृतमनुज्ञापनं भिन्नपात्राणामपि कार्यमुतैकपात्रसमवेतानामेवेति प्रसङ्गाच्चिन्तनात्प्रासङ्गिकी **सङ्गतिः सन्देहश्च** । अनुज्ञापनस्यादृष्टार्थतया सङ्कोचे विशेषहेत्वभावात्पात्रान्तरपातॄणामप्यनुज्ञापनमिति **प्राप्ते,**

अनेकसाधारणे शेषवस्तुनि कथञ्चिदधिकांशभक्षणप्राप्तापराधनिमित्तेतरकोपशान्तिरूपदृष्ट-प्रयोजनकं ह्यनुज्ञापनम् । तच्चैकपात्रपुरुषाणामेव सम्भवतीति तेषामेवोपाह्वानं, नान्येषामपीति **सिद्धान्तः** । तथा च **सूत्रम्,** तदनुज्ञापन**मेकपात्रे** अनेक**समवाया**देव भवतीति । **फलन्तु,** एकपात्रपायिनामेवानुज्ञापनमिति व्यक्तम् ।

इति षोडशमेकपात्राणामनुज्ञापनाधिकरणम्

अथ सप्तदशं स्वयं यष्टुर्भक्षास्तित्वाधिकरणम् (सूत्राणि ४४-४६)

याज्यापनये नापनीतो भक्षः प्रवरवत् ॥ ४४ ॥

(यष्टुर्वा कारणागमात् ॥ ४५ ॥ प्रवृत्तत्वात्प्रवरस्यानपायः ॥ ४६ ॥)

पूर्वमृत्विजां भक्षोक्तावत्र स्वामिनो भक्षश्चिन्त्यत इति **सङ्गतिः** । होतृकाण्डे समाम्नाता याज्याः समाख्यया होतुः प्राप्ताः । तत्र ज्योतिष्टोमे ऋतुनामकेज्यासु 'यजमानस्य याज्या । सोऽभिप्रेष्यति होतरेतद्यजेति । स्वयं वा निषद्य यजति' इति वचनात् काचिद्याज्या होतुरपनीय यजमानस्य विधीयते । तत्र यदा यजमानो निषद्य यजति, स्वयमेव याज्यां पठति, तदा किं याज्यायाः होतुरपनये वषट्कारभक्षावप्यपनीयेते, उत तौ होतर्येवावतिष्ठेते इति **सन्देहः** ।

पूर्वपक्षस्तु, 'यजमानस्य याज्या' इति होतुः सकाशात् याज्यापनयनमात्रचोदनात् 'याज्याया अधिवषट्करोति' इति याज्याया उपरि श्रुतवषट्कारस्य याज्यानन्तर्भावान्न तदपनये तस्यापनयः। तदनपनयनादेव भक्षोपीति होतैव यजमानप्रयुक्तयाज्याया अधिवषट्कर्ता भक्षयिता चेति। तदाह सूत्रे, **याज्यापनये भक्षस्त्वपनीतो न** भवति **प्रवरवत्** ऋतुग्रहेज्यासु यजमानाशक्तानां याज्यानां प्रयोगार्थे यद्वरणं तद्वदिति।

सिद्धान्तस्तु, प्रत्यक्षवचनेन श्रुतं यजमानस्य यष्टृत्वं वषट्कारे सति पूर्णं भवति। याज्यामात्रप्रयोगे तन्न्यूनं स्यात्। अतो यजमान एव तत्र वषट्कर्ता भक्षयिता च, न होतेति। **फलन्तु,** यष्टुर्यजमानस्यैव वषट्कारभक्षणे, न होतुरिति व्यक्तम्।

इति सप्तदशं स्वयं यष्टुर्भक्षास्तित्वाधिकरणम् (सूत्राणि ४४-४६)

अथाष्टादशं फलचमसस्येज्याविकारताधिकरणम् (सूत्राणि ४७-५१)

फलचमसो नैमित्तिको भक्षविकारः श्रुतिसंयोगात् ॥ ४७ ॥

(इज्याविकारो वा संस्कारस्य तदर्थत्वात् ॥ ४८ ॥ होमात् ॥ ४९ ॥ चमसैश्च तुल्यकालत्वात् ॥ ५० ॥ लिङ्गदर्शनाच्च ॥ ५१ ॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। ज्योतिष्टोमे 'यदि राजन्यं वैश्यं वा याजयेत्, स यदि सोमं बिभक्षयिषेत् न्यग्रोधस्तिभिनीराहृत्य, ताः सम्पिष्य, दधनि सम्मृज्य तमस्मै भक्षं प्रयच्छेत्, न सोमम्, इति राजन्यवैश्यनिमित्तः फलाख्यचमसः श्रुतः। **स्तिभिन्यो** वटमुकुलानीत्येके। वटफलानीत्यन्ये। तत्र **सन्देहः,** फलचमसो भक्षमात्रे सोमविकारः सन् सोमं बाधते, अथ यागसाधनमपि सोमं विकुर्वंस्तं बाधित्वा यागसाधनत्वेनापि स्वयं निविशत इति।

बिभक्षयिषेत्, इत्युपक्रमात् 'भक्षं प्रयच्छेत्' इत्युपसंहारात्तत्रैव विकारो भूत्वा सोमं बाधते, नेज्यायामपीति, पूर्वत्र होतुरिव राजन्यवैश्ययोरपि सोमभक्षापनय इति **प्राप्तम्।** तदाह सूत्रे, **नैमित्तिकः फलचमसो भक्षविकार** एव। 'भक्षं प्रयच्छेत्' इति **श्रुत्या** भक्षेणैव **संयोगा**दिति।

अनिज्यासाधनस्य भक्षरूपप्रतिपत्तिसम्बन्धायोगाद्यागद्रव्यसोमविकारः सन् फलचमसो

यागसाधनसोमद्रव्यं बाधित्वा स्वयं साधनत्वेन निविशत इति यागविकारो, न भक्षमात्रविकार इति सिद्धान्तः । तदाह सूत्रे, **इज्याविकारो वा संस्कारस्य तदर्थत्वादिति** । **फलन्तु**, यागविकारः फलचमस इति व्यक्तम् ।

इत्यष्टादशं फलचमसस्येज्याविकारताधिकरणम् (सूत्राणि ४७-५१)

अथैकोनविंशं ब्राह्मणानामेव राजन्यचमसानुसर्पणाधिकरणम् (सूत्रे ५२-५३)

अनुसर्पिषु सामान्यात् ॥ ५२ ॥

(ब्राह्मणा वा तुल्यशब्दत्वात् ॥ ५३ ॥)

राजन्यस्य सोमभक्ष इव फलचमसभक्षोऽपि क्वचिन्नास्तीतीह कथनात्सङ्गतिः । राजसूये दशपेयाख्ये सोमविकारयागे ज्योतिष्टोमाद्दश चमसाः प्राप्ताः । तत्र यजमानचमसस्य राज्ञो भक्षणं प्राप्तम् । तत्रेदं वचनम् 'दश दशैकैकं चमसमनुसर्पेयुः' इति श्रुतम् । तथा 'शतं ब्राह्मणाः सोमं भक्षयन्ति' इत्यपि श्रुतम् । उपसर्पेयुः भक्षणार्थमिति शेषः । तत्र **सन्देहः**, राजन्यचमसं राजन्या दश भक्षयेयुरुत दश ब्राह्मणा इति ।

पूर्वपक्षस्तु, 'दश दश' इति वाक्ये 'अनुसर्पेयुः' इति विधिश्रवणात्प्रतिचमसं दशसङ्ख्या विधीयत तद्वाक्यशिष्टया दशत्वसङ्ख्यया अतिदेशप्राप्तैकत्वसङ्ख्याया एव समानकार्यतया समानजातित्वेन च निवृत्तेर्न राजन्यत्वजातेर्निवृत्तिरिति राजन्या एव दश राजन्यचमसं भक्षयेयुः । 'शतं ब्राह्मणाः' इति तु वर्तमाननिर्देशतया यथाप्राप्तानुवादत्वात्, भूम्ना सृष्टिशब्दवत् ब्राह्मणाऽब्राह्मणसमुदाये ब्राह्मणशब्दो लक्षणया नीयमानोपि न दुष्यतीति । तदाह **सूत्रे**, **अनुसर्पिषु** मध्ये राजन्यचमसं राजन्या एव दश भक्षणार्थं अनुसर्पेयुः । कुतः ? **समान्यात्** समानजातित्वादिति ।

सिद्धान्तस्तु, 'शतं ब्राह्मणाः सोमं भक्षयन्ति' इत्यत्र श्रुतार्थसम्भवे लक्षणा न न्याय्या । सम्भवति च प्राप्तेषु दशसु चमसेषु भक्षणायानुसर्पतां पुंसां दश दशेति वीप्सया प्रतिचमसं दशसङ्ख्याविधानेन सिद्धां शतसङ्ख्यामनूद्य सङ्ख्येयानां सर्वेषां ब्राह्मण्यविध्यङ्गीकारे श्रुत्यर्थः । न च विध्यश्रवणदोषः । 'भक्षयन्ति' इत्यस्य लेट्त्वकल्पने 'ये शतं भक्षयेयुः ते ब्राह्मणाः' इति विधानोपपत्तेः । तस्मात् ब्राह्मणा एव सर्वत्र दश दश भक्षका इति । तदाह सूत्रे, **ब्राह्मणा वा तुल्यशब्दत्वादिति** । **ब्राह्मणा एव**

चमसं भक्षयेयुः । कुतः ? 'ब्राह्मणा भक्षयन्ति' इति शतसङ्ख्येयेषु ब्राह्मणशब्दस्य तुल्यत्वादिति । फलन्तु, सर्वत्र ब्राह्मणानां भक्षणमिति व्यक्तम् ।

इत्यकोनविंशं ब्राह्मणानामेव राजन्यचमसानुसर्पणाधिकरणम् (सूत्रे ५२-५३)

इति श्रीभाट्टसङ्ग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्यश्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते तृतीयाध्यायस्य पञ्चमः पादः ।

अस्मिन् पादे अधिकरणानि १९ सूत्राणि ५३

आदितः '' १८४ '' ५१५

अथ तृतीयाध्यायस्य षष्ठः पादः

अथ प्रथमं स्रुवादिषु खादिरतादिविधेः प्रकृतिगामिताधिकरणम् (सूत्राणि १-८)

चतुर्थपादे प्रक्रान्तानारभ्यवादविचारप्रस्तावाऽगतं शेषविषयविचारमतीतपादे समाप्याधुनाऽत्र पादे तमेवानारभ्यवादमारभत इति तदानन्तर्यमस्य पादस्य, ततो भेदश्च ज्ञेयः ।

सर्वार्थमप्रकरणात् ॥ १ ॥

(प्रकृतौ वाऽद्विरुक्तत्वात् ॥ २ ॥ तद्वर्जन्तु वचनप्राप्ते ॥ ३ ॥ दर्शनादिति चेत् ॥ ४ ॥ न चोदनैकार्थ्यात् ॥ ५ ॥ उत्पत्तिरिति चेत् ॥ ६ ॥ न तुल्यत्वात् ॥ ७ ॥ चोदनार्थकात्स्न्र्यात्तु मुख्यविप्रतिषेधात्प्रकृत्यर्थः ॥ ८ ॥)

'यस्य पर्णमयी जहूर्भवति, न स पापं श्लोकं शृणोति' इत्यनारभ्य श्रूयते । **पर्णमयीं** पलाशविकाररूपेत्यर्थः । जुहूर्नाम अरत्निप्रमाणदण्डो हंसमुखदळबिलः पलाशदारुविकृतिविशेषः । पर्णतादेः फलश्रवणेऽपि न फलार्थत्वम् । किन्तु क्रत्वव्यभिचरितजुहूपस्थितक्रत्वर्थतैव । फलश्रवणं त्वर्थवाद इत्युत्तराध्यायतृतीयपादीयाद्यनये **द्रव्यसंस्कारकर्मसु परार्थत्वात्फलश्रुतिरर्थवाद** इति वक्ष्यमाणतया पर्णतायाः क्रत्वर्थत्वे सिद्धे, किं प्रकृतिविकृतिरूपसर्वक्रत्वर्थमिदं पर्णताविधानमुत प्रकृत्यर्थमेवेति **सन्देहे,**

पूर्वपक्षस्तु, पर्णताविधेर्हि जुह्वाः प्राप्तिमात्रमपेक्षितम् । सा च प्राप्तिः प्रकृतावौपदेशिकी विकृतावादिदेशिकी । सा सर्वापि प्राप्तिः प्राप्तिरूपेण तुल्येत्युभयत्र प्राप्तजुह्वनुवादेन विधीयमानं पर्णमयत्वं सर्वार्थमिति । तदाह **सूत्रे, अप्रकरणे** समाम्नातं **सर्वार्थं** स्यादिति ।

सिद्धान्तस्तु, विकृतावतिदेशतः प्राप्तमनूद्य पर्णमयत्वं 'यस्य' इति वाक्येन विधेयम्। अतिदेशतो जुहूप्राप्तिवेलायां पर्णतापि जुह्वा सहैव प्राप्यत इति पुनस्तत्रानेन वाक्येन पर्णताविधौ द्विरुक्तिर्दोषः स्यात्। तस्मात्प्रकृतियागार्थमेव पर्णताविधिरति। एवं 'खादिरः स्रुवो भवति' इत्यादावपि ध्येयम्। तदाह **सूत्रे, प्रकृतौ वाऽद्विरुक्तत्वादिति। प्रकृतावेव** पर्णताविधिः, न विकृतावपि। **कुतः? अद्विरुक्तत्वात्**। अन्यथा हि द्विरुक्तता स्यादिति।

फलन्तु, गुणफलानामुपदिष्टमात्रविषयत्वाद्विकृतिष्वपि प्रवृत्तिः **पूर्वपक्षे। सिद्धान्ते तु** 'गोदोहेन पशुकामस्य' इत्यादौ गोदोहनादिगुणकर्मफलस्येव प्रकृतावेव निवेश इति ज्ञेयम्।

इति प्रथमं स्रुवादिषु खादिरतादिविधेः प्रकृतिगामिताधिकरणम् (सूत्राणि १-८)

अथ द्वितीयं सामिधेनीनां सप्तदशसङ्ख्याया विकृतिगामिताधिकरणम्

प्रकरणविशेषात्तु विकृतौ तद्विरोधि स्यात्॥ ९॥

अत्र पूर्वन्यायेन शङ्कनात्सङ्गतिः। 'सप्तदश सामिधेनीरनुब्रूयात्' इत्यनारभ्य श्रुतम्। 'प्र वोवाजा अभिद्यव' इत्याद्या अग्निसमिन्धनार्था ऋचः **सामिधेन्यः**। तासां साप्तदश्यं किं प्रकृतौ निविशते उत विकृताविति **सन्देहः**।

पूर्वत्र पर्णमयत्वादिकमिव प्रकृतावेव साप्तदश्यं निविशते। न विकृतौ। न च 'पञ्चदश सामिधेनीरनुब्रूयात्' इति प्राकरणिकपाञ्चदश्यविरोधः शङ्क्यः। साप्तदश्यपाञ्चदश्ययोर्वाक्यात्सामिधेनीसम्बन्धस्य क्रत्वविनाभूतसामिधेन्युपस्थितक्रत्वपूर्वसम्बन्धस्य चाविशेषेण वाक्यप्रकरणयोस्तुल्यबलत्वाद्द्वयोर्विकल्प इति **पूर्वः पक्षः**।

सिद्धान्तस्तु, स्यादेवं, यदि द्वयोरपि सङ्ख्ययोरपूर्वीयता वाक्यबलात्स्यात्। न चैवमस्ति। वाक्याद्धि तयोः सामिधेनीस्वरूपमात्रसम्बन्धोऽवगम्यते। पश्चात्तु तन्मात्रसम्बन्धे सङ्ख्ययोरानर्थक्यात्सामिधेनीपदलक्षितापूर्वार्थताकारसम्बन्धोऽर्थादवगम्यते। तदाकारसम्बन्धे वाक्यप्रकरणयोर्न तुल्यता। पाञ्चदश्यस्य कैमर्थ्याकांक्षायां प्रकरणात्स्वत एवापूर्वोपस्थितेः फलवदफलन्यायेन शीघ्रं तादर्थ्यं ज्ञायते। तन्निर्वाहाय सामिधेनीपदेन तत्साधनत्वाकारलक्षणा झडिति भविनी। साप्तदश्यस्य तु कैमर्थ्याकांक्षायामविनाभावसम्बन्धस्मृतिपूर्वं कथञ्चित्सामधेनीपदेनापूर्वोपस्थितिर्विलम्बितेति तादर्थ्यकल्पना तन्निर्वाहाय पुनः सामिधेनीपदेन तादृशाकारलक्षणा चाऽतिविलम्बितेति क्रत्वपूर्वप्रत्यासत्तेः पाञ्चदश्यमेव बलीय

इति, पूर्वनिविष्टपाञ्चदश्यावरुद्धायां तेनैव निराकांक्षायां प्रकृतौ निवेशमलभमानं साप्तदश्यं श्रुतसाप्तदश्यासु मित्रविन्दादिविकृतिषु निविशत इति। तत्र निवेशनकृत्यन्तु दशमान्त्यपादे **अप्रकरणे त्विति** नवमाधिकरणे वक्ष्यते। तदाह **सूत्रे, प्रकरणविशेषात्** पाञ्चदश्यमेव प्रकृत्यन्वयि। **तद्विरोधि तु** साप्तदश्यं **विकृतौ स्यादि**ति। **फलन्तु**, विकृतावेव निवेशः साप्तदश्यस्येति न प्रकृतौ विकल्प इति व्यक्तम्।

इति द्वितीयं सामिधेनीनां सप्तदशसङ्ख्याया विकृतिगामित्वाधिकरणम्

अथ तृतीयं नैमित्तिकसाप्तदश्यस्य प्रकृतिगामिताधिकरणम्

नैमित्तिकन्तु प्रकृतौ तद्विकारः संयोगविशेषात् ॥ १० ॥

अत्राप्यापवादिकी **सङ्गतिः**। 'सप्तदश वैश्यस्य' इति विहितं वैश्यनिमित्तकं साप्तदश्यं किं प्रकृतावुत श्रुतसाप्तदश्यायां विकृतौ निविशत इति **सन्देहे**, प्रकृतौ पाञ्चदश्यावरुद्धायां निवेशमलभमानं पूर्वन्यायेनौपदेशिकसाप्तदश्यवत्यां विकृतावुत्कर्षे द्वयोः प्रकरणाधीतत्वात्क्रत्वर्थत्वाविशेषाद्विकल्प इति **प्राप्ते,**

नैमित्तिकेनानेन वचनेन प्रकृतिगतस्य नित्यस्य पाञ्चदश्यस्य वैश्यव्यतिरिक्तविषयतया सङ्कोचनीयत्वान्नित्यं सामान्यरूपतया सावकाशत्वेन च दुर्बलम्। नैमित्तिकन्तु विशेषरूपत्वनिरवकाशत्वाभ्यां प्रबलम्। तस्माद्वैश्यनिमित्तकं साप्तदश्यं प्रकृतावववतिष्ठत इति **सिद्धान्तः**। तथा च **सूत्रम्, नैमित्तिकन्तु प्रकृतावेव, तस्य** नित्यस्य **विकारः**। कुतः ? संयोगविशेषात् निमित्तसंयोगेन विशेषविधानादिति। **फलन्तु,** प्राकृतपाञ्चदश्यबाधेन साप्तदश्यानुवचनमिति व्यक्तम्।

इति तृतीयं नैमित्तिकसाप्तदश्यस्य प्रकृतिगामिताधिकरणम्

अथ चतुर्थमाधानस्य पवमानेष्टयनङ्गताधिकरणम् (सूत्राणि ११-१३)

भाष्यकारीयं वर्णकम्

इष्ट्यर्थमग्न्याधेयं प्रकरणात् ॥ ११ ॥

(न वा तासां तदर्थत्वात् ॥ १२ ॥ लिङ्गदर्शनाच्च ॥ १३ ॥)

एवं पूर्वत्र क्रत्वर्थपदार्थोद्देशेनानारभ्य विहितानामुत्सर्गतः प्रकृतिगामित्वमपवादे विकृतिगामित्वमित्युक्तौ तत्प्रसङ्गादिहाऽधानस्यानारभ्यवादत्वसिद्ध्ये पवमानेष्टचङ्गत्वं तावदाशङ्क्या निरस्यत इति **सङ्गतिः**। एवं **श्रूयते** 'अग्नये पवमानाय पुरोडाशमष्टादशकपालं निर्वपेत्, अग्नये पावकाय, अग्नये शुचये' इति। तथा 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इति च। तत्र किमाधानं पवमानादीष्टचङ्गमुत नेति **सन्देहे,** दर्शपूर्णमासविकृतिषु पवमानादीष्टिषु चोदकप्राप्तानामाहवनीयाद्यग्नीनामिष्टचङ्गत्वे सति तत्संस्काररूपस्याऽधानस्यापि तदङ्गतावश्यम्भावात् विश्वजिन्न्यायेन स्वर्गफलकपवमानादीष्टचङ्गमाधानमिति **प्राप्तम्**। तदाह **सूत्रे, अग्न्याधेयं** अग्न्याधानं **प्रकरणादिष्टचर्थमिति**।

सिद्धान्तस्तु, आधानस्येष्टचङ्गत्वे तासामश्रुतफलत्वेन विश्वजिन्न्यायेन फलकल्पनाप्रसङ्गात् 'आहवनीये जुहोति' इत्येतत्प्रकरणगतवाक्ये सप्तम्या लक्षणया साध्यत्वावगमेन, तथा 'जीर्यति ह वा एष आहितोयमग्निः, तदेतान्यग्न्याधेयस्य हवींषि संवत्सरे संवत्सरे निर्वपेत्, तेनैव न जीर्यते, तेन चैनं पुनर्नवं करोति' इति वचने 'पुनर्नवं करोति' इत्यग्निसंस्कारार्थतोक्त्या चेष्टीनामग्न्यर्थत्वादाधानस्यापि श्रुत्या अग्न्यर्थत्वेनोभयोः फलवदग्निहोत्रार्थत्वेन फलवन्तो ये अग्नयः तदर्थतया अन्योन्याङ्गाङ्गिभावायोगान्नेष्टचङ्गमाधानमिति, अनारभ्यवादत्वमेवाऽधानस्येति।

वार्तिककारीयं वर्णकम्

वार्तिककारस्तु 'आहवनीये जुहोति' इति प्राकरणिकवाक्यकल्पनां मन्यमानो वचने 'अग्न्याधेयस्य हवींषि निर्वपेत्' इत्युक्त्या आधानार्थतावगमात् अग्निहोत्रादिफलवत्क्रत्वङ्गाग्न्यर्थत्वेनाऽधानस्य फलवत्त्वेन फलवदफलन्यायेनाऽधानाङ्गत्वमिष्टीनाम्। एवं विश्वजिन्न्यायेन फलकल्पनं नेति मन्यत इति ज्ञेयम्। तथा च **सूत्रम्, न वा तासां तदर्थत्वादिति। नेष्टचङ्गमाधानम्।** इष्टीनामग्न्यर्थत्वादाधानार्थत्वादिति वाऽर्थः।

फलन्तु, प्रागुक्तवचनाद्यदा। संवत्सरे संवत्सरे पवमानहवींषि निरुप्यन्ते तदा आधानमपि कार्यं **पूर्वपक्षे। सिद्धान्ते** तु नेति।

इति चतुर्थमाधानस्य पवमानेष्टचनङ्गताधिकरणम् (सूत्राणि ११-१३)

अथ पञ्चममाधानस्य सर्वार्थताधिकरणम् (सूत्रे १४-१५)

तत्प्रकृत्यर्थं यथाऽन्येऽनारभ्यवादाः ॥ १४ ॥

(सर्वार्थं वाऽधानस्य स्वकालत्वात् ॥ १५ ॥)

पूर्ववैषम्येण शङ्कनात्सङ्गतिः । पूर्वोक्तरीत्या सिद्धानारभ्यवादरूपमाधानं दर्शादिप्रकृतिभूतक्रत्वङ्गमुताग्निमात्रार्थमिति **सन्देहे,** पूर्वत्रेष्टीनामफलत्वेनाऽधानस्यातादर्थ्येऽपीह दर्शपूर्णमाससोमाग्निहोत्ररूपप्रकृतियागानां फलवत्त्वात्तदर्थाहवनीयोद्देशेन विधीयमानमाधानं जुहूद्देशेन विधीयमानपर्णमयीत्वं जुहूद्वारा क्रत्वर्थमिवाग्निद्वारा दर्शादिप्रकृत्यर्थमस्तीति **प्राप्तम्** । तदाह **सूत्रे, तत्** आधानं **प्रकृत्यर्थम्** । **यथा** जुहूद्देशेन विधीयमानाः पर्णतादयो**ऽनारभ्यवादास्त**थेति ।

सिद्धान्तस्तु, जुह्वाकारोऽरत्निमात्रदीर्घहंसमुखबिलत्वादिरूपः । विनापि पर्णमयीत्वेन तदाकारो लौकिकोपि शक्य इति तत्स्वरूपमात्रोद्देशेन पर्णमयीत्वविधाने विध्यानर्थक्यप्रसङ्गात् 'जुह्वा जुहोति' इति प्रसिद्धक्रतुसम्बन्धित्वरूपलक्षिताऽकारेण जुहूमुद्दिश्य पर्णताविधानात्तद्द्वारा क्रत्वर्थता । तत्रापि विकृत्यर्थत्वे प्रागुक्तदिशा द्विरुक्तिदोषापातेन प्रकृत्यर्थता पर्णमयीत्वस्य युक्ता । इह तु 'यदाहवनीये जुहोति' इति क्रतुसम्बन्धश्रवणेप्याहवनीयादिस्वरूपस्य दृष्टत्वात्तत्स्वरूपानुवादेनाऽधानविधानाऽनर्थक्याभावात्, आधानवाक्यप्रवृत्तेः प्राक्रतुसम्बन्धप्रसिद्ध्यभावाच्च क्रतुसम्बन्धित्वाकारेणाग्नीनामुद्देश्यत्वस्यानावश्यकत्वान्न प्रकृतिभूतदर्शाद्यङ्गाग्निद्वारा क्रत्वर्थत्वमाधानस्येत्यग्न्यर्थत्वमेव । तथा पवमानेष्टीनामप्यग्न्यर्थत्वमेव । न प्रकृतिभूतक्रत्वर्थत्वं ज्ञेयम् । तदाह **सूत्रे, सर्वार्थं वाऽधानस्य स्वकालत्वादि**ति । सर्वपदेन सर्वकार्यार्थाग्निग्रहः । **तदर्थ**माधानम् । कुतः ? **आधानस्य** वसन्तादिवाक्यविहितस्वकालत्वात् । क्रत्वङ्गत्वे क्रतुकालत्वप्राप्त्या कालविधिवचनमयुक्तं स्यादिति । **फलन्तु,** आधानस्याग्न्यर्थत्वेनाक्रत्वङ्गत्वान्न दर्शपूर्णमासाद्यनुष्ठानकालेऽनुष्ठेयता । किन्तु स्वकाल एवेति ।

इति पञ्चममाधानस्य सर्वार्थताधिकरणम् (सूत्रे १४-१५)

अथ षष्ठं पवमानेष्टीनामसंस्कृतेऽग्नौ कर्तव्यताधिकरणम् (सूत्रे १६-१७)

तासामग्निः प्रकृतितः प्रयाजवत् ॥ १६ ॥

(न वा तासां तदर्थत्वात् ॥ १७ ॥)

पवमानेष्टीनां प्रकृतिभूतक्रत्वर्थत्वाभावेऽपि विकृतिभूतपवमानादीष्ट्यर्थत्वं स्यादिति शङ्कनात्सङ्गतिः । किं पवमानेष्टिसंस्कृतेऽग्नौ पवमानेष्टयः कार्या उत तदसंस्कृतेऽग्नाविति **सन्देहः** ।

पूर्वपक्षस्तु, पवमानेष्टीनां दर्शपूर्णमासविकृतित्वाच्चोदकेन प्राकृतपवमानेष्टिसंस्कृताग्नीनां प्राप्तौ तत्संस्कारकेष्टीनामप्यत्र प्राप्तेः इष्टित्वहेतुना दर्शादीष्टिदृष्टान्तेनेष्टिसंस्कृताग्नावनुष्ठातव्यतानुमानाच्च संस्कृताग्नावेवेष्टयः कार्याः । न चैवमनवस्था । 'यस्मिन्नहनि यावतीरिष्टिः कर्तुं शक्नुयात्तावतीः कुर्यात्' इति शक्तिवशेन व्यवस्थोपपत्तेरिति । तथा च **सूत्रम्, तासामिष्टीनामग्निः प्रयाजवत्प्रकृतितश्चोदकात्प्राप्नोति** । अतस्तास्वप्यग्निसिद्ध्यर्थं ताः कार्या इति ।

सिद्धान्तस्तु, कर्मणस्त्वप्रवृत्तत्वादित्यष्टमाद्यपादीयद्वादशेऽधिकरणे 'अङ्गानामेवातिदेशः । न त्वर्थात्प्रकृतिसम्बद्धानामाग्नेयादित्रिकसाहित्यादीनाम्' इति वक्ष्यमाणत्वात्, इष्टीनाञ्च पूर्वोक्तदिशा प्रकृतावनङ्गत्वान्नास्त्यतिदेश इत्यसंस्कृताग्नावेव ता अनुष्ठेयाः । एवं सति नानवस्थादोषोपि । तथा हि **सूत्रम् ॥ न वा तासां तदर्थत्वादिति ॥ तासां अग्न्यर्थत्वात्** क्रत्वनङ्गत्वेनातिदेशाप्राप्तेर्नानुष्ठेयास्ताः पवमानेष्टिष्विति । **फलन्तु** पवमानेष्टिषु तासामननुष्ठानं व्यक्तम् ।

इति षष्ठं पवमानेष्टीनामसंस्कृतेऽग्नौ कर्तव्यताधिकरणम् (सूत्रे १६-१७)

अथ सप्तममुपाकरणादीनामग्नीषोमीयधर्मताधिकरणम् (सूत्राणि १८-२७)

तुल्यः सर्वेषां पशुविधिः प्रकरणाविशेषात् ॥ १८ ॥

(स्थानाच्च पूर्वस्य ॥ १९ ॥ श्वस्त्वेकेषां तत्र प्राक्श्रुतिर्गुणार्था ॥ २० ॥ तेनोत्कृष्टस्य कालविधिरिति चेत् ॥ २१ ॥ नैकदेशत्वात् ॥ २२ ॥ अर्थेनेति चेत् ॥ २३ ॥ न श्रुतिविप्रतिषेधात् ॥ २४ ॥ स्थानाद्वा पूर्वस्य संस्कारस्य तदर्थत्वात् ॥ २५ ॥ लिङ्गदर्शनाच्च ॥ २६ ॥ अचोदना गुणार्थेन ॥ २७ ॥)

एवं **अहिनो वा प्रकरणादिति** तृतीयपादीयद्वादशेऽधिकरणे प्रकान्तां प्रकरणस्य श्रुतिलिङ्गवाक्यविरोधभावाभावचिन्तां समाप्येदानीं स्थानस्य श्रुत्यादिविरोधभावाभावचिन्ता चतुर्भिर्नयैः प्रस्तूयत इति **सङ्गतिः** । ज्योतिष्टोमे अग्निष्टोमसंस्थाके त्रयः पशव आम्नाता अग्नीषोमीयः सवनीयोऽनुबन्ध्यश्चेति । तथा पशुधर्मा यूपछेदनोपाकरणपर्यग्निकरणादयः । 'प्रजापतेर्जायमानाः' 'इमं पशुम्' इत्याभ्यामृग्भ्यां पशोरुपस्पर्शन**मुपाकरणम्** । ज्वालया त्रिः प्रदक्षिणीकरणं **पर्यग्निकरणम्** । तत्र किमेते पशुधर्मास्त्रयाणां पशूनां साधारण्येन विधीयन्ते, अथ सवनीयस्यैव, सवनीयाग्नीषोमीययोर्वा अग्नीषोमीयस्यैव वेति **चतुर्धा सन्देहे,**

पूर्वपक्षस्तु, ज्योतिष्टोमप्रकरणे पठितानां पशुधर्माणां प्रकरणेन ज्योतिष्टोमाङ्गत्वे प्राप्ते सोमद्रव्यके तत्र पशुधर्माणामानर्थक्येनाङ्गावतारन्यायेन ज्योतिष्टोमाङ्गपशुयागेऽवतारात्पशूनाञ्च प्राकरणिकत्वाविशेषात्सर्वपशुसाधारण्येनायं धर्मविधिरित्येकः। तदाह **सूत्रे, तुल्यः सर्वेषामित्यादि। व्यक्तोऽर्थः।** स्यादेवम्, यदि प्रकरणाविशेषः स्यात्। न चैवम्। यस्मिन्नहनि पशुधर्माः कर्तव्यतयाऽऽम्नातास्तत्रैव 'आग्नेयः पशुरग्निष्टोमः' इति सवनीयस्य पाठेनावान्तरप्रकरणबलेन सवनीयस्यैवेते पशुधर्मा इति **द्वितीयः।** अस्मिन्नेव पक्षे 'तुल्यः' इति सूत्रम्। **पशुविधिः सर्वेषां तुल्यः स्यात्। यदि प्रकरणाविशेषः स्यात्।** अस्ति प्रकरणविशेषः सवनीयस्येति योजयन्ति। प्राकरणिकेन सवनीयार्थेन निराकांक्षा अपि पशुधर्मा अग्नीषोमीयस्य पशुधर्मापेक्षित्वादन्यतराकांक्षया सन्निधिरूपस्थानप्रमाणेनाग्नीषोमीयस्यापि भवन्तीत्युभयार्थाः पशुधर्माः। अनुबन्ध्यस्य त्ववभृथान्तेऽनुष्ठेयत्वेन तद्धर्मत्वशङ्कानवकाश इति **तृतीयः।** तदाह **सूत्रे, स्थानाद्वा पूर्वस्येति।** सन्निधिरूपस्थानप्रमाणात् **पूर्वस्य** सुत्यादिनात्पूर्वदिनेऽनुष्ठीयमानस्याग्नीषोमीयस्यापि धर्मा इति।

सिद्धान्तस्तु, स्यादेवं यदि पशुधर्मोक्तिस्थले सवनीयस्य विधिः स्यात्तदाऽवान्तरप्रकरणेन तदर्थता धर्माणाम्। न चैवम्। 'आश्विनं ग्रहं गृहीत्वा, त्रिवृता यूपं परिवीय, आग्नेयं सवनीयं पशुमुपाकरोति' इति सुत्येऽहनि सवनीयपशोर्विधानम्। यत्र विधिस्तत्रैव तस्य प्रकरणम्। पशुधर्मविधिस्थले 'आग्नेयः सवनीयः पशुरग्निष्टोमः' इति तस्य सवनीयस्य श्रवणन्तु 'प्रातःसवने वपया प्रचरन्ति, पुरेडाशेन माध्यन्दिने, अङ्गैस्तृतीयसवने' इति वपाप्रचारविप्रकर्षगुणविध्यर्थमेव। न तु सवनीयपशुविध्यर्थमिति आनर्थक्यप्रतिहतज्योतिष्टोमप्रकरणबाधेन सन्निधिरूपस्थानप्रकरणादग्नीषोमीयार्थाः पशुधर्मा इति। अन्यत्र तु चोदकेन प्रापणीया इति। **फलं, पूर्वपक्षे** पशुपुरोडाशस्याग्नीषोमदैवत्यत्वादाग्नेये सवनीयेऽननुष्ठानम्। **सिद्धान्ते तु** दैक्षविकृतित्वादतिदेशतः प्राप्तेरूहेनानुष्ठानमिति।

इति सप्तममुपाकरणादीनामग्नीषोमीयधर्मताधिकरणम् (सूत्राणि १८-२७)

अथाष्टमं शाखाहरणादीनामुभयदोहधर्मताधिकरणम् (सूत्रे २८-२९)

दोहयोः कालभेदादसंयुक्तं शृतं स्यात्॥ २८॥

(प्रकरणाविभागाद्वा तत्संयुक्तस्य कालशास्त्रम्॥ २९॥)

अत्र पूर्वन्यायेन शङ्कनात्सङ्गतिः। दर्शपूर्णमासप्रकरणे पलाशशाखाछेदनं तया वत्सापाकरण-

मित्यादयो दोहधर्माः पठिताः । दोहौ द्वौ स्तः । पूर्वेद्यू रात्रावेको दोहः । परेद्युः प्रातरन्यः । दोहधर्माः पूर्वेद्युरनुष्ठीयन्ते । ते किं सायंदोहार्था उतोभयार्था इति **सन्देहे** पूर्वत्रैवानुष्ठानसादेश्यादवान्तरप्रकरणाद्वा सायंदोहार्था इति **प्राप्तम्** । तदाह **सूत्रे, दोहयोः कालभेदात्** प्रातर्दोहस्य न स्थानमिति **शृतं** पयः **धर्मैरसंयुक्तं स्यादिति** ।

सिद्धान्तस्तु, पूर्वत्र पशुधर्माणां महाप्रकरणिना सोमयागेनान्वये आनर्थक्यात्स्थानप्रमाणेनाग्नीषोमीयपश्वर्थत्वमुक्तम् । न ह्यत्र महाप्रकरणेनाऽन्वये स दोषोस्ति । अतो दर्शपूर्णमासप्रकरणेन गृहीता दोहधर्माः प्रकरणाविशेषात्स्थानबाधेनोभयार्थाः । स्थानमपि सायंदोहस्य नास्ति । परेद्युर्हि 'ऐन्द्रं दध्यमावास्यायां, ऐन्द्रं पयोऽमावास्यायां' इति द्वयोर्दोहयोरनुष्ठानम् । पूर्वेद्युः शाखाहरणादिदोहधर्मानुष्ठानमिति पाठानुष्ठानसादेश्याभावादिति ।

फलन्तु, पूर्वपक्षे पयोयागार्थं वत्सापाकरणं न शाखया । **सिद्धान्ते तु,** शाखयैवेति । न चातिदेशतः शाखाहरणादिप्राप्तिः पयोयागे शङ्क्या । द्वयोरपि प्रकृतित्वेन प्रकृतिविकृतिभावाभावात् ।

इत्यष्टमं शाखाहरणादीनामुभयदोहधर्मताधिकरणम् (सूत्रे २८-२९)

अथ नवमं सादनादीनां सवनत्रयधर्मताधिकरणम्

तद्वत्सवनान्तरे ग्रहाम्नानम् ॥ ३० ॥

अत्र पूर्ववैषम्येण शङ्कनात्सङ्गतिः । ज्योतिष्टोमे प्रातःसवने सन्त्यैन्द्रवायवादयो दश ग्रहाः । माध्यन्दिने मरुत्वतीयादयः । तृतीयसवने आदित्यादयः । तत्र सादनसम्मार्गादयो ग्रहधर्माः प्रातःसवनीयग्रहसन्निधावाम्नाता 'उपोप्तेऽन्ये ग्रहाः साद्यन्ते, अनुपोप्ते ध्रुवाः' इति 'दशापवित्रेण ग्रहं सम्मार्ष्टि' इति च । **उपोप्ते** इत्यस्य सिकतापरिष्कृते स्थल इत्यर्थः । ते किं ग्रहधर्माः प्रातःसावनिकग्रहार्था उत सवनत्रयगतसर्वग्रहार्थो इति **सन्देहः** ।

युक्तं पूर्वत्र दोहधर्माणां दधियागमात्रार्थत्वे सन्निध्यभावेन उभयार्थत्वम् । इह तु ऐन्द्रवायवादिग्रहाणां प्रातस्सवन एवानुष्ठानेन तेषामनुष्ठानसादेश्यरूपस्थानप्रमाणसत्त्वादन्येषां अन्यदाऽनुष्ठानेन तदभावादैन्द्रवायवादीनामेव ते धर्मा इति **प्राप्ते,**

सिद्धान्तः, सादनादीनां वाक्येन ग्रहधर्मत्वं प्रकरणेन ज्योतिष्टोमधर्मत्वञ्चावगम्यत इति प्रबलाभ्यांवाक्यप्रकरणाभ्यां स्थानं बाधित्वा त्रिषु सवनेषु सादनादयोऽवतिष्ठन्त इति सर्वार्था इति ।

तदाह **सूत्रे, सवनान्तरे** माध्यन्दिनसवनादौ **ग्रहाम्नानमपि तद्वत्प्रातर्दोहवत्प्रकरणाविशेषात्** सर्वधर्मकमिति। **फलन्तु,** सवनान्तरग्रहाणामपि धर्मवत्तेति व्यक्तम्।

इति नवमं सादनादीनां सवनत्रयधर्मताधिकरणम्

अथ दशमं रशनात्रिवृत्त्वादीनां सर्वपशुधर्मताधिकरणम्

रशना च लिङ्गदर्शनात् ॥ ३१ ॥

अत्रापि पूर्ववैषम्येण शङ्कनात्सङ्गतिः। अग्नीषोमीयपशुसन्निधौ 'परिव्ययति, ऊर्ग्वै रशना' इति 'त्रिवृद्भवति' इति 'दर्भमयी भवति' इत्यादिना रशनया यूपस्य परिवेष्टनं, रशनायास्त्रिवृत्त्वं, दर्भमयत्वञ्चेत्यादयो धर्मा उक्ताः। ते किं परिव्याणसाधनरशना तद्धर्माश्चाग्नीषोमीयपरिव्याणार्थाः सवनीयपरिव्याणार्था अपीति **सन्देहः**।

युक्तः पूर्वत्र ग्रहधर्माणामैन्द्रवायवमात्रार्थत्वाभावः। वाक्येन सर्वग्रहार्थत्वात्प्रकरणेन स्थानबाधात्। इह तु परिव्याणस्वरूपमात्रार्थत्वे रशनादीनामानर्थक्यादबाधितसन्निधिरूपस्थानप्रकरणादवान्तरप्रकरणाद्वा अग्नीषोमीयार्थयूपार्थपरिव्याणार्था रशना तद्धर्माश्चेति **प्राप्ते**

सिद्धान्तः, 'आश्विनं ग्रहं गृहीत्वा, त्रिवृता यूपं परिवीय, आग्नेयं सवनीयं पशुमुपाकरोति' इति सवनीयेपि परिव्याणश्रवणात्, तत्र च त्रिवृत्त्वानुवादलिङ्गबलात्, तथा 'अग्नीषोमीयपशुसम्बन्धी यो यूपस्तत्सम्बन्धि यत्परिव्याणं तदर्था रशना तद्धर्माश्च' इत्युक्तावपि रशनादीनामनानर्थक्येन 'अग्नीषोमीयार्थो यो यूपस्तदर्थं यत्परिव्याणं तदर्था रशनादयः' इत्यकल्प्यत्वात्, यूपश्च पशुत्रयस्यापि तन्त्रमिति वक्ष्यमाणत्वेन अग्नीषोमीयपशुसम्बन्धियूपसम्बन्धि सवनीयपरिव्याणमपि भवतीति श्रुत्या तदर्था अपि रशना तद्धर्माश्चेति। तदाह **सूत्रे, रशना** सवनीयपरिव्याणार्थापि स्यात्। कुतः? 'आश्विनम्' इत्यादिसवनीयोत्पत्तिवाक्ये सवनीयपरिव्याणसाधने 'त्रिवृता' इति त्रिवृत्त्वानुवादरूपलिङ्ग**दर्शनादिति**। **फलन्तु** सवनीयपरिव्याणे रशनादीनामौपदेशिकी प्राप्तिरिति व्यक्तम्।

इति दशमं रशनात्रिवृत्त्वादीनां सर्वपशुधर्मताधिकरणम्

अथैकादशमंऽश्वदाभ्ययोरपि सादनादिधर्मवत्त्वाधिकरणम् (सूत्राणि ३२-३४)

आराच्छिष्टमसंयुक्तमितरैः सन्निधानात् ॥ ३२ ॥

(संयुक्तं वा तदर्थत्वाच्छेषस्य तन्निमित्तत्वात् ॥३३॥ निर्देशाद्व्यवतिष्ठेत ॥३४॥)

अतः परं वाक्यप्रकरणयोर्विरोधभावाभावाचिन्ता प्रसङ्गात्प्रस्तूयते। **तद्वत्सवनान्तर** इति सूत्रे ग्रहधर्माणां सवनत्रयगतग्रहसाधारण्यमुक्तम्। ते किं 'अंशुं गृह्णाति,' 'अदाभ्यं गृह्णाति' इति अनारभ्य श्रुतयोरंश्वदाभ्यसंज्ञकयोर्ग्रहयोरपि सम्भवन्त्युत नेति **सन्देहः**।

ज्योतिष्टोमप्रकरणवशेन प्राकरणिकानामेव ते धर्माः। न त्वंश्वदाभ्ययोरपि। **असन्निधानादिति प्राप्तम्**। तथा च **सूत्रम्**, ग्रहधर्माणा**मितरैः** प्रकरणाधीतैरेव **सन्निधानादाराच्छिष्टमनारभ्याधीतं तैरसंयुक्तं** स्यादिति।

सिद्धान्तस्तु, ऐन्द्रवायवादिग्रहाणामफलत्वेनाऽङ्गकाङ्क्षावैधुर्येण प्रकरणाभावात्सोमप्रकरणे पाठेन पाठसादेश्ये सत्यपि भिन्नभिन्नग्रहस्वरूपानुवादेन सादनसम्मार्गादिधर्मविधाने वैयर्थ्यप्रसङ्गेन ज्योतिष्टोमापूर्वसाधनत्वाकारेणोद्देश्यत्वात्, तादृशाकारश्चानारभ्याधीतसाधारण इति तेन रूपेण ग्रहानुद्दिश्य सादनादि विदधता 'उपोप्तेऽन्ये ग्रहाः साद्यन्ते' इत्यादिवाक्येनाप्राकरणिकयोस्तयोरप्यमी धर्माः स्युरिति। तदाह **सूत्रे, संयुक्तंवा तदर्थत्वाच्छेषस्य तन्निमित्तत्वादिति**। अनारभ्याधीतमपि सादनादि ग्रहधर्मैः **संयुक्तं** स्यात्। कुतः ? तस्यापि **तदर्थत्वात्** ज्योतिष्टोमार्थत्वात्, तच्छेषत्वस्य ग्रहनिमित्तत्वादिति। **फलन्तु,** अंश्वदाभ्ययोरपि सादनाद्यनुष्ठानम्।

इत्येकादशमंश्वदाभ्ययोरपि सादनादिधर्मवत्त्वाधिकरणम् (सूत्राणि ३२-३४)

अथ द्वादशं चित्रिण्यादीष्टकानामग्न्यङ्गताधिकरणम्

अग्न्यङ्गमप्रकरणे तद्वत् ॥ ३५ ॥

आतिदेशिकी **सङ्गतिः**। अनारभ्य श्रूयते 'चित्रीणीरुपदधाति' 'वज्रिणीरुपदधाति' इत्यादि। अग्निप्रकरणे च 'अखण्डा अकृष्णाः कुर्यात्' इतीष्टकानां धर्मा उक्ताः। ते किं प्राकरिणिकीनां धर्मा उतानारभ्याधीतानां चित्रिणीसंज्ञकानामपीति **सन्देहः**।

अंश्वदाभ्ययोरुत्पत्तिवाक्यस्यानारभ्याधीतत्वेऽपि **'अद्रव्यत्वात्केवले'** इति पूर्वाध्यायतृतीयपादोक्त दिशा विनियोजकवाक्यस्य प्राकरणिकत्वात् ग्रहधर्मवत्त्वं तयोरुक्तम्। अत्र तु चित्रिण्यादिनामकेष्टका-विशेषाणां विनियोजकवाक्यमपि न प्राकरणिकमस्ति। अतो न तद्धर्मवत्त्वं तासामिति **विशेषाशङ्कायां**

(संयुक्तं वा तदर्थत्वाच्छेषस्य तन्निमित्तत्वात् ॥३३॥ निर्देशाद्व्यवतिष्ठेत ॥३४॥)

अतः परं वाक्यप्रकरणयोर्विरोधभावाभावाचिन्ता प्रसङ्गात्प्रस्तूयते । **तद्वत्सवनान्तर इति सूत्रे** ग्रहधर्माणां सवनत्रयगतग्रहसाधारण्यमुक्तम् । ते किं 'अंशुं गृह्णाति,' 'अदाभ्यं गृह्णाति' इति अनारभ्य श्रुतयोरंश्वदाभ्यसंज्ञकयोर्ग्रहयोरपि सम्भवन्त्युत नेति **सन्देहः** ।

ज्योतिष्टोमप्रकरणवशेन प्राकरणिकानामेव ते धर्माः । न त्वंश्वदाभ्ययोरपि । **असन्निधानादिति प्राप्तम्** । तथा च **सूत्रम्,** ग्रहधर्माणा**मितरैः** प्रकरणाधीतैरेव **सन्निधानादाराच्छिष्टमनारभ्याधीतं तैरसंयुक्तं** स्यादिति ।

सिद्धान्तस्तु, ऐन्द्रवायवादिग्रहाणामफलत्वेनाऽङ्गकाङ्क्षावैधुर्येण प्रकरणाभावात्सोमप्रकरणे पाठेन पाठसादेश्ये सत्यपि भिन्नभिन्नग्रहस्वरूपानुवादेन सादनसम्मार्गादिधर्मविधाने वैयर्थ्यप्रसङ्गेन ज्योतिष्टोमापूर्वसाधनत्वाकारेणोद्देश्यत्वात्, तादृशाकारश्चानारभ्याधीतसाधारण इति तेन रूपेण ग्रहानुद्दिश्य सादनादि विदधता 'उपोप्तेऽन्ये ग्रहाः साद्यन्ते' इत्यादिवाक्येनाप्राकरणिकयोस्तयोरप्यमी धर्माः स्युरिति । तदाह **सूत्रे, संयुक्तंवा तदर्थत्वाच्छेषस्य तन्निमित्तत्वादिति** । अनारभ्याधीतमपि सादनादि ग्रहधर्मैः **संयुक्तं** स्यात् । कुतः ? तस्यापि **तदर्थत्वात्** ज्योतिष्टोमार्थत्वात्, तच्छेषत्वस्य ग्रहनिमित्तत्वादिति । **फलन्तु,** अंश्वदाभ्ययोरपि सादनाद्यनुष्ठानम् ।

इत्येकादशमंश्वदाभ्ययोरपि सादनादिधर्मवत्त्वाधिकरणम् (सूत्राणि ३२-३४)

अथ द्वादशं चित्रिण्यादीष्टकानामग्न्यङ्गताधिकरणम्

अग्न्यङ्गमप्रकरणे तद्वत् ॥ ३५ ॥

आतिदेशिकी **सङ्गतिः** । अनारभ्य श्रूयते 'चित्रीणीरुपदधाति' 'वज्रिणीरुपदधाति' इत्यादि । अग्निप्रकरणे च 'अखण्डा अकृष्णाः कुर्यात्' इतीष्टकानां धर्मा उक्ताः । ते किं प्राकरिणिकीनां धर्मा उतानारभ्याधीतानां चित्रिणीसंज्ञकानामपीति **सन्देहः** ।

अंश्वदाभ्ययोरुत्पत्तिवाक्यस्यानारभ्याधीतत्वेऽपि **'अद्रव्यत्वात्केवले'** इति पूर्वाध्यायतृतीयपादोक्त दिशा विनियोजकवाक्यस्य प्राकरणिकत्वात् ग्रहधर्मवत्त्वं तयोरुक्तम् । अत्र तु चित्रिण्यादिनामकेष्टका-विशेषाणां विनियोजकवाक्यमपि न प्राकरणिकमस्ति । अतो न तद्धर्मवत्त्वं तासामिति **विशेषाशङ्कायां**

इष्टकास्वरूपानुवादेनाखण्डत्वादिधर्मविधानानर्थक्येनाग्र्यपूर्वसाधनत्वाकारेणैवोद्देश्यत्वात्तादृशाकारस्य चित्रिण्यादावपि सत्त्वेन 'या इष्टका अग्र्यपूर्वीयास्ता अखण्डा अकृष्णाः कुर्यात्' इत्येवमिष्टकोद्देशेन धर्मान्विदधद्वाक्येन प्रकरणाद्बलवता अनारभ्याधीतानां चित्रिण्यादीनामपि धर्माः । न प्राकरणिकानामेवेति **सिद्धान्तः** । तदाह **सूत्रे, अप्रकरणे** अधीतचित्रिण्यादिकमग्र्यङ्गमपि धर्माः । न प्राकरणिकानामेवेति **सिद्धान्तः** । तदाह **सूत्रे, अप्रकरणे** अधीतचित्रिण्यादिकमग्र्यङ्गमपि **तद्वत् ग्रहवत् सधर्मक**मिति । **फलन्तु,** चित्रिण्यादीनां इष्टकाधर्मवत्त्वमिति व्यक्तम् ।

इति द्वादशं चित्रिण्यादीष्टकानामग्र्यङ्गताधिकरणम्

अथ त्रयोदशमभिषवादीनां सोममात्राङ्गताधिकरणम्

नैमित्तिकमतुल्यत्वादसमानविधानं स्यात् ॥ ३६ ॥

पूर्वन्यायेन शङ्कनात्सङ्गतिः । पूर्वपादान्त्यभागे **फलचमसो नैमित्तिक** इत्यधिकरणे राजन्यवैश्यनिमित्तकः फलचमसो यागविकारः सन् यागसाधनसोमं बाधित्वा यागसाधनत्वेनापि स्वयमेव निविशत इत्युक्तम् । तत्र 'सोमं क्रीणाति, सोममभिषुणोति, इत्यादिवाक्योक्तक्रयाभिषवादिसोसंस्काररूपधर्मा अपि फलचमसे उपदेशतः प्राप्नुवन्ति, उत नेति **सन्देहे,**

पूर्वपक्षस्तु, पूर्वत्राधिकरणद्वये यथाऽपूर्वीयत्वाकारनिवेशित्वाद्धर्माणामप्राकरणिकसाधारण्यमुक्तं तथेहापि फलचमसस्यापि इज्याविशेषत्वेनापूर्वसाधनत्वाविशेषादुपदेशत एव सोमधर्माः स्युरिति ।

सिद्धान्तस्तु, अपूर्वसाधनत्वाकारेणान्वयेऽपि क्रयाभिषवादिधर्माः राजन्यादिनिमित्तसंयोगाभावेनानैमित्तिकाः स्वाभाविकत्वेन विधीयमानास्तदनुरूपं स्वाभाविकं सोममेव संस्कार्यं द्वारं लब्ध्वा चरितार्थास्सन्तो नान्यं नैमित्तिकं संस्कार्यमाकाङ्क्षन्तीति नित्यभूतसोमार्था एव क्रयादयो धर्माः । नैमित्तिकफलचमसस्य तु सोमविकारत्वादतिदेशतो धर्माः स्युरिति । तदाह **सूत्रे, नैमित्तिकं** फलचमसादिकमनित्यतया नित्यैर्धर्मैरतुल्यत्वात्तद्वारत्वायोग्यतया नित्यैः सोमादिभिरसमानविधानं **स्यादिति । फलन्तु,** 'सोमं ते क्रीणामि' इत्यादिसोमपदयुक्तमन्त्राणां फलचमसे प्रयोगप्रवृत्तिः **पूर्वपक्षे । सिद्धान्ते** तूहेन प्रवृत्तिरिति ।

इति त्रयोदशमभिषवादीनां सोममात्राङ्गताधिकरणम्

अथ चतुर्दशं प्रतिनिधिष्वपि मुख्यधर्मानुष्ठानाधिकरणम् (सूत्राणि ३७-३९)

प्रतिनिधिश्च तद्वत् ॥ ३७ ॥

(न तद्वत्प्रयोजनैकत्वात् ॥ ३८ ॥ अशास्त्रलक्षणत्वाच्च ॥ ३९ ॥)

अत्रापवादिकी **सङ्गतिः**। षष्ठे श्रुतिप्रमाणत्वादिति तृतीयपादीये चतुर्थेऽधिकरणे श्रुतद्रव्यापचारे प्रतिनिधिरुपादेय इति वक्ष्यते। स किं मुख्येन समानविधान उत नेति **सन्देहे**, मुख्याभावनिमित्तकत्वात्प्रतिनिधेः फलचमसवदतिदेशत एव धर्मप्राप्तेर्न मुख्यद्रव्यसमानविधिः प्रतिनिधिरिति **प्राप्तम्**। तदाह **सूत्रे**, नीवारादि**प्रतिनिधिश्च तद्वत्** नैमित्तिकवदसमानविधान इति।

सिद्धान्तस्तु, नीवारादिप्रतिनिधिद्रव्यस्य मुख्यव्रीह्याद्यभावनिमित्तत्वेपि न स्वातन्त्र्येण ते यागसाधनत्वेनोपादीयन्ते। तथात्वे ह्यतिदेशतो धर्मान् लभेरन्। न चैवम्। स्वतः साधनत्वे मानाभावात्। किन्तु ये नीवारादिगता व्रीह्यवयवा विकला दृश्यन्ते त एव सकलाभावाद्यागीयत्वेनोपदीयन्ते। नीवारोपादानं विना तद्गतव्रीह्यवयवोपादानाशक्तेर्नान्तरीयकतयैव तदुपादानम्। व्रीहिपदेन द्रव्यमनूद्य विधीयमानाः प्रोक्षणादिधर्मा व्रीहित्वजात्युपलक्षितेषु सकलावयवेष्विव विकलावयवेष्वप्युपदेशत एव भवन्तीति समानविधिरेव प्रतिनिधिरिति। तदाह **सूत्रे**, **न तद्वत्प्रयोजनैकत्वादिति**। नैमित्तिकवदसमानविधिर्न। कुतः? एकप्रयोजनकत्वादिति।

फलन्तु 'व्रीहीणां मेध सुमनस्यमानः' इत्यादिमन्त्रगतव्रीह्यादिपदस्योऽहेन प्रयोगः **पूर्वपक्षे**। **सिद्धान्ते** तु यथाश्रुतस्यैवेति।

इति चतुर्दशं प्रतिनिधिष्वपि मुख्यधर्मानुष्ठानाधिकरणम् (सूत्राणि ३७-३९)

अथ पञ्चदशं श्रुतेष्वपि प्रतिनिधिषु मुख्यधर्मानुष्ठानाधिकरणम्

नियमार्था पुनःश्रुतिः ॥ ४० ॥

अत्र पूर्ववैषम्येण शङ्कनात्सङ्गतिः। 'यदि सोमं न विंदेत्पूतिकानभिषुणुयात्' इति प्रतिनिधिः श्रूयते। तत्र किं समानविधानं उतातिदेशत एव धर्मप्राप्तिः पूतीके इति **सन्देहः**। वचनेनैव पूतीकस्य साधनत्वोक्त्या नीवारवदसाधनत्वाभावात्, अनित्यत्वात्फलचमसवदसमानविधाना पूतीकलतेति **प्राप्तम्**।

सिद्धान्तस्तु, पूतीकानामत्यन्ताप्राप्तसाधनत्वविधौ गौरवापत्तेः, सोमाभावे विकलांस्तदवयवानुपादित्सुः पूतीकगतानेवोपादद्यादिति प्राप्तप्रतिनिधिनियमविधिपक्षे लाघवात्, पूतीकग्रहणस्य च सोमावयवोपलक्षणार्थतयोपपत्तेः, तत्रत्यसोमावयवानामेव साधनत्वात्सोमसमानविधाना पूतीकलतेति । तदाह **सूत्रे ॥ नियमार्था पुनःश्रुतिरिति ॥** यद्यप्येतन्नियमार्थत्वं वचनस्य षष्ठे तृतीयपादे **वचनाच्च** इति त्रयोदशेऽधिकरणे वक्ष्यते तथापि तदधिकरणपूर्वोत्तरपक्षयोरसमानसमानविधानरूपफलकथनमिदमित्यपौनरुक्त्यमित्याहुः । **फलन्तु, पूर्वपक्षे** मन्त्रगतसोमपदस्य ऊहेन प्रयोगः । **सिद्धान्ते तु** यथाश्रुतस्येति ।

इति पञ्चदशं श्रुतेष्वपि प्रतिनिधिषु मुख्यधर्मानुष्ठानाधिकरणम्

अथ षोडशं दीक्षणीयादिधर्माणामग्निष्टोमाङ्गताधिकरणम् (सूत्राणि ४१-४७)

संस्थास्तु समानविधानाः प्रकरणाविशेषात् ॥ ४१ ॥

(व्यपदेशश्च तुल्यवत् ॥ ४२ ॥ विकारास्तु कामसंयोगे नित्यस्य समत्वात् ॥ ४३ ॥ अपि वा द्विरुक्तत्वात्प्रकृतेर्भविष्यन्तीति ॥ ४४ ॥ वचनात्तु समुच्चयः ॥ ४५ ॥ प्रतिषेधाच्च पूर्वलिङ्गानाम् ॥ ४६ ॥ गुणविशेषादेकस्य व्यपदेशः ॥ ४७ ॥)

अत्र पूर्वन्यायेन शङ्कनात्सङ्गतिः । ज्योतिष्टोमस्य चतस्रः संस्था अग्निष्टोम उक्थ्यः षोडशी अतिरात्रश्चेति । अत्यग्निष्टोमस्य वाजपेयस्य अप्तोर्यामस्य च क्रमादग्निष्टोमषोडश्यतिरात्रप्रभेदत्वात्सप्तसंस्थाप्रसिद्धिः । **संस्था** समाप्तिः । ज्योतिष्टोम एकोपि समाप्तिभेदाद्भिद्यते । यज्ञायज्ञियस्तोत्रेण समाप्तावग्निष्टोमः, उक्थ्यस्तोत्रेण समाप्तावुक्थ्य इति । एवं षोडश्यादिरपि ध्येयः । तत्राग्निष्टोमः क्रत्वर्थः । अन्यास्तिस्रः संस्था ज्योतिष्टोमाश्रयाः फले विधीयन्ते 'पशुकाम उक्थ्यं गृह्णीयात्, इति षोडशिना वीर्यकामः स्तुवीत, इति 'अतिरात्रेण प्रजाकामं याजयेत्, इति । तत्र ज्योतिष्टोमप्रकरणे श्रुतो दीक्षिणीयेष्टिप्रायणीयेष्टयाद्यङ्गविधिर्ज्योतिष्टोमस्य प्रथमसंस्थाविशेषे अग्निष्टोमे यथा प्रवृत्तस्तथैवोक्थ्यादावप्युपदेशतः प्रवर्तते, उतातिदेशत इति **सन्देहे,**

पूर्वपक्षस्तु, संस्थानां क्रतोश्च फलवत्त्वेन कथम्भावाकाङ्क्षालक्षणप्रकरणतौल्यात्पूर्वत्र प्रतिनिधेरिव समानविधानमेवाङ्गानामुभयत्र युक्तमिति । तदाह **सूत्रे संस्थानस्तु समानविधानाः प्रकरणाविशेषादिति ॥** स्पष्टोऽर्थः ।

सिद्धान्तस्तु, संस्थानामक्रियारूपत्वेन प्रकृतक्रतुमाश्रित्यैव फलनिर्वर्तकतया क्रत्वविनाभावात्काम्यसंस्थार्थं प्रस्थितमङ्गजातं, तदाश्रयत्वेन विद्यमानं स्वयमपि फलसाधनत्वेनाङ्गाकांक्षिक्रतुं न कथञ्चित् परित्यजेत् । क्रतुस्तु काम्यसंस्थाभिर्विनाप्यग्निष्टोमसंस्थोऽस्तिति काम्यसंस्थाऽनादरेणैव धर्मान् गृह्णातीति केवलक्रत्वर्थता तु शक्या कल्पयितुम् । अङ्गविधीनां प्रधानविध्यन्वितस्वार्थबोधकत्वनियमेन नित्यवदाम्नातानां पूर्वं नित्यक्रत्वन्वितानां पश्चात्संस्थाभिरनित्याभिर्विरूपाभिरप्यन्वये विरम्यव्यापारापातेन वैरूप्यापातेन च केवलं क्रत्वर्था एव धर्मा इति न समानविधानाः संस्थाः । किन्त्वतिदेशत एव धर्मवत्य इति । **चिन्ताफलन्तु,** ज्योतिर्गौरायुरित्यादिविकृतिविशेषेष्वसति विशेषलिङ्गे **अव्यक्तासु तु सोमेस्येति** वक्ष्यमाणदिशा प्रकृतिभूताग्निष्टोमस्य विध्यन्तातिदेश इति ।

इति पञ्चदशं दीक्षणीयादिधर्माणामग्निष्टोमाङ्गताधिकरणम् (सूत्राणि ४१-४७)

इति श्रीभाट्टसङ्ग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य-
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते तृतीयाध्यायस्य षष्ठः पादः
अस्मिन् पादे अधिकरणानि १५ सूत्राणि ४७
आदितः " १९९ " ५६२

अथ तृतीयाध्यायस्य सप्तमः पादः

अथ प्रथमं बर्हिरादीनां दर्शपूर्णमासतदङ्गोभयाङ्गताधिकरणम् (सूत्राणि १-५)

पूर्वपादे प्रधानयोरेव प्रकृतिविकृत्योः समानविधानासमानविधानचिन्ता कृता । अत्र पादे तु अङ्गप्रधानयोः सैव चिन्ता वाक्यप्रकरणविरोधभावाभावमुखेन क्रियत इति पादभेदः पूर्वानन्तर्यञ्चास्य ध्येयम् ।

प्रकरणविशेषादसंयुक्तं प्रधानस्य ॥ १ ॥

(सर्वेषां वा शेषत्वस्यातत्प्रयुक्तत्वात् ॥ २ ॥ आरादपीति चेत् ॥ ३ ॥ तद्वाक्यं हि तदर्थत्वात् ॥ ४ ॥ लिङ्गदर्शनाच्च ॥ ५ ॥)

दर्शपूर्णमासयोः श्रूयते ''वेद्यां हवींष्यासादयति'' ''बर्हिषि हवींष्यासादयति'' इति । तथा तद्धर्माश्च श्रूयन्ते ''वेदिं खनति'' ''बर्हिर्लुनाति'' इत्यादयः । ते किं प्रायाजादिरूपाङ्गदर्शादिरूपप्रधानयोः साधारणा उत प्रधानहविषामेवेति **सन्देहः ।**

पूर्वपक्षस्तु, वेद्यामित्यादिना वाक्येन सर्वहविरङ्गताप्रतीतावपि प्रकरणेनैकवाक्यत्वाभावेऽपूर्वीय-साधनाद्यबोधनेन वाक्यानर्थक्यापातात्, पिण्डपितृयज्ञार्थवेदिवर्हिषोः खननलवनादिधर्मप्रसङ्गाच्च प्रकरणेनैकवाक्यतावश्यम्भावात्, प्रकरणञ्च प्रधानस्येति प्रधानहविषामेव खननलवनादिस्वधर्मोपितं वेदिबर्हिरादिकमङ्गमिति। तदाह **सूत्रे, असंयुक्तं** धर्मजातं **प्रकरणविशेषात्प्रधानस्यैवे**ति।

सिद्धान्तस्तु, आनर्थक्यादिप्रसङ्गनिरासाय प्रकृतापूर्वसाधनभूतहविष्षु वेद्यादेरङ्गत्वेऽपि 'हविरा-सादनद्वारा प्रधानापूर्वं कुर्यात्' इत्यर्थो न वेद्यामिति वाक्यस्य। किन्तु 'यद्दर्शपूर्णमासोपकारिहविः तद्वेद्याम्' इत्यर्थः। एवं हि नातिप्रसङ्गः। अङ्गभूतप्रयाजादेर्हविरपि प्रधानस्योपकारकमेव। तत्रापि वेद्यादिरङ्गम्। एवं हि वाक्यस्य नातिसङ्कोचः कृतः स्यादिति। तदाह **सूत्रे ॥ सर्वेषां शेषत्वस्या-तत्प्रयुक्तत्वादिति** ॥ वेद्यादिकं **सर्वेषां** अङ्गप्रधानहविषां स्यात्। **शेषत्वस्य** प्रधानापूर्वप्रयुक्तत्वेन प्रकरणाप्रयुक्तत्वादिति। **फलन्तु,** प्रयाजादिहविषामपि वेद्यादावासादनम्।

इति प्रथमं बर्हिरादीनां दर्शपूर्णमासतदङ्गोभयाङ्गताधिकरणम् (सूत्राणि १-५)

अथ द्वितीयं स्वामिसंस्काराणां प्रधानार्थताधिकरणम्

फलसंयोगात्तु स्वामिसंयुक्तं प्रधानस्य ॥ ६ ॥

अत्र पूर्वन्यायेन शङ्कनात्सङ्गतिः। ज्योतिष्टोमे केशश्मश्रुवपनादयः **संस्कारास्तु पुरुषसामर्थ्ये** इत्युत्तरपादे वक्ष्यमाणदिशा यजमानसंस्काररूपा धर्माः श्रुताः। ग्रहसोमहोमो ज्योतिष्टोमे मुख्यः। अग्नीषोमीयपश्वादिकमङ्गम्। तत्र यजमानधर्माः किमङ्गप्रधानार्थाः प्रधानार्था एववेति **सन्देहः।**

पूर्वपक्षस्तु, अङ्गप्रधानयोर्द्वयोरप्येते पूर्वत्रेवोपकारकाः। कुतः? कर्तृधर्मत्वात्। यजमानो हि कर्तृतया वपनादिभिः संस्क्रियते। कर्तृत्वञ्च यथा मुख्यं प्रति तथाऽङ्गं प्रत्यप्यस्तीत्युभयोरुपकारका एते धर्मा इति।

सिद्धान्तस्तु, यजमानस्य कर्तृत्वभोक्तृत्वरूपौ द्वावाकारौ स्तः। तत्र क्रियानिष्पत्तिर्दृष्टा। फलभोगो ह्यदृष्टः। एवञ्च वपनादिकृतोपकारस्याप्यदृष्टत्वाद्भोक्तृशेषा वपनादयः फलभोगसाधने प्रधान एव पर्यवस्यन्ति। वपनादिसंस्कारहीनै ऋत्विग्भिः कृषीवलादिभिश्च क्रियानिष्पत्तेर्दर्शनेन न कर्तृत्वांशे धर्माणां निवेशः। कर्तृत्वांशे वपनादिकृतोपकाराभावात्। तस्माददृष्टफलभोजिनोऽस्य योयमदृष्टरूपः शास्त्रीयः संस्कारः सोयं प्रधान एव कर्मणि युक्तो नाङ्गेषु। न ह्यत्र पूर्ववद्वाक्यमस्ति। प्रकरणन्तु

मुख्यस्य गृहसोमहोमस्यैव । न त्वङ्गानामिति न तेषूपकार इति । तदुक्तं **सूत्रे, स्वामिसंयुक्तं** याजमानं वपनादिकं **प्रधानस्य** भोक्तृत्वस्यैव । कुतः? **फलसंयोगात्** फलजननार्थत्वादिति । **फलन्तु,** अङ्गभूतदैक्षपश्वर्थत्वाभावात्तद्विकृतिषु नवपनपयोव्रतादियजमानधर्मप्राप्तिरिति ।

इति द्वितीयं स्वामिसंस्काराणां प्रधानार्थताधिकरणम्

अथ तृतीयं सौमिकवेद्यादीनामङ्गप्रधानोभयाङ्गताधिकरणम्

चतुर्थमभिमर्शनादीनामङ्गप्रधानोभयाङ्गताधिकरणञ्च (सूत्राणि ७-१०)

चिकीर्षया च संयोगात् ॥ ७ ॥

(तथा प्रधानेन ॥ ८ ॥ तद्युक्ते तु फलश्रुतिस्तस्मात्सर्वचिकीर्षा स्यात् ॥ ९ ॥ गुणाभिधानात् सर्वार्थमभिधानम् ॥ १० ॥)

अत्र पूर्ववत्प्रधानार्थतेति शङ्कनात्सङ्गतिः । ज्योतिष्टोमे वेदिः श्रूयते ''षट्त्रिंशत्प्रक्रमा प्राची, चतुर्विंशतिरग्रेण, विंशज्जघनेन, इयति शक्ष्यामहेऽस्यां कर्तुम्'' इति । अस्यार्थः, प्रक्रमः पादः । प्राची षट्त्रिंशत्प्रक्रमदीर्घा । चतुर्विंशतिरग्रेण प्राग्भागे तिर्यक्चतुर्विंशतिप्रक्रमव्यायामा । जघनेन पश्चाद्भागे तिर्यक्त्रिंशत्प्रक्रमव्यायामा । इयति इयत्यां एतावत्परिमाणवत्यां अस्यां वेद्यां कर्तुं शक्ताः स्म इति । तत्र **सन्देहः** सौमिकीयं वेदिः प्रधानार्था अथाङ्गार्थापीति ।

पूर्वपक्षस्तु ''इयति शक्ष्यामहे अस्यां कर्तुम्'' इति तुमुन् प्रत्ययान्तःप्रयोगश्चिकीर्षित विषय एव भवति । चिकीर्षितश्च प्रधानम् । फलहेतुत्वात् । नाङ्गानि । तेषामिष्टिपशूनां चिकीर्षितसिद्ध्यर्थत्वात् । अतः पूर्वत्रेव प्रधानार्थैव वेदिरिति । तदाह सूत्रे, तुमुनप्रत्ययान्तेन प्रतीतचिकीर्षया संयोगात् प्रधानस्य वेदिरिति पूर्वानुषङ्गशेषाभ्यामर्थो ध्येयः । एवं स्थिते पूर्वपक्षे, तद्युक्ते तु फलश्रुतिस्तस्मात्सर्वचिकीर्षा स्यात् इति सूत्रेण सिद्धान्तयिष्यन् पूर्वसूत्रोक्तसंयोगपदानुवृत्तिप्राप्तीच्छया मध्ये चिन्तान्तरमारभते सूत्रकारः । तदुक्तं वार्तिके, संयोगादिति वर्तते इति ।

तथा प्रधानेन ॥ ८ ॥

''चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्राऽमावास्याम्'' इति दर्शपूर्णमासयोर्हविरभिमर्शनार्थौ द्वौ मन्त्रौ श्रुतौ । 'पृथिवी होता द्यौरध्वर्युः' इत्यादिको मन्त्रश्चतुर्होतेत्युच्यते । तन्मन्त्रस्याभिमानित्वेन

अनुहूतः कश्चित्पुमान् प्रजापतिना चतुर्वारमामन्त्रितः प्रत्युत्तरमुवाचेति स पुमांश्चतुर्हूतः। तदीयनाम्ना मन्त्रोपि चतुर्हूत इत्युच्यते। 'पूज्यानां प्रत्यक्षनामोक्तिरयुक्ता' इत्यभिप्रेत्य हूतशब्दस्थाने होतृशब्दः पठ्यते। अयञ्चार्थस्तैत्तिरीयब्राह्मणे व्यक्तः ''आत्मन्नात्मन् इत्यामन्त्रयत। तस्मै चतुर्हूतः प्रत्यशृणोत्। स चतुर्हूतोऽभवत्। चतुर्हूतो ह वै नामैषः। तं वा एतं चतुर्हूतं चतुर्होतेत्याचक्षते परोक्षेण'' इति। 'अग्निर्होता' इत्यादिको मन्त्रः पञ्चहोता। तत्राप्युक्तप्रकारो ध्येयः।

तत्र **सन्देहः** किं तौ मन्त्रावङ्गप्रधानार्थावुत प्रधानार्थाविवेति। प्रधानवाचिपौर्णमास्यादिशब्दार्थोद्देशेन श्रुतौ मन्त्रौ प्रधानार्थाविव वचनाद्युक्ताविति **पूर्वः पक्षः**। तदाह सूत्रे, **प्रधानेन संयोगात् मन्त्रावपि तथा पूर्वत्रेव** प्रधानार्थाविति। **पूर्वपक्षद्वये आद्यस्योत्तरम्**, प्रधानस्य फलहेतुत्वेन चिकीर्षितत्वेपि साङ्गस्यैव फलं प्रति पुष्कलकारणतया साङ्गमेव चिकीर्षितमित्यङ्गप्रधानोभयार्था वेदिरिति। तदाह सूत्रे, **तद्युक्ते** अङ्गयुक्ते प्रधाने **फलश्रवणात् तस्मात् सर्वार्था** अङ्गप्रधानोभयार्था **चिकीर्षे**ति।

फलन्तु, अग्नीषोमीयपशावपि वेद्या अङ्गत्वात्तद्विकारे निरूढपशावपि वेद्या प्रवृत्तिरिति। **द्वितीयपूर्वपक्षस्योत्तरं** पौर्णमास्यमावास्याशब्दौ कर्मवचनौ। न च कर्मणोरभिमर्शनं सम्भवति। अतो द्वितीयेयं सप्तम्यर्थे 'पौर्णमासीकर्मणि यदस्त्युपकारकं तच्चतुर्होत्राऽभिमृशेत्, अमावास्याकर्मणि यत्तत्पञ्चहोत्रेति। तदुभयकर्मणि विद्यमानञ्च प्रधानहविरङ्गहविश्च भवति। न चैवमभिम्रष्टव्यविशेषानिर्देशाज्जुह्वादीनामप्यभिमर्शः शङ्क्यः। 'आसन्नानि हवींष्यभिमृशेत्' इति वाक्यान्तरप्राप्तसर्वहविरभिमर्शनोद्देशेन मन्त्रयोर्व्यवस्थामात्रविधानात्। तस्मादङ्गप्रधानहविरभिमर्शार्थौ मन्त्राविति। तदुक्तं सूत्रे, **गुणाभिधानात्सर्वार्थमभिधानमिति**। अभिमर्शनरूपगुणाभिधानात् मन्त्राभिधानं सर्वार्थमिति। **फलन्तु,** उभयहविरभिमर्शनम्।

इति तृतीयं सौमिकवेद्यादीनामङ्गप्रधानोभयाङ्गताधिकरणम्

चतुर्थमभिमर्शनादीनामङ्गप्रधानोभयाङ्गताधिकरणञ्च (सूत्राणि ७-१०)

अथ पञ्चमं दीक्षादक्षिणयोः प्रधानार्थताधिकरणम् (सूत्रे ११-१२)

दीक्षादक्षिणन्तु वचनात्प्रधानस्य ॥ ११ ॥

(निवृत्तिदर्शनाच्च ॥ १२ ॥)

अत्र पूर्वन्यायेन शङ्कनात्सङ्गतिः । ज्योतिष्टोमे दीक्षा दक्षिणा च श्रुता । 'दण्डेन दीक्षयति, वाससा दीक्षयति, तिस्रो दीक्षाः' इति 'तस्य द्वादशशतं दक्षिणा' इति । ते दीक्षादक्षिणे अङ्गप्रधानोभयार्थे उत प्रधानार्थे इति **सन्देहे**

पूर्वपक्षस्तु, वपनन्यायेन दीक्षाया यजमानसंस्कारतया प्रधानार्थत्वे सिद्धेपि 'दीक्षितोऽग्नीषोमीयं पशुमालभेत' इति 'दीक्षितो भृतिं वन्वीत' इत्यादावङ्गेष्वपि विनियोगात्, दक्षिणायाः प्रयोगाङ्गत्वात् पूर्वत्रेवोभयार्थं दीक्षादक्षिणम् । न च ''दीक्षा सोमस्य दक्षिणा सोमस्य'' इति वचनविरोधः । साक्षात्परम्परारूपसम्बन्धसामान्य परत्वेन षष्ठ्युपपत्त्या अङ्गार्थत्वे वचनाविरोधादिति ।

सिद्धान्तस्तु, षष्ठ्याः साक्षात्सम्बन्धरूपमुख्यार्थसम्भवे परम्परासाधारणसामान्यसम्बन्धस्या-नाश्रयणीयत्वाद्वचन बलात्प्रधानोपकारकमेव दीक्षादक्षिणमिति । तदाह सूत्रे, दीक्षा दक्षिणमित्यादि । द्वन्द्वैकवद्भावः । **फलं तु,** सोमाङ्गविकृतिषु दीक्षादक्षिणयोरनतिदेश इति ।

इति पञ्चमं दीक्षादक्षिणयोः प्रधानार्थताधिकरणम् । (सूत्रे ११-१२)

अथ षष्ठमन्तर्वेदेर्यूपानङ्गताधिकरणम् (सूत्रे १३-१४)

तथा यूपस्य वेदिः ॥ १३ ॥

अत्रापि पूर्वन्यायेन शङ्कनात्सङ्गतिः । अग्नीषोमीयपशौ ''यूपं मिनोति'' इति प्रकृत्य श्रूयते ''अर्धमन्तर्वेदि मिनोति, अर्धं बहिर्वेदि'' इति । मिनोति प्रक्षिपति । डु मिञ् प्रक्षेपणे इति धातोः । यूपं स्थापयितुं कियद्विस्तारवानवटः? इत्यपेक्षायां तन्निर्णयाय यूपमूलस्य स्थौल्यमन्तर्वेद्यर्धं बहिर्वेद्यर्धं भवति इति पर्यवसितोऽर्थः । तत्र किमन्तर्वेद्येकदेशो यूपाङ्गत्वेन विधीयते उत बहिर्वेदिसहितो यूपस्य मानदेशं लक्षयतीति सन्देहे, मुख्यार्थान्वयानुपपत्त्यभावे लक्षणाया अयोगात् दीक्षादक्षिणयोर्वचनबलात्प्रधानार्थ-तेव ''अर्धमन्तः'' इति वचनाद्वेद्येकदेश एव यूपाङ्गतया चोद्यते । न चात्र यूपाश्रवणं शङ्क्यम् । अर्धशब्दस्य सम्बन्धिशब्दत्वात् कस्येत्याकाङ्क्षायां सन्निहितयूपस्य प्रतीतेस्तादर्थ्यं वेद्येकदेशस्य । अर्धे च तत्र मीयमाने अर्धान्तरं बहिरेव भवतीति ''अर्धं बर्हिर्वेदि'' इत्यनुवाद इति **प्राप्तम्** । तदाह सूत्रे, यथा दीक्षादक्षिणं वचनात्प्रधानस्य तथा वेदिरपि यूपस्येति ।

सिद्धान्तस्तु, ''अर्धमन्तर्वेदि'' इत्यस्य ''अर्धमेवान्तर्वेदि'' इत्यर्थः स्यात्तदाऽर्थप्राप्तानुवादो ''अर्धं बहिः'' इति वाक्यं स्यात् । न चैवम् । परिसङ्ख्यादोषापत्तेः । किन्तु ''अर्धं तावदन्तर्वेदि

मातव्यम्'' इति । ततश्चार्धान्तरं न विहितं न प्रतिषिद्धमिति तस्यार्धान्तरस्यान्तर्वा बहिर्वा मानं स्यात् । तत्र संस्कृतवेद्यन्तर्भाग इवासंस्कृतो वेदिबहिर्भागो ''बहिर्वेदि'' इत्यनेन विधेय इति वाक्यं भिद्येत । यदा तु वेदेरभ्यन्तरबाह्यभागाभ्यामुपलक्षितोऽसंस्कृतो लौकिको देशो मीयमानयूपोचितो विधीयते तदा नास्ति वाक्यभेदः । तस्माल्लौकिकदेश एवात्र यूपाङ्गत्वेन विधीयते । न तु संस्कृतो वेदिभाग इति । तदुक्तं सूत्रे, देशमात्रं वाऽशिष्येणैकवाक्यत्वादिति । लौकिकं देशमात्रं वाक्यद्वयलक्षितं ग्राह्यम् । कुतः? अशिष्येण बहिर्वाक्येन एकवाक्यत्वात् अन्तर्वाक्यस्येति ।

फलं तु, यूपैकादशिनी नाम काचन प्रकृतिरेकादशयूपोपेता । तस्यामन्तर्वेदिबहिर्वेद्यन्तराले तिरश्चीना यूपा निधीयन्ते । तत्रानुष्ठानविशेषो यद्यपि नास्ति तथापि प्रकृतमुक्थ्यनामकं यूपैकादशिनी-विकृतिभूतं यागं प्रकृत्य ''प्राच्यैकादशिनी सन्निधीयते'' इति विधानात्तस्मिन् विकृतौ वेद्या पुरस्ता-देकादश यूपाः स्थाप्याः । ततश्च यावति प्रदेशे यूपा मीयन्ते तावत्पर्यन्तं प्राचीनतया च वेदिरुत्खननीया पूर्वपक्षे । ''यावद्यूपं वेदिमुत्खनन्ति'' इत्युक्तेः । सिद्धान्ते तु यूपावटदेशस्य प्रादेशमात्रत्वादर्थ-प्रादेशमात्रविशालैव प्राचीनतया वेदिरुत्खननीयेत्यनुष्ठानभेद इति ।

इति षष्ठमन्तर्वेदेर्यूपानङ्गताधिकरणम् (सूत्रे १३-१४)

अथ सप्तमं हविर्धानस्य सामिधेन्यनङ्गताधिकरणम् (सूत्राणि १५-१७)

सामिधेनीस्तदन्वाहुरिति हविर्धानयोर्वचनात्सामिधेनीनाम् ॥ १५ ॥

(देशमात्रं वा प्रत्यक्षमर्थकर्म सोमस्य ॥ १६ ॥ समाख्यानञ्च तद्वत् ॥ १७ ॥)

पूर्ववैषम्येण शङ्कनात्**सङ्गतिः** । ज्योतिष्टोमे श्रूयते 'उत यत्सुन्वन्ति तत्सामिधेनीरन्वाहुः' इति । हविर्धानमण्टपे दक्षिणोत्तरभागावस्थितयोर्हविर्धाननामकयोः शकटयोर्मध्ये दक्षिणशकटमत्र यत्तच्छब्दार्थः । तस्य समीपे अभिषवः । उतशब्दोऽत्राथशब्दार्थः । **उत** अथ **यत्** यस्मिन् हविर्धाने सोममभिषुण्वन्ति **तत्** तस्मिन् तत्र स्थित्वेति यावत् । समिधेनीः अनुब्रूयादित्यर्थः । तत्र हविर्धानं सामिधेन्यङ्गमुत तल्लक्षितो देश इति **सन्देहे,**

पूर्वपक्षस्तु, युक्ता पूर्वत्र वाक्यभेदभयाल्लक्षणा । प्रकृते तु तदभावान्न देशलक्षणा युक्ता । तस्माद्धविर्धानमेव सामिधेन्यङ्गमिति **प्राप्तम्** । तदाह **सूत्रे,** **हविर्धानयो**र्मध्ये **'सामिधेनीस्तदन्वाहुः' इति** दक्षिणहविर्धाने **वचनात्** हविर्धानं **सामिधेनीना**मङ्गमिति ।

सिद्धान्तस्तु, आकांक्षावशादङ्गाङ्गिभावधीः । न ह्यत्र हविर्धानस्य सोमधारणार्थतया क्लृप्तत्वेन प्रयोजनाकांक्षास्ति । सामिधेनीनाञ्च दर्शपूर्णमासाख्यप्रकृतावग्निसमिन्धनार्थतया क्लृप्तप्रयोजनत्वेन नैराकांक्ष्यात् । अतो नाङ्गाङ्गिभावः । किन्तु सामिधेनीनां दर्शपूर्णमासाख्यप्रकृतित उत्तरवेदिस्थाहवनीय देशात्पश्चिमदेशश्चोदकेनाङ्गतया प्राप्तः । स च दक्षिणस्योत्तरस्य वा हविर्धानस्य समीपे भवतीति तत् दक्षिणहविर्धानसमीप इति नियममात्रं लाघवाद्विधीयते इति हविर्धानशब्दो हविर्धानसमीपस्थाभिप-वदेशलक्षक इति । **फलन्तु, पूर्वपक्षे** हविर्धाने स्थित्वाऽनुवचनम् । **सिद्धान्ते** तु तत्समीपदेशे **स्थित्वेति** ।

इति सप्तमं हविर्धानस्य सामिधेन्यनङ्गताधिकरण्यात् (सूत्राणि १५-१७)

अथाष्टममङ्गानामन्यद्वाराऽनुष्ठानाधिकरणम् (सूत्राणि १८-२०)

शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वात्तस्मात्स्वयं प्रयोगे स्यात् ॥ १८ ॥

(उत्सर्गे तु प्रधानत्वाच्छेषकारी प्रधानस्य, तस्मादन्यः स्वयं वा स्यात् ॥ १९ ॥ अन्यो वा स्यात्परिक्रयाम्नानाद्विप्रतिषेधात्प्रत्यगात्मनि ॥ २० ॥)

इयता ग्रन्थेन वाक्यप्रकरणविरोधचिन्ता कृता । अतः परं **ते सर्वार्थाः प्रयुक्तत्वादि**त्यादिना समाख्यायाः श्रुत्यादिभिः पूर्वैः विरोधाविरोधचिन्तां करिष्यन्, ततः प्रागेकादशाधिकरणैरुपोद्घातचिन्ता क्रियते । ज्योतिष्टोमादौ नानाकर्तृसमावेशे तत्पूर्वनयैः सिद्धे सत्येव होत्रादयो यथासामर्थ्यमनियमेन कर्म कुर्वन्ति किं वा यथासमाख्यं व्यवस्थयेति चिन्तायाः **ते सर्वार्था** इत्यत्र करिष्यमाणाया युक्तत्वा-दित्युपोद्घातत्वं ध्येयम् । दर्शपूर्णमासादिकं कर्म यजमानेनैव सर्वं कर्तव्यं, उत द्रव्यत्यागहविस्त्याग-दक्षिणादानादिकं तेनैव कार्यमन्यद्यजमानोऽन्यो वेत्यनियमोऽथ त्यागमेव यजमानः कुर्यादन्यत्त्वन्य इति त्रेधा **सन्देहः । पूर्वपक्षस्तु,** 'स्वर्गकामो यजेत' इति स्वर्गकामस्याऽख्यातोपात्तकर्तृसामानाधिकरणम् 'स्वरितञितः कर्त्रभिप्राये क्रियाफले' इति क्रियाफलस्य कर्तृगामित्व एवात्मनेपदविधानात् यजमानस्य सर्वाङ्गोपेतकर्माकर्तृत्वे फलभागित्वाभावापातेन फलार्थी यजमान एव सर्वाङ्गं प्रधानं कुर्यादित्येकः । तदाह **सूत्रे,** यस्माच्छास्त्रफलं स्वर्गादिकं **प्रयोक्तरि** भवति । कुतः ? **तल्लक्षणत्वात्** 'स्वर्गकामो यजेत' इति शास्त्रप्रामाण्यात् । **तस्मात् स्वयमेव प्रयोगे** कर्ता **स्यादि**ति साङ्गप्रधानकतुरेव फलभागित्वमिति । सत्यम्, तत् साक्षात्कर्तृत्वेनेव परम्परया प्रयोजककर्तृत्वेनापि भवति । 'स्वतन्त्रः कर्ता' 'तत्प्रयोजको हेतुश्च' इति स्मरणात् । स्वेनैव यजमानेन सर्वस्य कृतौ 'ऋत्विजो वृणीते' इत्यादिवचनोक्तो ऋत्विजं

परिक्रयोऽनर्थकः स्यात्। अतो यजमानेनैव त्यागमात्रं कार्यमिति नियमः। अन्यत्र तु स्वयं शक्तश्चेत्स्वयं सर्वं कुर्यात्। अशक्तश्चेदन्येन कारयेदिति त्यागादन्यत्रानियमः। सर्वकरणपक्षे दक्षिणादानमदृष्टार्थम्। अन्यैः कारयितृत्वपक्षे ऋत्विगानतिरूपदृष्टार्थमिति **द्वितीयः**। तदाह **सूत्रे, उत्सर्गे तु प्रधानत्वाच्छेषकारी प्रधानस्य, तस्मादन्यः स्वयं वा स्यादिति**। **प्रधानत्वात् उत्सर्गे** तु त्याग एव यजमानः कर्ता। **प्रधानस्य शेषकारी तु तस्मादन्यो वा स्वयं वा** कर्ता **स्यादिति**। **सिद्धान्तस्तु,** प्रयोजककर्तृत्वेनापि फलभात्त्वे सति परिक्रयणस्य नित्यवदाम्नातस्य पाक्षिकत्वाद्दृष्टार्थत्वयोरयोगात्तन्नित्यत्वाय उत्सर्गादन्यदन्येन कारयितव्यम्' इति। तथा च **सूत्रम्, अन्यो वा स्यात्परिक्रयाम्नानाद्विप्रतिषेधात्प्रत्यगात्मनीति**। स्वस्मिन् विक्रयस्य विप्रतिषेधादित्यर्थः। शिष्टं स्पष्टम्। **फलन्तु,** ऋत्विजोपि कर्तृतेति।

इत्यष्टममङ्गानामन्यद्वाराऽनुष्ठानाधिकरणम् (सूत्राणि १८-२०)

अथ नवमं परिक्रीतानामृत्विजां सङ्ख्याविशेषनियमाधिकरणम् (सूत्राणि २१-२४)

तत्रार्थात्कर्तृपरिमाणं स्यादनियमोऽविशेषात् ॥ २१ ॥

(अपि वा श्रुतिभेदात्प्रतिनामधेयं स्युः ॥ २२ ॥ एकस्य कर्मभेदादिति चेत् ॥ २३ ॥ नोत्पत्तौ हि ॥ २४ ॥)

सिद्धे कर्त्रन्तरनियमे कर्तृगतसङ्ख्यानियमचिन्तनात्**सङ्गतिः**। उत्सर्गादन्यत्रान्यः कर्तेत्युक्तम् स किमनियतसङ्ख्याकः, किं वा एक उतानेक इति त्रेधा **सन्देहः**।

पूर्वपक्षस्तु, परिक्रयविध्यन्यथानुपपत्त्या हि कर्त्रन्तरोपादानम्। स चैकस्य द्वयोर्बहूनां वोपादानेप्युपपन्न इति नैतावन्त इति नियमे हेतुरस्तीत्यनियम इत्याद्यः। तदाह **सूत्रे,** तत्र परिक्रीतस्य कर्तृत्वे **अर्थाद**ङ्गाल्पत्वबहुत्वानुरोधेन**कर्तृपरिमाणं स्यादिति विशेषाग्रहणादनियम** इति। सामानाधिकरण्यात्मनेपदाभ्यां साङ्गप्रधानस्य फलार्थिकर्तव्यत्वप्राप्तौ परिक्रयणवशेनान्योपादानम्। अतो यावता विना परिक्रयणायोगस्तावदेव कल्पनीयमित्येकमात्रोपादानेपि परिक्रयणाद्युपपत्तेरेक एवान्यः। स च तत्तत्कर्मकर्तृत्वनिमित्ततया अध्वर्युहोत्रादिसंज्ञायाऽभिलप्यत इति **द्वितीयः**। तदाह **सूत्रे, एकस्य कर्मभेदादिति चेदिति**। आध्वर्यवादि**कर्मभेदात्** पाचकलावकादिवदध्वर्य्वादिसंज्ञेति।

सिद्धान्तस्तु, अध्वर्य्वादिसंज्ञानां कर्मनिमित्तत्वे हि कर्मकृतिसमये तदनन्तरं वा एताः संज्ञाः श्रूयेरन् । न चैवम् । 'ब्रह्माणं वृणीते' 'उद्गातारं वृणीते' 'अध्वर्युं वृणीते' इति कर्मकृतेः प्रागप्रवृत्ताभ्यर्थनारूपवरणसमय एव संज्ञानां श्रवणेन वरणनिमित्तत्वमेव तासां वाच्यम् । वरणानि च **एकस्यैवं पुनः श्रुतिरित्य**भ्यासाधिकरणन्यायेन विहितस्य पुनर्विधानायोगात्समिधादियागवद्भिन्नान्येवेति यावद्वरणं संज्ञाभेदो यावत्संज्ञं कर्तृभेदोऽङ्गीकार्यः । वरणश्च महर्त्विजां होतृकाणाञ्च ''अग्निर्मे होतासौ मानुषः'' इत्यादिना मन्त्रेण । अन्येषान्तु ''प्रतिप्रस्थाता मे भवानस्तु'' इत्यादिलौकिकवाचा । एवञ्च संज्ञानामौत्पत्तिकत्वे **संज्ञा चोत्पत्तिसंयोगादि**ति पूर्वाध्यायोक्तन्यायेन 'अथैष ज्योतिः'' ''अथैष सर्वज्योतिः'' ''अथैष विश्वज्योतिः'' इत्यादाविव संज्ञाभेदाद्यावन्ति कर्तृनामधेयानि कर्माणि श्रूयन्ते तावन्तोऽङ्गीकार्याः । तथा च **सूत्रम्, अपि वा श्रुतिभेदात्प्रतिनामधेयं** स्युरिति । श्रूयन्ते हि तानि ''पुरोऽध्वर्युर्विभजति, प्रतिप्रस्थाता मन्थिनं जुहोति, नेष्टा पत्नीमभ्युदानयति, उन्नेता चमसानुन्नयति । प्रस्तोता प्रस्तोति, उद्गाता उद्गायति, प्रतिहर्ता प्रतिहरति, सुब्रह्मण्यः सुब्रह्मण्यमाह्वयति । होता प्रातरनुवाकमनुब्रूते, मैत्रावरुणः प्रेष्यति, अच्छावाको यजति, ग्रावस्तुत् ग्रावस्तोत्रीयामन्वाह' इति । एवं ब्रह्मब्राह्मणाच्छंस्याग्नीध्रपोतॄणां कर्माणि ज्ञेयानि । **फलन्तु,** यावत्कर्म कर्तृभेद इति व्यक्तम् ।

इति नवमं परिक्रीतानामृत्विजां सङ्ख्याविशेषनियमाधिकरणम् (सूत्राणि २१-२४)

अथ दशमं चमसाध्वर्यूणां पृथक्त्वाधिकरणम्

चमसाध्वर्यवश्च तैर्व्यपदेशात् ॥ २५ ॥

पूर्ववैषम्येण **शङ्कनात्सङ्गतिः ।** ज्योतिष्टोमे 'चमसाध्वर्यून् वृणीते' इति श्रुतम् । ते किं प्रागुक्तषोडशर्त्विग्भ्योऽन्ये उत तेष्वन्यतमा एवेति **सन्देहः । पूर्वपक्षस्तु,** पूर्वत्र हौत्रादिसमाख्यानां भेदकत्वेपि चमसाध्वर्युसंज्ञायाः 'चमसेऽध्वर्यवः' इति यौगिकत्वेन वरणनिमित्तत्वाभावान्न कर्तृभेदकतेति प्रागुक्तप्रतिप्रस्थातृप्रभृतय एव चमसयोगाच्चमसाध्वर्यव इति ।

सिद्धान्तस्तु, संज्ञाया यौगिकत्वेन पूर्वोक्तान्यतमेषु सम्भवेनाभेदकत्वेऽपि 'चमसाध्वर्यून् वृणीते' इति वरणभेदाम्नानात्, वृतेषु तदयोगात्, पूर्वन्यायेन चमसाध्वर्यवोऽन्ये । मध्यतः कारिणां चमसाध्वर्यवो होतृकाणां चमसाध्वर्यव इति षष्ठ्या मध्यतः कार्यध्वर्युहोतृप्रभृतिभ्यो होतृकशब्दितप्रतिप्रस्थातृप्रभृतिभ्यश्च चमसाध्वर्यूणां भेदोक्तेश्चेति । तदाह **सूत्रे, चमसाध्वर्यवश्च** प्रागुक्तषोडशर्त्विग्भ्योऽन्ये ।

कुतः ? तैस्सह व्यपदेशात् मध्यतः कारिणः, चमसाध्वर्यव इत्यादिव्यपदेशादिति । **फलन्तु,** षोडश-र्त्विग्भ्योन्यत्त्वं चमसाध्वर्यूणाम् ।

इति दशमं चमसाध्वर्यूणां पृथक्त्वाधिकरणम्

अथैकादशं चमसाध्वर्यूणां बहुत्वनियमाधिकरणम्

उत्पत्तौ तु बहुश्रुतेः ॥ २६ ॥

सिद्धे चमसाध्वर्यूणामन्यत्वे तत्सङ्ख्यापरिमाणचिन्तनात्सङ्गतिः । 'चमसाध्वर्यून् वृणीते' इत्यत्र बहुवचनोक्तं बहुत्वं विवक्षितमुत नेति **सन्देहे,** उद्देश्यगतत्वात् ग्रहैकत्ववदविवक्षितं बहुत्वम् । तथा चैको द्वौ बहवो वा ग्राह्या इति **प्राप्तम् ।**

सिद्धान्तस्तु, ग्रहाणामैन्द्रवायवाद्युत्पत्तिवाक्यैरेव प्रकरणसनाथैः क्रतुसम्बन्धसिद्धेः सम्मार्गवाक्ये केवलमुद्देश्यत्वेन तद्गतैकत्वाविवक्षा । चमसाध्वर्यूणां तु वरणं प्रत्युद्देश्यत्वेऽन्यत उत्पत्त्यभावेन क्रतुसम्बन्धासिद्धेरेतदेवोत्पत्तिवाक्यं प्रकरणसनाथं सत्, वरणसंस्कारयुक्तांश्चमसाध्वर्यून् क्रतुं प्रति विधत्ते 'वरणेन चमसाध्वर्यून् कर्तॄन् क्रत्वङ्गत्वेनोऽपाददीत' इति । तथा च क्रतुं प्रत्युपादेयत्वात्तद्गता सङ्ख्या पश्वेकत्वद्विवक्षणीया 'बहवश्चमसाध्वर्यवः' इति । तदाह **सूत्रे,** **उत्पत्तौ** चमसाध्वर्यूत्पत्तिवाक्ये **बहु**वचन**श्रुते**रिति । **फलन्तु** चमसाध्वर्यूणां बहुत्वनियमः ।

इत्येकादशं चमसाध्वर्यूणां बहुत्वनियमाधिकरणम्

अत द्वादशं चमसाध्वर्यूणां दशसङ्ख्यानियमाधिकरणम्

दशत्वं लिङ्गदर्शनात् ॥ २७ ॥

सिद्धे बहुत्वे तद्विशेषशङ्कनात्सङ्गतिः । चमसाध्वर्यूणां सङ्ख्यानियमो नास्त्युतास्तीति सन्देहे, नियामकाभावादेतावन्त इत्यनियमो वा कपिञ्जलाधिकरण्यायेन त्रय एवेति वा प्राप्तौ चमसानां दशत्वाद्दशभिर्भाव्यम् । ततोऽधिकसत्त्वे तु न मानमस्ति । किञ्च ऋतुपेये यागे "दश चमसाध्वर्यवः" इत्यनुवादरूपलिङ्गदर्शनाच्च दशैव चमसाध्वर्यव इति सिद्धान्तः । तदाह सूत्रे, दशत्वं लिङ्गदर्शनादिति । चमसाध्वर्यूणामिति शेषः । **फलं तु,** दशानां वरणम् ।

इति द्वादशं चमसाध्वर्यूणां दशसङ्ख्यानियमाधिकरणम्

अथ त्रयोदशं शमितुरपृथक्त्वाधिकरणम् (सूत्रे २८-२९)

शमिताऽन्यः शब्दभेदात् ॥ २८ ॥

(प्रकरणाद्वोत्पत्त्यसंयोगात् ॥ २९ ॥)

पूर्वन्यायेन शङ्कनात्सङ्गतिः । 'शमिता पशुं नयति' इति 'शमितार उपेत न यज्ञम्' इति मन्त्रे च श्रुतः शमिता प्रागुक्तेष्वन्यतम उत ततोऽन्य इति **सन्देहे** पूर्वत्र चमसाध्वर्यूणामिव संज्ञाभेदादन्य **इति प्राप्तम्** । तदाह **सूत्रे, शमिताऽन्यः संज्ञाभेदादिति** । 'चमसाध्वर्यून् वृणीते' इतिवत् 'शमितारं वृणीते' इति वरणविधेरभावात्, शमितेति संज्ञायाः शमयितेत्यर्थे 'शमिता यज्ञे' इति पाणिनिना निपातितत्वेन यौगिकतया पूर्वोक्तान्यतमे संज्ञपनयोगादध्वर्व्यादावपि सम्भवादुक्तेष्वन्यतम इति **सिद्धान्तः** । स चाऽध्वर्यवसमाख्यया संज्ञपनकर्तृतया शमिताऽध्वर्युः प्राप्तस्तथापि 'परागावर्ततेऽध्वर्युः पशोः संज्ञप्यमानात्' इति वचनेनाध्वर्योः परावृत्तिश्रवणेन अध्वर्युपुरुषाः प्रतिप्रस्थात्रादयः संज्ञपयितार इति । **फलन्तु** शमितुरुक्तेभ्योऽनन्यत्वं व्यक्तम् ।

इति त्रयोदशं शमितुरपृथक्त्वाधिकरणम् (सूत्रे २८-२९)

अथ चतुर्दशमुपगस्यापृथक्त्वाधिकरणम्

उपगाश्च लिङ्गदर्शनात् ॥ ३० ॥

पूर्ववैषम्येण शङ्कनात्सङ्गतिः । ज्योतिष्टोमे सन्त्युपगातारः । ते प्रकृतेभ्योऽन्य उत त एवेति **सन्देहः** । शमितुरनन्यत्वेप्युपगातारः प्रागुक्तेभ्योऽन्य एव । संज्ञाभेदात् । सर्वर्त्विजां यजमानकर्मकरतया साम्येन मिथो गुणभावायोगात् । यथा लौकिके गायकेभ्योऽन्ये पार्श्वस्था उपगातारस्तथेऽहाप्युपगातारोऽन्य एवेति **प्राप्ते**

सिद्धान्तः, उत्पत्तौ चमसाध्वर्युवद्वरणाभावात्संज्ञाया यौगिकत्वेनोक्तेष्वेवोपपत्तेः, ऋत्विजां मध्ये 'अग्नीदग्नीन्विहर' इत्यध्वर्योः प्रैषकर्तृत्वमाग्नीध्रादेः प्रैषार्थकारित्वम् । अथापि न मिथो गुणभावः । तथाऽत्रापि ऋत्विजं मध्य एव केचिदुपगातारो नान्ये । एवं हि सति 'नाध्वर्युरुपगायेत्' इति निषेधोऽर्थवान् । उपगातॄणामनन्यत्वे ह्यध्वर्योरुपगानाप्रसक्त्या तन्निषेधोऽनर्थकः स्यादिति । तदाह **सूत्रे, उपगाश्चोपगातारश्च ऋत्विजामन्यतमा एव । 'नाध्वर्युरुपगायेत्' इति लिङ्गदर्शनादिति । फलन्तु,** उपगातॄणां पृथगसम्पादनम् ।

इति चतुर्दशमुपगस्यापृथक्त्वाधिकरणम्

अथ पञ्चदशं सोमविक्रेतुः पृथक्त्वाधिकरणम्

विक्रयी त्वन्यः कर्मणोऽचोदितत्वात् ॥ ३१ ॥

पूर्वन्यायेन शङ्कनात्सङ्गतिः । अस्ति सोमविक्रयी । स किमुक्तानामन्यतमोऽथान्य इति **सन्देहः** । चमसाध्वर्युवच्छेदकवरणाभावादुपगातृवदुक्तेष्वन्यतम एव सोमविक्रयी इति **प्राप्ते**

सिद्धान्तः, क्रयस्यैव विहितत्वेन विक्रयाख्यकर्मणोऽचोदिततया क्रत्वर्थत्वाभावात्क्रत्वर्थमुपात्ता ऋत्विजः कथं विक्रयं कुर्युः । तस्मादुक्तेभ्योऽन्यः सोमविक्रयीति । तदाह **सूत्रे, विक्रयी त्वित्यादि** । व्यक्तः सूत्रार्थः । **फलन्तु**, विक्रेतुरन्यस्य सम्पादनम् ।

इति पञ्चदशं सोमविक्रेतुः पृथक्त्वाधिकरणम्

अथ षोडशं 'ऋत्विक्' इति नाम्नोऽसर्वगामिताधिकरणम् (सूत्राणि ३२-३५)

कर्मकार्यात्सर्वेषामृत्विक्त्वमविशेषात् ॥ ३२ ॥

(न वा परिसङ्ख्यानात् ॥ ३३ ॥ पक्षेणेति चेत् ॥ ३४ ॥ न सर्वेषामनधिकारः ॥ ३५ ॥)

भाष्यकारीयम् वर्णकम्

एवं पूर्वत्र ब्रह्मादयः षोडश, दश चमसाध्वर्यव इति बहवः कर्तार इति सिद्धे, तेषु नामविशेषचिन्तनात्**सङ्गतिः** । ते सर्वे किमृत्विङ्नामवन्त उत केचिदेवेति **सन्देहे पूर्वपक्षस्तु**, ऋत्विक्छब्दोयमृतुयजननिमित्ता यौगिकः । सर्वे च ते कर्मणि तत्तत्कार्यकरणादृतौ यजन्तीति यष्टृशब्देनेव ऋत्विङ्नामवाच्याः । न चैवम् 'सौम्यस्याध्वरस्य यज्ञक्रतोः सप्तदशर्त्विजः' इति वचनविरोधः । एकदेशानुवादशब्दितावयुत्यानुवादत्वेन तस्योपपत्तेरिति । **तदाह सूत्रे, अविशेषात् सर्वेषामृत्विक्त्वम्** । कथमविशेषः ? **कर्मकार्यात्** कर्मकर्तृत्वेन ऋतुयजनादिति ।

सिद्धान्तस्तु, ऋत्विक्छब्दस्योक्तदिशा यौगिकत्वे स्यादेवं सर्वेषामृत्विक्त्वम् । न चैवम् । किन्तु 'ऋत्विजो वृणीते' इति वरणनिमित्तकः । 'यूपं छिनत्ति' इत्यत्र 'छेदेन यूपं कुर्यात्' इतिवत् 'वरणेन ऋत्विजं कुर्यात्' इति हि तदर्थः । तच्च वरणं चमसाध्वर्युवरणव्यावृत्तमध्वर्य्वादितत्तन्निष्ठमेव निमित्त-

मित्यध्वर्य्वादय एव ऋत्विङ्नामानः। न चमसाध्वर्यवः। एवञ्च सति ''सप्तदशर्त्विजः'' इति वचनं समग्रानुवादपरं सदर्थवद्भवतीति भाष्यकारः।

वार्तिककारीयम् वर्णकम्

वार्तिककारस्तु, अवयुत्यानुवादनिरासाय तत्तद्वरणनिमित्तत्वेऽङ्गीकृते सति, ऋत्विक्पदस्य क्लृप्तर्तुयजनरूपावयवशक्तिबाधः। ऋत्विक्दधृक्स्रगित्यादिपाणिनिस्मृतौ क्विन्प्रत्ययान्तत्वोक्तेः, क्विनश्च ''कृदतिङ्'' इति कृत्संज्ञकत्वात्, कृतश्च ''कर्तरि कृत्'' इति कर्त्रर्थकत्वात्, वरणनिमित्तकत्वे पाणिनिस्मृत्या विरोधः। ''ऋत्विग्यज्ञकृदुच्यते'' इति स्मृत्या च विरोधः। वरणविधेः ''ऋतु-यजननिमित्तकत्वेन प्रसिद्धान् ऋत्विजो वृणीते'' इति प्रसिद्धपदार्थकत्वसम्भवे ''वरणेन ऋत्विजः कुर्यात्'' इत्यप्रसिद्धपदार्थकत्वकल्पनायोग इत्युपेत्य ऋतुयजनहेतुकत्वमेवर्त्विक्छब्दस्याङ्गीकृत्य, चमसाध्वर्युष्वतिप्रसङ्गनिरासाय तत्तद्गतऋतुयजनविशेषं चमसाध्वर्युव्यावृत्तमुपादाय, अध्वर्य्वादय एव ऋत्विजो नान्ये। साप्तदश्यवचनञ्च समग्रानुवाद इत्युच्यते। फलं तु, सप्तदशानामेव ऋत्विग्धर्मोप-वासादीति। इति षोडशं ''ऋत्विक्''।

इति नाम्नोऽसर्वगामिताधिकरणम्॥ (सूत्राणि ३२-३५)

अथ सप्तदशं दीक्षादक्षिणावाक्योक्तब्रह्मादीनामेव सप्तदशर्त्विक्त्वाधिकरणम् (सूत्रे ३६-३७)

नियमस्तु दक्षिणाभिः श्रुतिसंयोगात्॥ ३६॥
(उक्त्वा च यजमानत्वं तेषां दीक्षाविधानात्॥ ३७॥)

पूर्वं सामान्येनोक्तर्त्विक्त्वस्यात्र किन्निष्ठतेति विशेषचिन्तनात्सङ्गतिः। ये प्रागृत्विङ्नामान उक्तास्ते किं ब्रह्मादिषु केचिच्चमसाध्वर्युषु केचिदित्यनियम उत ब्रह्मादय एवेति नियम इति **सन्देहे**, विशेषाश्रवणादनियमे **प्राप्ते सिद्धान्तः**, ब्रह्मादीनामेवर्त्विक्त्वं नान्येषामिति नियम एव। 'ऋत्विग्भ्यो दक्षिणां ददाति' इत्युक्त्वा 'अग्नीधे ददाति' 'ब्रह्मणे ददाति' इत्यादिदक्षिणावाक्ये ब्रह्मादीनां षोडशानां कीर्तनेन ब्रह्मादिश्रुतिसंयोगाद्दक्षिणाभिर्नियमनिर्णयोपपत्तेः। व्यक्तः **सूत्रार्थः**। किं च **उक्त्वा च यजमानत्वं तेषां दीक्षाविधानादिति** सूत्रोक्तदिशा दीक्षाविधिवशाच्च ब्रह्मादीनामेव षोडशानामृत्विक्

त्वम्। तथा हि, सूत्रप्रकरणे 'ये यजमानास्ते ऋत्विजः' इत्युक्त्वा अनन्तरमाम्नायते ''अध्वर्युर्गृहपतिं दीक्षयित्वा ब्रह्माणं दीक्षयति, तत उद्गातारं, ततो होतारम्। ततस्तं प्रतिप्रस्थाता दीक्षयित्वा अर्धिनो दीक्षयति, ब्राह्मणाच्छंसिनं ब्रह्मणः, प्रस्तोतारमुद्गातुः, मैत्रावरुणं होतुः। ततस्तं नेष्टा दीक्षयित्वा तृतीयिनो दीक्षयति, अग्नीधं ब्रह्मणः, प्रतिहर्तारमुद्गातुः, अच्छावाकं होतुः। ततस्तमुन्नेता दीक्षयित्वा पादिनो दीक्षयति, होतारं ब्रह्मणः, सुब्रह्मण्यमुद्गातुः, ग्रावस्तुतं होतुः। ततस्तमन्यो बह्मणो दीक्षयति। अस्या यमर्थः अध्वर्युः यजुर्वेदोक्तकर्मकर्ता तस्य पुरुषास्त्रयः प्रतिप्रस्थाता नेष्टा उन्नेता चेति। एते चत्वारो दीक्षयितारः। ब्रह्मा वेदत्रयोक्तस्य प्रत्यवेक्षणकर्ता। तस्यापि त्रयः पुरुषा ब्रह्माणाच्छंसी अग्नीत् पोता चेति। उद्गाता उद्गानकर्ता। तस्यापि त्रयः पुरुषाः प्रस्तोता, प्रतिहर्ता, सुब्रह्मण्यश्चेति। होता शंसनकर्ता। तस्य मैत्रावरुण अच्छावाको ग्रावस्तुदिति त्रयः। चतुर्वर्गेषु ये प्रथमास्ते सम्पूर्ण-दक्षिणामाप्नुवन्ति। ये द्वितीयास्ते तदर्थं प्राप्नुवन्तीत्यर्धिनः। एवं ये तृतीयास्ते तृतीयांशं प्राप्नुवन्तीति तृतीयिनः। एवं ये चतुर्थास्ते चतुर्थांशं प्राप्नुवन्तीति पादिनः। ''ततस्तमन्यः'' उन्नेतारं ब्रह्मणोऽन्यो दीक्षयतीति। एतच्चिन्ताफलं तु ब्रह्मादीनामेवर्त्विक्त्वनिर्णयेन ऋत्विग्धर्मो ब्रह्मादिष्वेवेति।

इति सप्तदशं दीक्षादक्षिणावाक्योक्त ब्रह्मादीनामेव सप्तदशर्त्विक्त्वाधिकरणम् (सूत्रे ३६-३७)

अथाष्टादशमृत्विजां स्वामिसप्तदशत्वाधिकरणम्

स्वामिसप्तदशाः कर्मसामान्यात्॥ ३८॥

दक्षिणादीक्षावाक्ययोः कीर्तनेन ब्रह्मादीनां षोडशानामृत्विक्त्वसिद्धावत्रावशिष्टचिन्तनात्सङ्गतिः। सप्तदशः किं सदस्य उत यजमान इति **सन्देहः**। चमसाध्वर्यूणामवशिष्टत्वेपि तुल्यकक्ष्यतयाऽन्यतरा-वधारणे मानाभावेन न तेषामिह सन्देहकोटित्वम्। सदसि स्थिततया सदस्यनामकर्त्विक्सप्तदशः। न च तस्य वरणाभावान्नास्त्येव स इति शङ्क्यम्। शाखान्तरे तद्वरणस्याप्याम्नानादिति **प्राप्ते** 'सदस्य इदं कुर्यात्' इति विध्यभावेन तस्य कर्मकरत्वाभावेन तद्वरणस्य दृष्टार्थतया ऋतुयजनकर्तृत्वरूपर्त्विक्त्वा-भावात्, यागरूपकर्मकरणेन कर्मकरत्वसाम्याद्यजमानः सप्तदश इति **सिद्धान्तः**। व्यक्तः सूत्रार्थः। **फलन्तु**, सदस्यस्योपवासादिऋत्विग्धर्माप्राप्तिः।

इत्यष्टादशमृत्विजां स्वामिसप्तदशत्वाधिकरणम्

अथैकोनविंशमाध्वर्यवादिष्वेवाध्वर्य्वादीनां कर्तृतानियमाधिकरणम्
विंशमग्ने प्रकृतिविकृतिसर्वार्थताधिकरणञ्च (सूत्रे ३९-४०)

ते सर्वार्थाः प्रयुक्तत्वात्, अग्नयश्च स्वकालत्वात् ॥ ३९ ॥

(तत्संयोगात्कर्मणो व्यवस्था स्यात्संयोगस्यार्थवत्त्वात् ॥ ४० ॥)

यदर्थमतीतैः **शास्त्रफलमित्यादिभिरेकादशनयैर्नानाकर्तृसमावेशः क्रतुषु चिन्तितस्तदिदमारभ्यत इत्यवसरसङ्गतिः**। तेषामध्वर्युप्रभृतीनां कार्यं लिङ्गप्रकरणाभ्यामव्यवस्थितमुत समाख्यया **व्यवस्थितमिति सन्देहः**।

सर्वेषां कर्मकृतौ शक्तिसत्त्वात् ज्योतिष्टोमादिक्रतुप्रकरणस्य सर्वसाधारण्यात्समाख्यातो **बलवद्भ्यां** लिङ्गप्रकरणाभ्यामव्यवस्थितं कार्यम्। आध्वर्यवादिसमाख्या तु पक्षे प्राप्तानुवाद इति **प्राप्तम्। तदाह सूत्रे। ते** अध्वर्युप्रभृतयः **सर्वार्थाः**। कुतः? **प्रयुक्तत्वात्** सर्वकार्यार्थं वृतत्वादिति। एवं स्थिते पूर्वपक्षे, **तत्संयोगात्कर्मणो व्यवस्था स्यात् संयोगस्यार्थवत्त्वादिति** सूत्रेण सिद्धान्तयिष्यन् सर्वार्थपदानुवृत्तिलिप्सया मध्ये **चिन्तान्तरमारभते। अग्नयश्च स्वकालत्वादिति**। अनारभ्यवादेन 'यदाहवनीये जुहोति' इति विहिताग्नयः किं प्रकृतावाम्नातहोमार्था उत प्रकृतिविकृत्युभयत्राऽम्नातहोमार्था इति **सन्देहे** पूर्वत्र षष्ठांघ्र्याद्यनये **सर्वार्थमप्रकरणादित्यत्रोक्तदिशा** जुह्वाः पर्णमयत्वं यथा एवं प्रकृत्याम्नातहोमार्था इति प्राप्ते,

सिद्धान्तः अग्नयश्चेत्यादि। अग्नयश्च सर्वार्था इत्यनुषङ्गः। **स्वकालत्वात्** स्वतन्त्रत्वाम्नानात् अप्रकरणाधीतत्वादिति यावदिति। न चैवं पर्णमयत्वस्य विकृत्यर्थत्वे तत्रोक्तद्विरुक्तिदोष इवात्रापि द्विरुक्तिदोषप्रसक्तिः। वैषम्यात्। विकृतिषु सर्वत्रातिदेशतो जुहूप्राप्तिमपेक्ष्य पर्णताविधौ ह्यतिदेशतो जुह्वा सह पर्णताया अपि प्राप्त्या पुनरनेन पर्णताविधौ द्विरुक्तिदोषः उक्तः। इह तु क्वचिद्विकृतिषु 'चतुरवत्तं जुहोति' इति प्रकृतौ विहितस्य होमस्यातिदेशतोऽग्न्याधारतयैव प्राप्त्या द्विरुक्तिदोषापातेन तदनुप्रवेशायोगेपि, यत्र सांग्रहणेष्ट्यादौ 'आमनमस्यामनस्य देवा इति तिस्र आहुतीर्जुहोति' इति द्वारभूतहोमस्य प्रकृताविवोपदेशतः प्राप्तिस्तत्र होमप्राप्त्यर्थमतिदेशानपेक्षणात् पश्चादवतरतोप्यतिदेशस्य प्रथमत एवोपदेशसिद्धाऽहवनीयप्रापणविमुखत्वात् तद्विकृतिसाधारण्येपि द्विरुक्तिदोषाभावान्न प्रकृतिमात्रसाधारण्यम्। किन्तूक्तदिशोऽभयसाधारण्यमिति। फलन्तु आहवनीयाश्रितगुणकामप्राप्तिः।

इत्येकोनविंशमाध्वर्यवादिष्वेवाध्वर्य्वादीनां कर्तृतानियमाधिकरणम्

विंशमग्रेः प्रकृतिविकृतिसर्वार्थताधिकरणञ्च (सूत्रे ३९-४०)

अथैकविंशं समाख्यायातकर्तृत्वस्यापि क्वचिद्बाधाधिकरणम् (सूत्रे ४१-४२)

तस्योपदेशसमाख्यानेन निर्देशः ॥ ४१ ॥

(तद्वच्च लिङ्गदर्शनम् ॥ ४२ ॥)

लिङ्गप्रकरणाभ्यां कर्तॄणां कार्यानियम इति स्थितपूर्वपक्षस्योत्तरं **तत्संयोगादित्यादिसूत्र उक्तम्**। आध्वर्यवं हौत्रं औद्गात्रमिति विशिष्टपुरुषसंयोगात्कर्मणो व्यवस्थैव स्यात्। येन येन यद्यत्समाख्यायते तेन तेन तत्तत्कर्तव्यमिति **संयोगस्यार्थवत्त्वादिति**। अयं भावः, लिङ्गप्रकरणाभ्यां हि सर्वेषां सर्वत्र कर्तृत्वं समुच्चयेन न प्राप्तम्। किन्त्वनियमेन। तत्र किं? केन? इति व्यवस्थापेक्षायां आवश्यिक्या-मपेक्षितव्यवस्थाविधायकत्वेनोपपत्तौ नित्यवच्छ्रुतायाः समाख्याया निरर्थकप्रायपाक्षिकानुवादत्वायोगा-ल्लिङ्गप्रकरणाविरोधेन समाख्यया व्यवस्थेति। न चैवं समाख्यया नियमे सति अध्वर्युकाण्डे पठितस्य सर्वस्याध्वर्युणैव कार्यत्वात् 'प्रतिप्रस्थाता मन्थिनं गृह्णाति' नेष्टा पत्नीमुदानयति' इत्यादिवचनानां नेष्ट्रीयमित्यादिसमाख्यानाञ्चायोग इति शङ्क्यम्। वचनविशेषसमाख्याभ्यां सामान्यसमाख्याया बाधादिति। तदुक्तं **सूत्रे, उपदेशसमाख्यानेन निर्देश** इति। **फलन्तु,** व्यवस्थया कर्मानुष्ठानम्।

इत्येकविंशं समाख्यायातकर्तृत्वस्यापि क्वचिद्बाधाधिकरणम् (सूत्रे ४१-४२)

अथ द्वाविंशं समुच्चितयोरनुवचनप्रैषयोर्मैत्रावरुणकर्तृकत्वाधिकरणम् (सूत्रे ४३-४५)

प्रैषाऽनुवचनं मैत्रावरुणस्योपदेशात् ॥ ४३ ॥

(पुरोनुवाक्याधिकारो वा प्रैषसन्निधानात् ॥ ४४ ॥ प्रातरनुवाके च होतृदर्शनात् ॥ ४५ ॥)

पूर्वत्र वचनात्समाख्याया बाधोक्ताविह वचनार्थस्य चिन्तनात्सङ्गतिः। अग्नीषोमीयपशौ श्रूयते ''मैत्रावरुणः प्रैष्यति चानु चाह'' इति प्रैषशिरस्कानुवचनम्। 'होताऽयक्षदग्निं समिधम्' इत्यनुवचन-मन्त्रस्यान्ते प्रैषश्रवणात् प्रैषयुक्तानुवचनमस्ति। तथा केवलं प्रैषवचनमप्यस्ति 'अग्नये समिध्यमाना-यानुब्रूहि' इत्यादि। तथा केवलानुवचनमप्यस्ति 'प्र वा वाजा अभिद्यवः' इत्यादिकम्। तत्र **सन्देहः** किं

केवलप्रैषवाक्ये केवलेऽनुवचने प्रैषयुक्तानुवचने च सर्वत्र मैत्रावरुणः कर्तेति मैत्रावरुणवाक्यस्यार्थ उत प्रैषयुक्तानुवचन एवेति ।

पूर्वपक्षस्तु 'प्रैष्यति चानु चाह' इति चशब्दाभ्यां प्रैषानुवचनयोः साहित्यप्रतीतावपि प्रैषानुवचनयोरुद्देश्यत्वेन तद्गतसाहित्यस्याविवक्षितत्वात्केवलयोः प्रैषानुवचनयोः सहितप्रैषानुवचनयोश्च सर्वत्रैव कर्तृत्वमिति मैत्रावरुणवाक्यस्यार्थः । न चैवमाध्वर्यवं हौत्रमिति याज्ञिकसमाख्यया प्रेषणानुवचनानाञ्च यथाक्रममध्वर्युहोतृकर्तृकत्वप्राप्त्या तद्विरोधः शङ्क्यः । मैत्रावरुणवाक्येन समाख्याया बाधादिति । तदाह सूत्रे, **प्रैषानुवचनं सर्वं मैत्रावरुणस्य** । कुतः ? **उपदेशादिति** ।

सिद्धान्तस्तु, प्रत्येकमुद्देश्यत्वे प्रत्युद्देश्यं वाक्यसमाप्तेर्वाक्यभेदापातेन प्रैषान्तानुवचनरूप एक एव पदार्थ उद्देश इति प्रैषयुक्तानुवचन एव मैत्रावरुणः कर्तेति मैत्रावरुणावाक्यार्थः । किञ्चव्यस्तयोः प्रैषानुवचनयोः समाख्यया अध्वर्युहोतृकर्तृकत्वं निर्ज्ञातमिति न तत्र कर्त्राकांक्षा । प्रैषयुक्तानुवचने तु प्रैषांशे अध्वर्योरनुवचनांशे होतुः कर्तृत्वेन प्राप्तेः, एकमन्त्रे नानाकर्तृसमावेशायोगात्, अज्ञातकर्तृकत्वे सापेक्षत्वात्, अनपेक्षितविधानात् अपेक्षितविधेर्बलीयस्त्वेन, प्रैषान्तानुवचन एव मैत्रावरुणः कर्तेति 'मैत्रावरुणः प्रेष्यति च' इत्यादिवाक्यस्यार्थ इति । एवञ्च समाख्यायाः प्रैषान्तानुवचनांशे बाधेऽपि न केवलं प्रैषादौ बाध इति । **फलन्तु**, प्रैषान्तानुवचन एव मैत्रावरुणकर्तृतासिद्धिः ।

इति द्वाविंशं समुच्चितयोरनुवचनप्रैषयोर्मैत्रावरुणकर्तृकत्वाधिकरणम् (सूत्राणि ४३-४५)

अथ त्रयोविंशं चमसहोमेऽध्वर्योः कर्तृताधिकरणम् (सूत्राणि ४६-४९)

चमसांश्चमसाध्वर्यवः समाख्यानात् ॥ ४६ ॥

(अध्वर्युवा तन्यायत्वात् ॥ ४७ ॥ चमसे चान्यदर्शनात् ॥ ४८ ॥ अशक्तौ ते प्रतीयेरन् ॥ ४९ ॥)

उपदेशसमाख्यानेनेति सूत्रे वचनेन समाख्याबाधोक्तौ वचनार्थ एव कः? इति विचारितं पूर्वत्र अत्र तु विशेषसमाख्यया यः सामान्यसमाख्याबाध उक्तस्तस्यापवादः क्रियत इति **सङ्गतिः** । सन्ति चमसाध्वर्यवो ज्योतिष्टोमे । ते किं चमसाध्वर्युसमाख्यया चमसैर्जुहुयुरुताध्वर्युरिति **सन्देहः** ।

पूर्वपक्षस्तु, नेष्ट्रीयमित्यादिविशेषसमाख्यया आध्वर्यवमिति सामान्यसमाख्याया इवेहाप्याध्वर्यव-

समाख्याया बाधेन चमसाध्वर्युरूपविशेषसमाख्यया चमसैश्चमसाध्वर्यव एव जुहुयुरिति । तदाह **सूत्रे, चमसांश्चेत्यादि** । जुहुयुरिति शेषः । शिष्टं व्यक्तम् ।

सिद्धान्तस्तु, यत्र सामान्यसमाख्यानिरपेक्षैव विशेषसमाख्या तत्रैव तया तद्बाधः । अत्र तु चमसेष्वध्वर्युवदेत भवन्तीति हि तेषु विशेषसमाख्याप्रवृत्तिः । तत्र यदि चमसैरध्वर्युराध्वर्यवमिति सामान्यसमाख्यया न जुहुयात्तदा चमसे तेषां जुह्वतामध्वर्युवद्भावो न स्यादिति चमसाध्वर्युसमाख्यैव बाधिता स्यात् । अतश्चमसेषु तेषामजुह्वतामेव तद्वद्भाव इति विशेषसमाख्याबलादेवाध्वर्यु- र्जुहुयादिति । न चैवमध्वर्युणैव होमे चमसेषु कृते तेषामजुह्वतां कथं तद्वद्भाव इति शङ्क्यम् । अध्वर्योरन्यत्र ग्रहहोमादौ व्यापृतत्वेनाशक्तौ सत्यां तेषामपि होमसम्भवेन विशेषसमाख्योपपत्तेः । अतः सामान्यसमाख्या-सापेक्षत्वाद्विशेषचमसाध्वर्युसमाख्या न ततो बलवतीति न तया अस्या बाध इत्यध्वर्युश्चमसैर्जुहुयादिति । तदाह **सूत्रे, अध्वर्युर्वा तन्न्यायत्वादिति** । **अध्वर्युश्चमसान्** जुहुयात्, आध्वर्यवसमाख्यया **तस्य न्यायप्राप्तत्वादिति** । **फलन्तु,** अध्वर्युश्चमसहोमकर्ता । तदशक्तौ चमसाध्वर्यवः कर्तार इति व्यक्तम् ।

इति त्रयोविंशं चमसहोमेऽध्वर्योः कर्तृताधिकरणम् (सूत्राणि ४६-४९)

अथ चतुर्विंशं श्येनवाजपेययोरनेककर्तृकताधिकरणम् (सूत्रे ५०-५१)

वेदोपदेशात्पूर्ववद्वेदान्यत्वे यथोपदेशं स्युः ॥ ५० ॥

(तद्ग्रहणाद्वा स्वधर्मः स्यादधिकारसामर्थ्यात्सहाङ्गैरव्यक्तः शेषे ॥ ५१ ॥)

पूर्ववैषम्येण शङ्कनात्**सङ्गतिः** । औद्गात्रेतिसमाख्यायुक्ते सामवेदे श्येनयाग आम्नातः । आध्वर्यव-समाख्यावति यजुर्वेदे वाजपेयः पठितः । द्वावपि ज्योतिष्टोमविकृती । तत्र समाख्यावशाच्छ्येनयागे उद्गातैकः कर्ता वाजपेये चाध्वर्युरेकः कर्ता सन्नतिदेशतः प्राप्तानङ्गपदार्थानुद्गात्रादिः स स एव कुर्यादुत प्रकृताविव श्येने वाजपेये च नानाकर्तार इति **सन्देहः** ।

पूर्वपक्षस्तु, साङ्गश्येनयागादिकं समाख्यावशात्तेन तेनैव कार्यमिति । न च समाख्यान्तरयुक्त-वेदोक्ताङ्गानां तत्तत्पुरुषकार्यतया कथमुद्गात्रादिकार्यतेति वाच्यम् । 'सप्तमाऽध्यनये अङ्गानां प्रधानविधि-विधेयत्वस्य वक्ष्यमाणतया प्रधानवेदस्वरतैवाङ्गानाम्' इति पूर्वत्र तृतीयपादीयद्वितीयनये अभिहित-रीत्याऽत्रापि प्रधानवेदद्वारकसमाख्यैवाङ्गानां प्राप्त्योद्गात्रादिकर्तृताया एव प्राप्तेः । न च चोदकेनाङ्गानां नानाकर्तृकत्वप्राप्तिः शङ्क्या । पूर्वत्र चमसाध्वर्युसमाख्यया आध्वर्यवसमाख्याया अबाधेऽपि प्रधान-

विधिविहितानामौपदेशिकतुल्यत्वेन बलवत्तयाऽऽतिदेशिकनानाकर्तृकत्वस्य बाधादिति । तदाह सूत्रे, **वेदोपदेशात्**प्रधानवेदेनैवोपदेशादङ्गानां प्रधानद्वारकसमाख्यया कर्तारः स्युः । **पूर्ववत्** पूर्वं यथा प्रधानवेदस्वरत्वमुक्तमङ्गानां तद्वत् । **वेदान्यत्वे** हि तत्तद्वेदविधेयत्वे हि **यथोपदेशं** तत्तद्वेदसमाख्यया **कर्तारः स्युरिति** ।

सिद्धान्तस्तु, प्रधानद्वारकसमाख्या हि यदि चोदकप्राप्तेः प्रागेव स्यात्तदा तद्बाधिका स्यात् । न चैवम् । यावद्धि चोदकेनाङ्गानि न प्राप्यन्ते तावत्प्रयोगविधिरूपप्रधानविधेरेवापूर्तेस्ततः प्राक् समाख्यैवात्मानं न लभत इति कथं चोदकेन प्राप्यमाणनानाकर्तॄन्निवारयेत् । चोदकेनाङ्गानां प्राप्तौ च सकर्तृकाण्येवाङ्गानि प्राप्नुवन्ति । किं समाख्या करिष्यति । न हि श्रुतिवत्समाख्या स्वातन्त्र्येण विनियोक्त्री । किन्तु आकांक्षादिकं परिकल्प्य श्रुतिकल्पनाद्वारैव । न च चोदकप्राप्तैरेव कर्तृभिर्निराकांक्षाणामङ्गानामाकांक्षादिकल्पना सम्भवतीति । **यत्तु पूर्ववदित्युक्तम्** । तन्न । वैषम्यात् । अङ्गेषु स्वरस्य प्रधानवेदनिमित्तत्वेऽपि समाख्याया न तन्निमित्तता युक्ता । प्रकृतौ स्तोत्रशस्त्रादिष्वाध्वर्यवसमाख्याया अभावात् । किन्तु पाठनिमित्तैवाङ्गेषु समाख्येति प्रकृतिवन्नानैव श्येनादिषु कर्तारः स्युरिति । **फलन्तु,** नानाकर्तृकता श्येनादौ प्रकृतिवदिति व्यक्तम् ।

इति चतुर्विंशं श्येनवाजपेययोरनेककर्तृकताधिकरणम् (सूत्रे ५०-५१)

इति श्रीभाट्टसङ्ग्रहे सर्वतन्त्रस्वतन्त्रश्रीसुधीन्द्रतीर्थगुरुपादशिष्य-
श्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते तृतीयाध्यायस्य सप्तमः पादः
अस्मिन् पादे अधिकरणानि २४ सूत्राणि ५१
आदिः " २२३ " ६१३

अथ तृतीयाध्यायस्य अष्टमः पादः

अथ प्रथमं क्रयस्य स्वामिकर्मताधिकरणम् (सूत्रे १-२)

अत्र पादे समाख्यायाः पूर्वैः सहाव्यक्तो विरोधश्चिन्त्यत इति पादान्तरता पूर्वानन्तर्यञ्चेति ध्येयम् ।

स्वामिकर्म परिक्रयः कर्मणस्तदर्थत्वात् ॥ १ ॥

(वचनादितरेषां स्यात् ॥ २ ॥)

ज्योतिष्टोमेऽस्ति दक्षिणा । सा च द्वादशशतरूपाऽऽध्वर्यवसमाख्यावति यजुर्वेदे समाम्नाता औद्गात्रसमाख्यायुक्तसामवेदे च । दर्शपूर्णमासयोरन्वाहार्यदक्षिणाप्यध्वर्युर्वेदे । तत्र दक्षिणादानेन ऋत्विक्परिक्रयः किं समाख्यावशादध्वर्व्यादिभिः कर्तव्य उत नेति **सन्देहे,** समाख्यावशादध्वर्व्यादिभिरेव परिक्रयः कर्तव्यः स्यादिति **प्राप्तम्** । न चाध्वर्युः स्वामिकार्यार्थं कथं स्वद्रव्येणान्यान् परिक्रीणीयादिति शङ्क्यम् । यजमानोऽध्वर्यवे द्रविणं दत्वा तद्द्वाराऽन्यान् क्रीणातीत्युपपत्तेः ।

सिद्धान्तस्तु, 'स्वर्गकामो यजेत' इति प्रधानविधिना स्वरसतः साङ्गे प्रधाने स्वामिन एव कर्तृत्वावगतेस्तद्बाधेन समाख्या न कर्त्रन्तरं प्रापयितुमलम् । तथात्वे 'यः कामयेत वीरो म आजायेत इति, स चतुर्होतारं जुहुयात्' इत्यादावपि समाख्याबलेनाध्वर्युकर्तृकत्वापत्तेः । अतः परिक्रयात् प्रागध्वर्व्यादिरभावान्न तत्कर्तृता परिक्रयस्य । किन्तु यजमानकर्तृकत्वमेवेति । यत्र तु वचनमस्ति ''य एतामिष्टकामुपदध्यात् स त्रीन् वरान् दद्यात्'' इत्यादौ तत्रास्त्वध्वर्योरपीति । तदाह **सूत्रे, परिक्रयाः स्वामिकर्म** । कुतः ? **कर्मणः** परिक्रयस्य **स्वाम्यर्थत्वादिति** । **फलन्तु,** यजमानकर्तृकत्वं परिक्रयस्येति व्यक्तम् ।

इति प्रथमं क्रयस्य स्वामिकर्मताधिकरणम् (सूत्रे १-२)

अथ द्वितीयं वपनादिसंस्काराणां याजमानताधिकरणम् (सूत्राणि ३-८)

संस्कारास्तु पुरुषसामर्थ्ये यथावेदं कर्मवद्व्यवतिष्ठेरन् ॥ ३ ॥

(याजमानास्तु तत्प्रधानत्वात्कर्मवत् ॥ ४ ॥ व्यपदेशाच्च ॥ ५ ॥ गुणत्वे तस्य निर्देशः ॥ ६ ॥ चोदनां प्रति भावाच्च ॥ ७ ॥ अतुल्यत्वादसमानविधानाः स्युः ॥८॥)

पूर्ववैषम्येण शङ्कनात्सङ्गतिः । अध्वर्युवेदे ''केशश्मश्रू वपते, नखानि निकृन्तते'' इति श्रूयते । तन्मन्त्रश्च 'आप उन्दन्तु जीवसे' इत्यादिस्तत्रैव श्रुतः । ते किं केशश्मश्रुवपनादयः पुरुषसंस्कारा यजमानसम्बन्धिनोऽथाध्वर्युसम्बन्धिन इति **सन्देहः** ।

पूर्वपक्षस्तु, परिक्रये कर्त्रन्तराप्राप्तेः समाख्यया नियमायोगेपि वपनादिषु कर्त्रन्तरप्राप्तेः परिक्रयविधिबलादेव सिद्धेः समाख्यया नियमसम्भवादाध्वर्यवत्वमेव केशश्मश्रुवपनादेर्युक्तमिति । तदाह **सूत्रे, पुरुषसामर्थ्ये** पुरुषस्य कर्मयोग्यतारूपे फले विनियुक्ता अपि **संस्कारा यथावेदं** यथासमाख्यं व्यवतिष्ठेरन् इति ।

सिद्धान्तस्तु, वपनादयो हि स्वतः संस्कारतया लोके प्रसिद्धाः । संस्काराश्च कार्ययोग्यताऽऽधानार्था इति प्रोक्षणाऽदिषु सिद्धम् । ततश्च स्वामी स्वस्य फलरूपकार्ययोग्यताऽऽधानार्थं स्वस्मिन्नेव वपनादिकमनुमन्यते । न त्वन्यस्मिन् फलभागित्वयोग्यताऽधानार्थमन्यं परिक्रीणीत इति परिक्रयविधिना वपनादिषु कर्न्त्रतराप्राप्तेर्न समाख्यया नियमो युक्त इति यजमानस्यैव वपनादिसंस्कार इति । **फलन्तु,** समाख्याबाधेन वपनादेर्याजमानत्वमिति व्यक्तम् ।

इति द्वितीयं वपनादिसंस्काराणां याजमानताधिकरणम् (सूत्राणि ३-८)

अथ तृतीयं तपसो याजमानताधिकरणम् (सूत्राणि ९-११)

तपश्च फलसिद्धित्वाल्लोकवत् ॥ ९ ॥

(वाक्यशेषश्च तद्वत् ॥ १० ॥ वचनादितरेषां स्यात् ॥ ११ ॥)

पूर्ववैषम्येण **शङ्कनात्सङ्गतिः** । ज्योतिष्टोमे ''व्यहं नाश्नाति, त्र्यहं नाश्नाति'' इति कायशोषणरूपं तपः शब्दितं कर्मास्ति । तत्किं यजमानेन कार्यमुताध्वर्युणेति **सन्देहे,**

पूर्वपक्षस्तु, वपनादीनां फलसंस्कारत्वेन याजमानत्वेप्यनशनरूपतपसः क्लेशात्मकत्वेन सुखार्थिस्वामिप्रतिकूलस्य स्वामिगतातिशयानाधायकतया संस्कारत्वायोगात् स्वामिनस्तत्र गुणभूततया परिक्रयविधिना कर्त्रन्तरप्राप्तेः समाख्ययाऽऽध्वर्यवत्वमेव युक्तमिति ।

सिद्धान्तस्तु, संस्कारता हि कार्ययोग्यताऽऽधायकता । योग्यताऽऽधायकत्वञ्चातिशयजननादिव प्रतिबन्धनिरासादपि लोके दृष्टम् । ततश्च क्रतुफलविपरीतस्वफलभोगदानेन क्रतुफलं प्रतिबध्नतो बलवतो दुःखहेतोरधर्मस्य दुःखात्मकं तपोऽनुभवता भोगेन क्षपणादप्रत्यूहं क्रतुफलोत्पत्तेर्दुःखात्मकस्यापि तपसः कार्ययोग्यताऽऽधायकतया संस्कारत्वाविरोधाद्याजमानत्वमेवेति । तदुक्तं **सूत्रे, तपोऽ**नशनादिकञ्च **फलसिद्ध्यर्थत्वा**द्याजमानमेव । न चातिशयाजनकत्वात्कथं तपसः फलार्थत्वमिति वाच्यम् । प्रतिबन्धकनिवर्तकस्यापि **लोकवत्** फलार्थत्वाविरोधात् इति । **फलन्तु,** तपो याजमानमेवेति व्यक्तम् ।

इति तृतीयं तपसो याजमानताधिकरणम् (सूत्राणि ९-११)

अथ चतुर्थं लोहितोष्णीषतादीनां सर्वर्त्विग्धर्मताधिकरणम्

गुणत्वाद्भेदेन न व्यवस्था स्यात् ॥ १२ ॥

वचनाद्यत्र ऋत्विक्संस्कारः श्रुतस्तत्र विशेषश्चिन्त्यत इति सङ्गतिः । वाजपेये ''हिरण्यमालिनो ऋत्विजः प्रचरन्ति'' इति श्रूयते । तथा श्येनप्रकरणे ''लोहितोष्णीषा लोहितवसना निवीता ऋत्विजः प्रचरन्ति'' इति श्रूयते । ते किं हिरण्यमालित्वादयो धर्माः समाख्यया तत्तत्पुरुषैःकार्या उत सर्वर्त्विग्भिरिति **सन्देहे**

पूर्वपक्षस्तु, अध्वर्युकाण्डे पठिता हिरण्यमालित्वादयोऽध्वर्युभिरेव याजमानत्वप्राप्तावप्यत्र हिरण्येत्यादिवचनादृत्विग्भिः क्रियमाणानां तेषां समाख्याविषयत्वसम्भवादिति ।

सिद्धान्तस्तु, ऋत्विगुद्देशेन विधीयमानानां तेषां प्रतिप्रधानं गुणावृत्तिरिति न्यायेन वचनात् सर्वार्थतासिद्धेर्न समाख्याविषयत्वसम्भव इति सर्वर्त्विग्धर्मा हिरण्यमालित्वादय इति । तदाह सूत्रे, हिरण्यमालित्वादीनामृत्विजः प्रतिगुणत्वात् प्रतिप्रधानमावृत्त्यवश्यंभावाद्भेदेन समाख्यया व्यवस्था न स्यादिति । **फलं तु,** सर्वर्त्विग्धर्मतेति व्यक्तम् ।

इति चतुर्थलोहितोष्णीषतादिनां सर्वर्त्विग्धर्मताधिकरणम्

अथ पञ्चमं वृष्टिकामनाया याजमानताधिकरणम् (सूत्रे १३-१४)

तथा कामोऽर्थसंयोगात् ॥ १३ ॥

(व्यपदेशादितरेषां स्यात् ॥ १४ ॥)

अत्र पूर्ववैषम्येण शङ्कनात्सङ्गतिः । ज्योतिष्टोमे सदोमाने गुणकामः श्रुतः ''यदि कामयेत वर्षुकः पर्जन्यः स्यादिति, नीचैः सदो मिनुयात्'' इति । अयमर्थः, पुरस्तात्पश्चाच्चावस्थितौ हविर्धानप्राचीनवंशौ यथोच्चौ तथा सदो नोच्चं कार्यमिति । तत्र **सन्देहः** । किम् ''अध्वर्युर्यदिकामयेत'' इत्याध्वर्यवः काम इति ।

पूर्वपक्षस्तु, युक्तं पूर्वत्र ''हिरण्यमालिनः'' इत्यादिवाक्यविरोधभिया सर्वर्त्विग्धर्मत्वं हिरण्यमालित्वादीनाम् । इह तु तदभावात् प्रत्युत वाक्येन सदोमानसमानकर्तृकत्वप्रतीतेर्मानकर्तुरध्वर्युत्वाद्वाक्याविरुद्धया समाख्यया कामयतेराध्वर्यत्वमेव युक्तम् । न याजमानत्वमिति ।

सिद्धान्तस्तु डु मिञ् प्रक्षेपणे इत्यस्य ञित्वेन मानफलस्य कर्तृगामित्वे ''स्वरितञितः कर्त्रभिप्राये क्रियाफले'' इत्यात्मनेपदेन भाव्यतया परस्मैपदप्रयोगवशेन मानफलस्यान्यगामित्वप्रतीतेर्वृष्टिलक्षण-फलस्य यजमानगामित्वात्, परस्मैपदश्रुत्या वाक्यसमाख्ययोर्बाधात् याजमानत्वमेव कामयतेः । वाक्यं तु ''यजमानकामितां वृष्टिं पर्जन्यः सम्पादयत्वित्येवं योऽध्वर्युः कामयेत स नीचैः सदो मिनुयात्'' इत्येवं व्याख्येयम् ॥ तदाह सूत्रे, कामस्तथा तपोवद्यजमानः कुतः? अर्थेन फलेन यजमानस्य संयोगादिति । **फलं तु,** याजमानः काम इति व्यक्तम् ।

इति पञ्चमं वृष्टिकामनाया याजमानताधिकरणम् । (सूत्रे १३-१४)

अथ षष्ठं आयुर्दादिमन्त्राणां याजमानताधिकरणम् (सूत्रे १५-१६)

मन्त्राश्चाकर्मकरास्तद्वत् ॥ १५ ॥

(विप्रयोगे च दर्शनात् ॥ १६ ॥)

अत्रापि पूर्ववैषम्येण शङ्कनात्**सङ्गतिः** । अनुष्ठेयक्रियासाधनत्वेनाविनियुक्ताः प्रत्यगाशीरूपा 'आयुर्दा अग्नेस्यायुर्मे देहि' इत्यादयो मन्त्रा आध्वर्यवसमाम्नाते वेदे पठिताः । ते किमध्वर्युणा प्रयोक्तव्या उत यजमानेनेति **सन्देहः** । पूर्वत्र 'मिनुयात्' इति परस्मैपदश्रुत्या समाख्याबाधेन कामयतेर्याजमानत्वेपीह विरोधिश्रुतेरभावात्समाख्ययाऽध्वर्युणैव प्रयोक्तव्या इति **प्राप्ते,**

सिद्धान्त्यते, अत्र मन्त्रे मन्त्रलिङ्गान्मन्त्रोच्चारयितृपुरुषनिष्ठत्वेन प्रधानकर्मफलमाशास्यमवगम्य-मानं यजमानगाम्येव युक्तमिति लिङ्गात्समाख्याया बाधेन याजमानत्वमेव मन्त्रोच्चारणस्येति । तदुक्तं **सूत्रे, अकर्मकराः** कर्माकरणभूता **मन्त्राश्च तद्वत्तपोवद्याजमाना** इति । **फलन्तु** मन्त्रस्य यजमान-प्रयोक्तव्यत्वम् ।

इति षष्ठमायुर्दादिमन्त्राणां याजमानताधिकरणम् (सूत्रे १५-१६)

अथ सप्तमं व्याम्नातस्योभयप्रयोज्यताधिकरणम्

व्याम्नातेषूभौ व्याम्नानस्यार्थवत्त्वात् ॥ १७ ॥

प्रासङ्गिकी **सङ्गतिः** । दर्शपूर्णमासयोः ''वाजस्य मा प्रसवेन'' इत्यादयो मन्त्राः सामान्यरूपेणा-

ध्वर्युकाण्डे विशेषरूपेण यजमानकाण्डे चाऽम्नाताः । ते किं येन केनचित्प्रयोक्तव्याः ? उत यजमानेनैव ? अथाध्वर्युणैव ? किं वोभाभ्याम् ? इति चतुर्धा **सन्देहे पूर्वपक्षस्तु,** मन्त्रस्यैकत्वेनैकेन पठिते सति मन्त्रस्य चरितार्थत्वाद्यः कश्चिद्ब्रूयादित्ये**कः** । विशेषसमाख्याया बलीयस्त्वाद्याजमाना एवेति **द्वितीयः** । स्रुग्व्यूहनादेर्मन्त्रार्थस्याऽध्वर्यवत्वान्मन्त्रोप्यध्वर्युणैव प्रयोक्तव्य इति **तृतीयः** ।

सिद्धान्तस्तु, एकेनैव मन्त्रस्य पाठे काण्डान्तरपाठस्य वैयर्थ्यप्रसङ्गात्, **समाख्याद्वया-** विरोधादुभाभ्यां पठनीय इति कर्तृद्वयसमुच्चयः । परन्तु तयोः पठतोराशयभेदोऽस्ति । **'अनेन मन्त्रेण** प्रकाशितमर्थमनुष्ठास्यामि' इत्यध्वर्योराशयः । 'अत्र न प्रमदिष्यामि' इति यजमानस्येति । तदाह **सूत्रे, व्याम्नातस्य** द्वयोराम्नातस्योभौ प्रयोक्तारौ । कुतः ? तथात्वे व्याम्नानस्यार्थवत्त्वादि**ति । फलन्तु,** उभाभ्यामुच्चारणम् ।

इति सप्तमं व्याम्नातस्योभयप्रयोज्यताधिकरणम्

अथाष्टममभिज्ञस्यैव वाचयितव्यताधिकरणम्

ज्ञाते च वाचनं, न ह्यविद्वान्विहितोऽस्ति ॥ १८ ॥

पूर्वत्रेवात्राप्युभयकर्तृकं मन्त्रोच्चरणमिति शङ्कनाद्वा याजमानमन्त्रप्रसङ्गाद्वा प्रासिङ्गिकी **सङ्गतिः** । वाजपेये श्रूयते ''क्लृप्तोर्यजमानं वाचयति'' इति । ''क्लृपू सामर्थ्ये'' इति धातुनिष्पन्नशब्दरूपोपेतान् ''आयुर्यज्ञेनकल्पताम्'' इत्यादिकान्मन्त्रान् वाचयेदध्वर्युरित्यर्थः । तत्र किं मन्त्रमन्त्रार्थयोरभिज्ञ-मनभिज्ञश्चोभौ वाचयेदुतानभिज्ञमथाभिज्ञमेवेति त्रेधा **सन्देहे**

''विद्वांसमेव वाचयेत्'' इति विशेषाश्रवणादुभावपि वाचयेदित्येकः पूर्वः पक्षः । अभिज्ञः स्वयमेव वक्तुं शक्त इति न वाच्यः । किन्त्वनभिज्ञ एव वाचनीय इत्यन्यः ।

सिद्धान्तस्तु, ''अधिकारो हि विदुषो, नाज्ञस्य'' इति षष्ठाद्यपादे चातुर्वर्ण्यमविशेषादित्यत्र वक्ष्यमाणत्वेनानभिज्ञस्याधिकाराभावाद्विद्वानेव यजमानो वाचनीयः । ''प्रवृत्तप्रवर्तने णिच्'' इति शाब्दिकोक्तेः वदत एव तदनुकूलस्मरणाचरणेनोपपत्तेचाभिज्ञमेव वाचयेदिति । तदाह सूत्रे, ज्ञाते च वाचनं, न ह्यविद्वान् विहितोऽस्तीति । **फलं तु,** ज्ञातुरेव वाचनम् ।

इत्यष्टममभिज्ञस्यैव वाचयितव्यतादिकरणम्

अथ नवमं द्वादशद्वन्द्वानामाध्वर्यवताधिकरणम् (सूत्रे १९-२०)

याजमाने समाम्नानात्कर्माणि याजमानानि स्युः ॥ १९ ॥

(अध्वर्युर्वा तदर्थो हि न्यायपूर्वं समाख्यानम् ॥ २० ॥)

अत्र व्याम्नातवैषम्येण शङ्कनात्सङ्गतिः । आध्वर्यवसमाख्यावति यजुर्वेदे यजमानकाण्डे षष्ठे प्रश्ने दर्शपूर्णमासप्रकरणे श्रूयते ''द्वादश द्वन्द्वानि, दर्शपूर्णमासयोस्तानि सम्पाद्यानि, इत्याहुः । वत्सश्चोपावसृजति उखाश्चाधिश्रयति, अव च हन्ति दृषदौ च समाहन्ति, अधि च वपते, कपालानि चोपदधाति, पुरोडाशं चाधिश्रयति, आज्यञ्च स्तम्बयजुश्च हरति, अभि च गृह्णाति, वेदिश्च परिगृह्णाति, पत्नीश्च सन्नह्यति, प्रोक्षणीश्चासादयति, आज्यं च । एतानि वै द्वादश द्वन्द्वानि दर्शपूर्णमासयोः । तानि य एवं सम्पाद्य यजते'' इति । पलाशशाखया वत्सापाकरणमेकं कर्म । दोहनेन सम्पादितं क्षीरं धारयितुं पिठरस्थापनमन्यत्कर्म । तदुभयमेकं द्वन्द्वम् । तथा व्रीहिणामवघातो दृषदुपलयोः पाषाणान्तरेण समाघात इत्येतदुभयं द्वितीयं द्वन्द्वम् । एवमन्यानि च कर्मद्वन्द्वानि ज्ञेयानि ।

तत्र **सन्देहः**, किं द्वयोर्द्वयोर्मिथः प्रत्यासन्नत्वरूपद्वन्द्वसम्पादनं पदार्थांश्च यजमानः कुर्यात् उताध्वर्युरिति । **पूर्वपक्षस्तु**, व्याम्नातमन्त्रेषु भिन्नविषयत्वेनाविरोधात्समुच्चयेऽपीहैकेन कृतस्यान्येन करणायोगेन समुच्चयायोगात्, अध्वर्युणा आध्वर्यवमिति सामान्यसमाख्यया पदार्थानुष्ठाने कृते यजमानेन द्वन्द्वतालक्षणप्रत्यासन्नत्वकरणासम्भवाच्चान्यतरबाधावश्यम्भावे याजमानरूपविशेषसमाख्यया आध्वर्यवरूपसामान्यसमाख्याया बाधाद्यजमानेनैव तान्यनुष्ठेयानीति । तदाह **सूत्रे, याजमान** इत्यादि । व्यक्तः सूत्रार्थः ।

सिद्धान्तस्तु, आध्वर्यवसमाख्याते यजुर्वेदे याजमानमिदमवान्तरकाण्डम् । महाकाण्डन्त्वाध्वर्यवमेव । तत्रैते वत्सापाकरणादयो धर्माश्चोद्यन्ते । अतः प्रथमं विहितानां अनुपजातविरोधितया तत्रैवाध्वर्युकर्तृकत्वेन निर्ज्ञातानां यजमानेन द्वयोर्द्वयोर्मिथः प्रत्यासन्नत्वरूपद्वन्द्वतासम्पादनमात्रं विधीयते । तच्च यजमानः स्वानुष्ठेयकरणार्थमेवर्त्विजां क्रीतत्वेनाध्वर्युर्यथा द्वयं द्वयमासन्नं करोति तथा कारयतीति । एतेन 'द्वन्द्वानि सम्पाद्य यजते' इति त्त्वाश्रुत्या आत्मनेपदसमानकर्तृकत्वाद्धन्द्वसम्पादनं वचनादेव याजमानम् । तद्बलात्कर्मणामपि स एव कर्ता स्यादिति **निरस्तम्** । प्रयोजककर्तृत्वेन तदुपपत्तेरिति । **फलन्तु**, अध्वर्युकर्तृकतेति व्यक्तम् ।

इति नवमं द्वादशद्वन्द्वानामाध्वर्यवताधिकरणम् (सूत्रे १९-२०)

अथ दशमं होतुराध्वर्यवकरणमन्त्रानुष्ठातृत्वाधिकरणम्

विप्रतिषेधे करणः समवाये विशेषादितरमन्यस्तेषां यतो विशेषः स्यात् ॥ २१ ॥

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः । अग्नीषोमीयपशौ ''परिवीरसि'' इत्यनेन यूपपरिव्याणकरण-मन्त्रेणाध्वर्युर्यूपस्य रशनया परिव्याणं करोति । तदानीं क्रियमाणपरिव्याणं होता ''युवा सुवासाः परिवीत आगात्स उ श्रेयान् भवति जायमानः । तं धीरासः कवय उन्नयन्ति स्वाध्यो मनसा देवयन्तः'' इति मन्त्रेणानुवदति । स च मन्त्रः 'परिवीरसि' इति करणमन्त्रैणानुष्ठीयमानस्यापरिसमाप्त्यवच्छिन्न-स्यानुवादीति क्रियमाणानुवादीत्युच्यते । तौ करणमन्त्रक्रियमाणानुवादिमन्त्रौ चोदकपरम्परया कुण्डपायिनामयनं सत्रं प्राप्तौ । तत्र चाध्वर्योर्होतुश्च **समास** इतिशब्दितोऽभेदः श्रुतः 'यो होता सोऽध्वर्युः' इति । को होता द्वौ मन्त्रौ सकृत्प्रयोक्तुमशक्तः किं हौत्रं ब्रूयादुताध्वर्यवमथानियम इति **सन्देहे** अनियम इत्येकः **पूर्वः पक्षः । अन्यस्तु** यथा पूर्वत्र 'तानि सम्पाद्य यजते' इति वचनं प्रयोजककर्तृत्वेनान्यथोपपन्नमेवं 'यो होता सोऽध्वर्युः' इति वचनमपि होतृत्वेन सत एवाध्वर्युत्वं विद्धातीत्यपरित्यक्तस्वधर्मो होताऽविरुद्धाध्वर्युधर्मैः सम्बन्धमर्हतीति तावता वचनमन्यथोपपन्नं सन्न सामान्यसमाख्यया क्लृप्तं चोदकप्राप्तं होतृकर्तृकत्वं 'युवा सुवास' इति मन्त्रेण बाध्यत इति क्रियमाणानुवादिनमेव मन्त्रं वदेदिति ।

सिद्धान्तस्तु, हौत्राध्वर्यवयोः कर्मणोरुभयोरेकेन कर्तुमशक्यत्वेनान्यतरत्यागेऽवश्यं कार्ये 'यो होता सोऽध्वर्युः' इति प्रत्यक्षवचनेन चोदकतोऽपि प्रबलेनाऽध्यर्वधर्मेषु होतुः प्राप्ततयाऽऽतिदेशिकं हौत्रं क्रियमाणानुवादिमन्त्रं त्यक्त्वाऽऽध्वर्यवमेव 'परिवीरसि' इति करणमन्त्रमेव होता वदेत् । हौत्रं 'युवा सुवासा' इति मन्त्रं तु होतृपुरुषो मैत्रावरुणादिर्वदेदिति । तदेतदाह **सूत्रे, विप्रतिषेधे** विरोधे करणः करणभूताऽध्वर्यव एव मन्त्रः स्यात् । न हौत्रः । कुतः ? **समवाये** हौत्राऽध्वर्यवसमावेशे हौत्रादाति-देशिकादाध्वर्यवस्यौपदेशिकतया **विशेषात्** । तर्हि हौत्रं कः कुर्यात् ? इत्यस्योत्तरं **इतरं** हौत्र**मन्यस्**तदीयो मैत्रावरुणादिः, **तेषा**मपि मध्ये **यतो** यस्मिन् **विशेषः** प्राधान्यविशेषः **स्यात्** स कुर्यादिति । **फलन्तु,** होतुर्हौत्रत्यागः ।

इति दशमं होतुराध्वर्यवकरणमन्त्रानुष्ठातृत्वाधिकरणम्

अथैकादशं प्रैषप्रैषार्थयोः पृथक्कर्तृकत्वाधिकरणम्

प्रैषेषु च पराधिकारात् ॥ २२ ॥

पूर्ववैषम्येणात्र शङ्कनात्सङ्गतिः । दर्शपूर्णमासयोः प्रैषाः समाम्नाताः ''प्रोक्षणीरासादय'' ''अग्नीदग्नीन्विहर'' ''इध्माबर्हिरुपसादय'' इत्यादयः । ते किं प्रैषाः प्रैषार्थभूतप्रोक्षण्यासादनाग्निविहरणादयश्चाध्वर्युणैव कार्या उत अन्यः प्रेषयिताऽन्यस्तदर्थानुष्ठातेति **सन्देहे,**

पूर्वपक्षस्तु, पूर्वत्र विरोधात् हौत्राध्वर्यवरूपसमाख्याद्वयावगतस्यैककर्तृकत्वस्य हानेऽपीह लोट्प्रत्ययस्य प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चेति **सूत्रे** चकारेण लोटोऽपि विधानेन प्राप्तकालवाचितयोपपत्त्या प्रैषार्थत्वाभावेन प्रैषप्रैषार्थयोराध्वर्यवसमाख्यावगतैककर्तृकत्वे विरोधाभावेन तत्त्यागायोगादध्वर्युर्द्वयोरपि कर्तेति । 'आसादय' इत्यादिलोटः प्राप्तकालार्थत्वे कोऽर्थः सम्पन्नः ? इति चेत् ''प्रोक्षण्यासादनादेः प्राप्तः काल इत्यनेनानुष्ठातानुसन्धत्ते'' इत्ययमर्थः सम्पन्नो ध्येयः ।

सिद्धान्तस्तु, लोटः प्राप्तकालार्थत्वेऽपीह मध्यमपुरुषस्य 'अग्नीत्' इति सम्बोधनस्य च चेतनान्तर विषयकत्वेनाऽऽसादनादेः प्राप्तकालस्तव च तदनुष्ठानस्येत्यर्थो विवक्षणीयः इत्यनेकार्थत्वविवक्षागौरवम् । तथा विवक्षायामपि आसादनादिवाक्योच्चारणतदर्थानुष्ठानयोरेककर्तृकत्वा सिद्धिरेव । अतः प्रैषसमाख्यानुरोधाय प्रैषतैव युक्ता । स्वात्मनि च प्रैषायोगात्प्रैषलिङ्गबलादाध्वर्यव समाख्याबाधेन प्रैषप्रैषार्थौ भिन्नभिन्नकर्तृकाविति । तदुक्तं **सूत्रे, प्रैषेषु** प्रैषार्थकर्त्रपेक्षयाऽन्यः कर्ता कुतः ? प्रैषस्य **पराधिकारत्वेन** स्वात्मन्यसम्भवादिति । **फलन्तु,** भिन्नकर्तृकत्वसिद्धिरिति व्यक्तम् ।

इत्येकादशं प्रैषप्रैषार्थयोः पृथक्कर्तृकत्वाधिकरणम्

अथ द्वादशं प्रैषप्रैषार्थयोर्यथाक्रममाध्वर्यवाग्नीध्रताधिकरणम् (सूत्रे २३-२४)

अध्वर्युस्तु दर्शनात् ॥ २३ ॥

(गौणो वा कर्मसामान्यात् ॥ २४ ॥)

सिद्धे च भिन्नकर्तृत्वेऽत्र कर्तृविशेषचिन्तनात्सङ्गतिः । प्रेषयितुरन्यः प्रैषार्थकर्तेत्युक्तम् । स किमध्वर्युः प्रैषार्थकर्ता, प्रेषयिता 'अग्नीत्' उत विपरीतमिति **सन्देहः** । **पूर्वपक्षस्तु,** प्रैषस्य प्राथम्येन

तत्र समाख्याबलादध्वर्युकर्तृकत्वस्य न्याय्यत्वेपि **अङ्गगुणविरोधे च तादर्थ्यादिति** द्वादशाध्याय-द्वितीयपादीयन्यायाद्भूयोनुग्रहन्यायाच्चाङ्गभूते प्रैष एकस्मिन् समाख्याप्राप्ताध्वर्युकर्तृकत्वबाधो युक्तः । न तु प्रधानेष्वनेकेष्वासादनविहरणादिपदार्थेषु । तस्मादध्वर्युः प्रैषार्थकर्ता, प्रेषयिता त्वग्नीदिति । न च तत्रत्याऽग्नीत्पदस्य का गतिरिति शङ्क्यम् । गौण्या वृत्त्या अध्वर्युपरत्वसम्भवादिति । तदाह **सूत्रे, अध्वर्युः** प्रैषार्थकर्ता । कुतः ? ''तिर्यञ्चं स्फ्यं धारयेत्, यदन्वञ्चं धायेद्वज्रो वै स्फ्यो, वज्रेणाध्वर्युं क्षिणोति'' इति स्फ्यहस्तात्प्रेषकादन्यत्वेनाध्वर्योर्दर्शनादिति ।

सिद्धान्तस्तु, समाख्याया अबाधेनोपपत्तौ क्वापि बाधायोगात्, अग्नीत्पदस्य गौणार्थत्वस्य मुख्यार्थसम्भवेनायोगात्, प्रैषस्याध्वर्युकर्तृकत्वेऽपि अग्नीत्कर्तृकप्रैषार्थं प्रति प्रयोजककर्तृत्वेन तत्कर्तृ-त्वस्यापि सम्भवात्प्रेषयिताऽध्वर्युः प्रैषार्थानुष्ठाता अग्नीदिति । यत्त्वर्थवादे 'अध्वर्युं क्षिणोति' इत्यध्वर्योः प्रेष्यत्वदर्शनमस्तीत्युक्तम् तत्राध्वर्युशब्दो गौणवृत्त्या आग्नीध्रपरो ध्येयः । तदाह **सूत्रे, गौणो वा कर्म-सामान्यादिति** । अध्वर्युवेदे समाम्नातपदार्थ**कर्तृत्वसामान्यात्** आग्नीध्रे **गौणो**ऽध्वर्युशब्द इत्यध्वर्युरिव प्रैषकर्तेति । **फलं** व्यक्तम् ।

इति द्वादशं प्रैषप्रैषार्थयोर्यथाक्रममाध्वर्यवाग्नीध्रताधिकरणम् (सूत्रे २३-२४)

अथ त्रयोदशं करणमन्त्रेषु स्वामिफलस्याशासितव्यताधिकरणम् (सूत्राणि २५-२७)

ऋत्विक्फलं करणेष्वर्थवत्त्वात् ॥ २५ ॥

(स्वामिनो वा तदर्थत्वात् ॥ २६ ॥ लिङ्गदर्शनाच्च ॥ २७ ॥)

पूर्वाधिकरणस्य प्रैषाधिकरणोक्तार्थे विशेषचिन्तारूपत्वेन तदन्तर्भावात्प्रैषाधिकरणन्यायेनात्र शङ्कनात्सङ्गतिः । **मन्त्राश्चाकर्मकरा** इत्यत्र पूर्वमकरणभूताः प्रत्यगाशिषो मन्त्रा लिङ्गाद्याजमाना इत्युक्तम् । ये तु दर्शपूर्णमासप्रकरणस्था 'ममाग्ने वर्चो विहवेष्वस्तु' इत्यादय आहवनीयान्वाधानादि-करणभूताः प्रत्यगाशीरूपा अप्यध्वर्युणैव पठ्यन्ते तत्र **सन्देहः**, मन्त्रगतं वर्चःप्रभृति फलं किम-ध्वर्योरुत यजमानस्येति ।

पूर्वपक्षस्तु, पूर्वत्राग्नीदिति सम्बुध्वन्तपदलिङ्गात्प्रैषस्येवेहापि 'विशिष्टं हवः हवनं येषां यज्ञानां तेषु विहवेषु, वर्चस्तेजस्तदुपलक्षितं फलं ममास्तु' इति ममेति पदलिङ्गान्मन्त्रप्रकाश्यवर्चःप्रभृति-

फलस्याध्वर्युगामित्वमेव युक्तमिति । तदाह **सूत्रे, करणमन्त्रेषु ऋत्विक्फलमेव** प्रकाश्यम् । ऋत्विगुत्साहजनने**नार्थवत्त्वादिति**।

सिद्धान्तस्तु, ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' इत्यात्मनेपदश्रुत्या साङ्गप्रधानभावनाविषयाङ्गफलानामपि यजमानगामित्वप्रतीतेर्यजमानपरिक्रीतस्याध्वर्योर्दक्षिणातिरिक्तफलसम्बन्धस्यान्याय्यत्वाच्छ्रुतिन्यायाभ्यां विरुद्धं तल्लिङ्गं यजमानपरत्वेनोपचारेण नेयम् **'मम** मदीयस्य यजमानस्य वर्चोऽस्तु' इति । तस्माद्यजमानेन पाठ्येषु 'आयुर्दा अग्नेऽस्यायुर्मे देहि' इत्यादिप्रत्यगाशीर्मन्त्रेषु श्रुतफलं यथा याजमानं तथैवाध्वर्युणा पाठ्येषु करणमन्त्रेषु श्रुतमपि फलं याजमानमेवेति । तथाह **सूत्रे, स्वामिनो वा तदर्थत्वादिति । स्वामिनो** यजमानस्यैव फलं कर्मणस्तदर्थत्वादिति । **फलन्तु,** ममेति पदेन यजमान एवाध्वर्युणा स्मर्तव्या न स्वात्मेति ।

इति त्रयोदशं करणमन्त्रेषु स्वामिफलस्याशासितव्यताधिकरणम् (सूत्राणि २५-२७)

अथ चतुर्दशं करणमन्त्रेषु कर्मार्थफलस्य ऋत्विग्धर्मताधिकरणम्

कर्मार्थं तु फलं तेषां स्वामिनं प्रत्यर्थवत्त्वात् ॥ २८ ॥

अत्रापि पूर्वन्यायेन शङ्कनात्सङ्गतिः । दर्शपूर्णमासयोराघारहोमार्थमाज्यपूर्णौ पृथक् स्रुक्स्रुवौ गृहीत्वा नाभिसमीपे हस्तेन धारयति । तत्रायं करणमन्त्रोऽध्वर्युणा पठ्यते ''अग्नाविष्णू मा वामवक्रमिषं विजिहाथां मा मा सन्ताप्तं लोकं मे लोककृतौ कृणुतम्'' इति । भोः स्रुक्स्रुवरूपावग्नाविष्णू युवां नाभिदेशे धारयन्नहमध्वर्युर्वां **मावक्रमिषं** युवयोरतिक्रमं न कृतवानस्मि । युवाञ्च मा वियुक्तौ भवतम् । ततो मां देहधारिणं **मा सन्ताप्तं** मद्देहे सन्तापं ज्वरादिकं मा कुरुतम् । युवामाघारहोमायाग्निमण्डनं कुरुतमिति तदर्थः । तत्रैतन्मन्त्रप्रकाश्यसन्तापाभावरूपं फलं किं यजमान गाम्युताध्वर्युगामीति **सन्देहे स्वामिनो वा तदर्थत्वादि**त्युक्तन्यायेन वर्चोवद्यजमानगामीति **प्राप्तम्** पूर्वत्रेवाऽऽत्मनेपदश्रुतिविरोधात् म इत्यस्मच्छब्दरूपलिङ्गबाधादिति ।

सिद्धान्तस्तु, युक्तं पूर्वत्र वर्चोरूपफलस्याध्वर्युगततया यजमानेनानिष्यमाणत्वादात्मने- पदश्रुतिविरोधान्ममेति श्रुतलिङ्गबाधेन यजमानगामित्वम् । इह त्वसन्तप्तेनैव कर्म कर्तव्यमित्यसन्तापस्याध्वर्युगतत्वेनापि यजमानेच्छाविषयत्वं स्वाभिमतकर्मसमास्यर्थमावश्यकमिति, तदपि याजमानमेवेत्यात्मने-

पदश्रुत्यविरोधान्न लिङ्गबाधो युक्तः तस्मादसन्तापादिकमध्वर्युगामीति । तदाह **सूत्रे**, **कर्मानुष्ठानौपयिकं फलन्तु तेषा**मृत्विजामेव तादृशफलस्यात्मीयकर्माविघातार्थमृत्विग्गामितया **स्वमिनं प्रत्यर्थवत्त्वादि**ति । **फलन्तु**, **पूर्वपक्षे** अस्मच्छब्देन यजमान एव स्मर्तव्यः । **सिद्धान्ते**ऽध्वर्युरेवेति ।

इति चतुर्दशं करणमन्त्रेषु कर्मार्थफलस्य ऋत्विग्धर्मताधिकरणम्

अथ पञ्चदशं करणमन्त्रेषु क्वचित्कर्मार्थफलस्य यजमानर्त्विगुभयधर्मताधिकरणम्

व्यपदेशाच्च ॥ २९ ॥

पूर्ववैषम्येणात्र शङ्कनात्**सङ्गतिः** । ज्योतिष्टोमे हविर्धानमण्टपे सोमाभिषवाधारयोः फलकयोरधस्ताच्चतसृष्वाग्नेयादिविदिक्षु चत्वार उपरवनामका गर्ता अरत्निमात्रखाता अधोभागे परस्परं मिलिता ऊर्ध्वभागे प्रादेशमात्रव्यवहिता वर्तन्ते । तेष्वेकस्मिन्नुपरवके यजमानो दक्षिणहस्तं प्रसारयति । तत्रैवाध्वर्युरपि स्वहस्तं प्रसार्याधस्ताद्यजमानहस्तं गृह्णाति । तदा यजमानः 'किमत्र भद्रं तन्नौ सह' इति मन्त्रे 'किमत्र' इत्यंशेन फलं पृच्छति । अध्वर्युश्च 'भद्रम्' इत्यंशेनोत्तरं ब्रूते । ततो यजमानः 'तन्नौ सह' इति मन्त्रेण तत्फलं स्वकीयत्वेन स्वीकरोति । तत्र **सन्देहः**, भद्ररूपं फलं स्वामिमात्र-गाम्युताध्वर्युगाम्यपीति ।

पूर्वपक्षस्तु, भद्ररूपफलस्य कर्मानौपयिकतयाऽध्वर्युगामित्वेनासन्तापस्येव यजमानेच्छाविषयत्वाभावात्केवलं याजमानत्वेमवेति । **सिद्धान्तस्तु**, ''नौ'' इति द्विवचनेन ''सह'' इत्यनेन चोभयगामित्वप्रतीतेर्द्वयोरपि भद्ररूपं फलमिति । तदाह **सूत्रे**, द्विवचन**व्यपदेशात्** भद्ररूपं फलं **तेषाञ्च** ऋत्विजामपीति पूर्वानुवृत्त्यार्थो ध्येयः ।

फलन्तु, 'नौ' इति पदेनाध्वर्युः स्वात्मा च यजमानेन स्मर्तव्याविति ।

इति पञ्चदशं करणमन्त्रेषु क्वचित्कर्मार्थफलस्य यजमानर्त्विगुभयधर्मताधिकरणम्

अथ षोडशं प्राकृतधर्माणां विकृतावपूर्वपदार्थानङ्गताधिकरणम् (सूत्रे ३०-३१)

द्रव्यसंस्काराः प्रकरणाविशेषात्सर्वकर्मणाम् ॥ ३० ॥

(निर्देशात्तु विकृतावपूर्वस्यानधिकारः ॥ ३१ ॥)

एवं श्रुत्यादिभिः पूर्वपूर्वैरुत्तरोत्तरस्य विरोधाविरोधविचारे समाप्ते, तस्य च प्रकृताविव विकृतावप्यविशेषात् **प्रकरणाविशेषादसंयुक्तं प्रधानस्येति** पूर्वपादाद्यनये बर्हिर्धर्माणामङ्गप्रधानसाधारण्यं यदुक्तं तद्विकृतिषु कथमिति चिन्तयितुं द्रव्येत्यादि प्राप्यत इति प्राप्तिमात्रमेतत्। **यद्वा पूर्वपक्षसूत्रमिदम्। तथा हि,** पूर्वपादे अङ्गप्रधानार्थतयोक्ता लवनादयो बर्हिरादिधर्माः। ते किं विकृतावतिदिश्यमाना यूपावटास्तरणबर्हिष्वपि भवन्त्युत नेति **सन्देहे** अङ्गप्रधानार्थतया बर्हिरादिधर्माणां प्रागुक्ततया विकृतिगतयूपावटास्तरणबर्हिष्यपि स्युरिति **प्राप्तम्।** तदाह **सूत्रे, द्रव्यसंस्कारा** लवनादयः **प्रकरणाविशेषात्** प्रधानोपकारिसर्वकर्मसम्बन्धिनि बर्हिषि स्युरिति।

सिद्धान्तस्तु, प्रकृतौ बर्हिर्धर्मा बर्हिःकार्यप्रयुक्ताः। न बर्हिःस्वरूपप्रयुक्ताः। आनर्थक्यात्। कार्यद्वारेणैव विकृतावतिदिश्यन्ते। यूपावटास्तरणं न प्राकृतं कार्यम्। अतो यूपावटास्तरणसाधने बर्हिषि न लवनादयो बर्हिर्धर्माः। तदाह **सूत्रे, निर्देशात्तु** विकृतावपूर्वस्यानधिकार इति। **विकृतौ** कार्यमुखेन धर्माणामतिदेशात् **अपूर्वस्या**प्राकृतकार्यस्या**नधिकारो** न धर्मसम्बन्ध इति। **फलन्तु,** यूपावटास्तरणसाधनबर्हिषि बर्हिर्धर्माननुष्ठानम्।

इति षोडशं प्राकृतधर्माणां विकृतावपूर्वपदार्थानङ्गताधिकरणम् (सूत्रे ३०-३१)

अथ सप्तदशं विधृतिपवित्रयोः परिभोजनीयबर्हिषा कर्तव्यताधिकरणम्

विशये च श्रुतिविरोधादव्यक्तः शेषे ॥ ३२ ॥

विकृतौ न सर्वार्था द्रव्यसंस्कारा इत्युक्तिप्रसङ्गात्प्रकृतावपि नातीव सर्वार्था धर्मा इत्युच्यत इति **सङ्गतिः।** दर्शपूर्णमासयोः ''समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे करोति'' इति श्रुतम्। तथा विधृती अपि श्रुते। **विधृती** नाम वेद्यामुदगग्रतया स्थाप्यौ 'ऐक्षवी विधृती'' इति वाक्योक्तौ कुशौ। तानि किं विधृतिपवित्राणि लवनादिसंस्कृताद्वेदिस्तरणार्थाद्बर्हिषः कार्याणि, किं वा बर्हिस्सापेक्षप्राकृतसर्वधर्मादसंस्कृतात् परिभोजनीयादिति **संशये,** बर्हिर्धर्माणां प्रधानोपकारिबर्हिर्मात्रार्थत्वात् विधृत्यादीनां प्रधानोपकारित्वाविशेषात्संस्कृतादेव बर्हिषो विधृत्यादिकरणमिति **प्राप्ते,**

कृत्स्नस्यापि लवनादिसंस्कृतस्य बर्हिषो ''बर्हिषा वेदिं स्तृणाति'' इति विहितवेदिस्तरणे विनियोगान्न ततो विधृत्यादिकरणम्। किन्तु यथा यूपावटमसंस्कृतेन बर्हिषा स्तृणाति तथा

विधृतिपवित्रनिष्पत्तिरपि शास्त्रीयलवनादिसंस्काररहितैः परिभोजनीयनामकैर्दर्भैः कार्येति **सिद्धान्तः**। तदाह **सूत्रे, विशये** सधर्मकादधर्मकाद्वा इति विशये सधर्मकान्न कर्तव्यम्। कुतः ? 'बर्हिषा वेदिं स्तृणाति' इति संस्कृतस्य वेदिस्तरणार्थत्वबोधकश्रुतिविरोधात्। केन विधृत्यादिकरणमिति चेत् **अव्यक्तः** अनेन कर्तव्य इत्यनिर्णीतो विधृत्यादिः **शेषे** परिभोजनीयाख्येऽसंस्कृते दर्भे इति। **फलन्तु,** असंस्कृतधर्मेण विधृत्यादिकरणमिति।

इति सप्तदशं विधृतिपवित्रयोः परिभोजनीयबर्हिषा कर्तव्यताधिकरणम्

अथाष्टादशं प्राकृतपुरोडाशादीनां निधानाधिकरणम्

अपनयस्त्वेकदेशस्य विद्यमानसंयोगात्॥ ३३॥

आपवादिकी **सङ्गतिः**। ज्योतिष्टोमे श्रूयते 'पुरोडाशशकलमैन्द्रवायवस्य पात्रे निदधाति' इति शकल एकदेशः। तत्र **सन्देहः,** तत्किं सवनीयपुरोडाशादपनीय शकलः पात्रे निधातव्य उत पुरोडाशान्तरमुत्पाद्य तच्छकलस्य निधानमिति।

पूर्वपक्षस्तु, यथा हि पूर्वत्र संस्कृतबर्हिषो वेद्यास्तरणे विनियोगादसंस्कृतेनैव विधृत्यादिकरणं तथेहापि यागार्थस्यान्यत्र विनियोगासम्भवान्नूतनं किञ्चित्पुरोडाशं सम्पाद्य तदीयशकलेनैन्द्रवायवे प्रक्षेपक्रिया कार्येति।

सिद्धान्तस्तु, सवनीयपुरोडाशशकलस्यैवैतन्निधानम्। 'शकलं निदधाति' इति द्वितीयाश्रुत्या शकलस्य संस्कार्यत्वावगमात्, इष्टिशिष्टस्यैव प्रतिपत्तिरूपसंस्कारापेक्षणात्। न चात्र पूर्वत्र बर्हिष इव कृत्स्नस्य यजने विनियोगाच्छकलो नेति शङ्क्यम्। अवदानस्येयत्तया पुरोडाशस्यावशेषितत्वात्। एवं 'धाना आश्विने पात्रे' 'पयस्यां मैत्रावरुणपात्रे' इत्यत्रापि पूर्वशेषस्यैव प्रक्षेपो ध्येयः। तदाह **सूत्रे,** विनियुक्तपुरोडाशाद्येक**देशस्यैवायमपनयः** संस्कारः। कुतः ? **विद्यमानेन** पुरोडाशादिना द्वितीयया **संयोगादिति। फलन्तु,** सवनीयपुरोडाशैकदेशस्यान्यत्र निधानम्। न नूतनस्येति।

इत्यष्टादशं प्राकृतपुरोडाशादीनां निधानाधिकरणम्

अथैकोनविंशं काम्येष्टिषूपांशुत्वधर्मस्य प्रधानार्थताधिकरणम् (सूत्रे ३४-३५)

विकृतौ सर्वार्थः शेषः प्रकृतिवत् ॥ ३४ ॥

(मुख्यार्थो वाऽङ्गस्याचोदितत्वात् ॥ ३५ ॥)

विकृतावातिदेशिकानां बर्हिरादिधर्माणामङ्गप्रधानसाधारण्याभावेऽप्यौपदेशिकानां प्रकृताविव तदस्त्विति शङ्कनात्**सङ्गतिः** । ''यज्ञाथर्वणं वै काम्या इष्टयः, ता उपांशु यष्टव्याः'' इति विकृतौ श्रूयते । अथर्ववेदोक्तकर्मवद्यज्ञेषु काम्या इष्टयो गोप्याः । तस्मात्ता उपांशु कर्तव्या इति **तदर्थः** । तत्र किमुपांशुत्वमङ्गप्रधानार्थमुत प्रधानार्थमेवेति **सन्देहः** ।

पूर्वपक्षस्तु, यथा हि हविरासादनद्वारकाणां बर्हिषां तद्धर्माणाञ्चाविशेषादङ्गप्रधानार्थता तथा मन्त्रोच्चारणद्वारकस्योपांशुत्वस्याप्युभयार्थतेति । तदुक्तं **सूत्रे, विकृतौ शेष** उपांशुत्वादिः **सर्वार्थो**ऽङ्गप्रधानः । **प्रकृतौ** यथा बर्हिरादिधर्मा**स्तथे**ति ।

सिद्धान्तस्तु, युक्तं तत्र ''बर्हिषि हवींष्यासादयति'' इति वाक्येनैव प्रधानोपकारिहविर्मात्रद्वारकत्वावगमाद्बर्हिरादेरङ्गप्रधानार्थत्वम् । इह तु वाक्यात्प्रधानार्थतयैव विधानान्नोभयार्थत्वम् । किन्तु प्रधानकाम्येष्टयर्थतैवोपांशुत्वस्येति । अङ्गानां तत्तद्भेदानुसारेण स्वरो ध्येयः । तदाह **सूत्रकारः, मुख्यार्थो वाऽङ्गस्याचोदितत्वादिति** । **काम्येष्टयर्थ** उपांशुत्वादिः । **अङ्गस्य** फलवाक्येना**चोदितत्वादिति** । **फलन्तु,** उपांशुत्वं प्रधानार्थमिति व्यक्तम् ।

इत्येकोनविंशं काम्येष्टिषूपांशुत्वधर्मस्य प्रधानार्थताधिकरणम् (सूत्रे ३४-३५)

अथ विंशं श्येनाङ्गानां नवनीताज्यताधिकरणम् (सूत्राणि ३६- ३८)

सन्निधानविशेषादसम्भवे तदङ्गानाम् ॥ ३६ ॥

(आधानेऽपि तथेति चेत् ॥ ३७ ॥ नाप्रकरणत्वादङ्गस्य तन्निमित्तत्वात् ॥ ३८)

पूर्वन्यायेन शङ्कनात्**सङ्गतिः** । श्येने श्रूयते ''दृतिनवनीतमाज्यं भवति'' इति । दृतिश्चर्मभस्त्रिका । तत्र चिरं संङ्गृहीतं यन्नवनीतं तत्प्रकृतिद्रव्यकमाज्यमिति **तदर्थः** । तत्किं प्रधानार्थमुताङ्गार्थमिति **सन्देहः** ।

पूर्वपक्षस्तु, आज्यस्य श्येने अप्राप्तेराज्योद्देशेन तत्प्रकृतितया दृतिनवनीतविधानासम्भवाद्दृतिनवनीतप्रकृतिकमाज्यं विशिष्टमेव विधेयम्। तच्च पूर्वत्र वाक्यादुपांशुत्वस्येव प्रकरणात् प्रधानश्येनयागार्थं सोमप्रत्याम्नानतयैवेति।

सिद्धान्तस्तु, यदि सर्वथा आज्यस्याप्राप्तिः स्यात्तदैवं स्यात्। इह तु प्रधाने तदप्राप्तावप्यङ्गेष्वतिदेशतस्तत्प्राप्तिसम्भवात्तदनुवादेन दृतिनवनीतगुणविधाने लाघवान्न विशिष्टविधिगौरवाङ्गीकारो युक्तः। तस्मात् 'दृतौ नवनीतं प्रकृतिद्रव्यं यस्य तदाज्यं दृतिनवनीतम्' इति व्युत्पत्त्या आज्यप्राप्तिमच्छ्येनाङ्गेष्वेव तस्य निवेश इति। तदाह **सूत्रे, असम्भवे** प्रधानार्थत्वासम्भवे दृतिनवनीतं **तदङ्गानां स्यात्।** न च श्येने आतिदेशिकसोमबाधेन दृतिनवनीतविधिरस्त्विति वाच्यम्। आज्यपदसन्निधानविशेषादाज्योद्देशेनैव तद्विधानौचित्यादिति। **फलन्तु,** श्येनाङ्गनिवेशो दृतिनवनीताज्यस्येति व्यक्तम्।

इति विंशं श्येनाङ्गानां नवनीताज्यताधिकरणम् (सूत्राणि ३६-३८)

अथैकविंशं सर्वेषां श्येनाङ्गानां नवनीताज्यताधिकरणम् (सूत्राणि ३९-४१)

तत्काले वा लिङ्गदर्शनात्॥ ३९॥

(सर्वेषां वाऽविशेषात्॥ ४०॥ न्यायोक्ते लिङ्गदर्शनम्॥ ४१॥)

उक्ते श्येनाङ्गधर्मत्वेऽत्र तद्विशेषचिन्तनात्सङ्गतिः। दृतिनवनीतत्वं किं सुत्याकालीनेषु पशुतत्पुरोडाशरूपेष्वङ्गेषु स्यादुत कालान्तरवर्तिदीक्षणीयाद्यङ्गेष्वपीति **सन्देहः।**

पूर्वपक्षस्तु, सुत्याकालीनाङ्गेष्वेव स्यात्। कुतः? विमतो दृतिनवनीतत्वगुणः सुत्याकालीन एव भवितुमर्हति, सामान्यतः श्येनाङ्गत्वेन विहितत्वात् पशुसाहित्यवदित्यनुमानात्सिद्धेः। न च दृष्टान्तः साध्यविकलः। ज्योतिष्टोमाच्चोदकतः प्राप्तानामग्नीषोमीयसवनीयानुबन्ध्यानां त्रयाणां पशूनां 'सह पशूनालभते' इति श्येनाङ्गत्वेन विहितस्य साहित्यस्य सुत्याकालीनसवनीयपशौ दृष्टत्वात्। कथम्? अग्नीषोमीयस्य स्थाने 'अग्नीषोमीयः पुरोडाशः' अनुबन्ध्यायाः स्थाने 'मैत्रावरुणी पयस्या' इत्यग्नीषोमीयानुबन्ध्यापशुस्थानयोः पुरोडाशामिक्षाविधानेन तयोः स्थानयोः पशुशून्यत्वावगमेन सुत्याकाल एव पशुसाहित्यमित्यवगमात्। न च लोहितोष्णीषत्वस्य श्येनाङ्गस्य सर्वार्थत्वात् तत्र व्यभिचारः।

तदन्यत्वे सतीति हेतुविशेषणादिति। तदाह **सूत्रे, तत्काले** सुत्याकालीनाङ्ग एवेदं दृतिनवनीतं स्यात्। पशुसाहित्यादीनां श्येनवैशेषिकाङ्गानां सुत्याकालत्वरूप**लिङ्गदर्शनादिति**।

सिद्धान्तस्तु, 'यदाज्यं तद्दृतिनवनीतम्' इति आज्यसामान्यानुवादे दृतिनवनीतम् विदधद्वाक्यं सर्वार्थमेवावगमयतीति वाक्येनानुमानस्य बाधात्सर्वाङ्गेषु निवेशोऽस्य गुणस्येति। तदाह **सूत्रे, सर्वेषां वाऽविशेषादिति**। **फलन्तु,** आज्यप्राप्तिमत्सर्वाङ्गेषु दृतिनवनीताऽज्यनिवेशः।

इत्येकविंशं सर्वेषां श्येनाङ्गानां नवनीताऽज्यताधिकरणम् (सूत्राणि ३९-४१)

अथ द्वाविंशं सवनीयानां मांसमयताधिकरणम् (सूत्राणि ४२-४४)

मांसन्तु सवनीयानां चोदनाविशेषात्॥ ४२॥

(भक्तिसन्निधावन्याय्येति चेत्॥ ४३॥ स्यात्प्रकृतिलिङ्गत्वाद्वैराजवत्॥ ४४॥)

पूर्वन्यायेनात्र शङ्कनात्सङ्गतिः। षट्त्रिंशत्सु संवत्सरेष्वनुष्ठेयं शाक्यानामयनं नाम सत्रम्। तत्रैतद्वाक्यं श्रूयते ''संस्थितेऽहनि गृहपतिर्मृगयां याति। स यान् मृगान् हन्ति तेषां तरसमयाः सवनीयाः पुरोडाशा भवन्ति'' इति। तरसमया मांसमया इत्यर्थः। तत्र **सन्देहः,** किं तरसमयत्वं सर्वपुरोडाशानां विधीयते, किंवा सवनीयानामेवेति। यथा हि पूर्वत्र नवनीतं सर्वश्येनाङ्गार्थमेवं पुरोडाशमात्रानुवादेन वाक्याद्विधीयमानं तरसमयत्वमपि सर्वपुरोडाशार्थं स्यात्। सङ्कोचकाभावात्। अवयुत्यानुवादतया सवनीयपदस्योपपत्तेः। 'सृष्टीरुपदधाति' इत्यत्र सृष्ट्यसृष्टिसमुदाये सृष्टिपदस्येव सवनीयासवनीयसमुदाये सवनीयपदस्यामुख्यवृत्त्या वोपपत्तेरिति **प्राप्ते**

सिद्धान्तः, युक्तं पूर्वत्राऽज्यानुवादेन नवनीतगुणविधानादाज्योपेतसर्वाङ्गार्थत्वं नवनीतस्य। न चैवमिह पुरोडाशानुवादेन तरसमयता विधीयते। तथात्वे मुख्यस्य प्रकृतावदृष्टलक्षणस्य सवनीयपदस्य लाक्षणिकत्वापातः व्यवहितान्वयापातश्च स्यात्। अतः सन्निहितान्वयलाभाय 'ये सवनीयास्ते तरसमयाः' इति सवनीयानुवादेन तरसमयताविधिरेव युक्तः। तथा सति जघन्ये पुरोडाशपदे धानाकरम्भपरिवापपुरोडाशपयस्यारूपसवनीयनानाद्रव्यलक्षणा च न दुष्यति। प्रकृतौ 'पुरोडाशा-नलङ्कुरु' इत्यत्र पुरोडाशपदे धानादिनानाद्रव्यलक्षकताया दृष्टत्वाच्च। तस्मात् सवनीयनानाद्रव्य-

विकारतैव तरसमयस्येति । तदेतदाह **सूत्रकारः, सवनीयानां तु मांसं** विधीयते । कुतः ? **चोदनाविशेषात्** । चोदनाया विधेः सन्निहितान्वयरूपविशेषलाभादिति । **फलन्तु,** धानादिपञ्चहविषां मांसमयत्वमिति व्यक्तम् ।

इति द्वाविंशं सवनीयानां मांसमयताधिकरणम् (सूत्राणि ४२-४४)

इति श्रीभाट्टसङ्ग्रहे सर्वतन्त्रस्वतन्त्रसुधीन्द्रतीर्थगुरुपादशिष्यश्रीराघवेन्द्रतीर्थयतिसार्वभौमकृते

तृतीयाध्यायस्याष्टमः पादः

अस्मिन् पादे अधिकरणानि २२ सूत्राणि ४४

आदितः " २४५ " ६५७

तृतीयाध्यायः समाप्तः ।

अधिकरणार्थसङ्ग्रहः

अथ प्रथमे प्रमणाध्याये विधिपादः प्रथमः

१. ''स्वाध्यायोऽध्येतव्यः'' इत्यनेन विहितस्याध्ययनस्य धर्मरूपार्थज्ञानं दृष्टमेव फलम् । नादृष्टः स्वर्गः । लिखितपाठादिनाऽर्थज्ञानसम्भवेप्यध्ययनेनैवार्थज्ञानं सम्पदनीयमिति नियमविधिरयम्। स्वर्गादिसाधनधर्मज्ञानसाधनीभूता धर्मजिज्ञासा कर्तव्यैव ।

२. धर्मे विध्युपेतशब्दरूपा चोदना प्रमाणम् । श्रेयःसाधनत्वे सति चोदनागम्यत्वं लक्षणम् । ताभ्यां धर्मस्वरूपसिद्धेर्धर्मजिज्ञसायाः कर्तव्यत्वोक्तिर्युक्ता ।

३. ''चोदनैव धर्मे प्रमाणम्'' ''चोदना प्रमाणमेव'' इति विवक्षितोऽर्थः परीक्षणीय एव ।

४. चोदनैव धर्मे प्रमाणम् ।। न तदतिरिक्तं प्रत्यक्षादिकम् ।

५. चोदनाया अर्थावबोधकत्वात्स्वतः प्रमाणत्वाच्च धर्मे प्रामाण्यं युक्तम् ।

६. ''स एवायं गकारः'' इत्यबाधितप्रत्यक्षप्रत्यभिज्ञानाच्छब्दनां नित्यत्वम् । अतश्चोदनायाःप्रामाण्यं वाक्यार्थयोः सम्बन्धस्यौत्पत्तिकत्वञ्च युक्तम् ।

७. पदात्मकशब्दस्येव पदकदम्बकात्मकवाक्यस्याप्यनादिनित्यतया वाक्यरूपचोदनाया अपि प्रामाण्यमेव ।

८. वेदस्यापौरुषेयत्वेन प्रामाण्येन तन्मध्यगतचोदनापि प्रमाणमेव ।

अथ प्रथमे प्रमाणाध्याये अर्थवादमन्त्रपादो द्वितीयः

१. अर्थवादस्य प्रयत्नापरपर्यायर्थभावनातदंशत्रयप्रतिपादकत्वाभावेपि लिङादिरूपविधिप्रत्यय-वाच्ययं शब्दभावनयं प्राशस्त्यरूपेतिकर्तव्यतासमर्पणेन विध्येकवाक्यतया प्रामाण्यं युक्तम् ।

२. ''ऊर्जोऽवरुद्ध्यै'' इति विधिवन्निगदवाक्यं ''ऊर्जैवास्मा ऊर्जं पशूनाप्नोति'' इति वाक्यवदर्थवाद एव ।

३. ''शूर्पेण जुहोति । तेन ह्यन्नं क्रियते'' इति हेतुवन्निगदवाक्यमप्यर्थवाद एव ।

४. ''उरु प्रथस्व'' इत्यादिमन्त्राणामप्यर्थप्रत्ययनरूपदृष्टार्थत्वमेव । ब्राह्मणवक्यादिना अर्थप्रकाशन-सम्भवेपि मन्त्रैरेवार्थप्रकाशनं कार्यमिति नियमार्थमेतत् ।

अथ प्रथमे प्रमाणाध्याये स्मृत्याचारपादस्तृतीयः

१. ''अष्टकाः कर्तव्याः'' इत्यादिस्मृतिवाक्यानामदृष्टमूलश्रुतीनां श्रुतिमूलकत्वानुमानेन प्रामाण्यनिर्णयः ।

२. ''औदुम्बरी सर्वा वेष्टयितव्या'' इत्यादिस्मृतीनां ''औदुम्बरीं स्पृष्ट्वोद्गायेत्'' इत्यादिप्रत्यक्षश्रुतिविरुद्धत्वादप्रामाण्यमेवेति भाष्यकारः ।

२. तासामस्मत्प्रत्यक्षश्रुतिविरुद्धत्वेपि देशान्तरस्थैः पुरुषैः पठ्यमानश्रुतिमूलकत्वसम्भवेन तुल्यबलत्वाद् विकल्प एवेति भट्टः ।

३. ''वैसर्जनीयं वासोऽध्वर्युर्गृह्णाति'' इत्यादिस्मृतीनामदृष्टमूलश्रुतीनां प्रत्यक्षश्रुत्यविरुद्धानामपि लोभमूलत्वेनाप्रामाण्यमिति भाष्यकारः ।

३. लोभमूलत्वस्य दुर्ज्ञेयतया नात्यन्ताप्रामाण्यसाधकत्वम् । परन्तु तन्मूलभूतश्रुतिदर्शनपर्यन्तं न तदर्थानुष्ठानम् । किन्तु प्रत्यक्षश्रुत्यर्थस्यैवानुष्ठानम् । शाक्यादिपरिगृहीतवाक्यानान्तु श्रुतिविरोधहेतुदर्शनाभ्यामप्रामाण्यमेवेति भट्टः ।

४. ''आचान्तेन कर्तव्यम्'' इति स्मृतिविहितं क्रत्वङ्गमाचमनं पदार्थः । ''वेदं कृत्वा वेदिं करोति'' इति श्रुतिविहितः क्रमस्तु तद्धर्मः । अतः प्रबलमाचमनं प्रथमतः प्राप्नोति । दुर्बलस्तु क्रमस्तदनन्तरमवतरन्नपि पूर्वप्राप्तं नाचमनं बाधते । अतः पूर्वोक्ता स्मृतिः श्रुतिविरुद्धापि प्रमाणमेवेति भाष्यकारः ।

४. शाक्याद्युक्तं ''अहिंसा धर्मः'' इत्यादिवाक्यमपि धर्मप्रमापकत्वेन स्मृत्या अपरिगृहीतत्वान्न धर्मे प्रमाणम् । फाल्गुनकृष्णप्रतिपदि क्रियमाणवसन्तोत्सवादिसदाचारोपि स्मृतिप्रणडिकया मूलश्रुतिकल्पनेन प्रमाणमेवेति भट्टः ।

५. यववराहादिशब्दाः वाक्यशेषरूपशास्त्रप्रसिद्ध्या दीर्घशूकसूकरादिवाचिनः । न लोकप्रसिद्ध्या प्रियङ्गुवायसादिवाचिन इति भाष्यकारः ।

५. पील्वादिशब्दानां विप्लुतम्लेच्छप्रसिद्ध्यपेक्षया अर्यप्रसिद्धेः प्राबल्याद् वृक्षवाचित्वमेव । न म्लेच्छप्रसिद्ध्या हस्त्यादिवाचित्वम् । भाष्यकरोक्तिस्तूदाहरणाभावादुत्तराधिकरणन्यायेन गतार्थत्वाच्चोपेक्ष्या । अपि च मातुलसुताविवाहाद्याचारस्तु स्मृतिविरुद्धत्वात्त्याज्यः । स्मृत्याचारयोर्मध्ये स्मृतेः साक्षान्मूलश्रुतीकल्पकतया प्राबल्यम् । आचारस्य स्मृतिकल्पनद्वारा मूलश्रुतिकल्पकत्वाद् दौर्बल्यम् । किञ्च त्रिवृच्चर्वश्ववालादिशब्दानां वाक्यशेषप्रतीत एवार्थो ग्राह्यो न लौकिकः । लोकप्रसिद्धिवाक्यशेषयोर्मध्ये वाक्यशेषस्यैव बलीयस्त्वादिति भट्टः ।

६. पिकनेमशततामरसादिशब्दानामविप्लुतम्लेच्छप्रसिद्ध्या कोकिलादिवाचित्वम् । आर्याणामर्थविशेषे

क्वाप्यप्रयोगात् । अतो म्लेच्छप्रसिद्धेरप्यार्यप्रसिद्ध्यविरुद्धे शब्दार्थनिर्णये मानतैव ।

७. बोधायनाऽपस्तम्बाऽश्वलायनकात्यायनादिकल्पसूत्रग्रन्था निरुक्तादिषडङ्गग्रन्था मन्वादिस्मृतिग्रन्थाश्च न वेदवत्स्वतन्त्राः प्रमाणम् । किन्तु वेदमूलत्वेनैव ।

८. होलिकाद्यचाराणां सर्वदेशस्थसर्वजनधर्मता ।

९. गवादिशब्दानां पूर्वपूर्वव्याकरणस्मृतिमूलत्वेन प्रयोक्तव्यता । न गाव्यादिशब्दानाम् ।

१०. लोकवेदयोः शब्दार्थैक्यमेव । अतो लोके गृहीतसङ्गतिकानां शब्दानां वेदेप्यर्थावबोधकत्वं न विहन्यते । किञ्च शब्दानां जातिरेव वाच्या । लाघवात् । व्यक्तेर्वाच्यत्वे आनन्त्यव्यभिचारौ स्याताम् । व्यक्तिबोधस्तु लक्षणया ।

अथ प्रथमे प्रमणाध्याये चतुर्थो नामधेयपादः

१. उद्भिदादिपदानां विध्यर्थभावनाकरणांशे यागादौ गुणत्वेन नामत्वेन वाऽन्वयसम्भवेन विध्यन्त-र्भावात् प्रामाण्यम् ।

२. उद्भिदादिशब्दा यागात्मककर्मनमधेयम् । न गुणविधिपराः ।

३. ''चित्रया यजेत पशुकामः'' इत्यदौ श्रुतश्चित्राशब्दो यागनामधेयम् । ''पञ्चदशान्याज्यानि'' इति वाक्यगतमाज्यपदं मन्त्रनामधेयम् ।

४. ''अग्निहोत्रं जुहोति'' इति वाक्यगतमग्निहोत्रपदमेकपदोपत्तयागनामधेयम् । ''आघारमाघारयति'' इति वाक्यगतमघारपदं यत्र कर्मणि नैर्ऋतीं दिशमारभ्यैशानीं दिशमवधिं कृत्वा सन्तत्य घृतं क्षार्यते तस्य कर्मणो नामधेयम् ।

५. ''श्येनेनाभिचरन् यजेत'' इति वाक्यगतं श्येनपदमभिचारकर्मनामधेयम् । ''सन्दंशेनाभिचरन् यजेत'' ''गवाऽभिचर्यमाणो यजेत'' इति वाक्यगतयोः सन्दंशगोशब्दयोर्यागनामधेयत्वम् ।

६. ''वाजपेयेन स्वाराज्यकामो यजेत'' इति वाक्यगतं वाजपेयपदं यागनामधेयम् । एवमुद्भिदादिशब्दा अपि यागनामधेयम् ।

७. ''यदाग्नेयोऽष्टाकपालः'' इतिवाक्यगतमाग्नेयपदमग्निरूपदेवतालक्षणगुणपरम् । न नामधेयम् ।

८. ''बर्हिर्लुनाति'' इत्यादिवाक्यगता बर्हिरादिशब्दा जातिनिमित्तका एव । न लवनादिसंस्कार-निमित्तकाः ।

९. ''प्रोक्षणीरसदयति'' इति वाक्यगतः प्रोक्षणीशब्दः प्रकृष्टोक्षणसाधनत्वरूपयोगमादाय प्रवृत्तः ।

न जातिं संस्कारं वा निमित्तीकृत्य प्रवृत्तः ।

१०. ''निर्मन्थ्येनेष्टकाः पचन्ति'' इति वाक्यगतं निर्मन्थ्यपदं मथनकर्मत्वं भूतपूर्वमपि निमित्तीकृत्य प्रवृत्तं यौगिकमेव । न तु वह्नित्वजातिनिमित्तकम् ।

११. ''वैश्वदेवेन यजेत'' इतिवाक्यगतं वैश्वदेवपदमाग्नेयाद्यष्टयागसङ्घे वैश्वदेवनामसम्बन्धकरणाय प्रयुज्यते। अतो नामधेयम् । न तु विश्वेदेवरूपदेवतालक्षणगुणविधिः ।

१२. ''वैश्वानरं द्वादशकपालं'' इत्यदिवाक्यगतान्यष्टाकपालादिपदानि न कर्मनामधेयानि । नापि गुणविधिपराणि । किन्तु अंशैरष्टाकपालादिभिरंशिनो द्वादशकपालस्य स्तावकत्वेनायं सर्वोऽप्यर्थवादः।

१३. ''यजमानः प्रस्तरः'' इति वाक्यगतो यजमानशब्दो यज्ञसाधनत्वरूपयजमानगुणयोगेन प्रस्तरं स्तौतीत्यर्थवाद एव । न तु प्रस्तरकार्ये प्रहरणे यजमानरूपगुणविधिः । तथात्वे प्रस्तरप्रहरणे यजमनस्यापि प्रहरणप्रसङ्गेन कर्मशेषपरिलोपप्रसङ्गात् ।

१४. ''अग्निर्वै ब्राह्मणः'' इति वाक्यगतेनाग्निशब्देन प्रजापतिमुखजत्वरूपस्याग्निगुणस्य ब्राह्मणे सम्भवेन ब्राह्मणः स्तूयत इत्यर्थवाद एव । अग्निकर्ये होमे न ब्राह्मणरूपगुणविधिः ।

१५. ''आदित्यो यूपः'' इति वाक्यगतेनादित्यशब्देनादित्यगतस्यातितेजस्वित्वरूपगुणस्य घृताक्ते यूपे सत्त्वेन गौण्या वृत्त्या यूपः स्तूयत इत्यर्थवाद एव । न त्वदित्योपस्थानादौ कार्ये यूपाख्यगुणविधिः।

१६. ''अपशवो वाऽन्ये गोश्वेभ्यः पशवः'' इति वाक्यगतेनापशुशब्देन गवाश्वस्तुतिः क्रियत इत्यर्थवाद एव । न तु गवाश्वान्यपदोक्तानामजादीनां पशुकार्यनिषेधरूपो गुणो विधीयते ।

१७. ''सृष्टीरुपदधाति'' इति वाक्यगतं सृष्टिपदं सृष्टिपदोपेततद्रहितमन्त्रसमुदायपरमनुवादकतया न गुणविधिपरम् । किन्त्वर्थवाद एव ।

१८. ''प्राणभृत उपदधाति'' इति वाक्यगतं प्राणभृत्पदं न गुणविधिपरम् । किन्त्वनुवाद एव । ''एतस्यैव प्राणान् दधाति'' इति वक्ष्यमाणर्थवादोपपत्त्यर्थं प्राणभृदप्राणभृत्समुदाये गौणोयं प्राणभृच्छब्दः।

१९. ''अक्ताः शर्करा उपदधाति'' ''तेजो वै घृतम्'' इत्यत्र तेजस्त्वेन स्तूयमानेन विशेषेण घृतेनैवाञ्जनम्। न तु घृताघृतसाधारणेनाञ्जनसाधनसामान्येन । सामान्यस्यानुष्ठानायोग्यत्वात् ।

२०. ''स्रुवेणावद्यति'' ''स्वधितिनाऽवद्यति'' ''हस्तेनावद्यति'' इत्यवदानाङ्गत्वेन विहितस्रुवादिविधिरेव यथासामर्थ्यं स्रुवेणाज्यं, स्वधिति मांसं, हस्तेन पुरोडाशमिति विधेयं व्यवस्थापयति । न त्वव्यवस्थयेति ज्ञेयम् ।

अथ द्वितीये कर्मावान्तरभेदाध्याये उपोद्घातपादः प्रथमः

१. विधिवाक्ये यावन्ति पदानि सन्ति तावत्स्वेकमेर पदं फलेन सम्बद्ध्यऽपूर्वं प्रतिपदयति । अन्यानि तु पदानि मत्वर्थलक्षणया तद्विशेषणानि ।

२. धात्वर्थापरपर्यायभावार्थादेवापूर्वोत्पत्तिः । तस्यासिद्धत्वेपि द्रव्यादिना साधितस्य करणत्वसम्भवात् । न द्रव्यादेः सिद्धरूपस्य ।

३. ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' इत्यादिवाक्येषु विहितस्य यागस्य स्थायित्वं वा नष्टस्यैव स्वर्गादिहेतुत्वं वा नास्ति । किन्तु श्रुतार्थापत्तिकल्प्यस्य यागजन्यस्य यागावान्तरव्यापारस्यापूर्वस्य स्वर्गाव्यवहितपूर्ववृत्तित्वेन यागस्य स्वर्गहेतुत्वोपपत्ति :।

४. ''व्रीहीनवहन्ति'' इत्यादिवाक्यं नियमादृष्टपरम् । न तु फलापूर्वपरम् ।

५. ''स्रुचं संमार्ष्टि'' इत्यादिवाक्योक्तं संमार्जनादि स्रुगाद्यर्थत्वाद्गुणकर्मैव । न तु प्रयाजादिवत्प्रधानकर्म।

६. ''आज्यैः स्तुवते'' ''प्रउगं शंसति'' इति वाक्याभ्यां श्रुते स्तोत्रशस्त्रे प्रधानकर्मण्येव । न गुणकर्मणी।

७. ''देवांश्च याभिर्यजते ददाति च ज्योगित्ताभिः सचते गोपतिः सह'' इत्यत्र वाक्ये ''यजते'' इत्याद्याख्यातानि न विधायकानि । किन्त्वभिधायकान्येव ।

८. मन्त्रलक्षणम्

९. विधिशब्दितब्राह्मणलक्षणम्

१०. ऊहप्रवनामधेयानाममन्त्रत्वसमर्थनम्

११. ऋग्लक्षणसमर्थनम्

१२. सामक्षणसमर्थनम्

१३. यजुर्लक्षणसमर्थनम्

१४. ''अग्नीदग्नीन् विहर'' इत्यादिनिगदानां यजुष्ट्वसमर्थनम्

१५. ''देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामग्नये जुष्टं निर्वपमि'' इत्यादै विद्यमानानि सर्वाण्यपि वाक्यानि निर्वापरूपैकार्थप्रकाशनार्थत्वादेकवाक्यतामापद्यन्ते । न तु भिन्नवाक्यताम्।

१६. ''इषे त्वोर्जे त्व'' इत्यादिवाक्यं ''आयुर्यज्ञेन कल्पताम् , प्राणो यज्ञेन कल्पताम्'' इत्यादिवाक्यं चैकादृष्टप्रयोजनकत्वादेकवाक्यं न भवति । किन्तु शाखाछेदनादिभिन्नभिन्नार्थप्रकाशकत्वेनार्थभेदाद् भिन्नवाक्यमेव ।

१७. ''या ते अग्ने अयाशय तनूर्वर्षिष्ठा गह्वरेष्ठा'', ''उग्रं वचो अपावधीं त्वेषं वचो अपावधीं स्वाहा'',

''या ते अग्ने रजाशया'' ''या ते अग्ने हराशया'' इति वाक्ये रजाशयाहराशयेतिपदयोः साकांक्षयोराकांक्षापूरणाय ''तनूर्वर्षिष्ठा'' इत्यादिर्वैदिक एव पूर्वोक्तोऽनुषञ्जनीयः । न लौकिकः शेषोऽध्याहर्तव्यः ।

१७. वर्णकान्तरम् ''चित्पतिस्त्वा पुनतु ।वाक्पतिस्त्वा पुनात् । देवस्य त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः'' इति वाक्ये ''अच्छिद्रेण'' इत्यादिः शेषः । पावनक्रियाप्रकाशनार्थयोः ''चित्पतिस्त्वा'' इत्यादिकयोः पूर्वयोरपि वाक्ययोरनुषज्यते । न तु ''देवस्य त्वा'' इत्यनेनन्तिमेनैव वाक्येन ।

१८. ''सं ते प्राणो वायुना गच्छताम् । सं यजत्रैरङ्गानि । सं यज्ञपतिराशिषा'' इत्यत्र ''सङ्गच्छताम्'' इति पदस्य ''संयजत्रैः'' इत्यादिवाक्यद्वये नानुषङ्गः । किन्त्वध्याहार एव ।

अथ द्वितीये कर्मावान्तरभेदाध्याये धातुभेदादिभिः कर्मभेदपादो द्वितीयः

१. ''सोमेन यजेत'' ''हिरण्यमत्रेयाय ददाति'' ''दाक्षिणानि जुहोति'' इत्यादौ बहुभिर्धात्वर्थैरनुरक्ता भावना अन्यान्या एव । न त्वेका भावना ।

२. ''समिधो यजति'' ''तनूनपातं यजति'' ''इडो यजति'' ''बर्हिर्यजति'' ''स्वाहाकारं यजति'' इति वाक्ये पञ्चधा अभ्यस्तो यजतिशब्दः । तत्र प्रत्यभ्यासं भावनाभेदोऽपूर्वभेदो यागभेदश्च । नैका भावना । नैकमपूर्वम् । नैको याग ः ।

३. ''य एवं विद्वान् पौर्णमासीं यजते'' ''य एवं विद्वानमावास्यां यजते'' इति विद्वत्पदयुक्ते वाक्यद्वये नापूर्वकर्मान्तरविधिः । विद्वत्पदयुक्ते पोर्णमासीवाक्ये आग्नेयाग्नीषोमीयोपांशुयागानां त्रयाणां पौर्णमास्यां कर्तव्यानां पौर्णमासीपदेनानुवादः । अमावास्यावाक्ये च आग्नेयैन्द्रदध्यैन्द्रपयोयागानां त्रयाणाममावास्यापदेनानुवादः ।

४. ''जामि वा एतद्यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ । उपांशुयाजमन्तरा यजति । विष्णुरुपांशु यष्टव्योऽजामित्वाय, प्रजापतिरुपांशु यष्टव्योऽजामित्वाय, अग्नीषोमावुपांशु यष्टव्यावजामित्वाय, इति वाक्यत्रये मध्यगते ''उपांशउयाजम्'' इति वाक्ये ''विष्णुरुपांशु'' इत्यादिवाक्यविहितयागत्रयानुवादो न भवति । किन्तूपांशुयागनामकापूर्वकर्मविधिरेव ।

५. ''आघारमाघारयति'' ''अग्निहोत्रं जुहोति'' इति वाक्यद्वयं ''ऊर्ध्वमाघारयति'' ''दध्ना जुहोति'' इत्यादिवाक्यविहितकर्मसमुदायानुवादकं न भवति । किन्त्वपूर्वाग्निहोत्रादिकर्मविधायकम् ।

६. ''अग्नीषोमीयं पशुमालभेत ''इत्यत्र विद्यमान आलभतिः ''हृदयस्याग्रेऽवद्यति'' इत्यादिवाक्यैर्विहितावदानकर्मणां नानुवादकः । किन्त्वपूर्वावदानरूपपशुसंस्कारविधिपरः । तथा ''सोमेन

यजेत'' इत्यत्र विद्यमानो यजतिः ''ऐन्द्रवायवं गृह्णाति'' इत्यादिवाक्यैर्विहितग्रहणकर्मणां नानुवादकः। किन्तु ग्रहणरूपसोमसङ्करविधिपरः।

७. ''तिस्र आहुतीर्जुहोति'' इति वाक्ये तिस्र इत्याख्यातविशेषणात्कर्मबहुत्वमिति भट्टः। ''सप्तदश प्राजापत्यान् पशूनालभते'' इति वाक्ये देवतासम्बन्धानेकत्वात्कर्मबहुत्वमिति भाष्यकारः।

८. ''अथैष ज्योतिः। अथैष विश्वज्योतिः। अथैष सर्वज्योतिः। एतेन सहस्रदक्षिणेन यजेत'' इति वाक्ये ज्योतिरादिनामकानि कर्मान्तराण्येव सहस्रदक्षिणानि विधीयन्ते। न तु प्रकृतं ज्योतिष्टोममनूद्य सहस्रदक्षिणाख्यो गुणो विधीयते।

९. वैश्वदेवपर्वणि ''तप्ते पयसि दध्यानयति। सा वैश्वदेव्यामिक्षा'' इति यागं विधाय ''वाजिभ्यो वाजिनम्'' इति श्रुतं वाजिनं कर्मान्तरमेव। नाऽमिक्षायागे वाजिनरूपगुणविधिः।

१०. ''अग्निहोत्रं जुहोति'' इति निर्गुणं कर्म विधाय श्रुतानि ''दध्ना जुहोति'' इत्यादीनि दश वाक्यानि न कर्मान्तरकल्पकानि। किन्त्वग्निहोत्रकर्मण्येव विकल्पेन गुणमात्रविधायकानि।

११. ''अग्निहोत्रं जुहोति'' इति प्रकृत्य ''दध्नेन्द्रियकामस्य जुहुयात्'' इति श्रुते वाक्ये न कर्मान्तरं दधिविशिष्टं विधीयते। किन्तु प्रकृतमग्निहोत्रकर्मानूद्य दधिरूपगुणमात्रं फलाय विधीयते।

१२. ''त्रिवृदग्निष्टुदग्निष्टोमस्तस्य वायव्यास्वेकविंशमग्निष्टोमसाम कृत्वा ब्रह्मवर्चसकामो यजेत'' इत्यग्निष्टुत्संज्ञकं यागं विधाय श्रुतं ''एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो ह्येतेन यजेत'' इति वाक्यं पशुकामनाप्रयुक्तयागान्तरविधिपरमेव। न प्रकृताग्निष्टुद्यागमनूद्य तत्र रेवतीनमृचां वारवन्तीयनामकसाम्नश्च पशुरूपफलाय सम्बन्धविधिपरम्।

१३. ''सौभरमुक्थ्यानं ब्रह्म साम'' इति विहितं ''यो वृष्टिकामो योऽन्नाद्यकामो यः स्वर्गकामः स सौभरेण स्तुवीत'' इति फलत्रयसाधनत्वेन श्रुतश्च सौभरं प्रकृत्य ''हीषिति वृष्टिकामाय विधानं कुर्यात्, ऊर्गित्यन्नाद्यकामाय, ऊ इति स्वर्गकामाय'' इति श्रुतं वाक्यं हीषादिनियमविधिपरम्। न तु सौभरस्य ब्रह्मसामस्तोत्राश्रयस्य हीषादिगुणविधिपरम्।

अथ द्वितीये कर्मवान्तरभेदाध्याये अपवादपादस्तृतीयः

१. ''यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् ग्रहन् गृह्णीयात्। यदि बृहत्साम शुक्राग्रान्। यदि जगत्साम आग्रहणग्रान्'' इति वाक्ये ज्योतिष्टोम एव रथन्तरादिसाम्नि निमित्ते ऐन्द्रवायवाग्रतादिगुणो विधीयते। न त्वैन्द्रवयवाद्यग्रताविशिष्टं रथन्तराद्यैकैकसामकं कर्मान्तरं विधीयते।

२. ''राजा राजसूयेन स्वाराज्यकामो यजेत'' इति श्रुते राजसूये ''आग्नेयमष्टकपालं निर्वपति हिरण्यं

दक्षिणा, ऐन्द्रमेकादशकपालमृषभो दक्षिणा, वैश्वदेवं चरुं पिशङ्गी प्रष्ठौही दक्षिणा'' इति पञ्चहविष्कायामवेष्टौ श्रुतायां ''यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाऽहुतिमाहुतिं हुत्वा तमभिघारयेत्, यदि राजन्य ऐन्द्रं, यदि वैश्यो वैश्वदेवम्'' इति क्रमव्यत्ययः श्रूयते । तत्राप्राप्त-ब्राह्मणादिकर्तृकं बार्हस्पत्यादिमध्यनिधानादिगुणविशिष्टं कर्मान्तरं विधीयते । न तु बार्हस्पत्यादि-हविर्मध्ये स्थापयितुं ब्रह्मणादिकं निमित्तत्वेनानूद्यते ।

३. ''वसन्ते वसन्ते ब्राह्मणोऽग्नीनादधीत । ग्रीष्मे राजन्यः । शरदि वैश्यः'' इति श्रुतम् । तथा ''वसन्ते ब्राह्मणमुपनयीत । ग्रीष्मे राजन्यम् । शरदि वैश्यम्'' इति च श्रुतम् । एतानि वाक्यान्य-प्राप्तानां ब्रह्मणदीनां वसन्तादिविशिष्टाधानोपनयनविध्यर्थान्येव । न तु प्राप्तानां ब्रह्मणादीनां ''ब्राह्मणश्चेद्वसन्ते'' इत्यादिरूपेण कालविधिं प्रति निमित्तार्थानि ।

४. ''दाक्षायणयज्ञेन स्वर्गकामो यजेत'' इति ''साकम्प्रस्थायीयेन यजेत पशुकामः'' इति च श्रुतम् । तत्र प्रथमवाक्ये दाक्षायणशब्देन न कर्मान्तरविधिः । किन्तु फलायावृत्तिरूपगुणविधिरेव । तथा द्वितीयवाक्ये फलाय सहप्रस्थानरूपगुणविधिरेव ।

५. ''ईषामालभेत'' इति ''चतुरो मुष्टीर्निर्वपति'' इति च श्रुतम् । तथा ''वायव्यं श्वेतमालभेत भूतिकामः'' इति ''सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः'' इति चानारभ्य वाक्यद्वयं श्रुतम् । तत्र द्रव्यदेवताफलविशिष्टकर्मान्तरविधानमेव । न तु श्वेतत्वरूपगुणचरुरूपगुणयोर्विधानम् । न वा आलम्भनमात्रस्य निर्वपमात्रस्य वा विधानम् ।

६. ''वत्समलभेत'' इति वाक्ये आलम्भशब्दितवत्ससंस्कारमात्रविधिः । न तु वत्सपशुक्यागविधिः ।

७. ''नैवारश्चरुर्भवति'' इति ''चरुमुपदधाति'' इति ''बृहस्पतेर्वा एतदन्नं यन्नीवाराः'' इति च श्रुतम्। अत्र वाक्ये उपधानमात्रविधिः । न यागविधिः ।

८. ''त्वाष्ट्रं पात्नीवतमालभेत'' इति प्रकृत्य श्रुते ''पर्यग्निकृतं पात्नीवतमुत्सृजति'' इति वाक्ये आलभ्यत्वेन प्रकृतपात्नीवतपश्वनुवादेन पर्यग्निकरणान्ताङ्गकलापविधिरेव । न तु यागविधिः ।

९. ''एष ह वै हविषा हविर्यजते योऽदाभ्यं गृहीत्वा सोमाय यजते'' इति ''परा वा एतस्य प्राण एति योंऽशुं गृह्णाति'' इति च श्रुतम् । अत्र न कर्मान्तरविधिः । किन्तु अदाभ्यंशुशब्दितग्रहयोः ज्योतिष्टोमयाग एव ग्रहणविधिः ।

१०. ''य एवं विद्वानाग्निं चिनुते'' इति विधाय ''अग्नेः स्तोत्रमग्नेः शस्त्रम्'' इति ''षडुपसदोऽग्नेश्चित्यस्य सम्भवन्ति'' इति च श्रुतम् । तत्राग्नेश्चयनाख्यसंस्काररूपगुणविधिरेव । न तु चयनमात्रविधिः । न वा अग्निनामकयागविधिः ।

११. ''उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति'' इति ''मासं दर्शपूर्णमासभ्यं यजेत'' इति च श्रुतम् । तत्र न नित्याग्निहोत्रमनूद्य मासरूपगुणविधिः । किन्तूपसन्मासरूपगुणद्वयविशिष्टाग्निहोत्रनामक-कर्मन्तरविधिरेव ।

१२. ''आग्नेयमष्टाकपालं निर्वपेद्रुक्कामः'' इत्यनारभ्य श्रुते वाक्ये नाग्नेयनुवादेन फलसम्बन्धविधिः । किन्तु फलानुवदेन कर्मान्तरविधिरेव । एवम् ''अग्नीषोमीयमेकादशकपालं निर्वपेद्ब्रह्मवर्चसकामः'' ''ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः'' इत्यादिकाम्येष्टिकाण्डपठितकाम्येष्टिष्वपि फलानुवादेन कर्मान्तरविधिरेव ।

१३. ''समे दर्शपूर्णमासाभ्यां यजेत'' ''पौर्णमास्या यजेत'' ''अमावस्यायाममावास्या यजेत'' ''यावज्जीवं दर्शपूर्णमासाभ्यां यजेत'' इति दर्शपूर्णमासयोर्देशकालनिमित्तानि श्रुतानि । तथा तत्रैव ''स्विष्टकृतं यजति'' इति विहितस्विष्टकृद्यागसन्निधौ विधिवाक्यशषे ''शेषात्स्विष्टकृते समवद्यति'' इति स्विष्टकृद्यगहविःसंस्कारः श्रुतः । तथा ''आग्नेयोऽष्टाकपलः पुरोडाशो भवति'' इत्यादिनोक्तामवेष्टिनामकेष्टिं प्रकृत्य ''एतयाऽऽन्नाद्यकामं याजयेत्'' इति फलश्च श्रुतम् । तत्र देशकालनिमित्तसंस्कारफलसम्बद्धकर्मान्तरविधिपराणि नैतानि वाक्यानि । किन्तु सन्निहिते कर्मणि देशादिसम्बन्धस्याप्राप्तस्य विधिपराण्येव ।

१४. ''यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्याश्चाच्युतो भवति'' इति विहितात्कालद्वययुक्तादाग्नेयात् ''यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवति'' इति विहित एककालविशिष्ट आग्नेयो न कर्मान्तरम् । किन्त्वेक एव ।

अथ द्वितीये कर्मावान्तरभेदाध्याये प्रयोगभेदपादश्चतुर्थः

१. ''दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत'' इति काम्यप्रयोगं प्रकृत्य पठिते ''यावज्जीवं दर्शपूर्णमासाभ्यां यजेत'' इति वाक्ये न काम्यस्यैव कर्मणो यावज्जीवनकालमभ्यासरूपगुणविधिः । किन्तु जीवने निमित्ते कामनाभावेपि पुरुषस्य प्रत्यवायपरिहाराय दर्शपूर्णमासप्रयोगो विधीयते ।

२. काठकादिशाखासु श्रुताग्निहोत्रादिकर्म न प्रतिशारवं भिद्यते । किन्त्वेकमेव ।

अथ तृतीये शेषशेषिभावाध्याये श्रुतिपादः प्रथमः

१. शेषलक्षणारम्भणीयत्वसमर्थनम्

१. वर्णकान्तरं वक्ष्यमाणार्थप्रदर्शनम्

१. श्रुतिप्रमाणोदाहरणम्

१. लिङ्गप्रमाणोदाहरणम्

१. वाक्यप्रमाणोदाहरणम्

१. प्रकरणप्रमाणोदाहरणम्

१. स्थानप्रमाणोदाहरणम्

१. समख्याप्रमणोदाहरणम्

२. शेषलक्षणाधिकरणम्

३. कर्मणः फलहेतुतया फलशेषत्वम् । फलस्य काम्यतया पुरुषशेषत्वम् । पुरुषस्य कर्तृतया कर्मशेषत्वम् । अतो द्रव्यादिष्विव कर्मादिष्वपि शेषत्वम् । न तु द्रव्यादिष्वेव शेषत्वम् ।

४. व्रीहिधर्मा अवघातादय आज्यधर्मा उत्पवनादयः सान्नाय्यधर्मा दोहनादयश्चाव्यवस्थया न सर्वत्र सर्वे साङ्कर्येण कार्याः । किन्तु व्यवस्थया तत्तद्धर्मास्तेषु तेषु कार्याः ।

५. ''स्फ्येनोद्धन्ति'' इत्यादिवाक्योक्तमुद्धननादिकं यथासामर्थ्यं सर्वाङ्गेषु न विनियुज्यते । किन्तु यथाश्रुतं यथासंयोगश्च विनियुज्यते ।

६. ''अरुणया पिङ्गाक्ष्या एकहायन्या सोमं क्रीणाति'' इत्यत्र श्रुतमारुण्यं ज्योतिष्टोमसाधनद्रव्याणि सर्वाण्यनूद्य न विधीयते । किन्त्वेकहायनीद्रव्य एव निविशते ।

७. ''दशापवित्रेण ग्रहं सम्मार्ष्टि'' इति वाक्ये ग्रहमित्यत्रैकत्वं न विवक्षितम् । अतः सर्वेषामपि ग्रहाणामस्ति सम्मार्जनम् ।

८. ''ग्रहं सम्मार्ष्टि'' इत्यत्र ग्रहत्वं विवक्षितम् । नैकत्ववदविवक्षितम् ।

९. ''सप्तदशारत्निर्वाजपेयस्य यूपो भवति'' इति श्रुतं सप्तदशारत्नित्वं न वाजपेयाङ्गम् । किन्तु यूपद्वारा वाजपेयगतपश्वङ्गमेव ।

१०. ''अभिक्रामन् जुहोत्यभिजित्यै'' इति श्रुतमाहवनीयस्याभितः सञ्चरणं सन्निधिबलात् प्रयाजकर्त्रैव अन्वेति । न तु प्रकरणबलात्कृत्स्नप्राकरणिकदर्शपूर्णमासकर्त्रेति भाष्यकारः ।

१०. भट्टस्तु सन्निधेरपि प्रकरणस्य बलवत्त्वादवान्तरप्रकरणस्य चाभावान्महाप्रकरणेन प्राकरणिकेषु दर्शपूर्णमासाङ्गसर्वहोमेष्वभिक्रमणं निविशतीति न युक्तम् । किन्तु पूर्वोत्तरयोः प्रयाजवाक्यैः सन्दष्टत्वेन प्रयाजावान्तरप्रकरणसत्त्वात्प्रयाजाङ्गमेवाभिक्रमणमित्याह ।

११. शीतवातातपपीडानिवृत्त्यर्थत्वेन दृष्टार्थं वासोविन्यासविशेषरूपमुपवीतं पूर्वोत्तरयोः सामिधेनी-

गुणश्रवणेन सन्दंशेन सामिधेनीनामवान्तरप्रकरणकल्पनात्सामिधेन्यङ्गमिति न वक्तव्यम् । किन्तु "अग्ने महां असि" इत्यादिना निविन्नामकमन्त्रविनियोजकेन सामिधेनीप्रकरणस्य विच्छेदान्महा-प्रकरणेन दर्शपूर्णमासाङ्गमेव ।

१२. "वारणो यज्ञावचरः" "वैकङ्कतो यज्ञावचरः" इत्याभ्यां वाक्याभ्यामुक्तानि वारणादि-दारुपात्राण्याधानाङ्गपवमानेष्टिद्रव्यभूतेषु त्रिषु हविष्षु न निविशन्ते । किन्तु दर्शपूर्णमासादि-सर्वयज्ञाङ्गभूतेषु हविष्षु निविशन्ते ।

१३. "अग्नीषोमाभ्यामाज्यभागौ यजति" इत्याग्नेयः सौम्यश्चाज्यभागौ विहितौ । तयोः क्रमेणाम्नातं वार्त्रघ्नीद्वयं वृधन्वतीद्वयश्चेति ऋक्चतुष्टयमाज्यभागाङ्गमेव । न तु दर्शपूर्णमासाङ्गम् ।

१४. "हस्ताववनेनिक्ते" "उलपराजिं स्तृणाति" इति वाक्ये श्रुतं हस्तावनेजनं करिष्यमाणसर्वकर्माङ्गम् । नास्तरणमात्राङ्गम् । एवं "मुष्टीकरोति" "वाचं यच्छति" "दीक्षितमावेदयति" इति श्रुतमुष्टीकरणवाग्यमने "अदीक्षिष्टायं ब्राह्मणः" इति देवेभ्यो मनुष्येभ्यश्चावेदनरूपक्रियामात्राङ्गे न भवतः । किन्तु सर्वकर्माङ्गे ।

१५. "आग्नेयं चतुर्धा करोति" इति श्रुतं चतुर्धाकरणमग्नीषोमीयैन्द्राग्नयोः पुरोडाशयोरपि न भवतः । किन्त्वाग्नेयपुरोडाशस्यैव ।

अथ तृतीये शेषशेषिभावाध्याये श्रुत्युपजीवकलिङ्गपादो द्वितीयः

१. "बर्हिर्देवसदनं दामि" इत्ययं मन्त्रो बर्हिःशब्दमुख्यार्थदर्भलवन एव विनियुज्यते । न तु गौणोलपादिलवनादौ ।

२. "निवेशनः सङ्गमनो वसूनामित्यैन्द्या गार्हपत्यमुपतिष्ठते" इति श्रुतैन्द्रीऋक् मुख्यार्थभूतेन्द्रप्रकाशने न विनियुज्यते । किन्तु गार्हपत्यप्रकाशन एव विनियुज्यते ।

३. "हविष्कृदेहीति त्रिरवघ्नन्नाह्वयति" इत्यत्र "हविष्कृदेहि" इति मन्त्रो गौणे नावघाते विनियुज्यते । किन्तु हविष्कृदाह्वानरूपमुख्यार्थ एव ।

४. "उत्तिष्ठन्नाहाग्नीदग्नीन्विहर" "व्रतं कृणुतेति वाचं विसृजति" इति वाक्ययोर्मन्त्रोद्देशेनोत्थानवाग्वि-सर्गकालौ क्रमेणाङ्गत्वेन विधीयेते । न तूत्थानवाग्विसर्गावुद्दिश्याङ्गत्वेन मन्त्रौ विधीयेते ।

५. "सूक्तवाकेन प्रस्तरं प्रहरति" इति वाक्येन सूक्तवाकः प्रस्तरप्रहरणाङ्गत्वेन विधीयते । न तु सूक्तवाकपाठकालः प्रस्तरप्रहरणाङ्गतया विधीयते ।

६. कृत्स्नोपि सूक्तवाकोऽमावास्यायां पौर्णमास्याञ्च नावर्तनीयः । किन्तु यथासामर्थ्यं

प्रयोजनवशादमावास्यायां पौर्णमास्याञ्च विभज्य प्रयोक्तव्यः ।

७. काम्येष्टिकाण्डे ''ऐन्द्राग्नमेकादशकपालं निर्वपेत्'' इत्यादयः काम्येष्टय उक्ताः । तथा मन्त्रकाण्डे ''इन्द्राग्नी रोचना दिवः'' इत्यादयो मन्त्रा ऐन्द्राग्नादीष्टिक्रमेणोक्ताः । एते मन्त्रा न यथासामर्थ्यं सर्वेष्वेतद्देवतेषु काम्याकाम्यकर्मसु विनियुज्यन्ते । किन्त्वेतास्वेव काम्यास्विष्टिषु यथाक्रमं विनियुज्यन्ते ।

८. ''आग्नेय्या आग्नीध्रमुपतिष्ठते, ऐन्द्या सदः, वैष्णव्या हविर्धानीम्'' इति वाक्ये श्रुतमाग्नीध्रमण्डपाद्युपस्थानं प्रकृताभिराग्नेय्यादिभी ऋग्भिरेव । न तु प्रकरणपठिताभिः ''अग्न आयाहि वीतये'' इत्यादिभिर्दाशतयीगताभिश्च ।

९. ''अभिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि सोमं भक्षयन्ति'' इत्यत्र ज्योतिष्टोमेषु हुतस्य सोमरसस्य शेषभक्षणं विहितम् । तस्मिन् भक्षणे ग्रहणावेक्षणनिगिरणसम्यग्जरणानि ''भक्षे हि मा विश'' इत्यादौ भक्षानुवाकनाम्नि भक्षमन्त्रे समाम्नातानि । तत्र सर्वोपि भक्षानुवाको न भक्षण एव विनियुज्यते । किन्तु ''तर्हि वसो'' इत्यादिः ''सख्यासम्'' इत्यन्तो ग्रहणे, ''नृचक्षसम्'' इत्यादिः ''अवख्येषम्'' इत्यन्तस्तद्दर्शने, ''हिन्व'' इत्यादिः ''गाः'' इत्यन्तस्तस्य सम्यग्जरणे, इतरः सवोऽनुवाको भक्षणे विनियुज्यते ।

१०. भक्षानुवाके मन्द्रेत्यदिस्तृप्यत्वित्यन्तो भागस्तृप्तौ वसुमद्गणस्येत्यादिर्भक्षयामीत्यन्तोऽंशो भक्षणे चेति यथासामर्थ्यं विभज्य न विनियुज्यते । किन्तु सर्वोपि मन्द्रेत्यदिर्भक्षयामीत्यन्तो भागो भक्षण एव विनियुज्यते ।

११. ''वसुमद्गणस्य सोमदेव ते मतिविदः प्रात सवनस्य गायत्रछन्दस इन्द्रपीतस्य मधुमत उपहूतस्योपहूतो भक्षयामि'' इत्यत्रेन्द्रपीतस्येतिनिर्देशादिन्द्रप्रदानशेषभक्षण एवायं मन्त्रो विनियुज्यते । न तु मैत्रावरुणादिशेषभक्षणे । अतोऽमन्त्रकमेव तच्छेषभक्षणमिति प्रथमः पूर्वपक्षः । मित्रावरुणपीतस्येत्यूहसम्भवात्तद्भक्षणमपि मन्त्रवदेवेति द्वितीयः पूर्वपक्षः । इतः परं परमसिद्धान्ते वक्तव्ये कृत्वाचिन्तया पञ्चाधिकरणानि ।

१२. होतृकशब्दितानां मैत्रावरुणादीनां पञ्चानां पञ्चसु चमसेष्विन्द्रस्य मित्रावरुणदीनाञ्च शेषोऽस्ति । तस्मिन् भक्ष्यमाणे न मित्रावरुणपीतस्येत्येवोहः । किन्त्विन्द्रमित्रावरुणपीतस्येत्येव ।

१३. पात्नीवते देवतायै हुतशेषे भक्षणीये भक्षमन्त्रे इन्द्रवायुपत्नीवत्पीतस्येति नोहः । किन्तु पत्नीवत्पीतस्येत्येव ।

१४. भक्षमन्त्रे पत्नीवत्त्वष्टृपीतस्येति नोहः । किन्तु पत्नीवत्पीतस्येत्येव ।

१५. भक्षमन्त्रे शेषे भक्षणीये पत्नीवदग्नित्रयस्त्रिंशत्पीतस्येति नोहः । किन्तु पत्नीवदग्निपीतस्येत्येवोहः ।

१६. विकृतौ सोमशेषे भक्षणीये भक्षमन्त्रे अनुवषट्कारदेवताऽग्निर्नोपलक्षणीयः । किन्तु प्रधानदेवतेन्द्र एव ।

१७. एकादशाधिकरणोक्तद्वितीयपूर्वपक्षनिराकरणार्थमिदमधिकरणम् । अत्रैन्द्राणामपि ग्रहाणां शेष-भक्षणममन्त्रकमेवेति न मित्रावरुणपीतस्येत्यूहः । इदमेव त्रिभिरधिकरणैर्विचार्यते ।

१८. ''ऐन्द्राग्नं गृह्णाति'' इति वाक्ये इन्द्रपदरूपलिङ्गबलान्न समन्त्रकमैन्द्राग्नशेषभक्षणम् । किन्तु मन्त्रस्येन्द्राग्निविषयकत्वाभावात्केवलेन्द्रविषयकत्वादमन्त्रकमेवैन्द्राग्नशेषभक्षणम् ।

१९. भक्षमन्त्रे ''गायत्रछन्दसः'' इति श्रूयते । अतोयं मन्त्रो गायत्रछन्दोयुत एव सोमे प्रयोज्य इति न वक्तव्यम् । किन्तु छन्दोन्तरयुतेपि सोमे गायत्रछन्दस इति स्थाने ''त्रिष्टुप्छन्दसः'' इत्यादिरुपेणैवोहेन प्रयोज्यो मन्त्रः । एताभ्यामधिकरणाभ्यामनैन्द्रेष्वमन्त्रकं भक्षणमित्यवान्तरसिद्धान्तः कृतः ।

२०. अधुना परमसिद्धान्त उच्यते । अनैन्द्रेष्वपि ग्रहेषु शेषभक्षणं नामन्त्रकम् । न वा भक्षमन्त्रेषूहः । किन्तु यथाम्नातभक्षमन्त्रेणैव सर्वशेषभक्षणमिति परमसिद्धान्तः ।

अथ तृतीये शेषशेषिभावाध्याये लिङ्गोपजीविवाक्यादिपादस्तृतीयः

१. ''प्रजापतिरकामयत'' इत्यादि वा ''प्रजापतिर्वा इदमेक एवाग्र आसीत्'' इत्यादि वा उपक्रम्य पठिते उच्चैर्ऋचा क्रियते, उच्चैः साम्ना, उपांशु यजुषा'' इति वाक्ये उपसंहारगतऋगादिरूप-वेदैकदेशधर्मा नोच्चैस्त्वादयः । किन्तूपक्रमवाक्यागतऋगादिरूपसमस्तवेदधर्माः ।

२. यजुर्वेदे अग्न्याधानं विहितम् । सामवेदे च तदङ्गनि वारवन्तीयादीनि सामानि विहितानि । तत्र वारवन्तीयादेर्नोच्चैस्त्वरूपः सामवैदिकः स्वरः । किन्तूपांशुत्वरूपो याजुर्वैदिक एव स्वरः । इति भाष्यकारः

२. वारवन्तीयादेः सामवेदे पाठो यजुर्वेदे विनियोगः । तत्र सामवेदस्वरो न भवति । किन्तु विनियोजकयजुर्वेदस्वर एवेति भट्टः ।

३. यजुर्वेदे सामवेदे च श्रुतस्य ज्योतिष्टोमस्य नियामकाभावादुभयत्र विधिरिति न युक्तम् । किन्तु ज्योतिष्टोमाङ्गयोर्द्रव्यदेवतयोरुभयोरपि यजुर्वेद एवाम्नानाद्यजुर्वेद एव ज्योतिष्टोमविधिः ।

४. समिधादीनां पञ्चप्रयाजानां प्रकरणेन दर्शपूर्णमासाङ्गत्वमेव । न प्रधानकर्मत्वम् ।

५. प्रकरणोपजीविनः स्थानक्रमस्य विनियोजकतासमर्थनम् ।

६. स्थानोपजीविनः समाख्याप्रमाणस्य विनियोजकतासमर्थनम् ।

७. श्रुतेर्लिङ्गापेक्षया प्राबल्यसमर्थनम् ।

८. लिङ्गस्य वाक्यापेक्षया प्राबल्यसमर्थनम् ।

९. वाक्यस्य प्रकरणापेक्षया प्राबल्यसमर्थनम् ।

१०. प्रकरणस्य स्थानापेक्षया प्राबल्यसमर्थनम् ।

११. स्थानस्य समाख्यापेक्षया प्राबल्यसमर्थनम् ।

१२. बाधयोग्यतोपपादनम्

१३. ज्योतिष्टोमे प्रकरणबलाद्द्वादशोपसत्त्वमपि तदङ्गमिति न वक्तव्यम् । किन्तु प्रकरणात्प्रबलया अहीनस्येति श्रुत्या प्रकरणस्य बाधादहीनशब्दिताहर्गणाङ्गत्वमेव ।

१४. ''युवं हि स्थः स्वर्पती'' इत्यृचं द्वियजमानके ''एते असृग्रमिन्दव'' इत्यृचं बहुयजमानके यागे शस्त्रप्रथमं कुर्यादिति ज्योतिष्टोमे श्रुतम् । तच्च मन्त्रद्वयस्य प्राथम्यं श्रुत्या प्रकरणबाधेन कुलायाहीनादिषूत्क्रष्टव्यम् । न तु प्रकरणेन ज्योतिष्टोमप्रयोगे कार्यम् ।

१५. ''पत्नीसंयाजान् यजति'' इति विहितान् पत्नीसंयाजन् प्रकृत्य ''जाघन्या पत्नीः संयाजयन्ति'' इति श्रुतो जाघनीशब्दितो पशुजघनभवो मांसखण्डविशेषो न दर्शपूर्णमासयागे भवति । अतस्तत्संयुक्तनं पत्नीसंयाजानामपि दर्शपूर्णमासप्रकरणादुत्कृष्य पशुयाग एव निवेश इति न वक्तव्यम्। किन्तु दर्शपूर्णमासयागे पशोरभावेपि जाघन्याः क्रयेण सम्पादयितुं शक्यत्वान्न दर्शपूर्णमासप्रकरणादुत्कर्षः ।

१६. ''अथो खलु दीर्घसोमे सन्तृद्येद् धृत्या'' इति ज्योतिष्टोमे विहितं संश्लेषापरनामकं सन्तर्दनं न दीर्घयजमानकर्तृके ज्योतिष्टोमे निविशति। न वा दीर्घादीर्घयजमानकर्तृकज्योतिष्टोममन्त्रे निविशति। न वा ज्योतिष्टोमप्रकरणदुत्कृष्य द्विरात्रादिषु निवेशः । न वोक्थ्यादिज्योतिष्टोमसंस्थासु निवेशः। किन्तु द्विरात्रादिषु संस्थासु च निवेशः । वाक्यप्रकरणयोर्विरोधे प्रकरणबाधस्येदमुदहरणम् ।

१७. ''न प्रथमयज्ञे प्रवृञ्ज्यात्'' इति श्रुतो निषेधः वाक्यप्रकरणयोरविरोधाज्ज्योतिष्टोमाङ्गमिति न वक्तव्यम्। किन्तु वाक्यात्प्रकरणबाधेन ज्योतिष्टोमीयप्रथमप्रयोगस्यैवाङ्गम् । न तु ज्योतिष्टोमस्य ।

१८. दर्शपूर्णमासौ प्रकृत्य ''पूषा प्रपिष्टभागोऽदन्तको हि'' इति श्रुतम् । तत्र पौष्णपेषणस्य वाक्यप्रकरणयोरविरोधात्प्रकृतावेव निवेश इति न वाच्यम् । किन्तु वाक्यात्प्रकरणबाधेन पूषदैवत्यायां विकृतावुत्कर्षः ।

१९. पौष्णं पेषणं पूषदैवत्यासु सर्वसु विकृतिषु न निविशते । किन्तु चरुद्रव्यकास्वेव पूषदैवत्यासु विकृतिषु ।

२०. चरुद्रव्यकास्वपि पौष्णपेषणस्य केवलपूषदैवत्यचरुद्रव्यकास्वेव निवेशः नान्यसहितपूषदैवत्यासु विकृतिषु ।

अथ तृतीये शेषशेषिभावाध्याये श्रुत्यादिपरस्परविरोधसदसद्भवपादश्चतुर्थः

१. ''निवीतं मनुष्याणाम्'' इत्यादौ श्रुतं निवीतं श्रुत्या प्रकरणबाधेन न शुद्धपुन्धर्म इति न वक्तव्यम् । श्रुतिप्रकरणयोरविरोधात्क्रतुयुक्तपुन्धर्म इत्यपि न वक्तव्यम् । शुद्धक्रतुप्रायपाठात्प्रकरणाच्च शुद्धक्रतुधर्म इत्यपि न वक्तव्यम् । प्राकरणिकमनुष्यप्रधनान्वाहार्यदानदिकर्मधर्म इत्यपि न वक्तव्यम् । अप्राकरणिकमनुष्योद्देश्यकाऽतिथ्यादिकर्मधर्म इत्यपि न वक्तव्यम् । किन्त्वर्थवाद एव ।

२. ''उपव्ययते'' इति श्रुतमुपवीतं न सर्वदैवकर्मार्थम् । किन्तु दर्शपूर्णमसाङ्गमेव विधीयते ।

३. ''उपव्ययते'' इति नानुवादः । किन्तु विधिरेव ।

३. वर्णकान्तरं ''यज्ञोपवीती हि देवेभ्यो दोहयति'' इत्यत्रोपवीतस्याप्राप्तत्वाद्विधिरेव । नानुवादः ।

४. ''ये पुरोऽदञ्चो दर्भास्तन् दक्षिणाग्रान् स्तृणीयात्'' इत्यत्र श्रुतमुदग्रत्वं न विधीयते । किन्त्वनूद्यते ।

५. ''अधस्तात्समिधं धारयन्ननुद्रवेत् , उपरि हि देवेभ्यो धारयति'' इति वाक्योक्तमुपरि धारणं जीवदग्निहोत्रे अधस्तात्समिद्धारणस्तुत्यर्थमनूद्यते इति न वक्तव्यम् । किन्तु विधिरेवात्रोपरि धारणस्य ।

६. ''प्राचीनवंशं करोति'' इति विहितं प्राचीनवंशाख्यमण्टपविशेषं प्रकृत्य श्रुतं प्रतीचीभजनं न शुद्धपुन्धर्मः । नापि क्रतुयुक्तपुन्धर्मः । नपि प्राकरणिकक्रतुधर्मः । प्रकरण एव मनुष्योद्देश्यककर्मधर्मोपि न । नापि मनुष्योद्देश्यकास्वतन्त्राऽतथिपूजादिकर्मधर्मः । किन्तु पुरुषार्थत्वे वाक्यप्रकरणयोरविरोधदर्थवाद एवेति ।

७. दर्शपूर्णमासयोः पिण्डपितृयज्ञे ''पर्व प्रतिलुनाति'' इत्यत्र श्रुतं दितं, ज्योतिष्टोमे ''उप बिलादगृह्णति'' इत्यत्र श्रुतं ''यत्पूर्णं तन्मनुष्पाणां'' इत्यादिकं, तत्रैव दीक्षार्थाभ्यङ्गे श्रुतं घृतादिकं, दर्शपूर्णमासयोः पुरोडाशश्रपणे श्रुतं विदग्धादिकञ्च ''समूलं बर्हिर्भवति'' इत्यादिविध्येकवाक्यत्वादिना अर्थवाद एव ।

८. दर्शपूर्णमासप्रकरणे ''नानृतं वदेत्'' इति श्रुतोऽनृतनिषेधः न शुद्धमनुष्यधर्मः । नपि क्रतुयुक्त-पुरुषधर्मः । नापि शुद्धक्रतुधर्मः । किन्तु अनृतवचननिषेधविधिरेव ।

९. दर्शपूर्णमासयोः ''प्राणो वै दक्षः'' इत्यत्र श्रुतो ''मयि दक्षक्रतू'' इति मन्त्रो न शुद्धमनुष्यधर्मः ।

किन्तु वाक्यप्रकरणयोरविरोधेन क्रतुयुक्तपुरुषसंस्करद्वारा क्रत्वर्थ एव मन्त्रः ।

१०. दर्शपूर्णमासयोः ''यो ब्राह्मणयावगुरेत्'' इत्यादिना श्रुतोऽवगोरणनिषेधो न क्रत्वर्थः । किन्तु पुरुषार्थ एव ।

११. दर्शपूर्णमासप्रकरणे ''मलवद्वाससा न संवदेत्'' इति श्रुतो रजस्वलया संवादनिषेधो न क्रत्वर्थः । किन्तु पुरुषार्थ एव ।

१२. अनारभ्य ''तस्मात्सुवर्णं हिरण्यं'' इत्यादिना श्रुतं शोभनवर्णोपेतहिरण्यधारणं न क्रत्वङ्गम् । नापि क्रतुगतहिरण्यानुवादेन धारणरूपसंस्कारविधिः । नापि क्रतुगतहिरण्यधरणानुवदेन सुवर्णतामात्र-विधिः। किन्तु पुरुषार्थमेवेदं धारणम् ।

१३. अनारभ्य श्रुता जयाख्या होमाः ''ऋताषाट्'' इत्यादयो राष्ट्रभृतः ''अग्निर्भूतानां'' इत्यादयो अभ्यातानाः न लौकिकवैदिकसर्वकर्माङ्गम् । किन्तु ये आहवनीये कर्तव्यास्तन्मात्राङ्गम् ।

१४. काम्येष्टिकाण्डे अनारभ्य श्रुता वारुणेष्टिर्लौकिकवैदिकाश्वदाननिमित्ता न भवति । नापि लौकिकाश्वदाननिमित्ता। किन्तु वैदिकाश्वदाननिमित्तेयमिष्टिः ।

१५. वारुणेष्टिः प्रतिगृहीतुरेवेति न वक्तव्यम् । किन्तु दातुरेव ।

१६. अनारभ्य श्रुता सोमवान्तिनिमित्तेष्टिर्न पुमर्था । किन्तु वैदिके जरणपर्यन्तस सोमशेषस्य शास्त्रार्थत्वात्सोमवमननिमित्तप्रायश्चित्तरूपेयमिष्टिः ।

१७. सोमेन्द्रेष्टिः प्रागुक्ता यजमानवमननिमित्तैव । न तु ऋत्विग्वमननिमित्ता ।

१८. ''आग्नेयोऽष्टाकपालः'' इत्यत्रोक्तस्य पुरोडाशस्य शेषोऽस्तीति भाष्यकारः।

१८. हविरन्तरेऽशेषस्यापि होमदर्शनात्पुरोडाशस्यापि सर्वस्य होमो इति न वक्तव्यम् । किन्तु ''शेषात्स्विष्टकृते समवद्यति'' इति वाक्यशेषगतशेषपदस्वारस्यादस्ति होमशेष इति भट्टः ।

१९. स्विष्टकृदादिशेषकार्याणि आग्नेयादिहविस्त्रयशेषैरपि कार्याणि । नैकहविःशेषेण ।

२०. कृत्वाचिन्तयेदमधिकरणम् । एकस्मादेव हविषः शेषकार्याणि कार्याणीति पक्षे न यथेच्छमेक-स्माच्छेषोद्धारः । किन्तु प्राथमिकादेव हविषः ।

२१. आग्नेयहविषश्चतुर्धाकरणं न ऋत्विगादिपरिक्रयणार्थम् । किन्तु भक्षणार्थमेव ।

अथ तृतीये शेषशषिभावाध्यये प्रतिपत्तिकर्मपादः पञ्चमः

१. उपांशुयाजाज्यशेषात्स्विष्टकृदादिशेषकर्माणि न कार्याणि । शेषाभावात् ।

२. ''साकम्प्रस्थायीयेन यजेत पशुकामः'' इति विहिते कर्मणि श्रुतं ''अग्नीधे स्रुचौ प्रदाय सह कुम्भीभिरभिक्रामन्नाह'' इति । तत्र स्विष्टकृदादिशेषकार्याणि न सन्त्येव । शेषाभावादेव ।

३. सौत्रामणियागेपि शेषाभावान्न शेषकार्याणि ।

४. ''य इन्द्रियकामो वीर्यकामः स्यात्तमेतया सर्वपृष्ठया याजयेत्'' इति विहितायामिष्टौ श्रुतानां षण्णामिन्द्राणामेक एव पुरोडाशो विधीयते । तत्र स्विष्टकृदाद्यर्थं न पृथक्पृथगवदेयम् । किन्तु सर्वेषु प्रदानेषु कृतेषु योऽवशिष्टः पुरोडाशः स सर्वशेष इति ततोऽवदाने कृते सर्वे कृतार्था भवेयुरिति सकृदेव शेषकार्यं कर्तव्यम् ।

५. ज्योतिष्टोमे ऐन्द्रवायवग्रहशेषभक्षो न सकृदेव । किन्तु द्विर्भक्षणम् । इति भाष्यकारः

५. वर्णकान्तरम्, नाधिकरणान्तरमिदम् । द्विर्भक्षणे द्विःप्रदानस्य हेतुत्वकथनात्प्रत्यैन्द्रप्रदानं शेषकार्यं षोढा आवर्तनीयमिति न युक्तम् । हेतुवन्निगदाधिकरणन्यायेनार्थवादत्वात्तस्य हेतुसमर्पकत्वाभावा-दिति वक्तुं पूर्वाधिकरणशेषतैवास्य सूत्रस्येति भट्टः ।

६. सोमयागे बहवो ग्रहाश्चमसाः पुरुषाश्च सन्ति । तत्र शेषाभावान्न शेषभक्षोऽस्तीति न वक्तव्यम् । शेषसत्त्वेपि वचनाभावान्न शेषभक्षोऽस्तीति न वक्तव्यम् । सर्वत्र सर्वेषां भक्षोऽस्तीत्यपि न वक्तव्यम् । यत्र यस्याध्वर्य्वादेर्भक्षणं श्रुतं तत्र तस्य भक्षणमिति तु युक्तम् । परन्तु श्रवणमेव भक्षनियमे न प्रमाणम् । समाख्याऽपि ।

७. उद्गातृचमसे भक्ष उद्गातुरेकस्यैवेति न युक्तम् । सर्वर्त्विजां तत्र भक्ष इत्यपि न युक्तम् । छन्दोगानां त्रयाणां तत्र भक्ष इत्यपि न युक्तम् । किन्तु ससुब्रह्मण्यनां त्रयाणां छन्दोगानां तत्र भक्ष इति भट्टः ।

७. अपसुब्रह्मण्यानां त्रयाणामेव भक्ष इति भट्टः ।

८. हारियोजनग्रहे होतृगणे चतुर्थतया स्तितस्याचमसिनो ग्रावस्तुन्नामकस्यापि वचनाद्भक्षोऽस्ति ।

९. वषट्कारोपि भक्षनिमित्तम् ।

१०. होमाभिषवावपि मिलिते भक्षनिमित्ते । न केवलाभिषवादिकर्तृर्भक्षः ।

११. न चमसिनामेव चमसेषु भक्षः । वषट्कर्तुर्होमाभिषवकत्रोर्होत्रध्वर्य्वोरपि ।

१२. अनेषामेकपात्रभक्षणे सिद्धे वषट्कतुरेव प्रथमभक्षः ।

१३. वषट्कर्तपि भक्षयितरावितरावनुज्ञाप्यैव भक्षयेत् ।

१४. तदप्यनुज्ञापनं मन्त्रवाक्येनैव । न लैकिकेन वचनेन ।

१५. ''उपहूत उपह्वयस्व'' इत्यनुज्ञापनमन्त्रवाक्यं सर्वमपि प्रश्नोत्तरयोरुभयोरपि न विनियुज्यते । नाप्यनुज्ञानुज्ञपनयोरन्यतरत्र लौकिकं वचनम् । किन्तु तद्वाक्यं विभज्य ''उपह्वयस्व'' इत्यंशोऽनुज्ञापने ''उपहूतः'' इत्ययमंशोऽनुज्ञायां विनियुज्यते ।

१६. अनुज्ञापनञ्चैकपात्राणामेव पुरुषाणाम् । न भिन्नपात्राणाम् ।

१७. होतृकाण्डे समम्नाता याज्याः समाख्यया होतुः प्राप्ताः । ज्योतिष्टोमे ऋतुनामकेज्यासु ''यजमानस्य याज्या । सोऽभिप्रेष्यति होतरेतद्यजेषति । स्वयं वा निषद्य यजति'' इति वचनात्काचिद्याज्या होतुरपनीय यजमनस्य विधीयते । तत्र यदा यजमनो निषद्य यजति स्वयमेव याज्यां पठति तदा याज्याया होतुरपनये वषट्करभक्षावपि तस्मादपनीयेते । यजमन एव तत्र वषट्कर्ता भक्षयिता च।

१८. ज्योतिष्टोमे ''यदि राजन्यः'' इत्यादिना राजन्यवैश्ययाजमान्यनिमित्तः फलाख्यचमसः श्रुतः। स च भक्षमात्रे सोमविकारः सन् सोमं बाधते। अतो होतुरिव राजन्यवैश्ययोरपि सोमभक्षापनय इति न वक्तव्यम् । फलचमसो यागसाधनसोमद्रव्यं बाधित्वा स्वयं यागसाधनत्वेन निविशन् यागविकर एव।

१९. राजसूये दशपेयाख्ये सोमविकारयागे ज्योतिष्टोमाद्दश चमसाः प्राप्ताः । तत्र राजन्यचमसं राजन्या एव दश भक्षयेयुरिति न युक्तम् । किन्तु दश दश ब्राह्मणा एव सर्वत्र भक्षयेयुः ।

अथ तृतीये शेषशेषिभावाध्याये अनारभ्योक्तिपादः षष्ठः

१. क्रत्वर्था जुह्वः पर्णता प्रकृतिविकृतिरूपसर्वार्था न विधीयते । किन्तु प्रकृतियागार्थमेव । विकृतावति-देशतः प्राप्तिसम्भवत् ।

२. सामिधेनीनाम्नीनामृचां साप्तदश्यं प्रकृतावेव निविशत इति न युक्तम् । किन्तु श्रुतसाप्तदश्यासु मित्रविन्दादिविकृतिष्वेव निविशते ।

३. ''सप्तदश वैश्यस्य'' इति विहितं वैश्यनिमित्तकं साप्तदश्यं प्रकृतावेव निविशते । न तु श्रुतसप्तदश्यासु विकृतिषु ।

४. आधानं पवमानादीष्ट्यङ्गमिति न मन्तव्यम् । किन्त्वग्निसंस्कारर्थमेव । इति भाष्यकारः ।

४. आधानार्थत्वमेव पवमानादीष्टीनामिति भट्टः ।

५. अधानमग्निद्वरा दर्शादिप्रकृत्यर्थमिति न मन्तव्यम् । किन्त्वग्न्यर्थमेव । तथा पवमानेष्टीनामप्यग्न्य-र्थत्वमेव ।

६. विकृतिभूतः पवमानेष्टयः पवमानेष्ट्यसस्कृतेऽग्नावेव कार्याः । न तु पवमानेष्टिसंस्कृतेऽग्नौ ।

७. ज्योतिष्टोमे अग्निष्टोमसंस्थाके आम्नातेष्वग्नीषोमीयसवनीयानुवन्ध्येषु त्रिषु पशुष्वाम्नाताः पशुधर्मा यूपछेदनोपाकरणपर्यग्निकरणादयः सर्वापशुसाधारणा न भवन्ति । सवनीयस्यैवेते पशुधर्मा इत्यपि न युक्तम् । अग्नीषोमीयसवनीययोरुभयोरपीमे धर्मा इत्यपि न युक्तम् । किन्त्वानर्थक्यप्रतिहत-ज्योतिष्टोमप्रकरणबाधेन सन्निधिरूपस्थानप्रमाणादग्नीषोमीयार्थाः पशुधर्माः ।

८. दर्शपूर्णमसप्रकरणे श्रुताः पलाशशाखाच्छेदनं वत्सापाकरणमित्यादयो दोहधर्माः पूर्वेद्यू रात्रौ परेद्युः प्रानश्च क्रियमाणयोर्द्वयोर्दोहयोर्मध्ये पूर्वेद्युः क्रियमाण उभयदोहधर्मा एव । न तु सायन्दोहार्थाः ।

९. ज्योतिष्टोमे प्रातःसवने विद्यमानानां ग्रहणां सादनसम्मर्गादयो धर्माः स्थानप्रमाणत्प्रातः सावनिकग्रहाणामेवेति न युक्तम् । वाक्यप्रकरणाभ्यां स्थानबाधेन सवनत्रयसम्बन्धिसर्वग्रहाणमपि ।

१०. अग्नीषोमीयपशुसन्निधावुक्ता रशनया यूपस्य परिवेष्टनमित्यादयो धर्मा रशना चाग्नीषोमीययूपा-र्थपरिव्याणार्था न भवन्ति । किन्तु सवनीययूपार्थपरिव्याणार्था अपि भवन्ति ।

११. सवनत्रयगतग्रहसाधारणाः पूर्वोक्त धर्मा ज्योतिष्टोमप्रकरणवशेनासन्निहितयोरंश्वदाभ्यग्रहयोर्नेति न वक्तव्यम् । किन्तु तयोरप्राकरणिकयोरपि वाक्यबलात्संन्ति ते धर्माः ।

१२. चित्रिण्यादिसञ्ज्ञकानामिष्टकानामनारभ्याधीतानामप्यग्निप्रकरणेक्त इष्टकाधर्मा अखण्डत्वादयो वाक्यप्रमाणाद्भवन्त्येव । न प्राकरणिकानामेव ।

१३. ''सोमं क्रीणति'' इत्यादिवाक्योक्तक्रयभिषवादिसोमसंस्कारधर्मा राजन्यवैश्यनिमित्तके फलचमसे उपदेशतो न प्रप्नुवन्ति । किन्त्वतिदेशत एव तत्र प्रप्नुवन्ति ।

१४. श्रुतव्रीह्यादिद्रव्यापचारे उपादीयमानो नीवारादिप्रतिनिधिर्मुख्येन समनविधान एव । अतस्तत्र मुख्यधर्मनुष्ठानम् ।

१५. सोमाद्यभावे उपदीयमानो पूतिकादिप्रतिनिधिः ''यदि सोमं न विन्देत'' इत्यादिवाक्येन तस्य साधनत्वोक्त्या पूतिकलतागतानां सोमावयवानामेव साधनत्वात्सोमसमानविधाना पूतिकलता । न तु फलचमसवदसमानविधाना ।

१६. ज्योतिष्टोमप्रकरणे श्रुतो दीक्षणीयेष्टिप्रायणीयेष्ट्याद्यङ्गविधिर्ज्योतिष्टोमस्य प्रथमसंस्थाविशेषे अग्निष्टोमे यथा प्रवृत्तस्तथैवोक्थ्यादिसंस्थादरप्युपदेशतः प्रवर्तत इति न मन्तव्यम् । किन्तु केवलं क्रत्वर्था एव धर्मा अतिदेशोनोक्थ्यदिसंस्थासु प्राप्यन्ते ।

अथ तृतीये शेषशेषिभावाध्याये बह्वर्थपादस्सप्तमः

१. दर्शपूर्णमासयोः श्रुता वेदिबर्हिरादयस्तद्धर्माः खननलवनादयश्च प्रयाजादिरूपाङ्गदर्शादिरूपप्रधान-

हविषामुभयेषामप्युपकारकत्वेनाङ्गभूता एव । न तु प्रधानहविष एव खननलवनादिस्वधर्मोपेतमेव वेदिबर्हिरादिकमङ्गम् ।

२. ज्योतिष्टोमे श्रुताः केशश्मश्रुवपनदयो यजमानधर्मा अङ्गप्रधानयोरुभयोरप्युपकारका इति न मन्तव्यम्। किन्तु कर्तृत्वभोक्तृत्वरूपाकारद्वयविशिष्टस्य यजमानस्य वपनादिकृतोपकारस्यदृष्टत्वाद्भोक्तृशेषा वपनादयः फलभोगसाधने प्रधान एव निविशन्ते ।

३. ''षट्त्रिंशत्प्रथमा'' इत्यादिनोक्ता सौमिकी वेदिः प्रधानार्थैवेति प्रथमः पूर्वपक्षः । एवं पूर्वपक्षे स्थिते मध्ये चिन्तान्तरमरभते सूत्रकार इति भट्टः ।

४. ''चतुर्होत्रा पौर्णमासीमभिमृशेत्'' ''पञ्चहोत्राऽमावास्याम्'' इति दर्शपूर्णमासयोर्हविरभिमर्शनार्थौद्वौ मन्त्रौ श्रुतौ । ''पृथिवी होता द्यौरध्वर्युः'' इत्यादिको मन्त्रश्चतुर्होतेत्युच्यते । ''अग्निर्होता'' इत्यदिको मन्त्रः पञ्चहोता । तौ मन्त्रौ वचनात्प्रधानार्थाववेति द्वितीयः पक्षः । एतौ न पक्षौ न युक्तौ । किन्त्वङ्गप्रधानोभयार्था वेदिरिति प्रथमपूर्वपक्षस्योत्तरम् । अङ्गप्रधानहविरभिमर्शनार्थौ मन्त्राविति द्वितीयपूर्वपक्षस्योत्तरम् ।

५. ज्योतिष्टोमे दीक्षा दक्षिणा च श्रुता । ते च प्रधानाङ्गोभयार्थे इति न मन्तव्यम् । किन्तु प्रधानोपकरकाववेति ।

६. अग्नीषोमीयपशौ ''यूपं मिनोति'' इति प्रकृत्य यूपस्थापनार्थावटमूलस्थौल्यमन्तर्वेद्यर्धं बहिर्वेद्यर्धञ्च भवतीति ''अर्धमन्तर्वेदि मिनोति, अर्धं बहिर्वेदि'' इति श्रुतम् । तत्र वेद्येकदेश एव यूपांगतया विधीयत इति न मन्तव्यम् । किन्तु लौकिकदेश एवात्र यूपाङ्गत्वेन विधीयते । न तु संस्कृतो वेदिभागः ।

७. ज्योतिष्टोमे हविर्धानमण्टपे सामिधेनीरनुब्रूयादिति श्रूयते । तद्धविर्धानं सामिधेन्यङ्गमिति न युक्तम्। हविर्धानसमीपस्थाभिषवदेश एव । वाक्यप्रकरणविरोधचिन्तासमाप्तिः ।

८. समाख्यायाः श्रुत्यादिभिर्विरोधाविरोधचिन्तार्थमुपोद्घातचिन्ता क्रियते एकादशभिरधिकरणैः। दर्शपूर्णमासादिकं सर्वं कर्म सर्वाङ्गोपेतं यजमान एव कुर्यादिति न मन्तव्यम् । यजमानेनैव त्यागमात्रं कार्यमिति नियमः । स्वयं शक्तश्चेदन्यत्स्वयं कुर्यात् । अशक्तश्चेदन्येन कारयेदिति त्यागादन्यत्रानियम इत्यपि न मन्तव्यम् । किन्तु त्यागादन्यदन्येनैव कारयेत् ।

९. उत्सर्गादन्यत्रान्यः कर्तेत्युक्तम् । तस्यान्यस्य कर्तुः संख्या न नियतेति न मन्तव्यम् । एक एवान्यः कर्तेत्यपि न युक्तम् । किन्तु यावन्ति कर्तृनामधेयानि कर्माणि श्रूयन्ते तावन्तोऽङ्गीकार्याः । अतः षोडशैव ते ।

१०. चमसाध्वर्यवश्च पूर्वोक्तेष्वन्यतमा एवेति न मन्तव्यम् । किन्तु पूर्वोक्तषोडशर्त्विग्भ्योऽन्य एव ।

११. चमसाध्वर्युसंख्या न व्यवस्थितेति न वक्तव्यम् । बहव एव ते ।

१२. चमसाध्वर्यूणां बहुत्वेप्येतावन्त इत्यनियम इति न मन्तव्यम् । दशैव ते ।

१३. शतिता च प्रागुक्तेभ्योऽन्य एवेति न मन्तव्यम् । किन्तु अध्वर्युपुरुषाः प्रतिप्रस्थात्रदयः सञ्ज्ञपयितार एव ।

१४. उपगातारश्च प्रागुक्तेभ्योऽन्या एवेति न मन्तव्यम् । किन्तु तन्मध्ये केचिदुपगातारः ।

१५. सोमविक्रयी च प्रागुक्तेष्वन्यतम ' एवेति न मन्तव्यम् । किन्तु प्रागुक्तेभ्योऽन्य एव ।

१६. पूर्वोक्ताः सर्वे ऋत्विङ्नामवाच्या इति न मन्तव्यम् । किन्तु वरणविशिष्ट अध्वर्व्वादय एव ऋत्विजः । न चमसाध्वर्यव इति भाष्यकारः ।

१६. वरणवैशिष्ट्यं न ऋत्विक्पदप्रयोगे निमित्तम् । किन्तु ऋतुयजनविशिष्टत्वम् । तच्च चमसाध्वर्यु-व्यवृत्तमेवाङ्गीक्रियत इति भाष्यकारोक्तं वरणनिमित्तत्वमृत्विक्पदस्य निराकृत्य भाष्यकरोक्तमेव सिद्धान्तं स्थापयामास भट्टः ।

१७. ते च ऋत्विजो ब्रह्मद्विषु केचिच्चमसध्वर्युषु केचिदित्यनियम इति न मन्तव्यम् । किन्तु ब्रह्मदीनामेव ऋत्विक्त्वं नन्येषामिति नियम एव ।

१८. ब्रह्मादीनां षोडशानामृत्विक्त्वं सिद्धम् । सदस्यः सप्तदश इति न मन्तव्यम् । यजमान एव ।

१९,२०.समाख्यायाः श्रुत्यादिभिर्विरोधाविरोधचिन्तारम्भः । तेषामधर्व्वादीनां कार्यं लिङ्गप्रकरणाभ्या-मव्यवस्थितमिति पूर्वपक्षः । एवं पूर्वपक्षे स्थिते मध्ये चिन्तान्तरम् ।

२१. अनारभ्यवादेन विहिताग्न्यः प्रकृतावेवाम्नातहोमार्था इति न मन्तव्यम् । किन्तु प्रकृतिविकृत्युभयार्था एव । पूर्वपक्षस्योत्तरन्तु लिङ्गप्रकरणाविरोधेन समाख्यया व्यवस्थितमेवेति ।

२२. अग्नीषोमीयपशौ श्रुतं ''मैत्रावरुणः प्रेष्यति चानु चाह'' इति प्रैषशिरस्कानुवचनं, ''होताऽयक्षदग्निं समिधम्'' इत्यनुवचनस्यान्ते प्रैषश्रवणात्प्रैषयुक्तानुवचनं, ''अग्न्ये समिध्यमानायानुब्रूहि'' इत्यादिकं केवलप्रैषवचनं, ''प्र वो वाजा अभिद्यवः'' इत्यादिकं केवलुवचनश्च । तत्र केवलप्रैषवाक्ये केवलानुवचनवाक्ये प्रैषयुक्तानुवचनवाक्ये च मैत्रावरुणः कर्तेति न मन्तव्यम् । किन्तु प्रैषयुक्तानुवचन एव । तथा च वाक्येन समाख्यायाः प्रैषयुक्तानुवचनांशे बाधेपि न केवलप्रैषादौ बाधः ।

२३. ज्योतिष्टोमे सन्ति चमसाध्वर्यवः । त एव चमसैर्जुहुयुरिति न युक्तम् । किन्त्वध्वर्यव एव जुहुयुः ।

सामान्यसमाख्यासापेक्षाया विशेषसमाख्यायाः सामान्यसमाख्याबाधकत्वाभावात् ।

२४. औद्गात्रेतिसमाख्यायुक्ते सामवेदे श्येनयाग आम्नातः । आध्वर्यवसमाख्यावति यजुर्वेदे वाजपेयः पठितः । द्वावपि ज्योतिष्टोमविकृती । तत्र समाख्यावशाच्छ्येने उद्गातैकः कर्ता:, वाजपेये चाध्वर्युरेकः कर्ता सन्नतिदेशतः प्राप्तानङ्गपदर्थान् समाख्यया उद्गात्रादिः स स एव कुर्यादिति न युक्तम् । किन्तु प्रकृतिवन्नानैव कर्तारः ।

अथ तृतीये शेषशेषिभावाध्याये याजमानपादोऽष्टमः

१. ज्योतिष्टोमेऽस्ति दक्षिणा । सा च द्वादशशतरूपाऽऽध्वर्यवसमाख्यावति यजुर्वेदे औद्गात्रसमाख्यावति सामवेदे चाम्नाता । दर्शपूर्णमासयोरन्वाहार्यदक्षिणाप्यध्वर्युवेदे । तत्र दक्षिणादानेन ऋत्विक्परिक्रयः समख्यावशादधर्य्वादिभिरेव कार्य इति न युक्तम् । किन्तु प्रधानविधिना समख्याया बाधाद्यजमान एव परिक्रीणीयात् । यत्र तु स्पष्टं वचनमस्ति तत्राध्वर्युरपि परिक्रीणीयात् ।

२. अध्वर्युवेदश्रुता केशश्मश्रुवपनादयः पुरुषसंस्काराः यजमानस्यैव भवन्ति । समख्यया न त्वध्वर्य्वादीनाम् । परिक्रयविधिना समाख्याया बाधात् ।

३. कायशोषणरूपं तपःशब्दितं कर्म समाख्यया अध्वर्य्वादीनामेवेति न मन्तव्यम् । किन्तु यजमानस्यैव ।

४. वाजपेये ''हिरण्यमालिनो ऋत्विजः प्रचरन्ति'' इति श्रूयते । श्येनप्रकरणे लोहितोष्णीषा लोहितवसना निवीता ऋत्विजः प्रचरन्ति ''इति श्रूयते । तत्र हिरण्यमालित्वादयो धर्माः संस्कारत्वाद्याजमानत्वेन भासमाना अप्यध्वर्युकाण्डे पठिता आध्वर्यवा एव । औद्गात्रसमाख्याते सामवेदे पठिता लोहितोष्णीषत्वादय उद्गातृगता एवेति न वक्तव्यम् । वचनात्समाख्याबाधात्सर्वर्त्विग्धर्मतैव ।

५. ज्योतिष्टोमे सदोमाने ''यदि कामयेत वर्षुकः पर्जन्यः स्यादिति नीचैः सदो मिनुयत्'' इति श्रुतः कामयतिर्वाक्याविरुद्धया समख्यया सदोमानकर्तृगत एव । न यजमान इति न मन्तव्यम् । किन्तु श्रुत्या वाक्यसमाख्ययोर्बाधाद्याजमान एव ।

६. ''आयुर्दा अग्नेऽस्ययुर्देहि'' इत्यादय आध्वर्यवसमख्याते वेदे पठिता मन्त्राः समाख्यया आध्वर्यवा एवेति न मन्तव्यम् । मन्त्रलिङ्गात्समाख्याया बाधाद्याजमाना एव ।

७. दर्शपूर्णमासयोः ''वाजस्य वा प्रसवेन'' इत्यादयो मन्त्राः सामान्यरूपेणाध्वर्युकाण्डे विशेषरूपेण याजमानकाण्डे च पठिता अध्वर्युयजमानयोर्मध्ये येन केनचिद्वा अध्वर्युणैव केवलेन वा यजमानेनैव केवलेन वा प्रयोक्तव्या इति न मन्तव्यम् । किन्तु समाख्ययोरविरोधादुभाभ्यामपि प्रयोक्तव्याः ।

८. वाजपेये ''क्लृप्तीर्वाचयति'' इति श्रुतान् क्लृप्तिनामकान् ''आयुर्यज्ञेन कल्पताम्'' इत्यादीन्मन्त्रान्

मन्त्रार्थानभिज्ञाभिज्ञौ द्वौ वा अनभिज्ञमेव वा वाचयेदिति न मन्तव्यम् । किन्तु मन्त्रार्थाभिज्ञमेव वाचयेत् ।

९. आध्वर्यवसमाख्यावति यजुर्वेदे यजमानकाण्डे षष्ठे प्रश्ने दर्शपूर्णमासप्रकरणे श्रुतानि द्वादश द्वन्द्वानि तत्पदार्थाश्च विशेषसमाख्यया यजमान एव सम्पदयेदिति न मन्तव्यम् । किन्त्वध्वर्युरेव कुर्यात् ।

१०. अग्नीषोमीयपशौ विहितौ रशनया यूपपरिव्याणकरणमन्त्रक्रियमणनुवादिमन्त्रौ क्रमेणाध्वर्युहोतृकर्तृके चोदकपरम्परया कुण्डपायिनामयनं प्राप्तौ । तत्र चाध्वर्युहोत्रोरैक्यदेकेनैव । मन्त्रद्वये वक्तव्ये अनियमेन यस्य कस्यापि मन्त्रस्य प्रथममुक्तिरिति वा करणमन्त्रस्यैव प्रथममुक्तिरिति वा न मन्त्रव्यम् । किन्तु क्रियमाणानुवादिमन्त्रस्यैव प्रथममुक्तिः ।

११ अग्नीषोमयोः श्रुताः ''प्रोक्षणीरासादय'' इत्यादयः प्रैषाः प्रैषार्थाः प्रोक्षण्यासादनादयश्चाध्वर्युणैव कर्तव्या इति न मन्तव्यम् । किन्तु प्रैषप्रैषार्थयोर्भिन्नकर्तृकत्वमेव ।

१२. अध्वर्युरेव प्रैषार्थकर्ता । प्रेषयिता त्वग्नीदिति न मन्तव्यम् । किन्तु अध्वर्युः प्रेषयिता । प्रैषर्थानुष्ठाता त्वग्नीत् ।

१३. दर्शपूर्णमासप्रकरणस्थेषु अध्वर्युणा पठ्यमानेषु ''मामाग्ने वर्चो विहवेष्वस्तु'' इत्यादिषु करणमन्त्रेषु श्रूयमाणं फलं ममेति पदलिङ्गादध्वर्युगामीति न मन्तव्यम् । श्रुतिन्यायाभ्यां लिङ्गबाधेन यजमानगाम्येव ।

१४. दर्शपूर्णमासयोराघारहोमार्थमाज्यपूर्णौ स्रुक्स्रुवौ नाभिसमीपे धृत्वा अध्वर्युणा पठ्यमानेन ''अग्नाविष्णू वामक्रमिषम्'' इत्यादिना मन्त्रेण प्रकाश्यं सन्तापाभावरूपं फलं यजमानगामीति न मन्तव्यम् । किन्त्वध्वर्युगामि ।

१५. ज्योतिष्टोमे हविर्धानमण्टपे विद्यमनेषूपरवनामकेषु गर्तेषूर्ध्वभागे प्रादेशमात्रव्यवहितेष्वधोभागे परस्परं मिलितेष्वरत्निमात्रखातेष्वेकस्मिन्नुपरवके प्रसारितं यजमानहस्तमपरस्मिन्नुपरवके प्रसारितहस्तोऽध्व-र्युर्गृह्णाति । तदा यजमानः ''किमत्र भद्रं तन्नौ सह'' इति मन्त्रगतेन ''किमत्र'' इत्यंशेन फलं पृच्छति । अध्वर्युश्च ''भद्रम्'' इत्यंशेनोत्तरं ब्रूते । ततो यजमानः तन्नौ सह'' इत्यंशेन तत्फलं स्वक्रीयत्वेन स्वीकरोति । तच्च फलं याजमानमेवेति न मन्तव्यम् । किन्तूभयगाम्येव ।

१६. श्रुत्यादिभिः पूर्वपूर्वनयैरुत्तरौत्तरस्य विरोधाविरोधविचार इदानीं समाप्तः ।

पूर्वपादाद्यनये प्रकृतिविकृत्योरङ्गप्रधानसाधारण्यं बर्हिर्धर्माणामुक्तम् । ते च धर्मा विकृतावतिदिश्य-माना यूपावटास्तरणबर्हिष्यपि भवन्तीति न मन्तव्यम् । किन्तु यूपावटास्तरणस्य प्राकृतकार्यत्वा-भावात् प्राकृतकार्यप्रयुक्तानां तेषां न यूपावटास्तरणबर्हिष्णु सम्भवः ।

१७. दर्शपूर्णमासयोः ''समावच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे करोति'' इति श्रुतम् । तथा ''ऐक्षवी विधृती'' इति वाक्येन विधृतिनामकौ कुशावपि श्रुतौ । तत्र विधृतिपवित्राणि लवनादि-संस्कृताद्वेदिस्तरणार्थाद्बर्हिषःकार्यामीति न मन्तव्यम् । किन्तु लवनादिशास्त्रीयंस्सकाररहितैः परिभोजनीयनामकैर्दर्भैरेव ।

१८. ज्योतिष्टोमे ''पुरोडाशशकलमैन्द्रवायवस्य पात्रे निदधाति'' इति श्रुतम् । तत्रोक्तं पुरोडाशशकलं यज्ञार्थादन्यस्य पुरोडाशस्य पृथगुत्पादितस्येति न मन्तव्यम् । किन्तु सवनीयपुरोडाशस्यैव ।

१९. ''यज्ञाथर्वणं वै काम्या इष्टयः । ता उपांशु यष्टव्या'' इति विकृतौ श्रुतमुपांशुत्वमङ्गप्रधान-साधारणमिति न मन्तव्यम् । किन्तु प्रधानकाम्येष्ट्यर्थमेव ।

२०. ''दृतिनवनीतमाज्यं भवति'' इति श्येने श्रुतं दृतिनवनीतं प्रधानश्येनार्थमेवेति न मन्तव्यम् । किन्तु श्येनाङ्गार्थमेव ।

२१. तद्दृतिनवनीतत्वं सुत्याकालीनेषु पशुतत्पुरोडाशरूपेष्वङ्गेष्वेवेति न मन्तव्यम् । किन्तु कालान्तरवर्तिदीक्षणीयाद्यङ्गेष्वपि ।

२२. षट्त्रिंशत्सु संवत्सरेष्वनुष्ठेये शाक्तानामयनाख्ये सत्रे ''संस्थितेऽहनि गृहपतिर्मृगयां याति'' इत्यादिवाक्ये श्रुतं तरसमयशब्दवाच्यं मांसमयत्वं सवपुरोडाशानामिति न मन्तव्यम् । किन्तु सवनीयानामेव ।

भाट्टसंग्रहे व्याख्यातपदानामाकारादिक्रमेण सूचीपत्रम्

अग्निहोत्रावणी – निर्वासाधनकाष्ठपात्रम्

अदाभ्यः – ग्रहविशेषः

अध्वर्युः – यजुर्वेदोक्तकर्मकर्ता

अनुवषट्कारः – सोमशेषद्रव्यकप्रतिपत्तियागः

अयाशया – भूमिष्ठमयोनिर्मितं वा वह्निशरीरम्

अवगोरणम् – अवज्ञा

आगुरुते – सङ्कल्पयति

आग्नीध्रः – मण्टपविशेषः

आतिथ्या – क्रीतं सोमं शकटेऽवस्थाप्य प्राचीनवंशं प्रत्यानयने याममभिमुखो निर्वपति सेष्टिः

आमिक्षा – दध्यतिरिक्तोऽतिपक्वपयसो विकारः

ईषा – शकटगतो लाङ्गलवद् दीर्घः काष्ठविशेषः

उख्यः – उखायां स्थापितोऽग्निः

उग्रं वचः – अशनायापिपासे

उद्गाता – उद्गानकर्ता

उपधानम् – स्थलविशेषे स्थापनम्

उपरवः – गर्तविशेषः

उपवीतम् – शीतवातातपपीडानिवृत्त्यर्थं वासोविन्यासविशेषः

उपवेषः – वृक्षादानीतायाः पलाशशाखायाः पुनश्छिन्नायाः मूलभागः

उपसदः – दीक्षादिनादूर्ध्वं सोमाभिषवात् पूर्वं कर्तव्याः होमाः

उपाकरणम् – "प्रजापतेर्जायमानाः" "इमं पशुम्" इत्याभ्यामृग्भ्यां पशोरुपस्पर्शनम्

उपोप्तम् – सिकतापरिष्कृतं स्थलम्

उलपः – तृणविशेषः

ऊ – स्तोभाक्षरम्

ऊहः – "अग्नये जुष्टं निर्वपामि" इत्यत्र सौर्यचरौ "अग्नये" इत्यस्य स्थाने "सूर्याय" इति पादान्तरप्रक्षेपः

ऊर्क्	–	स्तोभाक्षरम्
ऋजीषम्	–	निष्पादितस्य सोमस्य नीरसो भागः
ऐन्द्री	–	ऋग्विशेषः
अंशुः	–	ग्रहविशेषः
करणमन्त्रः	–	मन्त्रविशेषः
काण्डानुसमयः	–	काण्डेन गुणकाण्डेन अनुसमययः सम्बन्धः
कुण्डपायिनामयनम्	–	सत्रविशेषः
क्रियमाणानुवादिमन्त्रः	–	मन्त्रविशेषः
ग्रावस्तुत्	–	होतृष्वेकः
चतुर्होता	–	मन्त्रविशेषः
चितिः	–	लाङ्गलाकृष्टायां भूमौ नानाविधाभिरिष्टिकाभिः पक्ष्याद्याकारेण निष्पादितं स्थलम्
चित्रिणी	–	इष्टकाविशेषः
चत्वालः	–	गर्तः
जञ्जल्यमानः	–	गात्रविनामेन विदारितमुखः पुरुषः
जाघनी	–	पशोर्जघनप्रदेशभवो मांसखण्डविशेषः
जामि	–	आलस्यहेतुः
जुहूः	–	अरत्निप्रमाणदण्डो हंसमुखदळबिलः पलाशदारुविकृतिविशेषः
तरसमयाः	–	मांसमयाः
त्रिवृत्	–	त्रिरज्जुका रशना
त्रैविदाः	–	वेदत्रयाध्यायिनः
दशापवित्रम्	–	कम्बळखण्डम्, वासःखण्डमित्यपरे।
दीर्घसोमः	–	विकृतियागविशेषः
दृतिनवनीतम्	–	चर्मभस्त्रिकायां चिरं स्थापितेन नवनीतेन सिद्धमाज्यम्
नामधेयम्	–	सुब्रह्मण्यायाममुको यजते इत्यादि
निगदः	–	परसम्बोधनपरवाक्यानि
निधनम्	–	प्रस्तावादिभक्तिभिर्युक्तस्य साम्नोऽन्त्यभक्तिः

निनयनम् – चतुर्दिक्षु सेचनम्

निरिष्टिकं बर्हिः – अन्यत्रोपयुक्तं बर्हिः

निवित् – इध्मसिद्धाग्निसम्बोधनरूपा ऋक्

निवीतम् – उत्तरीयस्य मध्ये बन्धनम्

परकृतिः – एककर्तृकचरितानुवादः

पदार्थानुसमयः – प्रत्येकगुणानां क्रमेण सम्बन्धः

पर्यग्निकरणम् – ज्वालया त्रिःप्रदक्षिणीकरणम्

पुराकल्पः – अनेककर्तृकचरितानुवादः

पृश्निः – अल्पतनुः

प्रउगम् – शस्त्रविशेषस्य नाम

प्रवरः – त्र्यार्षेयादिः

प्रष्ठौही – त्रिवर्षा

प्राचीनवंशः – प्रागग्रवंशनिर्मितमण्टपः

प्राचीनावीतम् – अपसव्यतया वासोधारणम्

प्रस्तरः – स्रुग्धारणाद्युपयुक्तदर्भमुष्टिः

प्राणमृतः – प्राणशब्दयुक्ता ''अयं पुरो भुवः'' इत्यनुवाकस्था मन्त्राः

ब्रह्मा – वेदत्रयोक्तस्य प्रत्यवेक्षणकर्ता

भक्तिः – स्तोभाक्षरसामैकदेशः

मलवद्वासाः – रजस्वला

मह्वा – गलस्तनयुता

रजाशया – अन्तरिक्षस्थं रजतनिर्मितं वाऽग्निशरीरम्

रुग्मप्रतिमोचनम् – रुग्मधारणम्

लोकम्पृणा – इष्टकाविशेषः

वसन्तोत्सवः – फाल्गुनकृष्णप्रतिपदि क्रियमाणमन्योन्यजलसेचनम्

वाजम् – तुराद्रव्यम्

वाजिनम् – आमिक्षतो निःसृतं जलम्

वारणः – दारुपात्रविशेषः
वार्तघ्नी – ऋग्विशेषः
विधृतिः – वेद्यामुदगग्रस्तया स्थाप्यौ कुशौ
वृधन्वती – ऋग्विशेषः
वेदः – सम्मार्जनहेतुदर्भमुष्टिः
वेदिः – आहवनीयगार्हपत्यमध्यवर्तिनी चतुरङ्गुलखाता भूमिः
वैकङ्कतः – दारुपात्रविशेषः
व्रतम् – भोजनम्
शम्या – शूलाकारकाष्ठम्
शर्कराः – मृत्तिकामिश्राः क्षुद्रपाषाणाः
शस्त्रम् – अप्रगीतमन्त्रसाध्या स्तुतिः
शाक्यानामयनम् – षट्त्रिंशत्सु वत्सरेषु क्रियमाणं सत्रम्
संयवनम् – पुरोडाशार्थं पेषणम्
स्फ्यः – खड्गाकारकाष्ठम्
स्वरुः – यूपार्थं खादिरादिवृक्षच्छेदे यः प्राथमिकः शकलः पतितः सः
सामिधेनी – ऋग्विशेषः
सूक्तवाकः – मन्त्रविशेषः
सोमः – सोमरससाधनको यागः
सौभरम् – सामविशेषः
स्तिमित्यः – वटमुकुलिनीत्येके । वटफलानीत्यन्ये
स्तोत्रम् – प्रगीतममन्त्रसाध्या गुणगुणिसम्बन्धकीर्तनरूपा स्तुतिः
हराशया – द्युलोकस्थं हिरण्यनिर्मितं वाऽग्निशरीरम्
हविष्कृत् – यजमानपत्नी
हारियोजनः – ग्रहविशेषः
हीष् – स्तोभाक्षरम्
होता – शंसनकर्ता

Bhātta Saṅgraha

प्रथमाध्याये प्रथमः पादः

नत्वा धर्मं वेदगम्यं जैमिन्यादिमुनीनपि ।
करोमि बालबोधाय भट्टोक्तन्यायसङ्ग्रहम् ॥

Śrī Rāghavendratīrtha commences his commentary Bhāttasaṅgraha on Jaimini sūtras by offering his obesience to Dharma the central theme of Pūrvamīmāmsa and Jaimini etc the propounders of Pūrvamīmāmsā.

धर्मजिज्ञासाधिकरणम् (I-1-1)

In this adhikaraṇa the question whether the word वैश्वदेव in the statement वैश्वदेवेन यजेत is गुणविधि or नामधेय is raised and it is concluded that it is a नामधेय.

At चातुर्मास्य sacrifice a group of वैश्वदेव, वरुणप्रधास etc four कर्मs are enjoined. In the first पर्व of these आग्नेयमष्टाकपालं निर्वपति. सौम्यं चरुं etc eight yāgas are prescribed. Among these 'वैश्वदेवीमामिक्षाम्' is seventh. After stating these eight yāgas it is enjoined that 'वैश्वदेवेन यजेत.'

चातुर्मास्याख्ये कर्मणि वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयशब्दितपर्वनामक कर्मसमुदायचतुष्टयमाम्नातम् । तत्र प्रथमे पर्वणि अष्टौ यागाः विहिताः 'आग्नेयमष्टाकपालं निर्वपति, सोम्यं चरुम्, सावित्रं द्वादशकपालम्, सारस्वतं चरुम्, मारुतं सप्तकपालम्, वैश्वदेवीमामिक्षाम् द्यावापृथिव्यमेक कपालमिति । तेषां यागानां सन्निधौ 'वैश्वदेवेन यजेत' इति श्रुतम् । तत्र वैश्वदेवशब्दः गुणविधिः उत नामधेयमिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that here विश्वदेवदेवतारूपगुण is enjoined with reference to all eight yāgas. In the seventh विश्वेदेव is already stated. In the case of other seven, विश्वेदेव has to be taken as an alternative to the अग्नि etc already mentioned for the yāga concerned.

उक्तयागान् अनूद्य उपसर्जनीभूतविश्वदेवाख्यदेवतारूपो गुणो विधीयते । सप्तमे यागे विश्वदेवानां प्राप्तत्वेपि तदन्यसप्तयागेषु गुणविधिरस्तु इति प्राप्ते ।

Siddhānta : Siddhāntin points out that here, the name वैश्वदेव is given to the whole group of eight yāgas. Though this name is mentioned for one of them it applies to the whole group by छत्रिन्याय. It is stated in the Brāhmaṇa 'विश्वदेवाः समयजन्त' these were performed by विश्वदेवs. Hence, also these are called वैश्वदेव.

सिद्धान्तः । उत्पत्तिवाक्ये विहितान् अष्टौ यागान् । यजिना अनूद्य अष्टानां सङ्घे वैश्वदेवनामसम्बन्धः क्रियते । यद् विश्वे देवाः अयजन्त तद् वैश्वदेवस्य वैश्वदेवत्वमिति ब्राह्मणवाक्योक्त्या विश्वदेवकर्तृकत्वाद् वा ।

वैश्वानरे अष्टाकपालादिशब्दानाम् अर्थवादताधिकरणम् (I-4-12)

In काम्येष्टिकाण्ड the statement 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते occurs. Continuing this statement offering from अष्टकपाल to द्वादशकपाल पुरोडाश is stated to obtain various benefits. It is concluded that यस्मिन् जाते एतामिष्टिं निर्वपति पूत एव स तेजस्वी अन्नादः इन्द्रियावी पशुमान् भवति ।

Here, the question is raised whether the अष्टाकपाल, नवकपाल etc upto द्वादशकपाल are कर्मनाम, गुणविधि or अर्थवाद. First two alternatives form two pūrvapakṣa and the last siddhānta.

i) By the application of तत्प्रख्यन्याय अष्टादशकपाल etc have to be considered as कर्मनाम.

ii) The words अष्टाकपाल etc refer to पुरोडाशद्रव्य, hence, these are गुणविधि.

Siddhānta : Siddhāntin points out that if अष्टाकपाल etc many गुणs are enjoined, it will result in वाक्यभेद. The closing sentence एतामिष्टिं निर्वपति indicates एकवाक्यता. Therefore, अष्टाकपाल etc are intended to glorify the offering of द्वादशकपाल and consequently are of the nature of अर्थवाद.

काम्येष्टिकाण्डे श्रुतम् 'वैश्वानरं द्वादशकपालं निर्वपेत् पुत्रे जाते । यदष्टाकपालो भवति गायत्र्या एव एनं ब्रह्म वर्चसेन पुनाति । यन्नवकपालः त्रिवृता एव अस्मिन् तेजो दधाति । यद्दशकपालः विराजा एव अस्मिन् अन्नाद्यं दधाति । यदेकादशकपालः त्रिष्टुभैव अस्मिन् इन्द्रियं दधाति । यद् द्वादशकपालः जगत्या एव अस्मिन् पशून् दधाति । यस्मिन् जाते एतामिष्टिं निर्वपति । पूत एव तेजस्वी अन्नादः इन्द्रियावी पशुमान् भवति इति ।

तत्र अष्टाकपालादिशब्दाः किं कर्मनामानि उत गुणविधयः अर्थवादो वा इति सन्देहे ।

i) वैश्वानरवाक्ये श्रुतद्वादशसङ्ख्यासु अष्टत्वादिसङ्ख्यानामन्तर्भावेण तत्प्रख्यन्यायात् कर्मनाम ।

ii) द्वादशसु कपालेषु संस्कृतः पुरोडाशः इति पुरोडाशद्रव्यपरतया गुण विधयः

iii) अनेकगुणविधाने वाक्यभेदापत्त्या 'वैश्वानरं द्वादशकपालं निर्वपेत्' इति विहितस्य यस्मिन् जाते एतामिष्टिं निर्वपति इति उपसंहारेण प्रतीतैकवाक्यतायाः भङ्गप्रसङ्गात् द्वादशकपालस्य स्तावकत्वेन सर्वोप्यर्थवादः ॥

यजमानशब्दस्य प्रस्तरादिस्तुत्यर्थत्वाधिकरणम् (I-4-13)

तत्सिद्धि जातिसारूप्यप्रशंसाभूमालिङ्गसमवायाः गुणाश्रयाः (J I-4-23)

In this sūtra six grounds to assign गौणार्थ i.e. secondary meaning to a word are stated. Bhāttasaṅgraha takes this as one sūtra and works out separate adhikaraṇa for each ground. Other commentators take each ground as a separate sūtra and work out separate adhikaraṇas.

(1) तत्सिद्धिः

In the first adhikaraṇa an instance of तत्सिद्धि ground is given. In the statement 'यजमानः प्रस्तरः' the question is raised whether the word is a नाम, or गुण or अर्थवाद.

Since, the words यजमान and प्रस्तर have altogether different meaning one cannot be the name of the other. यजमान cannot also be a गुण i.e. subbordinate item to प्रस्तर in the sense of प्रस्तरकार्यकारी. One of the प्रस्तरकार्य is throwing it in the fire. If यजमान is taken as a गुण for प्रस्तरकार्य, then, he will also required to be thrown in the fire. Hence, the mention of यजमान in this statement has to be taken as अर्थवाद for the glorification of प्रस्तर viz. just as यजमान contributes to the accomplishment of याग, the प्रस्तर also contributes.

The expression तत्सिद्धिः means तस्य यजमानकार्यस्य यागदेः सिद्धिः ।

i) 'यजमानः प्रस्तरः' इत्यत्र यजमानशब्दः किं नाम, उत गुणपरः, अथ अर्थवादः इति सन्देहे गोमहिषयोरिव यजमानप्रस्तरशब्दयोः भिन्नार्थकत्वेन प्रसिद्धत्वात् नामधेयपक्षो न युक्तः ।

ii) प्रस्तरकार्ये स्रुग्धारणादौ यजमानस्य शक्तत्वात् प्रस्तरकार्ये यजमानरूपो गुणो विधीयते इति प्राप्ते – प्रस्तरं प्रहरति इत्युक्तस्य अग्नौ प्रहरणस्यापि प्रस्तरकार्यत्वात् यजमानस्य अग्नौ प्रहरणे सति कर्मपरिलोपप्रसङ्गात् न गुणविधिपक्षो युक्तः ।

iii) यज्ञसाधनत्वरूप यजमानगुणयोगेन विधेयः प्रस्तरः यजमानपदेन स्तूयत इति अर्थवादः इति सिद्धान्तः ।

iv) तत्सिद्धिः तस्य यजमानकार्यस्य सिद्धिः निष्पादकत्वम् गुणस्य गौणशब्दस्य प्रस्तरादौ अन्यत्र वृत्तौ आश्रयः निमित्तम् । फलं तु प्रस्तर एव स्रुगादिसाधनम् न यजमानः ।

आग्नेयादिशब्दानां ब्राह्मणादिस्तुत्यर्थताधिकरणम् (I-4-14)

(2) जातिः

In this adhikaraṇa जाति i.e. birth, is stated as the ground for गौणप्रयोग. To present this ground Bhāṣya gives the instance of 'आग्नेयो ब्राह्मणः' while Vārtika gives 'अग्निर्वै ब्राह्मणः.'

Pūrvapakṣa : Here, pūrvapakṣin argues that ब्राह्मण is enjoined as गुण i.e. subbordinate item to अग्नि. As per the statement 'ब्राह्मणस्य दक्षिणे हस्ते होतव्यम्.'

Brāhmaṇa can be subbordinate to Agni, while Agni cannot do the Brahmaṇas job of priestly duties.

आग्नेयो ब्राह्मणः इति भाष्यवाक्यमनादृत्य 'अग्निर्वै ब्राह्मणः' इति वाक्यमुदाजहार वार्तिककारः ।

अग्निकार्ये होमे ब्राह्मणरूपगुणविधिः । ब्राह्मणकार्यार्त्विज्यादौ अग्नेरयोग्यत्वेपि ब्राह्मणस्य दक्षिणे हस्ते होतव्यमिति श्रुत्या ब्राह्मणस्य अग्निकार्यकरत्वसम्भवात् इति प्राप्ते ।

Siddhānta : Siddhāntin points out that this is a case of अर्थवाद. Both Agni and Brahmaṇa are stated to have been born from the mouth of Prajāpati keeping this in mind Brāhmaṇa is praised here as Agni.

अग्रे ब्राह्मणस्य च प्रजापति मुखजातत्वेन प्रजापतिमुख जन्यत्वस्य अग्निगुणस्य ब्राह्मणे सम्भवेन अग्निशब्देन ब्राह्मणः स्तूयते इति अर्थवादोऽयमिति सिद्धान्तः ।

आदित्यादिशब्दानां यूपस्तुत्यर्थताधिकरणम् (I-4-15)

(3) सारूप्यम्

In this adhikarana the question whether the word आदित्य in the statement 'आदित्यो यूपः' is कर्मनाम, गुणविधि or अर्थवाद is raised. It is concluded that it is अर्थवाद.

Pūrvapakṣa : Pūrvapakṣin argues that though it cannot be कर्मनाम it can be यूपरूपगुणविधि for आदित्योपस्थान.

Siddhānta : Siddhāntin points out that on the basis of तेजस्वित्वरूप the word आदित्य glorifies यूप. Hence, it is अर्थवाद.

यूपनामेति प्राप्तपक्षस्य भिन्नार्थत्वप्रसिद्ध्या अयोगेन अयुक्तत्वं मत्वा कर्माङ्गादित्योपस्थानादौ कार्ये यागाख्यगुणविधिरिति मन्वानं प्रति सिद्धान्त्यते आदित्यगुणस्य अतितेजस्वित्वस्य घृताक्ते यूपे सत्त्वेन एतद्वारा आदित्यशब्दो गौण्या यूपं स्तौति इति अर्थवाद एवायम् ।

अश्वादिशब्दानां गवादिप्रशंसार्थत्वाधिकरणम् (I-4-16)

(4) प्रशंसा

In this adhikarana the question whether the word अपशु in the statement 'अपशवो वा अन्ये गोऽश्वेभ्यः पशवः' is गुणविधि or नामधेय is raised. Pūrvapakṣin states that by the word अपशवः, पशुकार्यनिषेधरूपगुण is enjoined. Siddhāntin points out that if पशुकार्यनिषेध is enjoined, then the very enjoining of अजादिपशु becomes superfluous, hence, it is अर्थवाद of the nature of glorification of गो and अश्व.

'अपशवो वा अन्ये यो अश्वेभ्यः पशवः' इति श्रुते वाक्ये 'अन्ये अजादयः पशवः अपशवः' इत्यत्र अपशुशब्दः गुणविधिरर्थवादो वा इत्येव सन्देहः । गवाश्वान्यपदोपत्तानामजादीनाम् अपशवः इति पदेन पशुकार्यनिषेधरूपो गुणो विधीयते इति पूर्वपक्षे सिद्धान्तः – पशुकार्यनिषेधे अजादिपशुविधिवैय्यर्थ्यप्रसङ्गात् गवाश्वस्तावकत्वेन अर्थवाद एवायम् । अपशुशब्दस्य गवाश्वान्यजातिषु वृत्तौ गवाश्वेषु प्रशस्ततैव निमित्तम् ।

भूमाधिकरणम् (I-4-17)

(5) भूमा

In this adhikaraṇa the question whether the word सृष्टि in the statement 'सृष्टीरुपदधाति' is गुणविधि or अर्थवाद is raised, and it is concluded that it is अर्थवाद.

Pūrvapakṣa : Pūrvapakṣin argues that the hymns 'ब्रह्मअसृज्यत' 'भूतानि असृज्यन्त' etc that contain a reference to सृष्टि are recited while placing the bricks at अग्निचयन. The bricks are also called सृष्टि since, these hymns are recited with reference them. The expression उपधान means placing in a particular place. By the statement 'सृष्टीरुपदधाति,' the सृष्टिमन्त्रs are enjoined as गुण i.e. subbordinate item, to the act of उपधान.

i) अग्निचयनप्रकरणे सृष्टीरुपदधति इति श्रुतम् । सृज्यते इत्यादिशब्दोपेताः मन्त्राः यासामिष्टकानामुपधाने विद्यन्ते ता इष्टकाः सृष्टयः इत्युच्यन्ते । उपधानं स्थलविशेषेषु स्थापनम् । तत्र सृष्टिशब्दः किं गुणविधिपरः अर्थवादो वा इति सन्देहे 'ब्रह्म असृज्यत' भूतानि असृज्यन्त इति मन्त्राः उपधानार्थे विधीयन्ते इति प्राप्ते ।

Siddhānta : Siddhāntin points out that the relation between the सृष्टिमन्त्रs and अग्निचयन is in a general way, and with इष्टका i.e. bricks, is in a particular way is clear from the very context. Hence, enjoining the सृष्टि hymns is not necessary. In the statement सृष्टीरुपदधाति the expression

सृष्टीः is merely अनुवाद. उपधान is enjoined here. In view of this it is not गुणविधि but अर्थवाद. In this connection a special point to be noted is that a few hymns in this group of hymns do not contain the word सृष्टि while majority of them contain the word सृष्टि. On the basis of majority the whole group of hymns is called सृष्टि. In other words, the word सृष्टि covers both hymns that contain the word सृष्टि and those that do not contain the word सृष्टिः. This is a गौणप्रयोग based on भूमा i.e. majority.

ii) चयनप्रकरणे मन्त्राणां पाठेन सामान्यतः चयनसम्बन्धस्य मन्त्रलिङ्गबलेन विशेष-सम्बन्धस्य प्राप्तत्वेन मन्त्राणामविधेयत्वात् । उपधानमेव अत्र विधीयते । सृष्टीरिति तु 'असृज्यत' इत्यादिमन्त्रलिङ्गप्राप्तमन्त्राणामनुवादमात्रम् । अतो मन्त्रानुवादी सृष्टिशब्दः न गुणविधिः ।

iii) सृष्टि मन्त्रसमुदाये सृष्टिभूमा वर्तते । सः गौण सृष्टिपदस्य सृष्टचसृष्टि समुदाये अस्तीति तेन सादृश्येन समुदायवृत्तौ निमित्तम् । फलं तु सृष्टिपदेन असृष्टीनामपि ग्रहणसिद्धिः।

प्राणभृददिशब्दानां स्तुत्यर्थत्वाधिकरणम् (I-4-18)

(6) लिङ्ग समवायः

In this adhikaraṇa the question whether the word प्राणभृत् in the statement 'प्राणभृतः उपदधाति' is गुणविधि or अर्थवाद is raised.

Pūrvapakṣa : Pūrvapakṣin states that प्राणभृत् hymns are enjoined here as गुण for उपधान.

'प्राणभृतः उपदधाति' इत्यत्र किं प्राणभृत् शब्दः गुणविधिपरः अथ अर्थवादः इति सन्देहे पूर्वत्रेव उपधाने मन्त्ररूपगुणविधिरिति प्राप्ते ।

Siddhānta : Siddhāntin points out that there is no need of enjoining the hymns as these are available by लिङ्ग and प्रकरण. उपधान only has to be enjoined. Hence, there is अनुवाद only. A special point to be noted here is

that the group of hymns called प्राणभृत् consists of the hymns that contain the word प्राणभृत् and also the hymns that do not have this word. However, the लिङ्ग i.e. the attributes प्राण: प्राणं etc are found in these hymns. Hence, the whole group is called प्राणभृत्. Therefore, लिङ्गसमवाय: i.e. presence of the same attribute is the ground for गौणप्रयोग here.

i) लिङ्गप्रकरणाभ्यां चयनाङ्गत्वेन मन्त्राणां प्राप्तत्वेन मन्त्राणामविधेयत्वात् उपधान-मात्रस्य विधानात् प्राणभृतः इत्यनुवादः ।

ii) प्राणभृत् शब्देषु विद्यमानः प्राणः प्राणं इत्यादिः श्रुतलिङ्गसमवायः गौणप्राणभृत् शब्दस्य प्राणभृत् अप्राणभृत् मन्त्रसमुदाये प्रवृत्तौ निमित्तम् ।

वाक्यशेषेण सन्दिग्धार्थ निर्णायकाधिकरणम् (I-4-19)

In this adhikarana the question whether the word अक्ताः in the statement 'अक्ताः शर्कराः उपदधाति' be taken in the sense of anointed by any kind of oil or by ghee only is raised.

Pūrvapakṣa : Pūrvapakṣin argues that in the injunctive sentence no particular oil is stated, in अर्थवाद ghee is mentioned. Hence, anointment by any kind of oil is enjoined here. An injunctive statement is superior to Arthavāda on four grounds (i) An injunction conveys its primary meaning (ii) It is cognised earlier than arthavāda (iii) It is not contradicted (iv) It conveys a new point.

'अक्ताः शर्कराः' इति 'तेजो वै घृतम्' इति श्रूयते । मृत्तिकामिश्राः क्षुद्रपाषाणाः 'शर्कराः । ताः किं घृततैलवसानामन्यतमेन अञ्जनीयाः उत वाक्यशेषात् घृतेनैवेति सन्देहः । अञ्जनसामान्यबोधकस्य विधिवाक्यस्य घृतविशेषबोधकादर्थवादात् प्राबल्यात् धृताधृत-लक्षकोस्तु अर्थवादः ।

प्राबल्यं च विधेः (i) स्वार्थपरतया मुख्यत्वात् (ii) प्रथमश्रुतत्वात् (iii) असञ्जातविरोधित्वात् (iv) अनधिगतार्थबोधकत्वात् इति प्राप्ते ।

Siddhānta : Siddhāntin points out that it is true that an injunctive statement is superior to arthavāda. However, in the present case, the injunctive statement conveys anointing without mentioning the particular way. Hence, it cannot be implimented. The वाक्यशेष i.e. the supplimentary statement in the form of arthavāda 'तेज वै घृतम्' helps to specify it. Hence, the anointment has to be made by ghee. The word शर्करा means dusty sand particles.

विधिवाक्यस्य प्राबल्येपि तत्र प्रतीतस्य अञ्जनसाधनसामान्यस्य अनुष्ठानायोग्यत्वात् तन्निर्धारणाय चरमस्यापि अर्थवादस्य अनुसरणीयत्वेन तेजस्त्वेन स्तूयमानघृतविशेषेणैव अञ्जनमिति सिद्धान्तः ।

सामर्थ्येन अव्यस्थितानां व्यवस्थाधिकरणम् (I-4-20)

In this adhikaraṇa the question whether स्रुव, स्वधिति, हस्त etc means of अवदान should be used for the अवदान of आज्य, मांस and पुरोडाश indiscriminately or these should be used depending upon their usefulness, is raised. It is concluded that these should be used as per their capacity for the अवदान of respective items.

'स्रुवेण अवद्यति' 'स्वधितिना अवद्यति' 'हस्तेन अवद्यति' इति अवदानाङ्गत्वेन विहितस्रुवादीनि किम् आज्यमांसपुरोडाशाख्य हविष्षु अविशेषेण प्राप्नुवन्ति उत यथा-सामर्थ्यमिति सन्देहः ।

अशक्यविधेः असम्भवात् शक्तिसहायो विधिरेव यथासामर्थ्यं स्रुवेण आज्यम्, स्वधितिना मांसम्, हस्तेन पुरोडाशमिति विधिं व्यवस्थापयति इति सिद्धान्तः ।

द्वितीयाध्याये प्रथमः पादः

प्रतिपदाधिकरणम् (II-1-1)

In the previous chapter विधि, अर्थवाद, मन्त्र नामधेय, स्मृति and आचार are stated as प्रमाण in respect of धर्म and धर्मस्वरूप is explained in a general way. In this chapter the sub-divisions of धर्म will be explained.

In the first section of this chapter some preliminary points that are helpful to differentiate the sacrificial acts based on the differentiation of अपर्व that is established by श्रुतार्थपत्ति are disscussed. The first अधिकरण is a kind of preface.

तत्र आद्यः पादः श्रुतार्थापत्तिसमधिगम्यापूर्वभेदानुसारिकर्मभेदोपयोग्यर्थ- प्रतिपादत्वात् उपोद्घातविचारप्रधानः । तत्र आद्यमधिकरणमुपोद्घातरूपम् ।

In the first अधिकरण, the question whether in an injunctive statement all words separately convey अपूर्व or only one word conveys it is raised.

Pūrvapakṣa : Pūrvapakṣin argues that all words seperately convey अपूर्व. He gives the following reasons.

i) If all words convey अपूर्व then, all of them will be contributing to the main अपूर्व. There will be uniformity also.

ii) If one word only conveys अपूर्व, to connect other words with it मत्वर्थलक्षणा will be required. This is not desirable.

iii) If the other words are separately connected with this one word, then, it will result in वाक्यभेद or it will result in विरुद्धत्रिकद्वय.

i) सर्वेषां फलसम्बन्धेन अपूर्वप्रतिपादकत्वे सर्वेषां फलसम्बन्धलाभात् अवैरूप्य सम्भवाच्च सर्वाण्यपि पदानि अपूर्वप्रतिपादकानि ।

ii) एकस्यैव पदस्य तथात्वेपि अन्येषां पदानां तेन सामानाधिकरण्येन अन्वये मत्त्वर्थलक्षणा दोषप्रसङ्गात् ।

iii) वैय्यधिकरणेन अन्वये वाच्ये वाक्यभेदो वा वाजपेयनयोक्तदिशा विरुद्धत्रिकद्वयरूप वैरूप्यं वा स्यात् ।

Siddhānta : Siddhāntin points out that when envisaging one अपूर्व is possible, it is not proper to envisage many अपूर्वs. It is better to go by मत्त्वर्थलक्षणा than envisage many अपूर्वs.

एकेनैव अपूर्वेण उपपत्तौ अनेकादृष्टापूर्वकल्पनायोगात् एकमेव पदं फलेन सम्बध्य अपूर्वमुत्पादयति । मत्त्वर्थलक्षणया उपपत्तेः । अदृष्टकल्पनातो लक्षणाया वरत्वात् ।

भावार्थाधिकरणम् (II-1-2)

In this अधिकरण the question whether अपूर्व is generated by सोम etc द्रव्य or by यागक्रिया conveyed by the verbal root i.e. धात्वर्थ. The expression भावार्थ means धात्वर्थ i.e. यागक्रिया.

Pūrvapakṣa : Pūrvapakṣin argues that सोम etc द्रव्य is सिद्ध. It can be साधन to generate अपूर्व while यागक्रिया is साध्य i.e. to be achieved, like फल i.e. result. Therefore it cannot be साधन.

द्रव्यादेः उपपदार्थस्य सिद्धत्वेन साधनत्वसम्भवात् भावार्थस्य तु स्वयं फलवत् साध्यतया साधनत्वायोगात् उपपदार्थात् सोमादिद्रव्यादितः एव अपूर्वमिति प्राप्ते ।

Siddhānta : Siddhāntin points out that सोम etc द्रव्य cannot be directly the means of अपूर्व. These are the means only through the यागक्रिया. When yāga is performed utilising सोम etc it can generate अपूर्व. Achieving यागक्रिया is दृष्टफल for सोम etc द्रव्य. If सोम etc द्रव्य also considered as a means of अपूर्व it results in envisaging two अपूर्वs one by द्रव्य and another by याग. Hence, भावार्थ i.e. यागक्रिया only generates अपूर्व.

सोमादेः द्रव्यस्य साक्षात् फलसाधनत्वायोगेन क्रिया निवृत्तिद्वारैवेति वाच्यम् । तस्य सोमादिना साधितस्य करणत्वसम्भवात् । एवं हि सोमादेः यागनिष्पत्तिः दृष्टं फलं लभ्यते । अन्यथा सोमादितः एकमपूर्वम् । यागतोप्यपूर्वान्तरमिति गौरवम् ।

अपूर्वाधिकरणम् (II-1-3)

In this adhikaraṇa the question whether there is अपूर्व between याग and स्वर्गरूपफल as an intermediary is raised.

Pūrvapakṣa : Pūrvapakṣin argues that the तृतीयाविभक्ति in the expression दर्शपूर्णमासाभ्याम् indicates दर्शपूर्णमासयाग itself is the means of स्वर्ग. To protect this position either याग has to be considred as permanent or the perished याग itself is the means of स्वर्ग. If अपूर्व is envisaged as an intermediary. यागसाधनत्व expressly stated will be violated.

तृतीयाश्रुत्या भावार्थभूतयागस्यैव आख्यातोपात्तस्वर्गभावनायां साधनत्वप्रतीतेः अपूर्वसत्त्वे मानाभावात् । यागस्यैव तावत् स्थायित्वं वा नष्टस्यैव हेतुत्वं वा कल्प्यताम् ।

Siddhānta : Siddhāntin points out that it is a contradiction to consider the perishable याग as स्थायि i.e. permanent. The perished याग cannot be the cause of स्वर्ग, since, the the cause is required to immediatly precede the effect. Therefore अपूर्व has to be envisaged as an intermediary by श्रुतार्थापत्ति.

क्षणिकत्वेन प्रमिते स्थायित्वकल्पनस्य बाधात् । नष्टस्य पूर्वक्षणवृत्तित्वरूप हेतुत्वशङ्कायाः व्याहतत्वेन अनुदयात् । श्रुतार्थापत्त्या कल्प्यमानापूर्वस्य यागावान्तरवाक्यत्वेनैव कल्प्यत्वेन श्रुतिविरोधाभावात् अस्ति अपूर्वम् ।

कर्मणां गुणप्रधानविभागाधिकरणम् (II-1-4)

In this adhikaraṇa the question whether अवधात etc stated in the statement 'व्रीहीन् अवहन्ति' generate their own अपूर्व is raised.

Pūrvapakṣa : Pūrvapakṣin argues that अवधात etc are also धात्वर्थ like याग hence, these also generate अपूर्व. Consequently these are also अर्थकर्म i.e. प्रधानकर्म.

दर्शपूर्णमासप्रकरणे श्रुते 'व्रीहीनवहन्ति' इत्यादौ अवधातादितो अूपर्वनिष्पत्तिरस्ति उत न इति सन्देहे अवधातादेरपि धात्वर्थत्वात् भावार्थनयन्यायेन अवघातादितोप्यस्ति फलापूर्वमिति दर्शादियजिवत् अवघातादिकम् अर्थकर्म

Siddhānta : Siddhāntin points out that when दृष्टप्रयोजन is available it is not proper to envisage अदृष्ट. Removing the husk is दृष्टप्रयोजन of अवधात. Therefore, envisaging अपूर्व from it is not necessary. Hence, it is गुणकर्म only. However, husk should be removed by अवधात only not by nail etc other means. In this respect it is a case of नियमादृष्ट.

i) दृष्टे सति अदृष्टकल्पनायोगात् । इह तु तुषविमोकादिरूपादृष्टप्रयोजनमेव अवधातस्य लक्ष्यते इति न अदृष्टं कल्प्यम् ।

ii) नियमादृष्टं तु कल्प्यते । अवघातेन तुषविमोकं कुर्यात् न नखविदलनादिना । अतः गुणकर्मैव अवघातादि ।

सम्मार्जनाधिकरणम् (II-1-5)

At दर्शपूर्णमास the statement 'स्रुचः सम्मार्ष्टि' is found. here the question is raised whether सम्मार्जन is प्रधानकर्म or गुणकर्म.

Pūrvapakṣa : Pūrvapakṣin argues that in the case of अवधात of व्रीहि a दृष्टसंस्कार viz. तुषविमोक was found. But in the case of सम्मार्जन i.e. washing of स्रुक् types of spoons no such दृष्टसंस्कार is found. Hence, it has to be treated as प्रधानकर्म like प्रयाज.

दर्शपूर्णमासप्रकरणे श्रुतं 'स्रुचः सम्भार्ष्टि' इत्यादि । तत्र सम्मार्जनादि प्रधानकर्म उत गुणकर्म इति सन्देहे पूर्वत्र व्रीहिषु तुषविमोकरूपदृष्टसंस्काररूपोपकारस्य सत्त्वात् अवघातस्य

गुणकर्मत्वं युक्तम् । स्रुगादिषु सम्मार्जनादिना आधेयातिशयस्य अभावात् न गुणकर्मत्वम् । प्रयाजादिवत् प्रधानकर्मैव ।

Siddhānta : Siddhāntin points out that संमार्ग is ment for स्रुक्. Though there is no दृष्टसंस्कार, अदृष्टसंस्कार has to be envisaged. Hence it is गुणकर्म.

'सम्मार्जनेन स्रुचं भावयेत्' इति स्रुगर्थत्वात् सम्मार्गस्य गुणकर्मत्वमेव । दृष्टोपकारस्य कस्यचिदभावे अदृष्टः कश्चित् संस्काररूपः कल्पनीयः ।

स्तोत्रादि प्राधान्याधिकरणम् (II-1-6)

At ज्योतिष्टोम the स्तोत्र 'आज्यैः स्तुवते' and the शस्त्र 'प्रउगं शंसति' are found. प्रउग is the name of a particular शस्त्र. Here, the question is raised whether these स्तोत्र and शस्त्र are गुणकर्म or प्रधानकर्म.

Pūrvapakṣa : Pūrvapakṣin argues that the स्तोत्र and शस्त्रs describe गुण-गुणि सम्बन्ध this results in देवतास्मरण which is required at the sacrifice. This is दृष्टप्रयोजन. Hence, these are गुणकर्म.

ज्योतिष्टोमे 'आज्यैः स्तुवते' 'प्रउगं शंसति' इति स्तोत्रशस्त्रे श्रुते । तत्र सन्देहः स्तोत्रशस्त्रे किं गुणकर्मणी उत प्रधानकर्मणी इति ।

गुणगुणि सम्बन्धकीर्तनेन गुणवत्या देवतायाः कीर्तनलाभात् गुणवद् देवतास्मरणं क्रतूपयोगि दृष्टमेव प्रयोजनं लभ्यते इति गुणकर्म ।

Siddhānta : Siddhāntin points out that if स्तोत्र and शस्त्र are taken as देवताप्रकाशक, these will cease to be स्तावक which is expressly stated by स्तौति and शंसति. Hence, it is not proper to take them as देवताप्रकाशक. Therefore, these have to be considered as प्रधानकर्म.

सिद्धान्तस्तु गुणोक्तिद्वारा गुणवद्देवताप्रकाशनार्थत्वे अनयोः स्तावकत्वं न स्यात् ।

'स्तौति' 'शंसति' इति श्रुत्यबाधाय गुणाभिधानमात्रपरत्वात् । तस्य च दृष्टप्रयोजनाभावात् अदृष्टार्थत्वमेव स्तुतिशस्त्रयोः इति प्रधानकर्मणी स्तुतिशस्त्रे ।

i) The nature of स्तोत्र is explained as प्रगीतमन्त्रसाध्या गुणगुंणिसम्बन्धकीर्तनरूपा स्तुतिः स्तोत्रम् i.e. the discription of the relation between the qualities and the deity possessing these qualities by a hymn that could be sung is स्तोत्र.

ii) The nature of शस्त्र is explained as अप्रगीतमन्त्रसाध्या स्तुतिः शस्त्रम् i.e. a hymn that is recited without singing.

मन्त्राविधायकत्वाधिकरणम् (II-1-7)

In this adhikaraṇa, the question whether the expressions 'यजते' 'ददाति' etc are विधायक i.e. injunctions or अभिधायक i.e. अनुवादक type of statements is raised.

Pūrvapakṣa : Pūrvapakṣin argues that there is no ground to differentiate in the purpose of these whether these occur in the context of an injunction or in a मन्त्र. The wordings are the same.

तत्र सन्देहः, यजते ददाति इत्याद्याख्यातानि किं विधायकानि उत अभिधायकानि इति । विध्युद्देश्यगताख्यातमिव मन्त्रगतमपि विधायकमेव अविशेषात् इति प्राप्तम् ।

Siddhānta : The expressions 'यजते' 'ददाति' in the मन्त्र are accompanied by यत् as 'याभिः गोभिः यजते' याश्च गाः ददाति' this indicates that these are अनुवादक. Hence, these should be taken as अभिधायक only but not विधायक. The अनुवादकत्व nature of these is विधिशक्तिप्रतिबन्धक. Similarly the statements that contain the verb in उत्तमपुरुष and the verb in the sense of आमन्त्रण etc. are also not विधायक.

सिद्धान्तस्तु यच्छब्दयोगेन अनुवादत्वप्रतीत्या विधिशक्तिप्रतिबन्धात् न विधायकत्वम् ।

एवं 'बर्हिः देवसदनं दामि' इति उत्तमपुरुषप्रयोगे 'अग्नीदग्नीन् विहर' इत्यामन्त्रणादौ विधिशक्तिप्रतिबन्धेन अभिधायकत्वं बोध्यम् ।

मन्त्र निर्वचनाधिकरणम् (II-1-8)

In this adhikaraṇa the defintion of मन्त्र is given as 'अनुष्ठेयार्थस्य प्रकाशकेषु मन्त्रसंज्ञा ।

यानि अनुष्ठानौपयिकार्थाभिधानरूपाणि वाक्यानि तानि मन्त्रशब्देन उच्यते ।

ब्राह्मण निर्वचनाधिकरणम् (II-1-9)

In this adhikaraṇa the definition of ब्राह्मण is given as शेषे ब्राह्मणशब्दः मन्त्रभागादवशिष्टे वेदभागे ब्राह्मणशब्दो ज्ञेयः ।

ऊहाद्यमन्त्रताधिकरणम् (II-1-10)

In this adhikaraṇa the question whether ऊह, प्रवर, नामधेय also should be considered as मन्त्र are not is raised.

Pūrvapakṣa : Pūrvapakṣin argues that these also should be considered as मन्त्र for the following reasons.

i) मन्त्रेण सह एकवाक्यत्वापन्नत्वात् These are a part of मन्त्र.

ii) देवताप्रकाशनरूपमन्त्रकार्यकारित्वात् These play the role of मन्त्र viz. देवताप्रकाशन.

Siddhānta : Siddhāntin points out that only those are मन्त्रs that are taught as मन्त्रs at the time of the study. Merely added or substituted are not मन्त्र.

अध्ययनादिकाले मन्त्रत्वप्रसिद्धेरेव मन्त्रत्वप्रयोजकत्वेन मन्त्रैकवाक्यतायाः अप्रयोजकत्वात् नास्ति मन्त्रत्वम् ।

The expressions ऊह, प्रवर and नामधेय are explained as under.

i) 'अग्नये जुष्टं निर्वपामि' इत्यस्य सौर्यचरौ 'सूर्याय' इति पदान्तरप्रक्षेपः ऊहः ।

ii) 'सुब्रह्मण्याममुको यजते' इति नामधेयम् ।

ऋग् लक्षणाधिकरणम् (II-1-11)

In this adhikaraṇa the definition of ऋक् is a given as 'पादत्वेन उपेताः वृत्तबद्धाः मन्त्राः ऋचः ।

सामलक्षणाधिकरणम् (II-1-12)

In this adhikaraṇa the definition of साम is given as 'गीतिषु सामाख्या' गानेषु सामसंज्ञा इति गानरूपत्वं सामलक्षणम् ।

It should be noted here that though the word popularly known in the sense the hymns that are sung, it is the song aspect that is साम.

गानयुक्तमन्त्रे सामत्वप्रसिद्धावपि गीतेरेव सामशब्दवाच्यत्वम् ।

यजुर्लक्षणम् (II-1-13)

In this adhikaraṇa the definition of यजुस् is given as शेषे यजुःशब्दः– ऋक् सामाभ्यामन्यत् प्रश्लिष्टपठितं मन्त्रजातं यजुः ।

निगदानां यजुष्ट्वाधिकरणम् (II-1-14)

In this adhikaraṇa it is established that निगद is not a separate category of hymns. It is included under यजुस्.

Pūrpakṣa : Pūrvapakṣin argues that निगदs are distinct from यजुस् on two grounds.

i) 'इमे निगदाः' इमानि यजूषि इति संज्ञाभेदात् i.e. These two have different names as निगद् and यजुस्.

ii) 'उपांशु यजुषा' 'उच्चैः निगदेन' इति उपांशुत्व उच्चैस्त्वरूप विरुद्धधर्मयोगाच्च i.e. यजुस् should be recited slowly and निगद् should be recited loudly. Hence, these have opposit attributes. Therefore, these are different categories of hymns.

Siddhānta : Siddhāntin points out that such hymns of यजुस् that are to be recited loudly are named as निगद्. This is clear from the very etymological structure of the word निगद् viz. नितरां गद्यन्ते उच्चैः उच्चार्यन्ते इति निगदाः।

The निगद्s are addressed to others, hence उपांशुत्व i.e. slow recitation does not suit these. Therefore, neither different name nor the different mode of recitation comes in the way of considering these as यजुस्।

सिद्धान्तस्तु नितरां गद्यन्ते उच्चैस्त्वेन इति योगेन यजुर्भागे एव उपपत्तेः। धर्मभेदस्य परप्रत्यायनकार्यविरोधेन उपांशुत्वस्य अप्राप्तेः अर्थसिद्धोच्चैस्त्वस्य उच्चैः निगदेन इति वाक्येन अनुवादात् यजुष्वेव अन्तर्भावः।

एकवाक्यत्वाधिकरणम् (II-1-15)

In this adhikaraṇa the definition of वाक्य is given in the सूत्र 'अर्थैकत्वादेकं वाक्यं साकाङ्क्षं चेत् विभागे स्यात्' i.e. a group of words that serve a unitary purpose and give a unitary meaning constitute a वाक्य. In Mīmāmsā terminology it is conveying एकभावना. In this sūtra a criterion is also laid to ascertain whether a word forms a part of the sentence viz. 'साकाङ्क्षं चेत् विभागे स्यात्' i.e. if a word is taken out, the sentence is incomplete and needs that word to be complete, then, that word is a part of that sentence. This definition is illustrated by an example viz.

'देवस्य त्वा सवितुः प्रसवे अश्विनोर्बाहुभ्याम् पूष्णोः हस्ताभ्यां अग्नये जुष्टं निर्वपमि' निर्वापप्रकाशन is the purpose of this sentence. All other words contribute to it, hence, it is one sentence.

देवस्य त्वा इत्यादीनि सर्वाणि पदानि निर्वापप्रकाशनार्थानि । विभागे च साकाङ्क्षाणि इति निर्वपामि इत्यन्तम् एकं वाक्यम् ।

वाक्यभेदाधिकरणम् (II-1-16)

In this adhikarana, an example of वाक्यभेद i.e. considering a statement as two sentences on the ground that two parts of it serve two different purpose is discussed. In the statement इषे त्वा ऊर्जे त्वा the first part 'इषे त्वा' serves the purpose of पलाशशाखाच्छेदन, the second part 'ऊर्जे त्वा' serves the purpose of पलाश शाखामार्जन. This is clear from विनियोगवाक्य viz. इति छिनत्ति and इति अनुमार्ष्टि. Hence, these two are different sentences.

'इषे त्वा छिनत्ति 'ऊर्जेत्वा अनुमार्ष्टि इति वाचनिकविनियोगानुसारेण पलाशशाखा-च्छेदनानुमार्जनरूपार्थप्रकाशने अन्योन्यं निरपेक्षत्वात् भिन्नं भिन्नं वाक्यम् ।

अनुषङ्गाधिकरण (II-1-17)

प्रथमं वर्णकम्

In this adhikarana an example of अनुषङ्ग is given. At ज्योविष्टोम there are three उपसद्s viz. आग्नेयी, सौम्या and वैष्णवी. At आग्नेयी याते अग्ने अयाशया तनूः वर्षिष्ठा etc and 'याते अग्ने रजाशया' 'या ते अग्ने हराशया' are stated. However, in the latter two तनूर्वर्षिष्ठा etc portion is not stated.

Here the question arises whether this portion be brought from the first to the latter two by अनुषङ्ग or supplied by अध्याहार. Pūrvapakṣin argues that it should be supplied by अध्याहार. Siddhāntin points out that

if it is supplied by अध्याहार it will be लौकिक वाक्य. When the very वैदिकवाक्य can be brought by अनुषङ्ग it is not proper to supply a लौकिक वाक्य by अध्याहार. The expression अयाशया, रजाशया, हराशया are explained in two way.

i) अयाशया (a) भूमिस्थाः तनवः i.e. the bodies found on the earth
   (b) अयसा निर्मिताः तनवः the bodies made by Iron.

ii) रजाशया (a) अन्तरिक्षस्थाः तनवः i.e. the bodies found in अन्तरिक्ष
   (b) रजतेन निर्मिताः तनवः i.e. the bodies made by silver.

iii) हराशया (a) द्युलोकस्थाः तनवः i.e. the bodies found in द्युलोक
   (b) हिरण्यनिर्मिताः तनवः i.e. the bodies made by gold.

ज्योतिष्टोमे आग्नेयी सौम्या वैष्णवी इति तिस्रः उपसदः श्रुताः । तत्र आग्नेयी सन्निधौ श्रूयते 'या ते अग्ने अयाशया तनूः वर्षिष्ठा गह्वरेष्ठा उग्रं वचः अपावधी त्वेषं वचो अपवाधी स्वाहा.' 'याते अग्ने रजाशया' 'याते अग्ने हराशया' इति । रजाशया हराशया इति भूम्यन्तरिक्षद्युलोकस्थ तनवः इत्येके । अयसा रजतेन हिरण्येन निर्मितं तनुत्रयमिति अन्ये ।

तत्र रजाशया हराशया इति पदयोः आकाङ्क्षा पूरणाय तनूः इति अध्याहर्तव्यः पूर्व एव अनुषञ्जनीयः इति सन्देहः ।

एकत्र निबद्धः वैदिकः शेषः अन्यत्र नेतुं न शक्यते इति लौकिकः वाक्यशेषः अध्याहर्तव्यः इति प्राप्ते ।

वेदसमर्पितेन शेषेण नैराकाङ्क्ष्यसिद्धेः निष्प्रमाणकः लौकिकः अध्याहारः । अतः ननूर्वर्षिष्ठा इत्यादिशेषः उत्तरयोरपि अनुषञ्जनीयः इति सिद्धान्तः ।

अनुषङ्गाधिकरणे (II-1-17)
द्वितीयं वर्णकम्

In this adhikarana another instance of अनुषङ्ग is explained. In the statement चित् पतिः त्वा पुनातु वाक्पतिस्त्वा पुनातु देवस्त्वा सविता पुनातु अच्छिद्रेण

पवित्रेण वसोः सूर्यस्य रश्मिभिः' the portion अच्छिद्रेण पवित्रेण etc is not found in the earlier two. This portion has to be taken in the earlier two also by अनुषङ्ग, since, पावनक्रिया प्रकाशन is made by all the three by the expression पुनातु ।

व्यवेतानुषङ्गाधिकरणम् (II-1-18)

In this adhikaraṇa an instance of अध्याहार instead of अनुषङ्ग is presented.

द्वितीयाध्याये द्वितीयः पादः

In the prelimenary remarks of this section Bhātta Saṅgraha informs that कर्मभेद is the theme of this section. कर्मभेद means भावनाभेद. The criteria to work out कर्मभेद are six viz. शब्दान्तर, अभ्यास, सङ्ख्या, नामधेय, गुण and प्रकरण. शब्दान्तर means धातुभेद i.e. different verbal roots. अभ्यास is repetition of the same. सङ्ख्या i.e. the number. गुण i.e. द्रव्य to be offered as हविस्. The nature of प्रकरण and नामधेय will be explained in the respective places.

अत्र पादे अध्यायार्थः कर्मभेदः अवसरप्राप्तः निरूप्यते । कर्मभेदो नाम भावनाभेदः । तत्र शब्दान्तराभ्याससंख्यानामधेयगुणप्रकरणाख्यानि षट् प्रमाणानि । शब्दान्तरं नाम धातुभेदः । अविशेषेण पुनः श्रवणमभ्यासः । सङ्ख्यातु व्यक्ता । गुणस्तु हवीरूपद्रव्यम् । प्रकरणनामधेयेपि अग्रे व्यक्ते । तत्र आदौ शब्दान्तरात् भेदो अभिधीयते ।

अङ्गापूर्वाधिकरणम् (II-2-1)

There are श्रुति statements such as 'सोमेन यजेत' 'हिरण्यमात्रेयाय ददाति' 'दाक्षिणानि जुहोति.' In these statements the verbal terminations convey the same meaning i.e. भावना. However, the roots convey different

meanings i.e. therefore, the doubt arises whether only one भावना is connected by all these root meanings or different भावनाs get connected by each root meaning differently.

'सोमेन यजेत' हिरण्यमात्रेयाय ददाति दाक्षिणानि जुहोति इति श्रूयते अत्र प्रत्ययांशस्य एकत्वेपि यागदानहोमरूपधात्वर्थभेदात् आख्यातपदान्यपि मिथः शब्दान्तराणि भवन्तीति किमत्र बहुभिः धात्वर्थैः अनुरक्ता एका भावना उत भिन्ना इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that since the verbal terminations are the same the भावना conveyed by them is one. The difference of root meanings cannot lead to different भावना. The root meanings are subbordinate to भावना. The difference of the subbordinate does not warrent difference of principal i.e. भावना. Further if different भावनाs are envisaged these will lead to different अपूर्वs. It is not proper to envisage different अपूर्व when it can be managed by one अपूर्व.

पूर्वपक्षस्तु प्रत्ययस्य एकत्वात् तद्वाच्या भावना अपि एकैव । न च धातुभेदात् भेदः । प्रत्ययवाच्यभावनायां धातोः गुणभूतत्वेन गुणभेदात् प्रधानभेदस्य अयुक्तत्वात् । किञ्च भावनाभेदे भाव्यापूर्वभेदः स्यात् । एकेनैव अपूर्वेण उपपत्तौ अनेकापूर्वकल्पना न युक्ता । तस्मात् अनेक धात्वर्थविशिष्टा एकैव भावना ।

Siddhānta : Siddhāntin points out that when the verbal roots are different. Each verbal termination suffixed to it conveys separate भावना. Hence भावना भेद has to be accepted. Consequently अपूर्वभेद also has to be accepted.

सिद्धान्तस्तु । प्रतिधातु प्रत्ययभेदे हि तत्तद्विशिष्टा अन्यान्यैव भावना प्रतीयते । एकधात्वावरुद्धभावनायां धात्वन्तरार्थेन अवच्छेदायोगात् । अतो भावनाभेदः । तद्भेदाच्च भाव्यापूर्वभेदोऽपि न्यायप्राप्तः ।

समिधाद्यपूर्वभेदाधिकरणम् (II-2-2)

At दर्शपूर्णमास 'समिधो यजति' 'तनूनपातं यजति' etc five statements, containing the verb यजति are found. Here, the doubt arises whether these convey a single भावना or at every repetition of यजति a separate भावना is conveyed.

दर्शपूर्णमासयोः 'समिधो यजति' 'तनूनपातं यजति' 'इडो यजति' 'बर्हिः यजति' 'स्वाहाकारं यजति' इति पञ्चकृत्वः अभ्यस्तः यजतिशब्दः श्रूयते । तत्र पञ्चभिः एकैव भावना उच्यते अथ प्रत्याभ्यासं भावनाभेदः इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that here, the same verb is found in all. Hence, भावनाभेद need not be envisaged.

इह प्रत्ययस्य धात्वर्थभूतयागस्य च एकत्वात् न भावनाभेदः ।

The first statement समिधो यजति can be taken as enjoing the समिद्याग and other statements may be taken as stating देवता or द्रव्य.

'समिधो यजति' इति प्रथमवाक्यविहितसमिन्नामकयागं अग्रेसरैः चतुर्भिः यजतिपदैः अनूद्य तनूनपातादयः देवतारूपाः द्रव्यरूपाः गुणाः विधीयन्ते ।

Siddhānta : Siddhāntin points out that at each occurance of यजति if भावनाभेद is not envisaged, then stating यजति five times becomes superfluous.

Further, enjoining of देवता or द्रव्य cannot be envisaged for तनूनपातं यजति etc other four statements, since चतुर्थी or तद्धित required to indicate देवता and तृतीया or द्रव्यत्व प्रसिद्धि required to indicate द्रव्य are not present.

i) प्रत्यभ्यासं भावना भेदाभावे अभ्यासवैयर्थ्यात् ।

ii) चतुर्थी–तद्धितरूपलिङ्गाश्रवणेन दैवताविधेः, तृतीयान्तत्वद्रव्यत्वप्रसिद्ध्योः अभावेन द्रव्यविधेश्च अयोगः ।

आधाराग्नेयादीनामङ्गाङ्गिभावाधिकरणम् (II-2-3)

At दर्शपूर्णमास आग्नेय etc six यागs are stated. After stating these the statements 'य एवं विद्वान् पौर्णमासी यजते' 'य एवं विद्वान् अमावास्यां यजते' are found. Here, the doubt arises whether these two are separate यागs or the two groups of three, out of the six यागs stated above are mentioned in these two विद्वद्वाक्यs.

'यदाग्नेयो अष्टाकपाल:' 'अग्नीषोमावाज्यस्यैव' इत्यादि षड्यागान् विधाय 'य एवं विद्वान् पौर्णमासीं यजते' 'य एव विद्वान् अमावास्यां यजते' इति आम्नाते अत्र विद्वत्पद-युक्ते वाक्यद्वये पौर्णमास्यामावास्यानामके कर्मान्तरे विधीयेते उत प्रकृतषड्यागानां द्वौ समुदायौ यजिद्वयेन अनूद्येते इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that since, the names पूर्णमासी and अमावास्या are stated again, these are two different यागs. ध्रौव्याज्य is provided here as द्रव्य and अग्नि as देवता by मन्त्रवर्ण.

पूर्वपक्षस्तु पुनः श्रवणरूपाभ्यासेन प्रकृताग्नेयादिभ्यो अन्ये पौर्णमस्यामावास्यनामके कर्मान्तरे विधीयेते । न च द्रव्यदेवतालक्षणयागरूपाश्रवणात् न कर्मान्तरविधिरिति युक्तम् । सर्वस्मै वा एतद् यज्ञाय गृह्यते यद् ध्रुवायामाज्यम् इत्युक्तस्य ध्रौव्याज्यस्य 'अग्निर्वृत्राणि जङ्घनत्' इत्यादिमन्त्रवर्णप्राप्तदेवतायाश्च सत्त्वात् ।

Siddhānta : Siddhāntin points out that देवता cannot be provided by the मन्त्रवर्ण, since this मन्त्र is the अङ्ग of आज्यभाग.

The आग्नेय etc. six यागs have to be grouped into two groups of three यागs on the basis of the duel number of दर्शपूर्णमासाभ्यां यजेत. These two groups are to be arranged in relation with the time दर्श and पूर्णमास.

प्रकृताग्नेयादिषड्यागानां कालसंयुक्तानां समुदायद्वित्वकरणेन यजतिशब्दाभ्यां समुदाय-द्वयमनूद्य कालसम्बन्धनिमित्तानां सम्बन्धः क्रियते । दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इति फलवाक्यापेक्षितद्विवचनान्तपदार्थभूतसमुदायद्वयसिद्धेः समुदायानुवादफलत्वात् ।

उपांशुयाजापूर्वताधिकरणम् (II-2-4)

At दर्शपूर्णमास it is stated that 'जामिवा एतद् यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ। उपांशु याजमन्तरा यजते' this is followed by विष्णुरूपाशु यष्टव्यः अजामित्वाय etc. Here, the doubt arises whether the अन्तरालवाक्य enjoins a separate कर्म or it is merely अनुवाद of the three कर्मs enjoined by विष्णुरूपांशु यष्टव्यः etc three statements.

दर्शपूर्णमासयोः श्रूयते 'जामिवा एतद् यज्ञस्य क्रियते यदन्वञ्चौ पुरोडाशौ' उपांशु-याजमन्तरा यजति । विष्णुरूपांशु यष्टव्यः अजामित्वाय प्रजापतिरुपांशु यष्टव्यः अजा-मित्वाय अग्नीषोमौ उपांशु यष्टव्यौ अजामित्वाय । जामि आलस्यहेतुः । अन्वञ्चौ अव्यवहितौ । तत्र अन्तरालवाक्ये विष्ण्वादिवाक्यविहितयागत्रयानुवादः यजिः उत अपूर्वकर्मविधिः इति सन्देहः ।

Pūrvapakṣa : In विष्णुरूपांशु यष्टव्यः etc three statements the injunction is expressly stated, while in अन्तरालवाक्य the verb यजति is not injunctive. There is no mention of द्रव्य and देवता also in the context of अन्तरालवाक्य. Hence, it does not enjoin any separate कर्म. It is only अनुवाद of the three कर्मs enjoined by विष्णुरूपांशु यष्टव्यः etc. three statements.

पूर्वपक्षस्तु विष्ण्वादिवाक्ये प्रत्यक्षविधिश्रवणात् अन्तरालवाक्ये वर्तमाननिर्देशेन विधेर-श्रवणात् द्रव्यदेवतालक्षणयागरूपाभावाच्च विध्ययोगात् विष्ण्वादिवाक्यविहित यागत्रयानुवादः यजिः ।

Siddhānta : Siddhāntin points out that at उपक्रम जामितादोष is stated. At उपसंहार its निर्हरण is stated. If the statements occuring in between these two are taken as injunctions, एकवाक्यता of उपक्रम and उपसंहार will be violated. Hence, अन्तरालवाक्य that occurs at उपक्रम has to be taken as injunction and the three statements as अर्थवाद.

ध्रौव्याज्य has to be provided as द्रव्य and विष्णु etc are देवता. The injunctive suffix तव्य has to be taken as अर्हार्थ.

सिद्धान्तस्तु विष्णवादिवाक्यैः यागविधौ अङ्गीकृते जामितादोषोपक्रम तन्निर्हरणोपसंहाराभ्यां प्रतीतैवाक्यताभङ्गप्रसङ्गात् जामितादोषाभिधानोक्रम एव अन्तराले किञ्चिद् विधित्सितम् इत्यवगमात् यजतीत्यस्य लेट्त्वेन विधित्वसम्भवात् । विष्ण्वादिदेवतायाः ध्रौव्याज्यद्रव्यस्य च सम्भवात् अन्तरा वाक्य एव यागविधिः विष्णवादिवाक्यानि तु अर्थवादः ।

आधारापूर्व ताधिकरणम् (II-2-5)

In the context of अग्निहोत्र two statements are found viz. 'आधारमाधारयति' 'अग्निहोत्रं जुहोति.' In the same context a group of other कर्मs viz. 'ऊर्ध्वं' आघारयति 'ऋजुमाघारयति' etc are stated. Here, the doubt arises whether the earlier two statements are अनुवादक of these later stated कर्मs or enjoin separate कर्मs.

'आधारमाधारयति' 'अग्निहोत्रं जुहोति' इति वाक्यद्वयम् 'ऊर्ध्वमाघारयति' 'ऋजुमाघारयति' 'दध्नाजुहोति' 'पयसा जुहोति' इत्यादि कर्मसमुदायानुवादकम् उत अपूर्वकर्मविधायकमिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that ऊर्ध्वमाघारयति ऋजुमाघारयति etc enjoin a group of कर्म. 'आघारमाघारयति' 'अग्निहोत्रं जुहोति' are अनुवाद of these. These cannot be injunctions, since, there is no द्रव्य or देवता in respect of these, ऊर्ध्वमाधारयति cannot be taken as गुणविधि for these as these lack the द्रव्यदेवतारूपयाग स्वरूप as stated above.

इहतु ऊर्ध्वादिदध्यादिवाक्यविहितकर्मसमुदायानुवादकत्वं भवतीति अनुवादकं वाक्यद्वयम् ।

न चोर्ध्वेत्यादिवाक्यं आधाराग्निवाक्यविहितकर्मानुवादेन ऊर्ध्वत्वदध्यादिगुणमात्रं विधिपरमिति वाच्यम् । द्रव्यदेवतालक्षणयागरूपाभावात् तत्र यागविधेः अभावात् ।

Siddhānta : Siddhāntin points out that 'दध्ना जुहोति' should not be taken as enjoining the गुणविशिष्टकर्म as it results in गौरव. अग्निहोत्रं जुहोति be taken as कर्मविधायक and दध्ना जुहोति as गुण विधायक. This is लाघव. This means अग्निहोत्रं जुहोति is not अनुवादक but it is also विधायक. द्रव्य i.e. दधि is provided by गुणविधि. मान्त्रवर्णिकदेवता is available.

In the case of आधारमाघारयति also ध्रौव्यज्य and मान्त्रवर्णिकदेवता are available.

सिद्धान्तस्तु दध्यादिवाक्ये गुणविशिष्टकर्मविधाने विशिष्टविधिगौरवेण अग्निहोत्र-वाक्यविहितकर्मानुवादेन दध्यादिगुणमात्रविधाने लाघवम् ।

न च रूपाभावात् अग्निहोत्रादिवाक्यं न कर्मविधायकम् । दध्यादिवाक्यैः द्रव्यस्य मान्त्रवर्णिकदेवतायाश्च सम्भवात् ।

पशुसोमापूर्वताधिकरणम् (II-2-6)

At ज्योतिष्टोम after the statement 'अग्नीषोमीयं पशुमालभेत' the statements 'हृदयस्याग्रे अवद्यति etc are found. Similarly after the statement 'सोमेन यजेत' the statements 'ऐन्द्रवायवं गृण्हाति' 'मैत्रावरुणं गृह्णाति are found. Here, the question arises whether, 'आलभति' 'यजति' are अनुवादकs of the कर्मs stated in 'हृदयस्य अग्रे अवद्यति' 'ऐन्द्रवायवं गृण्हाति' etc respectively or enjoin separate कर्म.

ज्योतिष्टोमे 'अग्नीषोमीयं पशुमालभेत' इत्युक्त्वा श्रूयते हृदयस्य अग्रे अवद्यति 'अथ जिह्वायाः' अथ वक्षसः इत्यादि । तथा 'सोमेन यजेत' इत्युक्त्वा 'एन्द्रवायवं गृण्हाति' मैत्रावरुणं गृण्हाति इत्यादि । तत्र अवद्यति गृण्हाति वाक्यैः विहितकर्मणां समुदाययोः आलभति यजति शब्दौ अनुवादकौ उत अपूर्वकर्मणोः विधायकौ इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the expression ऐन्द्रवायव contains तद्धित suffix. This provides देवता. सोम provides द्रव्य. Hence,

द्रव्यदेवताविशिष्टयाग is enjoined by एन्द्रवायवं गृण्हाति. Same is the case with मैत्रावरुणं गृण्हाति । Hence, सोमेन यजेत is अनुवाद of these.

In the case of अवदानवाक्य, हृदयादिद्रव्यविशिष्टयाग is enjoined. Hence, अग्रेषोमीयम् आलभेत enjoins देवतारूपगुण. In any case the यजति and लभते do not enjoin अपूर्वकर्म.

पूर्वपक्षस्तु ऐन्द्रवायवमिति तद्धितप्रत्ययेन इन्द्रवाय्वादिप्रातिपदिकैः देवतानाम् सोमरसाख्यस्य द्रव्यस्य प्रतीत्या तेष्वेव द्रव्यदेवताविशिष्टविधिः ।

अवदानवाक्येषु हृदयादीन्द्रियश्रवणेन द्रव्यविशिष्टयागविधानात् तदनुवादेन पश्वालम्भन वाक्ये अग्नीषोमरूपदेवता विधीयते ।

Siddhānta : Siddhāntin points out that the statements 'यजति' 'लभते' and 'ग्रहण' 'अवदान' have altogether different contents. Hence, these cannot be अनुवाद्य and अनुवादक. 'यजति' and लभते contain a reference to द्रव्य i.e. सोमलता, and पशु. Hence, these enjoin अपूर्वकर्म. The गृण्हाति and अवद्यति statements convey the ग्रहण and अवदान संस्कार for सोम and पशु respectively.

सिद्धान्तस्तु यजत्यालभति वाक्ययोः भिन्नार्थत्वात् न अनुवाद्यानुवादकभावः । प्रसिद्धसोमलतापशुरूपद्रव्ययुक्तत्वात् सोमादिवाक्ये अपूर्वकर्म विधायके ।

गृण्हात्यवदानवाक्यानि तु देवताविशिष्टसोमस्य ग्रहणरूपसंस्कारावदानरूपसंस्कारविधिपराणि ।

संख्याकृतकर्मभेदाधिकरणम् (II-2-7)

In respect of the statement 'तिस्रः आहुतीः जुहोति' the doubt arises whether only one होम is enjoined or many.

'तिस्रः आहुतीः जुहोति' इत्यत्र एको होमो विधीयते उत बहवः इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that in the instance of समिधो यजति etc. the verb यजति is repeated. In the present case जुहोति is not repeated. Hence, only one कर्म is enjoined here. The mention of three can be managed by repeating thrice, as in the case of एकादशप्रयाजान् यजति in respect of पञ्चप्रयाजs.

समिधो यजति इत्यादाविव जुहोति इत्याख्यातस्य अभ्यासाभावेन सकृदेव श्रवणात् कर्माप्येकमेव ।

त्रित्वसङ्ख्यातु 'एकादशप्रयाजान् यजति' इति श्रुतसङ्ख्याया: पञ्चप्रयाजेषु आवृत्त्या निवेशवत् ।

Siddhānta : Siddhāntin points out that the verb जुहोति is specified by तिस्रः. Hence, it cannot be managed by repeating. In the case of प्रयाजs the number of them is fixed as five. Hence, it has be made एकादश by repetition only.

तिस्रः इत्यनेन विशेषितेन आख्यातेन अवगम्यमानं बहुत्वं न अभ्यासेन नेतव्यम् । प्रयाजेषु तु पञ्चप्रयाजाः इति निर्णीतसङ्ख्यावत्वेन अभ्यासेन विना एकादशत्वायोगात् आवृत्त्या तन्नीयते ।

Bhāṣyakāra's interpretation of this अधिकरण

The above interpretation of वृत्तिकार is based on कर्मगतसङ्ख्या. However, भाष्यकार offers another interpretation based on द्रव्यगत सङ्ख्या.

वृत्तिकारोक्ते तिस्रः इति वाक्ये कर्मण्येव सङ्ख्याश्रवणात् पूर्वपक्षशङ्का मन्दा इति मत्वा भाष्यकारः वाजपेयगतं 'सप्तदशप्रजापत्यान्' इति द्रव्यगतसङ्ख्यायुक्तम् वाक्यमुदाहृत्य व्यचारयत् ।

In the statement 'सप्तदश प्राजापत्यान् यजेत' the doubt arises whether, one याग offering seventeen पशुs is enjoined or seventeen यागs with the one of पशु at each याग is enjoined.

किं सप्तपशुद्रव्यकः एकः यागः विधीयते उत एकैकपशुद्रव्यकाः सप्तदशयागाः इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the तद्धित suffix in the word प्राजापत्य indicates that all seventeen पशुs are connected with the देवता i.e. प्रजापति. This connection with देवता is one. Hence, only one याग offering seventeen पशुs is enjoined here.

तत्र प्रजापतिः देवता येषां इति विगृह्य तद्धितोत्पादने तावतां पशूनां देवतासम्बन्धस्य ऐक्यात् तावत् पशुद्रव्यकः एकः एव यागः ।

Siddhānta : Siddhāntin points out that the word प्राजापत्यान् is in plural. This means that देवतासम्बन्ध for each पशु is separate and these पशुs get connected with देवता seperately. Hence, seventeen यागs are enjoined here.

प्राजापत्यप्रातिपदिकात् परत्र श्रुतबहुवचनात् देवतासम्बन्धविशिष्टानामेव पशूनाम् बहुत्वप्रतीत्या देवतासम्भन्धानेकत्वात् अनेके यागाः ।

Bhāṣyakāra further states that if कर्मैक्य is accepted on the ground of देवतासम्बन्धैक्य then, as per the guideline 'प्रकृतिवद् विकृतिः कार्या' there being one injunction only one अवदान has to be effected. When it is effected for one पशु, as its purpose is served it will not apply to other पशु consequently these cease to be related with प्रजापति देवता ।

किञ्च द्रव्यदेवता सम्बन्धैक्येन कर्मैक्ये अङ्गीकृते सति प्रकृतिवद् विकृतिः कार्या इति चोदकमपि एकं सत् एकमेव अवदानगणं प्रापयेत् । स च एकस्मिन् पशौ कृतार्थः सन् पश्वन्तरं न प्राप्नोतीति सर्वपशूनां प्राजापत्यम् असम्पादितं स्यात् ।

संज्ञाकृतकर्मभेदाधिकरणम् (II-2-8)

At ज्योतिष्टोम the statement 'अथैष ज्योतिः अथैष विश्वज्योतिः अथैष

सर्वज्योतिः एतेन सहस्रदक्षिणेन यजेत' is found. Here, the doubt arises whether mentioning ज्योतिष्टोम itself by way of अनुवाद by these names, the auxiliary सहस्रदक्षिणा is enjoined or these names convey different कर्मs.

ज्योतिष्टोमे 'अथैष ज्योतिः अथैषः विश्वज्योतिः अथैष सर्वज्योतिः एतेन सहस्र-दक्षिणेन यजेत' इति श्रुतम् । तत्र प्रकृतज्योतिष्टोमं ज्योतिरादिशब्दैः अनूद्य सहस्र-दक्षिणाख्यो गुणः विधीयते । अथ कर्मान्तराणि एवं नामकानि विधीयन्ते इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the pronoun एषः indicates that the very ज्योतिष्टोम is mentioned by the names विश्वज्योतिः etc. and सहस्रदक्षिणा is enjoined as an auxiliary.

एषः इति एतच्छब्देन प्रकृतं ज्योतिष्टोममनूद्य तस्मिन् सहस्रदक्षिणाख्यो गुणो विधीयते । अन्यथा प्रकृतहान्यप्रकृतकल्पनादोषप्रसङ्गात् ।

Siddhānta : Siddhāntin points out that the expression अथ at the commencement of each name separates these from ज्योतिष्टोम. The pronoun एषः can be used with reference to next also. If एतेन सहस्रदक्षिणेन is intended to enjoin it as an auxiliary of ज्योतिष्टोम only, then, the mention of विश्वज्योतिः etc. inbetween becomes purposeless. Different names clearly indicate that these are different कर्मs.

सिद्धान्तस्तु प्रकृतस्य ज्योतिष्टोमस्य अथपदेन विच्छेदात्, प्रकृते कर्मणि गुणविधिपरत्वे एतेन इत्यादिवाक्येनैव पूर्तौ अथैष इत्यादेः वैयर्थ्यापत्तेः । संज्ञाभेदेन प्रतीतार्थभेदस्य बाधकं विना त्यागायोगात् । एषः इत्येतच्छब्दस्य वक्ष्यमाणेपि सम्भवात् कर्मान्तराणि एवं नामकानि ।

देवताकृतकर्मभेदाधिकरणम् (II-2-9)

At चातुर्मास्य, वैश्वदेव, वरुणप्रघास etc a group of four कर्मs are stated. Among these at वैश्वदेवपर्व by the statement 'तप्ते पयसि दधि आनयति सा वैश्वदेवी आमिक्षा' आमिक्षायाग is enjoined. The statement 'वाजिभ्यो वाजिनम् is

found. Here, the doubt arises whether the latter statement enjoins the auxiliary वाजिन for आमिक्षायाग or it enjoins a separate याग.

चातुर्मास्येषु वैश्वदेववरुणप्रघाससाकमेधशुनासीरीयाख्यपर्वशब्दितकर्मसमुदायेषु आद्ये वैश्वदेव पर्वणि 'तप्ते पयसि दध्यानयति' सा वैश्वदेवी आमिक्षा इति यागं विधाय 'वाजिभ्यो वाजिनम्' इति श्रुतम्। दध्यतिरिक्तः अतिपक्वपयसः विकारः आमिक्षा। वाजिनं तु ततो निस्सृतं जलम्।

तत्र पूर्वस्मिन् आमिक्षायागे गुणविधिः उत कर्मान्तरमिति सन्देहः।

Pūrvapakṣa : Pūrvapakṣin argues that the expression वाजिभ्यः may be taken in the sense of विश्वेदेवेभ्यः by etymological explanation. वाजिन may be taken as a द्रव्य to be offered. Since, आमिक्षा is already stated as द्रव्य, वाजिन may be considered as an alternate.

द्रव्यदेवता संयोगानुमिते पूर्वस्मिन् आमिक्षायागे वाजम् आमिक्षारूपम् अन्नम् एषां अस्तीतिव्युत्पत्त्या वाजिभ्यः इति पदेन विश्वेदेवान् अनूद्य तेभ्यः एव वाजिनरूपगुणविधिः सम्भवतीति न कर्मान्तरविधिः।

Siddhānta : Siddhāntin points out that आमिक्षारूपद्रव्य is उत्पत्तिशिष्ट, that is to say, it is enjoined along with the enjoining of याग itself while वाजिनरूपद्रव्य is उत्पन्नशिष्ट, that is to say, it is enjoined later after the enjoining the याग. When उत्पत्तिशिष्ट is already there, उत्पन्नशिष्ट cannot be enjoined. Hence, वाजि has to be taken in the sense of another deity. Consequently as वाजिनरूपद्रव्य and देवता are different a different कर्म has to be envisaged.

उत्पत्तिशिष्टेन आमिक्षाद्रव्येण अवरुद्धे वैश्वदेवयागे उत्पन्नशिष्टं वाजिनद्रव्यं निवेश-मलभमानं सत् वाजिशब्दस्य देवतान्तरपरत्वमापादयति। ततो द्रव्यदेवताभेदात् कर्मान्तर-मिति सिद्धान्तः।

द्रव्यविशेषानुक्तिकृतकर्म भेदाधिकरणम् (II-2-10)

In the statement 'अग्निहोत्रं जुहोति' अग्निहोत्र is enjoined without mentioning any द्रव्य. This is followed by the statements 'दध्ना जुहोति' 'पयसा जुहोति' etc ten statements of द्रव्यs. Here, the doubt arises whether दधि etc all should be offered at अग्निहोत्र only or at different other कर्मs.

'अग्निहोत्रं जुहोति' इति निर्गुणं कर्म विधाय 'दध्ना जुहोति' 'पयसा जुहोति' इत्येवमादीनि दश वाक्यानि श्रुतानि । तत्र सन्देहः दध्यादेः पूर्वकर्मण्येव निवेशः अथ कर्मान्तरापादकत्वमिति ।

Pūrvapakṣa : Pūrvapakṣin argues that if दधि etc all are to be offered in अग्निहोत्र it will result in विकल्प, since, when one is offered the other cannot offered. Hence, different कर्मs have to be envisaged to offer each one of these at a different कर्म.

दध्यादीनां अनेकेषां गुणानां पूर्वकर्मणि निवेशे सति विकल्पप्रसङ्गात् अन्यतरावरुद्धे अन्यतरनिवेशायोगात् वाजिनवदेव कर्मान्तरकल्पकत्वम् ।

Siddhānta : Siddhāntin points out that दधि etc all seperately need to be connected with अग्निहोत्र. These do not proceed in an order as earlier or later. Hence, one does not obstruct the other, since, अग्निहोत्र is capable of receiving the offerings of all these द्रव्यs, these get connected with that only. However, these are to be offered alternately.

सर्वेषां दध्यादीनां अन्योन्यनैरपेक्ष्येण अग्निहोत्रमात्रापेक्षणात् । तत्र च निर्गुणस्य कर्मणः अवगतस्य सर्वगुणयोग्यत्वात् पौर्वापर्याभावाच्च अन्यावरोधिनि अन्यस्य अनिवेशः इत्यस्य अभावात् । तत्रैव गुणमात्रविधानम् । प्रमाणवशाद् विकल्पः इति ।

दध्यादिद्रव्यसफलत्वाधिकरणम् (II-2-11)

At अग्निहोत्र the statement 'दध्ना इन्द्रियकामस्य जुहुयात्' is found. Here the doubt arises whether at अग्निहोत्र itself the offering of दधि by those who desire to have strong इन्द्रियs is enjoined or a seperate याग is enjoined for them.

'अग्निहोत्रं जुहोति' इति प्रकृत्य 'दध्ना इन्द्रियकामस्य जुहुयात्' इति श्रूयते । तत्र किम् अग्निहोत्रात् कर्मान्तरं दधिविशिष्टम् इन्द्रियकामाय विधीयते अथ तत्रैव फलमात्रं गुणाय विधीयते ।

Pūrvapakṣa : Pūrvapakṣin argues that गुण and फल stated in one statement cannot be connected with अग्निहोत्र. This will result in वाक्यभेद. Enjoining गुण alone to obtain the फल is also not possible. Without the a reference to याग. गुण cannot lead to the result. Hence, a different कर्म has to be envisaged to achieve a particular result viz. इन्द्रिय.

गुणफलयोः एकवाक्यश्रुतयोः प्रकृते कर्मणि निवेशः न युक्तः । एकेन वाक्येन गुणसम्बन्धस्य फलसम्बन्धस्य च विधाने वाक्यभेदप्रसङ्गात् । न च फलाय गुणमात्रविधिः इति वाच्यम् । धात्वर्थमन्तरेण केवलगुणात् फलासिद्धेः । अतः होमाख्यमपूर्वं कर्म तदर्थं च दधि ।

Siddhānta : Siddhāntin points out that if a separate कर्म is envisaged, then, it will result either in मत्वर्थलक्षणा or in विशिष्टविधि. Hence, it is better to think of दधिरूपगुणविधि for इन्द्रियरूपफल.

कर्मान्तरविधौ 'दधिमता होमेन इन्द्रियं भावयेत्' इति मत्वर्थलक्षणाप्रसङ्गात् विशिष्ट विधौ गौरवप्रसङ्गात् लाघवेन गुणमात्रं फलाय विधीयते ।

वारवन्तीयादीनाम् कर्मान्तरताधिकरणम् (II-2-12)

At अग्निष्टुत् याग which is also called as त्रिवृत् and अग्निष्टोम, the recitation of अग्निष्टोमस्तोत्रसाधनसाम in वायव्य ऋक्s is enjoined for a person

who is ब्रह्मवर्चसकाम while for पशुकाम the recitation of वारवन्तीयसाम is enjoined. Here, the doubt arises whether the recitation of वारवन्तीय has to be made at the same अग्निष्टुत् याग as its auxiliary or it requires a different कर्म.

त्रिवृदग्निष्टुदग्निष्टोमः तस्य 'वायव्यासु एकविंशदग्निष्टोम साम कृत्वा ब्रह्मवर्चसकामो यजेत' इत्यग्निष्टुत् संज्ञं यागं विधाय 'एतस्यैव रेवतीषु वारवन्तीयमग्निष्टोमसाम कृत्वा पशुकामो यजेत' इति श्रूयते । तत्र सन्देहः किं पूर्वस्मिन् अग्निष्टुत्संज्ञके यागे पशुफलाय वारवन्तीयसामाख्यो गुणो विधीयते अथ कर्मान्तरम् ।

Pūrvapakṣa : Pūrvapakṣin argues that the pronoun एतस्य coupled with एव indicates that at the same अग्निष्टुत्याग वारवन्तीयसाम has to be recited by those who desire पशुरूपफल. To envisage a different याग results in गौरव.

पूर्वपक्षस्तु प्रकृतपरामर्शकेन एतच्छब्देन अन्यव्यावर्तकैवकारेण च अग्निष्टुद् यागे समर्पिते सति यजेतेति तमनूद्य तत्र रेवतीनाम् ऋचां वारवन्तीयनामकसाम्ना सम्बन्धः सोयं पशुफलाय विधीयते ।

Siddhānta : Siddhāntin points out that if the recitation of वारवन्तीय-साम is enjoined as an axiliary for obtaining पशुरूपफल with reference अग्निष्टुत्, then it will not be साक्षात् यागसाधन. अङ्गावतार न्याय is also not applicable. Hence, रेवतीवारवन्ती सम्बन्धविशिष्टापूर्वकर्म has to be envisaged.

सिद्धान्तस्तु पूर्वकर्मानुवादेन गुणविधौ रेवत्याधारकवारवन्तीयसाम्नः साक्षात् याग-साधनत्वायोगात् । अङ्गावतरणन्यायेन तदङ्गस्तोत्रनिर्वृतिद्वारफलसाधनत्वस्य यागाङ्गत्वेन अचोदितत्वेन अयोगात् रेवतीवारवन्तीयसम्बन्धविशिष्टापूर्व यागकरणिका भावना फलाय विधीयते ।

सौभरनिधनयोः कामैक्याधिकरणम् (II-2-13)

At ज्योतिष्टोम, ब्रह्मसामस्तोत्राश्रयसौभर is enjoined as नित्यक्रत्वर्थ. The same is enjoined for वृष्टिकाम, अन्नाद्यकाम and स्वर्गकाम. For these three सौभरs the निधन viz. हीष्, ऊर्ग, ऊ are prescribed respectively. सौभर is साम, हीष् etc स्तोभाक्षरs. Here, the doubt arises whether, the हीष् etc lend to different वृष्टि etc फलs सौभर resulting in महावृष्टि etc or lead to the same फल in an order.

ज्योतिष्टोमे 'सौभरमुक्थानां ब्रह्मसाम' इति नित्यक्रत्वर्थेन विहितं सौभरमेव 'यो वृष्टिकामः यो अन्नाद्यकामः यः स्वर्गकामः सौभरेण स्तुवीत' इति ब्रह्मसामस्तोत्राश्रयं तत् फलत्रयसाधनत्वेन श्रुतम् । तदेतत् सौभरं प्रकृत्य श्रूयते हीषिति वृष्टिकामाय निधनं कुर्यात् ऊर्गित्यन्नाद्यकामाय, ऊ इति स्वर्गकामाय' इति ।

हीषादीनि स्तोभाक्षराणि । सौभरं सामविशेषः । निधनमिति अन्त्यभक्तेः वाचकः । भक्तिः स्तोभाक्षररूपसामैकदेशः । तत्र सन्देहः वृष्ट्यादेः सौभरफलात् हीषादीनि पृथक् अपरस्य वृष्ट्यादेः फलानि उत सौभरस्य फलं साधयतः व्यवस्थार्थे तन्निधनं नियम्यते ।

Pūrvapakṣa : Pūrvapakṣin argues that in the injunction of हीष etc तादर्थ्यचतुर्थी is found in the words वृष्टिकामाय etc. This indicates that हीष etc are the auxiliaries of पुरुष who is वृष्टिकाम. This requires the auxiliary to lead to वृष्टि etc results. Consequently सौभरसाम and हीष etc निधनs have to lead to two वृष्टि etc. results. This may be considered as महावृष्टि ।

पूर्वपक्षस्तु– अत्र प्रकृतस्तोत्राश्रयेण हीषादिगुणादेव फलमित्युक्तौ बाधकाभावात् । किञ्च हीषादिविधिवाक्ये वृष्टिकामायेत्यादिना तादर्थ्ये चतुर्थी हीषादीनां वृष्ट्यादिकाम-पुरुषशेषत्वं गमयति । तच्छेषत्वं च पुरुषापेक्षितफलहेतुत्वे उपपद्यते नान्यथा इति सौभरस्य हीषित्यादि निधनस्य च द्वयोः फलभूते द्वे वृष्ट्यादिके भवतः । तदुभयमेलनात् महावृष्टिः ।

Siddhānta : Siddhāntin points out that one who is stated as वृष्टिकाम

in सौभरविधि he only is stated as वृष्टिकाम in हीष etc statements. Hence, the very वृष्टादि results stated in सौभर वाक्य are again stated in हीषादि वाक्य. This is intended to fix the order of the recitation of हीषादि.

सिद्धान्तस्तु सौभरविधौ यः वृष्टयादिकामः स एव हीषादिवाक्यैः प्रत्यभिज्ञायते । अतः सौभरवाक्यफलभूताः वृष्टयादयः एव हीषादिवाक्येषु अनूद्यन्ते इति न फलान्तरम् ।

फलत्रयकामानाम् त्रयाणाम् अनियमेन हीषादिमध्ये यस्य कस्य चित् निधनस्य प्राप्तौ विधेः वृष्टिकामः हीषित्येव निधनं कुर्यात् इति नियमार्थत्वात् ।

द्वितीयाध्यायस्य तृतीयः पादः

ग्रहाग्रतायाः ज्योतिष्टोमाङ्गताधिकरणम् (II-3-1)

In the earlier पाद, कर्मभेद was presented on the basis of शब्दान्तर, अभ्यास etc. five criteria. In this पाद कर्मभेद will be discussed on the basis of the criterion of प्रकरण ।

शब्दान्तराभ्याससंज्ञानामधेयगुणप्रकरणरूपेषु कर्मभेदप्रमाणेषु पञ्चभिः कर्मभेदः सापवादः पूर्वपादेऽभिहितः । अत्र तु प्रकरणात् कर्मभेदो सापवादो निरूप्यते ।

At ज्योतिष्टोम, आज्यपृष्ठ etc. स्तोत्र, रथन्तर etc. सामs, ऐन्द्रवायव, मैत्रावरुण etc. ten ग्रहs are stated. Further it is stated that ''यदि रथन्तरसामा सोमः स्यात् ऐन्द्रवायवाग्रान् ग्रहान् गृह्णीयात्, यदि बृहत्सामा शुक्राग्रान्'' and so on. The expression सोम means सोमरससाधनक याग. When in the सोमयाग, रथन्तरसाम is employed then, ऐन्द्रवायवग्रह be used first, then other ग्रहs are to be employed is the implication of these statements. Here the question arises whether रथन्तराद्येकैकसोमकयाग etc distinct कर्मs are enjoined or at the ज्योतिष्टोम itself ऐन्द्रवायवाग्रतादि auxiliaries are enjoined.

ज्योतिष्टोमे हि आरादुपकारकाणि आज्यपृष्ठादीनि स्तोत्राणि, तत्साधनानि रथन्तर-बृहद्वायत्रजगद्वैरूपवैराजशाक्वररैवतादिसामानि च सन्ति । ऐन्द्रवायवमैत्रावरुणाऽश्विन-

शुक्रमन्थिषोडशि वैश्वदेवाऽग्रयणादयो दश ग्रहाश्च सन्ति । तमिम् ज्योतिष्टोमं प्रकत्य श्रूयते। ''यदि रथन्तरसामा सोमः स्यात् ऐन्द्रवायवाग्रान् गृहान् गृह्णीयात्, यदि बृहत्सामा शुक्राग्रान्, यदि जगत्सामा आग्रयणाग्रान्'' इत्यादि । सोमशब्देन सोमरससाधको याग उच्यते । तस्य रथन्तरसामपेतत्वे ऐन्द्रवायवग्रहं प्रथमं गृहीत्वा अन्यान् पश्चात् गृह्णीयादित्येवं रूपेणार्थो ध्येयः । अत्र सन्देहः ऐन्द्रवायवाद्यग्रताविशिष्टरथन्तराद्येकैकसोमकं कर्मान्तरं विधीयते, अथवा प्रकृते ज्योतिष्टोमे ऐन्द्रवायवाग्रतादिगुणविधिरिति ।

Pūrvapakṣa : Pūrvapakṣin argues that the word रथन्तरसाम is a word of वहुव्रीहि compound. In this compound the word रथन्तरसाम is an adjective. An adjective when applied to a substantive, excludes the other adjectives. In the case of ज्योतिष्टोम, गायत्र etc. other सामs are stated. Therefore रथन्तरसाम cannot exclude them. Hence रथन्तरसाम कर्म is distinct from ज्योतिष्टोम. In the same way बृहत्साम etc. are also different कर्मs.

पूर्वपक्षस्तु कर्मान्तरमिति । कुतः? रथन्तरे साम अस्येति बहुव्रीहिरयं समासो रथन्तरसामविशेषणकः । विशेषणं च विशेष्यव्यापि विशेषणान्तरव्यवच्छेदकं भवति । ज्योतिष्टोमे च गायत्रादिसामान्तरोपेते विशेषणभूतज्योतिष्टोमव्यापित्वसामान्तरव्यवच्छेदकत्वयोरयोगात् रथन्तरसामकं ज्योतिष्टोमादन्यदेव कर्मेति वाच्यम् ।

Siddhāntin : Siddhāntin points out that the expression यदि in the statement ''यदि सोमो रथन्तरसामा स्यात्'' indicates that it has to be taken as an auxiliary of ज्योतिष्टोम only. An adjective does not exclude other adjectives. Even if it has to exclude, it may exclude बृहदादिसाम.

सिद्धान्तस्तु ''यदि सोमो रथन्तरसामा स्यात्'' इति प्राप्त्यपेक्षनिमित्तवाचि यदिशब्देन प्रकरणेन च प्रकृतज्योतिष्टोमस्यैव प्रत्यभिज्ञानात् । विशेषणस्य स्वायोगव्यवच्छेदेन स्वसत्तामात्रतया विशेषणत्वोपपत्त्या विशेषणान्तरव्यवच्छेदविशेष्यव्यापित्वयोरनावश्यकत्वात् व्यवच्छेदकत्वेपि वैकल्पिकविरोधिबृहददिसामान्तरव्यवच्छेदसम्भवेनाविरोधिगायत्रादिसामान्तराव्यवच्छेदेऽपि विशेषणत्वोपपत्तेर्न कर्मान्तरम् ।

अवेष्टेः क्रत्वन्तरताधिकरणम् (II-3-2)

By the injunction 'राजा राजसूयेन स्वाराज्यकागो यजेत' राजसूययाग is stated. राजसूय consists of a group of यागs consisting इष्टि, पशु and सोम. The इष्टि mentioned here is named as अवेष्टि. At this, the हविस् has to be offered for five dieties. आग्नेयम् अष्टाकपालम् निर्वपति, हिरण्यम् दक्षिणा etc. Here, certain order is stated. If ब्राह्मण performs बार्हस्पत्य must be placed in the middle. If राजन्य performs ऐन्द्र has to be placed in the middle. If वैश्य performs, then वैश्वदेव has to be placed in the middle. Here the question is raised whether at राजसूय, the auxiliary viz. placing middle is enjoined for ब्राह्मण etc. or different कर्मs are enjoined.

''राजा राजसूयेन स्वाराज्यकामो यजेत्'' इति इष्टिपशुसोमाख्ययागसमुदायात्मा राजसूयः श्रुतः । तत्रावेष्टिर्नामेष्टिः पञ्चहविष्काऽऽम्नाता ''आग्नेयमष्टाकपाले निर्वपति हिरण्यं दक्षिणा, ऐन्द्रमेकादशकपालं ऋषभो दक्षिणा, वैश्वदेवं चरुं पिशङ्गीप्रष्ठौही दक्षिणा, मैत्रावरुणीमामिक्षां वशा दक्षिणा, बार्हस्पत्यं चरुं शितिपृष्ठो दक्षिणा, इत्यादि तस्यामवेष्टौ हविषां क्रमव्यत्ययः श्रूयते । यदि ब्राह्मणो यजेत बार्हस्पत्यं मध्ये निधायाहुतिमाहुतिं हुत्वा तमभिधारयेत्, यदि राजन्यः ऐन्द्रम्, यदि वैश्यो वैश्वदेवम्'' इति । तत्र सन्देहः राजसूये तत्कर्तृतया प्राप्तब्राह्मणादिकं निमित्तीकृत्य प्रकृतराजसूये मध्यनिधानगुणविधिः, उताप्राप्त-ब्राह्मणादिविशिष्टकर्मान्तरविधिरिति ।

Pūrvapakṣa : Pūrvapakṣin argues that in order to place ऐन्द्रवायवाग्र etc. in an order, रथन्तरसामत्व etc. are quoted. The expression राजन् in the statement of राजसूय refers to all the three– ब्राह्मण, क्षत्रिय and वैश्य. Hence all these three are available for enjoining the auxiliaries.

पूर्वपक्षस्तु यथाहि पूर्वत्र ऐन्द्रवायवाग्रत्वादिकं व्यवस्थापयितुं रथन्तरसामत्वादिकं निमित्तत्वेनानूद्यते । तथा इहापि बार्हस्पत्यादिहविः मध्ये स्थापयितु 'यदि ब्राह्मणः' इत्यादिकं निमित्तत्वेन अनूद्यते । न च राजसूयवाक्ये राजपदश्रवणेन ब्राह्मणवैश्ययोरप्राप्तिरिति शङ्क्यम् । तत्र राजशब्दस्य अर्थप्रसिद्धया जनपदादिरक्षणरूपराज्यकर्तृत्वनिमित्तकत्वात् तस्य च निमित्तस्य त्रिष्वपि सम्भवेन राजशब्देन ब्राह्मणादित्रयस्यापि प्राप्तेरिति ।

Siddhānta : Siddhāntin points out that the word राजन्, should not be taken in the sense he who rules over a kingdom. It conveys क्षत्रिय only. The other two cannot claim the title राजन् on the ground that they also rule a kingdom sometimes. Hence in the statement "राजा राजसूयेन यजेत," by the word राजन्, ब्राह्मण and वैश्य cannot be taken. Hence at अवेष्टियाग बार्हस्पत्यमध्यनिधनादिगुणविशिष्ट. Therefore is enjoined कर्मान्तर.

राजशब्दयोगादेव राज्यशब्दनिष्पत्त्युक्त्या न राज्ययोगनिमित्तत्वं राजशब्दस्यार्यप्रसिद्ध्या ग्राह्यम्, आर्यप्रयोगरूपाचारादपि स्मृतेः प्राबल्यात्, आर्यवरपाणिन्यनुगृहीतायाः अनार्यद्रविडप्रसिद्धेः क्षत्रियमात्रे सत्वाच्च "राजानामभिषेचयेत्" इति राज्यप्रयोगात्प्रागेव क्षत्रियमात्रे राजशब्दस्य वेदे प्रयोगाच्च रूढ्या राजपदस्य क्षत्रियमात्रवाचित्वेन ब्राह्मणादेरप्राप्तेः अप्राप्तब्राह्मणकर्तृकं बार्हस्पत्यादिमध्यनिधानादि गुणविशिष्टं कर्मान्तरमिति ।

आधानस्य विधेयत्वाधिकरणम् (II-3-3)

Without the context of any particular sacrifice, अग्न्याधान is stated in the statements वसन्ते ब्राह्मणो अग्नीनादधीत etc. Further the statements "वसन्ते ब्राह्मणमुपनयीत," "ग्रीष्मे राजन्यं," "शरदि वैश्यं" are also found. Here the question is raised, since, आधान and उपनयन have to be performed by ब्राह्मण etc. in the natural course, the time of आधान and उपनयन viz. वसन्त, ग्रीष्म etc. are enjoined here or वसन्तादिविशिष्ट आधान and उपनयन are enjoined.

अनारभ्य श्रूयते "वसन्ते ब्राह्मणोऽग्नीनादधीत" "ग्रीष्मे राजान्यः, शरदि वैश्यः" इति । तथा "वसन्ते ब्राह्मणमुपनयीत, ग्रीष्मे राजान्यं, शरदि वैश्यम्" इति च । तत्र सन्देहः आधानोपनयनयोः कर्तृत्वेनार्थप्राप्तानां ब्राह्मणादीनां ब्राह्मणश्चेद्वसन्ते, राजन्यश्चेद् ग्रीष्मे इत्यादि रूपेण कालविधिं प्रति निमित्तार्थानि वाक्यानि, उताप्राप्तानां ब्राह्मणादीनां वसन्तादिविशिष्टाधानोपनयनविध्यर्थानि इति ।

Pūrvapakṣa : Pūrvapakṣin argues that the आधान and उपनयन have to be made for ब्राह्मण etc. since the performance of अग्निहोत्र etc. यागs is

enjoined for them. Hence there is no need to enjoin आधान and उपनयन. In view of this, the वसन्त, ग्रीष्म etc, time is only enjoined.

''अग्निहोत्रं जुहुयात् स्वर्गकामः'' इति त्रैवर्णिकसाधारणक्रतुविधयस्तदनुष्ठानद्वारा स्वर्गाद्यर्थाः । न च क्रत्वनुष्ठानमाहवनीयाद्यग्निं वेदाध्ययनतदर्थज्ञानरूपविद्यां च विना युक्तम्। न च ते आधानोपनयने विना शक्यसंपादे । अत आक्षेपादेव ब्राह्मणादेराधानोपनयनसम्बन्धसिद्धेर्निमित्तार्थकानि वाक्यानीति ।

Siddhānta : Siddhāntin points out that though performance of the अग्निहोत्र etc. sacrifice requires आधान and उपनयन, these can be performed in लौकाकाग्नि or the अग्न्याधान made by others. Hence, the enjoining अग्निहोत्र etc. does not necessarily brings in अग्न्याधान and उपनयन. Hence, in these statements, वसन्तादिकालविशिष्ट अग्न्याधान and उपनयन are enjoined.

सिद्धान्तस्तु क्रत्वनुष्ठानस्याग्निविद्यासाध्यत्वेपि लौकिकाग्नौ वा अन्येनाऽहिताहवनीयदौ क्रयादिना सम्पादिते वा पुस्तकनिरीक्षणद्युपायसम्पादितविद्यया वोपपत्त्या नावश्यमाधानोपनयने अक्षिपन्ति क्रतुविधयः इत्यप्राप्तब्राह्मणादेर्वसन्तादिविशिष्टाधानोपनयनविध्यर्थानि वाक्यानि ।

दाक्षायणादीनां गुणताधिकरणम् (II-3-4)

In the context of दर्शपूर्णमास, दाक्षायणयज्ञ and साकं प्रस्थायी यज्ञ are stated. Here the question is raised whether these are distinct कर्मs or the auxiliaries enjoined for दर्शपूर्णमास itself.

दर्शपूर्णमासप्रकरणे ''दाक्षायणयज्ञेन स्वर्गकामो यजेत'' इति ''साकंप्रस्थायीयेन यजेत पशुकामः'' इति च श्रुतम् । तत्र सन्देहः दाक्षायणादिशब्देन कर्मान्तरविधिरुत दर्शपूर्णमासयोरेव फलाय गुणविधिरिति ।

Pūrvapakṣa : Pūrvapakṣin argues that the expressions दाक्षायण etc. do not convey any auxiliary. These are stated along with यजेत. Therefore these are the names of distinct कर्मs.

दाक्षायणादिशब्दितस्य कस्यचिद्गुणस्य उद्भिदादिशब्दवद्यजिसामानाधिकरण्येन कर्मनामत्वात् ''अयैष ज्योतिः'' इत्यादिवत् संज्ञाभेदात् कर्मान्तरमिति पूर्वपक्षः ।

Siddhāta : Siddhāntin points out that the expression दाक्षायण etc. do convey auxiliaries of याग namely ऋत्विजs i.e., priests. This is explained as दक्षस्य यजमानस्य इमे दाक्षाः ऋत्विजः. The वाक्यशेष, ''द्वे पौर्णमासे यजेत,'' ''द्वे अमावास्ये यजेत'' also states that these have to be repeated twice at पौर्णमासी and अमावास्या respectively. Hence, these are enjoined as auxiliaries of दर्शपूर्णमास to achieve certain results like ''दध्ना इन्द्रियकामस्य जुहुयात.''

सिद्धान्तस्तु दाक्षायणादिशब्दस्य गुणवाचितया लोकतोऽप्रसिद्धत्वेपि दक्षस्य पुनरावृत्तावनलसस्य सम्बन्धि दाक्षमिति वा दक्षस्य यजमानस्य इमे दाक्षाः ऋत्विजः, तेषां तत्कर्तृकमिति यावत्, अयनमावृत्तिर्यस्य तेन यज्ञेन प्रकृतदर्शपौर्णमासाख्येनेति निरुक्त्या ''द्वे पौर्णमास्ये यजेत द्वे अमावास्ये'' इति वाक्यशेषाच्च, प्रकृते कर्मणि ''दध्नेन्दियकामस्य'' इत्यत्रेव फलायावृत्तिरूपगुणविधिः ।

द्रव्यदेवतायुक्तानां यागान्तरताधिकरणम् (II-3-5)

In the context of दर्शपूर्णमास the statements ईषामालभेत, चतुरोमुष्टाः निर्वपति are found. Futher two statements ''वायव्यं श्वेतमालभेत भूतिकामः'' and ''सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः'' are found without reference to any particular sacrifice. Here the question is raised whether by the statements वायव्यं and सौर्यं the auxiliaries श्वेतत्व and चरु are enjoined or mere आलम्भन and निर्वाप are enjoined or द्रव्यदेवताविशिष्ट कर्मान्तर is enjoined.

दर्शपौर्णमासप्रकरणे ''ईषामालभेत'' इति ''चतुरो मुष्टीर्निवपति'' इति च श्रुतम् । ईषेति शकटगतो लाङ्गलवदीर्थं काष्ठविशेषः । तथा ''वायव्यं श्वेतमालभेत भूतिकामः'' इति ''सौर्यं चरुं निर्वपेद्ब्रह्मवर्चसकामः'' इति चानारभ्य वाक्यद्वयं श्रूयते । तत्र सन्देहः वायव्यसौर्यवाक्ययोः

ईषावाक्यनिर्वापवाक्यगतालम्भननिर्वापावनूद्य क्रमात् श्वेतत्वगुणचरुरूपगुणौ विधीयेते, उत यावदुक्तमालम्भनमात्रं निर्वापमात्रं च विधीयते उत द्रव्यदेवताविशिष्टं कर्मान्तरमिति ।

Pūrvapakṣa : Pūrvapakṣin argues that the expression आलम्भन means touching. Quoting this from the statement ईषामालभेत the auxiliary श्वेतत्व is enjoined here. Similarly quoting the निर्वाप from the statement मुष्टीः निर्वपति, the auxiliary चरु is enjoined. The expressions भूतिकाम and ब्रह्मवर्चसकाम state the partial results of दर्शपूर्णमास which is for सर्वकाम. He also proposes another explanation as it is not proper to think of the partial statement of results it may be stated that two different कर्मs of आलम्भन and निर्वाप are enjoined here.

पूर्वपक्षस्तु ईषावाक्यस्य स्पर्शशब्दितमालम्भनमनूद्याऽलभ्यायामीषायां श्वेतत्वगुणो विधीयते ''श्वेतमीषामालभेत'' इति । तस्य श्वेतकाष्ठस्य वायुना स्पृश्यमानत्वात् वायव्यता सम्भवति । तथा मुष्टिवाक्यस्थनिर्वापमनूद्य चरुगुणो विधीयते । ''निर्वपेत्'' इति यत् तत् चरुम्, चरौ स्थाल्यामिति सप्तम्यर्थे द्वितीया । निरुप्तस्य हविष आग्नेयतया तेजोदैवत्यत्व-साम्यात्सौर्यत्वं च युक्तम् । भूतिब्रह्मवर्चसकामशब्दौ सार्वकामिकदर्शपूर्णमासयोः पक्षे प्रातैकदेशफलानुवादावित्येकः । अन्यस्तु फलपदयोः नित्यवच्छ्रुतयोः सम्भवत्प्रयोजनयोश्च पाक्षिकानुवादत्वरूपमानर्थक्यं न युक्तमिति गुणफलविशिष्टे आलम्भननिर्वापरूपे यथोक्तकर्मान्तरे विधीयते इति ।

Siddhānta : Siddhāntin points out that श्वेतपशु and चरु are द्रव्यs. वायु and सूर्य are देवताs. Since द्रव्य and देवता are stated here, these are clearly यागs. Hence द्रव्य देवताफलविशिष्ट यागs are enjoined here.

सिद्धान्तस्तु श्वेतपशुचरुद्रव्ययोस्तद्धितान्तशब्दार्थयोर्वायुसूर्यदेवतयोश्च स्पष्टं प्रतीत्या द्रव्यदेवतालक्षणरूपवतोः यागयोरर्थात् प्राप्तयोर्निरासयोगात्, द्रव्यदेवताफलविशिष्टयाग-योर्विधिर्युक्तः ''भूतिकामो वायव्येन श्वेतेन पशुना यजेत'' इति ''ब्रह्मवर्चसकामः सौर्येण चरुणा 'यजेत,' इति च ।

वत्सालम्भादीनां संस्कारताधिकरणम् (II-3-6)

In the context of milking the cow at अग्निहोत्र, the statement "वत्समालभेत" is found. Here the question is raised whether a याग is enjoined or merely a संस्कार is enjoined.

अग्निहोत्रदोहप्रकरणे "वत्समालभेत" इति श्रुतम् । तत्र यागविधिरुत संस्कारमात्रविधिरिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that as in the case of वायव्यश्वेतालम्भन, here also वत्सरूपद्रव्यालम्भन is stated. Hence it is a याग wherein a वत्स पशु is offered.

वायव्यश्वेतालम्भनवत् प्राणिद्रव्यालम्भनत्वात् वत्सपशुकयागविधिरिति प्राप्ते ।

Siddhānta : Siddhāntin points out that in this context mostly दोह etc. संस्कारs are stated. The word आलम्भ means स्पर्श. Hence स्पर्शरूपवत्ससंस्कार is enjoined here.

अग्निहोत्रदोहादिसंस्कारप्रायपठितत्वात् आलम्भशब्दितस्पर्शो वत्ससंस्कार एवेति सिद्धान्तः ।

नैवारचरोराधानार्थताधिकरणम् (II-3-7)

In the context of चयन the statements "नैवारश्चरुर्भवति," "चरुमुपदधाति," "बृहस्पतेर्वा एतदन्नं यन्नीवाराः" are found. Here the question is raised whether उपधान of the चरु is enjoined here or याग is enjoined.

चयनं प्रकृत्य श्रूयते "नैवाश्चरुर्भवति" इति "चरुमुपदधाति" इति "बृहस्पतेर्वा एतदन्नं यन्नीवाराः" इति । तत्र सन्देहः किं चरोः यावदुक्तमुपाधानमात्रं विहितम् । उत यागविधिरिति ।

Pūrvapakṣa : Pūrvapakṣin argues that the statement बृहस्पतेर्वा एतदन्नं conveys देवतासम्बन्ध. Therefore याग is enjoined here. उपधान of चरु is प्रतिपत्तिकर्म here.

''बृहस्पतेर्वा एतदन्नं'' इति वाक्यशेषेण देवतासम्बन्धप्रतीत्या यागविधिसम्भवात् उपधानं यागोपयुक्तस्य स्विष्टकृदादिवत् प्रतिपत्तिः इति प्राप्ते ।

Siddhānta : Siddhāntin points out that देवतासम्बन्ध can be envisaged from वाक्यशेष only after the enjoining of याग is confirmed. Hence, making देवतासम्बन्ध itself the ground for enjoining याग is not proper. Hence, only उपधान of चरु is enjoined here. The वाक्यशेष that refers to बृहस्पति is अर्थवाद here.

यागविधौ हि निश्चिते देवतापेक्षायां वाक्यशेषाद्देवताप्रापणं युक्तम् । न चेह यागविधिः प्रमितः । किन्तु अधानमात्रम् । न तस्य यागवद्देवतापेक्षाऽस्ति । अतोऽर्थवादमात्रं वाक्यशेष इत्युपधानमात्रं विहितम् चरोः, न यागविधिरिति सिद्धान्तः ।

त्वाष्ट्रपात्नीवतस्य पर्यग्निकरणगुणकत्वाधिकरणम् (II-3-8)

The statement ''त्वाष्ट्रं पात्नीवतमालभेत'' is found. In the context of this, another statement पर्याग्निकृतं पात्नीवतमुत्सृजति is found. Here the question is raised, whether पर्यग्निकरण is enjoined as an auxiliary or a separate याग is enjoined.

''त्वाष्ट्रं पात्नीवतमालभेत'' इति प्रकृत्य श्रूयते ''पर्यग्निकृतं पात्नीवतमुत्सृजति'' इति । तत्र प्रकृते कर्मणि पर्यग्निकरणान्तगुणविधिरुत यागान्तरविधिरिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that by the expression पात्नीवत which is used with तद्धित suffix देवता is conveyed. By the word पर्यग्निकृत, संस्कृतपशुद्रव्य is conveyed. Hence a याग is enjoined here.

अत्र तु विध्युद्देश एव पात्नीवतशब्देन तद्धितान्तेन पत्नीवन्नामकदेवतासम्बन्धस्य पर्यग्निकृतशब्देन संस्कृतपशुद्रव्यस्य च प्रतीतेर्वायव्यपशुवद्यागविधिरिति प्राप्ते ।

Siddhānta : Siddhāntin points out that the पशु which is stated in connection with आलम्भन is quoted by the word पात्नीवत and the auxiliaries upto पर्यग्निकरण are enjoined. Though the auxiliaries upto पर्यग्निकरण are attracted by the injunction itself, to point out that the auxiliaries that occur later should not be taken here, the पर्यग्निकरण is enjoined.

इह त्वालभ्यत्वेन प्रकृतपशोः पात्नीवतशब्देन प्रत्यभिज्ञानात्तदनुवादेन पर्यग्निकरणान्ताङ्ग-कलापविधिः । न च तस्य चोदकप्राप्तत्वात् विधिवैयर्थ्यम् । उत्तराङ्गनिवृत्त्यर्थत्वात् ।

अदाभ्यादीनां ग्रहनामताधिकरणम् (II-3-9)

The statement 'अदाभ्यं गृहीत्वा सोमाय यजते' and 'योंऽशुम् गृह्णाति' occur without reference to any particular sacrifice. Here a question is raised whether two separate यागs namely अदाभ्य and अंशु are enjoined or अदाभ्यग्रहण and अंशुग्रहण are enjoined as the auxiliaries of ज्योतिष्टोम.

अनारभ्य श्रूयते ''एष ह वै हविषा हविर्यजते'' यो अदाभ्यं गृहीत्वा सोमाय यजते'' इति, तथा ''परा वा एतस्य प्राण एति, योंऽशुम गृह्णाति'' इति च श्रुतम् । योऽदाभ्यं गृहीत्वा सोमाय यजते एष सोमाख्येन हविषा सोमाख्ये हविः यजत इति । परेत्यस्य एतीत्यनेनान्वये परेति विनश्यतीत्यर्थः । तत्र सन्देहः अदाभ्यांशुनामकयागान्तरविधिः उत ज्योतिष्टोम एव एतद्ग्रहणविधिरिति ।

Pūrvapakṣa : Pūrvapakṣin argues that अदाभ्य is a distinct name. ग्रहण being a संस्कारकर्म cannot be taken as a name since अदाभ्य is a name, a distinct याग of that name is enjoined here. अंशु is also a distinct name. Therefore the याग of that name is also enjoined separately.

किञ्चादाभ्यशब्दस्यापूर्वनामत्वात् ग्रहणस्य संस्कारकर्मत्वेन नामधेयायोग्यत्वादेवं संज्ञाभेदात्तन्नामकं यागान्तरं ''यजते'' इत्याख्यातेन अदाभ्यं यजते इति विधीयते। अंशुमित्यत्र यजतेरश्रवणेऽपि नामविशेषबलादेव अपूर्वयागविधिः ।

Siddhānta : Siddhāntin points out that it is true that अदाभ्य and अंशु are the names but these are not the names of यागs but the names of ग्रह type of vessels, used at the sacrifice. In the statement अदाभ्यं गृहीत्वा, the expression गृहीत्वा occurs immediately. In the statement अंशुं गृह्णाति also the word गृह्णाति occurs. This clearly shows that holding of ग्रह kind of sacrificial vessels is meant here. Hence the auxiliary ग्रहणरूपसंस्कार is enjoined here for सोमरस to be offered at ज्योतिष्टोम sacrifice.

अदाभ्यांशुशब्दयोर्नामत्वेप्यव्यवहितेन ''गृहीत्वा'' इत्यनेन ''गृह्णाति'' इत्यनेन चान्वये सम्भवति व्यवहितेन यजिना अन्वयायोगात् तौ ग्रहयोरेव नामनी । न यागयोः । अंशुवाक्ये यजेरश्रवणाच्च अतो ज्योतिष्टोमांगतसोमरसस्य ग्रहणाख्यसंस्काररूपगुणविधिरेव । न यागान्तरविधिः ।

अग्निचयनस्य संस्कारताधिकरणम् (II-3-10)

The statement एवं विद्वान् अग्निं चिनुते is found. Here the question is raised whether अग्निचयन is enjoined here or याग named अग्नि is enjoined. Or an auxiliary of ज्योतिष्टोम is enjoined.

''य एवं विद्वानाग्निं चिनुते'' इति विधाय श्रूयते ''अग्नेः स्तोत्रम्, अग्नेः शस्त्रम्'' इति षडुपसदोऽग्नेश्चित्यस्य सम्भवन्ति'' इति च । तत्र सन्देहः यावदुक्तचयनमात्रं, उत अग्निनामकं यागान्तरं विधीयते, अथ ज्योतिष्टोमादौ गुणविधिरिति ।

Pūrvapakṣa : Pūrvapakṣin argues that there is no indication for enjoining the auxiliary for ज्योतिष्टोम. चयन alone cannot be enjoined. Hence, a याग called अग्नि is enjoined here.

This is clear from the mention of स्तोत्र and शस्त्र in वाक्यशेष. The statement यदग्निं यजति तत् अग्निष्टोमाख्यसंस्थाविशेष is also found. चिनुते is only अनुवाद.

पूर्वपक्षस्तु यदुक्तं पूर्वत्र तैत्तिरीये क्रतुसंयोजकवाक्यसत्त्वेन ज्योतिष्टोमे गुणविधानमिति, नेह तथा वाक्यमस्ति, येन ज्योतिष्टोमे गुणविधिरिति स्यात् । यावदुक्तचयनमात्रविधिपक्षस्त्वानर्थक्यादयुक्तः । अतो अग्निनामकयागविधिः । यजेरश्रवणेपि । "अग्नेः स्तोत्रम्" इति वाक्यशेषे स्तोत्रशस्त्रादिरूपयागलिङ्गश्रवणात् "चिनुते" इति तु इष्टकाभिरग्निं चिनुते" इत्यादिवाक्यप्राप्तानुवाद इति ।

Siddhānta : Siddhāntin points out that the word अग्नि means fire. It cannot be taken as a name of a distinct याग since द्रव्य and देवता are not mentioned here. Hence चयनरूप संस्कार is enjoined for अग्नि here.

सिद्धान्तस्तु अग्निशब्दस्य रूढ्या वह्निवाचित्वात्, रूढेर्लिङ्गादिकल्प्यायागवाचित्वाद् बलवत्त्वात्, यागरूपयोः द्रव्यदेवतायोरसिद्धेश्च न यागनामत्वमग्निशब्दस्य युक्तम् । किन्तु अग्नेश्चयनाख्यसंस्कारविधिरेव ।

मासाग्निहोत्रादीनां क्रत्वन्तरताधिकरणम् (II-3-11)

At सत्र of कुण्डपायिन्s called अयन, the statement उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोति is found. Here the question is raised whether the auxiliary of मास is enjoined or नित्याग्निहोत्र itself or it is a different कर्म.

कुण्डपायिनामयननामकसत्रम् । तत्र श्रूयते "उपसद्भिश्चरित्वा, मासमग्निहोत्रं जुहोति" "मासं दर्शपूर्णमासाभ्यां यजेत" इत्यादि । तत्र सन्देहः नित्याग्निहोत्र एव मासरूपो गुणो विधीयते, अथ कर्मान्तरमिति ।

Pūrvapakṣa : Pūrvapakṣin argues that the name अग्निहोत्र makes a reference to नित्याग्निहोत्र only. Therefore, the auxiliary i.e. the time of one month is enjoined here for नित्याग्निहोत्र only.

अग्निहोत्रशब्देन नित्याग्निहोत्रस्योपस्थापनात् तस्य च प्राप्तत्वात् तदनुवादेनाप्राप्तो मासरूपो गुणो विधीयत इति प्राप्ते ।

Siddhānta : Siddhāntin points out that the उपसद्s stated here are not to be found in नित्याग्निहोत्र. If both a months time and उपसद् are enjoined it will result in वाक्यभेद. Moreover, नित्याग्निहोत्र does not belong to the context of अयन. Hence, a separate कर्म named मासाग्निहोत्र is enjoined here. The same name is used here to enable the अतिदेश of certain auxiliaries of नित्याग्निहोत्र.

"उपसद्भिश्चरित्वा" इत्युक्तोपसदां नित्याग्निहोत्रे अभावेन तासां मासस्य च द्वयोरपि विधौ "अग्निहोत्रं जुहोति इति यत्तदुपसद्भिश्चरित्वा" इति मासम् इति चान्वयेन वाक्यभेद-प्रसङ्गेन तदुपस्थापनायोगात्, अयनप्रकरणे तस्याप्रकृतत्वात्, अनुपादेयदेशकालनिमित्ता अन्यतमरूपगुणे सति पूर्वकर्मानुपस्थापनाच्च, प्रकरणान्तरात् गुणद्वयविशिष्टं कर्मान्तरमग्नि-होत्रनामकं विधीयते । तन्नाम्ना व्यवहारकरणं तु तद्धर्माणामतिदेशार्थमिति सप्तमे वक्ष्यते ।

आग्नेयादिकाम्येष्टयधिकरणम् (II-3-12)

The statement आग्नेयमष्टाकपालं निर्वपेद्रुक्कामः is found without reference to any particular sacrifice. The expression रुक्काम mans तेजस्काम. Here the question is raised whether फल is enjoined for the very आग्नेय which is a part of दर्शपूर्णमास or separate आग्नेययाग is enjoined with तेजस् as फल.

आग्नेयमष्टाकपालं निर्वपद्रुक्कामः "इत्यनारभ्य" श्रूयते । रुक्काम; तेजस्कामः इत्यर्थः । अत्र सन्देहः दर्शपूर्णमासगताऽग्नेयानुवादेन फलसम्बन्धो विधीयते, अथ फलविशिष्टं कर्मान्तरमिति ।

Pūrvapakṣa : Pūrvapakṣin argues that here फल is enjoined for the very आग्नेय which is a part of दर्शपूर्णमास by वाक्यप्रमाण.

आग्नेयानुवादेन फलसम्बन्धविधिरिति प्राप्तम् । कुतः? वाक्येन आग्नेये फलसम्बन्धस्य प्रतीतेः ।

Siddhānta : Siddhāntin points out that this statement is not found nereby दर्शपूर्णमास. Hence, it is a distinct कर्म.

सिद्धान्तस्तु प्रकरणान्तराभावेपि तस्यासन्निधिकृतत्वेन असन्निधेरेव कर्मान्तरप्रयोजकत्वेन, अत्र दर्शपौर्णमासिकाग्नेयस्य असन्निधानात् तद्बलात्, फलस्यापि उद्देश्यत्वेन मासस्येवानुपादेयत्वात् तदनुवादेन कर्मान्तरविधिरिति ।

अग्नीषोमीय and ऐन्द्राग्न should also be explained in the same way.

एवम् अग्नीषोमीयमेकादशकपालं निर्वपेद् ब्रह्मवर्चसकामः ऐन्द्राग्नमेकादशकपालं निर्वपेत्प्रजाकामः'' इत्यादि काम्येष्टिकाण्डपठितकाम्येष्टिष्वपि संशयपूर्वपक्षसिद्धान्ता ध्येयाः ।

अवेष्टेरन्नाद्यफलकत्वाधिकरणम् (II-3-13)

At दर्शपूर्णमास the statements ''समे दर्शपूर्णमासाभ्यां यजेत,'' ''पौर्णमास्यां पौर्णमास्या यजेत,'' ''अमावास्यां अमावास्या यजेत,'' ''यावज्जीवं दर्शपूर्णमासाभ्यां यजेत'' are found. In these statements, देश, काल, निमित्त are stated for दर्शपूर्णमास. Similarly the statement 'स्विष्टकृतं यजति'' is also found. For this स्विष्टकृत, हविस्संस्कार is stated in वाक्यशेष. Further with reference to अवेष्टि इष्टि by the statement 'एतया अन्नाद्यकामं याजयेत्' फल is stated. Thus we find these statements state देश, काल, निमित्त, संस्कार, फलसम्बद्धकर्म. Here, the question is raised whether these enjoin different कर्मs or enjoin देश काल etc. for the very दर्शपूर्णमास.

i) समे दर्शपूर्णमासाभ्यां यजेत'' इति ''पौर्णमास्याम् पौर्णमास्या यजेत'' इति । अमावास्यायां अमावास्या यजेत'' इति ''यावज्जीवं दर्शपूर्णमासाभ्यां यजेत'' इति देशकालनिमित्तानि दर्शपूर्णमासयोः श्रुतानि । तथा तत्रैव ''स्विष्टकृते यजति'' इति विहितस्विष्टकृद्यागस्य सन्निधौ स्विष्टकृद्यागहविःसंस्कारो विधिवाक्यशेषे ''शेषात् स्विष्टकृते समवद्यति'' इति वाक्ये श्रुतः । तथा आग्नेयोऽष्टाकपालः पुरोडाशो भवति'' इत्यादिनोक्तामवेष्टनामकेष्टिं प्रकृत्य ''एतयाऽन्नाद्यकामं याजयेत्'' इति फलं श्रुतम् ।

ii) तत्र सन्देहः देशकालनिमित्तसंस्कारफलसम्बद्धकर्मपराण्येतानि वाक्यानि सन्निहित-कर्मापेक्षया कर्मान्तरविधिपराणि उत सन्निहिते कर्मणि देशादिसम्बन्धमात्र-विधिपराणीति ।

Pūrvapakṣa : Pūrvapakṣin argues that with reference to देश काल etc., कर्म cannot be enjoined. दर्शपूर्णमास with is already enjoined cannot be enjoined again. Therefore these statements enjoin देशादिसम्बद्धकर्मान्तरs.

तत्र देशकालदेरनुपादेयत्वेन तदुद्देशेन कर्मण एव उपादेयतया विधेयतापत्तेः, यदाग्नेयादिवाक्ये विहितस्य दर्शस्य पुनर्विधानायोगाद्देशादिसम्बद्धकर्मान्तरविधिपराण्येतानि वाक्यानि इति प्राप्ते ।

Siddhānta : Siddhāntin points out that though देश etc. cannot be enjoined, दर्शपूर्णमास that is already enjoined is available for enjoining देश, काल etc. Hence, envisaging separate कर्मs is not necessary.

देशादेरनुपादेयत्वेनाविधेयत्वेपि प्रकृतसन्निहितप्रत्यभिज्ञया कर्मैक्यप्रतीतेः सन्निहिते कर्मणि देशादिसम्बन्धस्य अप्राप्तस्य विधिपराण्येतानि वाक्यानीति सिद्धान्तः ।

आग्नेयद्विरुक्तेः स्तुत्यर्थताधिकरणम् (II-3-14)

At दर्शपूर्णमास by the statement ''यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति,'' आग्नेय याग is enjoined on both पौर्णमासी and अमावास्या. By another statement आग्नेय is enjoined on अमावास्या only. Here the question is raised whether the आग्नेय that is to be performed on अमावास्या only is distinct from the आग्नेय that is to be performed on both days.

दर्शपूर्णमासयोः ''यदाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चाच्युतो भवति' इति कालद्वययुक्तमाग्नेयस्यैकं वाक्यम् । ''यदाग्नेयोऽष्टाकपालोऽमावास्यायां भवति'' इति एककालयुक्तमपरं वाक्यम् । तत्र कालद्वययुक्ताऽग्नेयापेक्षया एककालयुक्तमाग्नेयं कर्मान्तर-मुत तस्यैवानुवाद इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that if the आग्नेय that is to be performed on both days is same as the आग्नेय that is to be performed on अमावास्या only, the statement of the latter becomes superflous. Therefore, it has to be taken as different कर्म. However, since a कर्म that is already enjoined cannot be enjoined again by repeating the first one only on the अमावास्या day again, the development of two कर्मs has to be managed.

पूर्वपक्षस्तु, युक्तं पूर्वत्र कर्मान्तरपरत्वाभावेऽपि देशादिसम्बन्धविध्यर्थतया वाक्यसार्थक्य सम्भवेन प्रकृतकर्मानुवादत्वम् । इह तु कालद्वययुक्तवाक्योक्ताऽग्नेयस्य एककालयुक्तवाक्ये अनुवादत्वे वाक्यवैयर्थ्यापातेन कर्मविधेरेवोपेयत्वाद्विहितस्य विधानायोगात् अभ्यासेन समिदादिवत् कर्मान्तरमिति ।

Siddhānta : Siddhāntin points out that since आग्नेय is stated in both the statements, it is the same आग्नेय. Its restatement in the second statement is intended to praise ऐन्द्राग्न.

सिद्धान्तस्तु प्रत्यभिज्ञाबलात् आग्नेयस्यैकत्वे सिद्धे सति एककालवाक्यस्यानुवाद-कत्वोपपत्तेः न चानुवादो व्यर्थः ।

द्वितीयाध्याये चतुर्थः पादः

यावज्जीविकाग्निहोत्राधिकरणम् (II-4-1)

At दर्शपूर्णमास the statement दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत enjoins काम्यप्रयोग. There is another statement "यावज्जीवं दर्शपूर्णमासाभ्यां यजेत." Here the question is raised whether for the very काम्यकर्म the auxiliary of performing it for the whole life is enjoined or for the very दर्शपूर्णमास just as फल is enjoined by स्वर्गकामवाक्य, जीवननिमित्त is enjoined by यावज्जीवन वाक्या.

तत्र सन्देहः । किं काम्यस्यैव कर्मणः यावज्जीवनकालमभ्यासः विधीयते । अथ यावज्जीवनवाक्येन जीवने निमित्ते पुरुषार्थतया विधीयत इति ।

Pūrvapakṣa : Pūrvapakṣin argues that by the statement यावज्जीवं दर्शपूर्णमासाभ्यां यजेत, the auxiliary of repeating the performance for the whole life is enjoined. This is because this statement occurs in the context of काम्यदर्शपूर्णमास.

पूर्वपक्षस्तु काम्यस्यैव कर्मणो यावज्जीवनकालमभ्यासरूपगुणविधिरेवायाम् । काम्य-दर्शपूर्णमासप्रकरणादिति ।

Siddhānta : Siddhāntin points out that if यावज्जीवन काल अभ्यास is enjoined, then the expression यावज्जीवन has to be understood in the sense of यावज्जीवनकाल by लक्षणा and the word यजति has to be understood in the sense of repeating याग by लक्षणा. It is not proper to take these words in the secondary meaning when the primary meaning is possible. Hence the very दर्शपूर्णमास is enjoined here for the whole life.

सिद्धान्तस्तु यावज्जीवनशब्दस्य जीवनवाचिनः काले, यजतिशब्दस्याऽवृत्ति-लक्षणाभ्यासरूपगुणे च लक्षणापत्तेः, मुख्यार्थे सम्भवति प्रकरणमात्रेण मुख्यार्थत्यागा-योगात्, जीवने निमित्ते पुरुषस्य प्रत्यवायवपरिहाराय दर्शपूर्णमासप्रयोगो विधीयत इति'' ।

सर्वशाखाप्रत्ययैकताधिकरणम् (II-4-2)

अग्निहोत्र etc. कर्मs are stated in the texts of several शाखाs such as काठक, कालापक and काण्व etc. Here the question is raised whether the अग्निहोत्र stated in all these शाखाs is one or distinct in each शाखा ।

काठककालापककाण्वमाध्यन्दिनतैत्तिरीयासु श्रुताग्निहोत्रादिकर्म प्रतिशाखं भिद्यते, अथ सर्वशाखास्वेकमेव कर्मेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that it is distinct in each शाखा because all अभ्यास, नामधेय etc. criteria laid down for distinguishing the कर्म apply to this instance. He gives the details of the application of these criteria.

पूर्वपक्षस्तु प्रतिशाखं भिद्यत इति । कुत:? i) काठकमग्निहोत्रं कालापकमग्निहोत्रं इत्यादिनामभेदात्, ii) ''ऐन्द्रग्नमेकादशकपालं'' इति क्वचिच्छाखायां, क्वचिच्च ''ऐन्द्राग्नं द्वादशकपालं'' इत्युक्त्या द्रव्यात्मकगुणपर्यायरूपभेदात्, iii) अश्वमेधवाक्यान्यधीयानैरश्वघासो दीयते नान्यैरित्यश्वघासदानादानरूपधर्मभेदात्, iv) एकत्र शाखायामाम्नातस्य कर्मणो अन्यत्राप्या-म्नानेनाभ्यासपर्यायात् पुन: श्रवणात्, v) उदितानुदितहोमनिन्दाश्रवणात्, vi) सर्वशाखोक्ताङ्गोपसंहारस्याशक्यत्वात्, vii) एकेऽन्यत्र चयनसमाप्तिमन्येऽन्यत्रेति समाप्तिवचनभेदात्, viii) उदितानुदित-होमयो: पृथक् प्रायश्चित्तविधानात्, ix) 'उपहव्योऽनिरुक्तोऽग्निष्टोमो यज्ञ: रथन्तरसामा' इत्येकस्यां शाखायां ''उपहव्योऽनिरुक्तो उक्थ्यो यज्ञो बृहत्सामा'' इत्यस्यां शाखायां श्रुतमिति रथन्तरबृहत्सामरूपान्यार्थवचनात्, x) शाखान्तररूपप्रकरणान्तराच्चेति सूत्रोक्तैर्हेतुभि: ।

नहि कर्मैकत्वपक्षे अविशेषपुन: श्रवणरूपाभ्यास: नामधेयादिभेद: शाखान्तराख्य-प्रकरणान्तरं वा द्वादशकपालत्वैकादशकपालत्वादिगुणभेदो वा युक्त इति ।

Siddhānta : Siddhāntin points out that the अभ्यास, नामधेय etc. criteria are not meant for distinguishing कर्मs. These are primarily intended to enjoin each कर्म separately. The same अग्निहोत्र enjoined for the followers of one शाखा in the respective text is enjoined for the followers of other शाखाs in their respective texts, because, different people study different शाखाs. Hence, अग्निहोत्र though repeated in several शाखाs is not a distinct कर्म in each शाखा.

सिद्धान्तस्तु अभ्यासलक्षणपुनरुक्त्यादिहेतुभिर्हि कर्मणो विधानमात्रं सिद्ध्यति, न पुनस्तद्भेदोऽपि । तद्भेदस्तु एकस्यां शाखयां विहितस्य पुन: शाखान्तरे विधाना-न्यथानुपपत्त्या हि कल्प्य: । तच्च पुनर्विधानं पुरुषान्तरं प्रत्युपपन्नं सन्न कर्मभेदकम् । यथैक-शाखागतमग्निहोत्रादिवाक्यमेकस्य पुरुषस्य विहितमेवान्यस्यापि विधत्ते न कर्मान्तरमेव-मत्राप्यध्येतृभेदात्तान् प्रति सर्वाण्येव वाक्यान्येकमेव कर्म विदधति, न कर्मान्तरमिति ।

The Second Chapter Ends.

तृतीयोऽध्याये प्रथमः पादः

प्रतिपदाधिकरणे प्रथमं वर्णकम् (III-1-1)

In the earlier chapter कर्मभेद is presented. In this अध्याय शेषशेषिभाव i.e. अङ्गाङ्गिभाव will be explained by utilising the six criteria– श्रुति, लिङ्ग etc.

पूर्वाध्याये कर्मणां भेदो निरूपितः । अत्र त्वध्याये तेषां शेषशेषिभावः श्रुतिलिङ्ग-वाक्यप्रकरणस्थानसमाख्यारूपैः षड्भिः प्रमाणैर्निरूप्यते ।

Here a doubt arises, whether the presentation of शेषलक्षण be undertaken or not. शेषलक्षणं आरभ्यं न वेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the syntactical connection between क्रिया and कारक is well known. But there is no connection between शेष and शेषि different from that. Hence, there is no need of undertaking शेषलक्षण.

लोके क्रियाकारकान्वयस्य व्युत्पन्नतया तदतिरिक्तशेषशेषिभावान्वयस्य अत्यन्तं अप्रसिद्धत्वेन तद्व्युत्पादनायोगात् न आरभ्यं शेषलक्षणं इति प्राप्ते ।

Siddhānta : Siddhāntin points out that in the case of the syntactical relation between क्रिया and कारक the relation of प्रधान and गुण is not explicit. However the intention of शेषशेषिभाव is to convey गुण and प्रधान relation. Hence, the presentation of शेषलक्षण has to be undertaken.

'गामानय' इत्यादिक्रियाकारकान्वये द्वयोः पदार्थयोः प्राधान्ये गुणत्वे वा, अन्योन्यान्वयानर्हतया गुणप्रधानभावेनैव अन्वयस्य वाच्यतया क्रियाकारकान्वये गुणप्रधान-शब्दितशेषशेषिभावरूपान्वयस्य अन्तर्भावेण अप्रसिद्धत्वाभावेन व्युत्पादनार्हत्वात् आरम्भणीयं शेषलक्षणं इति सिद्धान्तः ।

प्रतिपदाधिकरणे द्वितीयं वर्णकम् (III-1-1)

Some say that the above पूर्वपक्ष is quite ordinary. Therefore no such पूर्वपक्ष is to be proposed for this अधिकरण. But in this सूत्र it is only intended to state that, what is शेष, why it is शेष, what are the प्रमाणs to show the connection between शेष and शेषिन् to help the readers.

अपरे तु पूर्वपक्षस्य अतिमन्दतया नात्र पूर्वपक्षादिकं युक्तम् । किन्तु श्रोतृमनः-समाधानाय कः शेषः? केन हेतुना शेषः? शेषस्य शेषिणा सह अन्वयबोधने कानि श्रुत्यादीनि प्रमाणानि? इत्यादिवक्ष्यमाणार्थ- प्रदर्शनमात्रपरमिदं सूत्रमित्याहुः ।

Bhātta Saṅgraha explains the nature of श्रुति, लिङ्ग etc. in detail.

1) श्रुतिः – अनपेक्षः शब्दः श्रुतिः — A Vedic expression that conveys its meaning without depending upon लिङ्ग etc. other प्रमाणs. This श्रुति is of three types. i) विधात्री i.e., injenctive ii) अभिधात्री i.e., mention of the names इन्द्र etc. iii) विनियोक्त्री i.e., indicating the शेषशेषी i.e., अङ्ग–अङ्गी relation.

श्रुतिः शब्दोऽनपेक्षः । सा त्रिधा । तथा हि, लिङ्गादिश्रुतिः विधात्री । इन्द्रादिश्रुतिः अभिधात्री । विनियोक्त्र्यपि एकप्रत्ययरूपा एकपदरूपा विभक्तिरूपा चेति त्रिधा ।

For विभक्तिरूपा श्रुति Bhātta Saṅgraha gives examples for all case suffixes – from द्वितीया to सप्तमी.

2) लिङ्गम् – सामर्थ्यं लिङ्गम्, तद्द्विविधम् । शब्दगतमर्थप्रकाशरूपमर्थगतश्चेति i.e. the capacity of a vedic word or its meaning to convey the अङ्ग – अङ्गिभाव relation is लिङ्ग. The example for the first is बर्हिर्देवसदनं दामि, for the second अथातो धर्मजिज्ञासा.

तत्र आद्यं यथा 'बर्हिर्देवसदनं दामि' इत्यादिमन्त्रस्य लवनप्रकाशनसामर्थ्यरूपलिङ्गात् लवनशेषता तदर्थशास्त्रात् (१-३-३१) द्वितीयं तु, अथातो धर्मजिज्ञासा इत्यत्र

स्वाध्यायोऽध्येतव्यः, इत्युक्ताध्ययनस्य अर्थज्ञानजननशक्तिरूपेण अर्थसामर्थ्येन अर्थज्ञाने विनियोगो दर्शितः ।

वाक्यम् – पदसङ्घातो वाक्यम् । तद्विविधम् । मन्त्रवाक्यं ब्राह्मणवाक्यं चेति । Bhātta Saṅgraha gives examples for both these.

प्रकरणम् – इतिकर्तव्यताकांक्षा प्रकरणम् । तद्विविधम् । महाप्रकरणम् अवान्तर-प्रकरणश्चेति ।

Examples : अङ्गत्व of प्रयाज for दर्शपूर्णमास is the example for महाप्रकरण.

अङ्गत्व of अभिक्रमण for प्रयाज is the example for अवान्तरप्रकरण.

तत्र आद्येन प्रयाजादेर्दर्शपूर्णमासादिशेषता । अत्रैव तृतीयपादे असंयुक्तं प्रकरणादिति-कर्तव्यतार्थित्वात् (३-३-११)

द्वितीयेन ''अभिक्रामम् जुहोति'' इत्यादि वाक्यविहिताभिक्रमणादेः प्रयाजादिशेषता ''कर्तृगुणे तु कर्मसमन्वयात्'' इति एतत्पादीयनवमाधिकरणे दर्शिता । (३-१-१९)

स्थानम्– तुल्यप्रदेशत्वं स्थानं i.e., Common place is स्थानम्. This is of two types– i) पाठसादेश्यम् i.e., Common place in the text ii) अनुष्ठानसादेश्यम् i.e., Common place at the performance. The first category namely पाठसादेश्य is again of two types i) यथासंख्याम्नान i.e., stated in the serial order, ii) सन्निध्याम्नान i.e., stated close by. Bhātta Saṅgraha gives examples for these.

समाख्या– i.e., etimological name. It is of two types i) लौकिकी e.g. आध्वर्यवम्, ii) वैदिकी होतृचमसः ।

समाख्या यौगिकी संज्ञा । सा द्विविधा । लौकिकी वैदिकी चेति । तत्र अवघातादिपदार्थे आध्वर्यवादिसंज्ञा लौकिकी । होतृचमसादिसमाख्या वैदिकी । तया होतृचमसादेः चमसभक्षणशेषता ।

शेषलक्षणाधिकरणम् (III-1-2)

In the statement व्रीहिभिः यजेत, व्रीहि etc. are the शेष for याग because these do not serve their own purpose but serve the purpose of some other.

'व्रीहिभिर्यजेत' इत्यादौ व्रीह्यादिकं यागं प्रति शेषः कुतः । परार्थत्वात् ।

Here a doubt arises whether the nature of शेषत्व i.e. अङ्गत्व, could be explained or not.

शेषत्वं निरूपणार्हम् उत नेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin gives a number of explanations of शेषत्व such as शेषत्व is अविनाभूतत्व etc. and states that none of them is suitable. Hence the nature of शेषत्व cannot be explained at all.

किं तच्छेषत्वं? अविनाभूतत्वं वा, प्रयुक्तत्वं वा, अधिकतया विहितत्वं वा, विध्यन्त-भागेविहितत्वं वा, उपकारकत्वं वा ।

Siddhānta : Siddhāntin points out that अविनाभूतत्व etc. stated by Pūrvapakṣin may not be suitable explanations of शेषत्व. However we explain it as पारार्थ्य i.e., परोद्देशेन प्रवृत्तत्व, i.e., serving the purpose of some other. This explanation is free from the drawbacks stated by pūrvapakṣin.

सिद्धान्तस्तु अविनाभूतत्वादेः दुष्टत्वेऽपि परोद्देशेन प्रवृत्तत्वरूपपारार्थ्याख्यस्य शेषत्वस्य निर्दुष्टत्वेन परार्थः शेष इति निरूपणार्हमेव शेषत्वमिति ।

शेषलक्ष्याधिकरणम् (III-1-3)

In the context of sacrifices, द्रव्य, गुण, संस्कार are stated. दर्शपूर्णमास etc. कर्म, कर्मफल, पुरुष are also stated. Here a doubt arises whether द्रव्य, गुण, संस्कार –these three only are शेष i.e. अङ्ग, or कर्म, फल and पुरुषs are also अङ्ग ।

सन्ति क्रतुषु व्रीह्यादिद्रव्याणि, आरुण्यादयो गुणाः, अवघातादिसंस्काराः । तथा दर्शपूर्णमासादिकर्माणि, तत्फलानि स्वर्गादीनि, तत्कामाश्च पुरुषाः । तत्र सन्देहः किं द्रव्यगुणसंस्कारेष्वेव शेषत्वमुत कर्मफलपुरुषेष्वपि इति ।

Pūrpakṣa : शेषत्व means उपकारकत्व i.e. assisting. This is possible only in the case of द्रव्य, गुण and संस्कारs, as these lead to observable effects. कर्म etc. do not assist any. It cannot assist the result since it is perishable and does not remain until the result is achieved. फल and पुरुष are प्रधान for कर्म. Therefore these cannot be शेष. Hence only द्रव्य, गुण and संस्कार can be the शेष i.e. अङ्ग. This is the opinion of बादरि.

पूर्वपक्षस्तु उपकारकत्वमेव शेषत्वम् । तच्च दृष्टार्थानां द्रव्यगुणसंस्काराणामेव युक्तम् । द्रव्यस्य क्रियानिर्वर्तकत्वात् । गुणस्य क्रियासाधनपरिच्छेदकत्वात् । संस्कारस्य तद्योग्यतापादकत्वात् । कर्मादेस्तूपकारकत्वं दुरुपपादम् । 'यागेन स्वर्गम्' इति फलं प्रत्युपकारकत्वबोधकतृतीयादेरश्रवणात् । आशुतरविनाशिनः कर्मणः फलोपकारकत्वायोगाच्च । फलपुरुषयोश्च कर्म प्रति प्राधान्यान्न शेषत्वम् । अतो द्रव्यादिष्वेव तदिति बादरिराचार्य आहेति ।

Siddhānta : Siddhāntin points out that उपकारकत्व is not शेषत्व but it is पारार्थ्य. Such पारार्थ्य is found in याग etc. कर्मs also. The पारार्थ्य is conveyed by the injunction itself. कर्म is the शेष for फल, फल is शेष for पुरुष and पुरुष is the शेष for कर्म. Therefore just as द्रव्य, गुण and संस्कारs are शेषs, कर्म, फल and पुरुषs are also शेषs.

सिद्धान्तस्तु पारार्थ्यमेव शेषत्वम् । नोपकारकत्वम् । पूर्वाधिकरणोक्तदोषदुष्टत्वात् । तच्च पारार्थ्यं यागादिष्वपि अस्तीति कर्मादेरप्यस्ति शेषत्वम् । पारार्थ्यस्य विधिगम्यताया वक्ष्यमाणत्वात् । तथा च कर्मणः फलशेषत्वं, फलस्य काम्यतया पुरुषशेषत्वं, पुरुषस्य तु कर्तृतया कर्मशेषत्वमिति द्रव्यादिष्विव कर्मादिष्वपि शेषत्वं जैमिन्याचार्यो मन्यते ।

निर्वापादीनां व्यवस्थितविषयताधिकरणम् (III-1-4)

At दर्शपूर्णमास, व्रीहिधर्मs आज्यधर्मs, सान्नाय धर्मs are stated. Here the doubt arises whether these धर्मs should be effected for their respective items in respective order or they can be effected without any order in respect of the items stated.

दर्शपूर्णमासयोर्हि व्रीहिधर्मा अवघातप्रोक्षणादयः, आज्यधर्मा उत्पवनावेक्षणादयः, सान्नायधर्मा दोहनादयः । तत्र संदेहः किमेते धर्मा अव्यवस्थया सर्वत्र कार्या उत यथासंयोगं यागव्यवस्थया इति ।

Pūrvapakṣa : Pūrvapakṣin argues that अवघात, उत्पवन etc. धर्मs are meant to generate फलापूर्व. These are not meant for व्रीह्यादिवस्तुस्वरूप. The फलापूर्व is one. Hence these धर्मs can be effected for all items without any order.

पूर्वपक्षस्तु अवघातोत्पवनादिधर्माणां फलापूर्वप्रयुक्तत्वेन व्रीह्यादिवस्तुस्वरूपप्रयुक्तत्वाभावात् फलापूर्वस्य चैक्यत्वात् तदर्थाः धर्माः सर्वे सर्वत्र साङ्कर्येणानुष्ठातव्या इति ।

Siddhānta : Siddhāntin points out that though फलापूर्व is one, there are अवान्तरापूर्वs. The अपूर्व generated by respective items is the ground for giving effect to the respective धर्मs. Hence the धर्मs have to be given effect to the respective items in order to achieve respective अपूर्वs.

सिद्धान्तस्तु फलापूर्वस्यैकत्वेऽप्याग्नेयाग्नीषोमीयादियागजन्यावान्तरापूर्वाण्यपि द्वितीयाद्य पादे अपूर्वनये प्रतिपादितानि । तेषु पुरोडाशद्रव्यकयागजन्यापूर्वं व्रीहिधर्माणां प्रयोजकम् । एवं आज्यधर्माणां सान्नायधर्माणां च तत्तद्रव्यकयागजन्यावान्तरापूर्वाण्येव प्रयोजकानि । प्रत्यासन्नत्वात् । न तु फलापूर्वम् । तस्य व्यवहितत्वात् । तथा च प्रयोजकावान्तरापूर्वाणां व्यवस्थिततया तत्प्रयुक्ता धर्मा अपि व्यवस्थिताः ।

स्फ्यादीनां संयोगानुसारेण व्यवस्थितताधिकरणम् (III-1-5)

At दर्शपूर्णमास स्फ्य, कपाल, अग्निहोत्रहवणी etc. ten instruments of sacrifice are stated. Then स्फ्येन उद्धन्ति, कपालेषु श्रपयति etc. the role to be played by these instruments are stated. Here the doubt arises, whether स्फ्य etc. should be utilised for उद्धनन etc. specifically stated for them or whatever items they have the capacity to deal with for all these items they could be utilised without any specification. स्फ्य is a wooden instrument of the form of a sword. अग्निहोत्रहवणी is a wooden vessel. शम्या is a wooden piece of the form of a शूल.

दर्शपूर्णमासयोः श्रूयते स्फ्यश्च, कपालानि च, अग्निहोत्रहवणी च, शूर्पञ्च, कृष्णाजिनञ्च, शम्या चोखूलञ्च, मुसलञ्च, दृषच्चोपला चैतनि वै दश यज्ञायुधानि'' इति । तथा ''स्फ्येनोद्धन्ति, कपालेषु श्रपयति, अग्निहोत्रहवण्या हर्वीषि निर्वपति, शूर्पेण विविनक्ति, कृष्णाजिनमधस्तादुलूखलस्यावस्तृणाति, शम्यायां दृषदमुपदधाति, उलूखलमुसलाभ्यामवहन्ति, दृषदुपलाभ्यां पिनष्टि'' इति । स्फ्यशब्देन खड्गाकारकाष्ठमुच्यते अग्निहोत्रहवणी नाम निर्वापसाधनकाष्ठपात्रम् । शम्या तु शूलाकारं काष्ठम् । तत्र सन्देहः स्फ्यादिषु येन येन यद्यदस्मिन् प्रकरणे कर्तुं शक्यते तेन तेन तत्सर्वं कार्यमुत यथाश्रुतमुद्धननाद्येवेति ।

Pūrvapakṣa : Pūrvapakṣin argues that the word आयुध means that it is a साधन. The स्फ्य etc. cannot be directly यज्ञसाधन. Their साधनत्व has to be managed by यज्ञाङ्गनिष्पादकत्व. There is no special ground to specially utilise them for a certain special item. Therefore they have to be utilised for all items stated in the context depending upon their capacity. The mention of them in respect of a particular item is only एकदेशानुवाद ।

आयुधपदस्य साधनवाचितया यज्ञायुधशब्देन उक्तयज्ञसाधनत्वस्य साक्षाद्यज्ञेऽसम्भवेन तदङ्गनिष्पादकत्वेनैव निर्वाह्यत्वादविशेषाद्यथासामर्थ्यं सर्वाङ्गेषु विनियोगः । ''स्फ्येनोद्धन्ति'' इति एकैकक्रियासम्बन्धोक्तिस्तु एकदेशानुवादशब्दितावयुत्यानुवाद इति ।

Siddhānta : Siddhāntin points out that if स्फ्य etc. are utilised without any order, then the statements that state specific role will be purposeless. To consider these statements as अनुवाद does not serve any purpose. Hence these have to be utilised in respect of the items with reference to which these are stated.

सिद्धान्तस्तु यथासामर्थ्यमव्यवस्थया अनेकत्र स्फ्यादीनां विनियोगे ''स्फ्येनोद्धन्ति'' इत्यादिविशेषसंयोगबोधकबहुवाक्यानां वैयर्थ्यापत्तेः, अनुवादे फलाभावात् । एतानि वाक्यानि विधायकान्येव । यथासंयोगं स्फ्यादेः व्यवस्थया विनियोगः ।

आरुण्यादिगुणानामसङ्कीर्णताधिकरणम् (III-1-6)

At ज्योतिष्टोम the statement अरुणया पिंगाक्ष्या is found. In this statement the word अरुणा conveys a quality. Whether this has to be applied to all द्रव्यs offered at the sacrifice, or it is to be applied to एकहायनी only.

ज्योतिष्टोमे 'अरुणया पिंगाक्ष्या एकहायन्या सोमं क्रीणाति' इति श्रुतम् । अरुणा-शब्दोऽत्राकृत्यधिकरणन्यायेन गुणमात्रवाची । तत्र स किं वाक्यात् पृथक्कृतः प्रकरणेन क्रत्वङ्गसर्वद्रव्येषु निविशते, उत क्रीणातिना सम्बध्य तदङ्गः सन् एकहायन्यां निविशत इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the word अरुणया is an instrumental case suffix which conveys that it is a करण, however, आरुण्यगुण is अमूर्त. Hence it cannot be क्रयसाधन. Consequently it cannot be syntactically connected with क्रीणाति. Therefore it has to be separated from the sentence and be taken as a qualification of all करणद्रव्यs stated in ज्योतिष्टोम context. This can be managed in another way also. The quality अरुण itself is taken as द्रव्य by लक्षणा. In any case it cannot be connected with क्रीणाति.

आरुण्यगुणस्य तृतीयाश्रुत्या करणकारकत्वेन अवगतस्य अमूर्तत्वेन क्रीयसाधनत्वायोगेन क्रिणातिना अन्वयासम्भवात् । तस्माद्वाक्यात् पृथग्भूतप्रातिपदिकार्थोऽरुणिमा तृतीयया प्राकरणिकानेककरणद्रव्याणि अनूद्य तत्परिच्छेदकतया विधीयते ''यानि ज्योतिष्टोमसाधनद्रव्याणि तानि सर्वाणि अरुणानि कर्तव्यानि'' इति । यद्वा अरुणाप्रातिपादिकमेव लक्षणया प्राकरणिकद्रव्यपरं सत् तृतीयायुक्तत्वेन करणतया तान्यनूद्य तत्र गुणविधिपरं सेत्स्यतीति ।

Siddānta : Siddhāntin points out that though आरुण्य cannot be directly क्रियासाधन as it is अमूर्त it can be क्रियासाधन through a द्रव्य connected with it as a quality. Therefore it need not be separated from the sentence nor लक्षणा be adopted. In the very statement एकहायनी द्रव्य is mentioned. Hence through एकहायनी it can be connected with क्रीणाति. Hence it need not be connected with other द्रव्यs mentioned in the context.

सिद्धान्तस्तु तृतीयाश्रुत्या 'क्रीणाति' इत्युक्तक्रयं प्रति अवगतकरणभावस्याऽरुण्यगुणस्य अमूर्तत्वेन साक्षात्क्रियासाधनत्वायोगेऽपि द्रव्यपरिच्छेदमुखेन तत् सम्भवति । ''आरुण्यगुणपरिच्छिन्नेन द्रव्येण क्रयं कुर्यात्'' इत्येवं गुणस्य क्रयैकवाक्यत्वे सम्भवति वाक्यभेदस्य लक्षणाश्रयणस्य वा अयोगात् । एवं च गुणस्य क्रयार्थत्वे सिद्धे अस्य तदीयैकहायनीद्रव्ये निवेशः । न वासःप्रभृतिद्रव्ये निवेशः । तेषां क्रयान्तरसाधनत्वादिति ।

ग्रहसंमार्जनाधिकरणम् (III-1-7)

At ज्योतिष्टोम the statement दशापवित्रेण ग्रहं संमार्ष्टि is found. दशापवित्र means a piece of woollen cloth or a piece of cloth in general. In this statement the word ग्रहं is in singular number. Here the doubt arises whether the एकत्व conveyed by it is to be taken into account or not.

ज्योतिष्टोमे श्रूयते ''दशापवित्रेण ग्रहं संमार्ष्टि'' इति । दशापवित्रं नाम कम्बळखण्डमित्येके वासः खण्डमित्यपरे । तत्र ग्रहमित्यत्रैकवचनोक्तमेकत्वं विवक्षितं न वेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that just as in the case of पशुना यजेत, एकत्व is taken into account here also एकत्व has to be taken into account. This means that only one यज्ञपात्र of ग्रह type has to be wiped but not all ग्रहs.

''पशुना यजेत'' इत्यत्र उपादेयगतपश्वेकत्वस्य उद्देशागतग्रहैकत्वस्यापि विवक्षितत्वादेकस्यैव संमार्गशब्दितं शोधनं न सर्वग्रहाणामिति प्राप्तम् ।

Siddhānta : Siddhāntin points out that the word ग्रहम् is in accusative case suffix. This means that it is प्रधान for the गुण i.e. संमार्ग. As per the guidelines, a गुण has to be repeated for every प्रधान. Hence संमार्ग ie., wiping of all ग्रहs has to be made. Since the number of ग्रहs is already known there is no need to particulary know the एकत्वसंख्या. Hence it is not to be taken into account. In the case of पशुना यजेत, there is a need to know as to how many पशुs are to be offered. Hence in that case the number has to be taken into account. This distinguishes the two cases.

द्वितीयाश्रुत्या ग्रहस्य संमार्गं प्रति प्राधान्यावगमेन ''प्रतिप्रधानं गुणस्य आवृत्तिः'' इति न्यायेन ''यावन्तो ग्रहाः सोमे तावत्सु संमार्गः'' इति निश्चये सति ग्रहे इयत्तापरिच्छेदकस्य अनाकांक्षितत्वात् तत्परिच्छेदक–एकत्वसंख्या न विवक्षिता । विवक्षापक्षे च ''ग्रहं संमृज्यात् स चैकः इति वाक्यभेदापत्तेः । पशोस्तु यागं प्रति गुणत्वादस्ति तत्र ''कियता पशुना'' इति परिच्छेदकाकांक्षेति वैषम्यादेकत्वस्य तत्र विवक्षायामपि नात्र तथेति ''सर्वग्रहेषु संमार्गः'' इति सिद्धान्तः ।

चमसादौ संमार्गाप्रयोगाधिकरणम् (III-1-8)

In this अधिकरण the question whether in the statement ग्रहं संमार्ष्टि just as एकत्व of the word ग्रहम् is not to be taken into account, the ग्रहत्व also not to be taken into account or not is discussed.

ग्रहं संमार्ष्टि'' इत्यत्र एकत्ववत् ग्रहत्वमपि अविवक्षितमुत न इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that संमार्ग is meant to felicitate the offering of सोम. This means that संमार्ग of सोम प्रात्रs has to be made. चमस type of vessels are also सोमपात्र. Therefore without taking into account the ग्रहत्व, संमार्ग has to be made for चमसs also. Further संमार्ग of the ग्रहs has to lead to सोमापूर्व. ग्रहत्व has no role in it. सोमापूर्वीयत्व is common to चमसs also. Therefore without taking into account ग्रहत्व, संमार्ग has to be made for चमसs also.

संमार्ष्टि इत्यनेन सोमावसेकनिर्हरणप्रयोजनकतया ''सोमपात्राणां संमार्गः'' इत्यवगमे, पुनः कस्य? इत्याकांक्षानुदयात् चमसानामपि सोमपात्रत्वात् एकत्ववत् ग्रहत्वमपि अविवक्षितमेव । किञ्च ग्रहेषु संमार्गः सोमपूर्वीयत्वप्रयुक्तः, न ग्रहत्वप्रयुक्तः । तच्च चमसेष्वपि अविशिष्टमिति ग्रहत्वाविवक्षया चमसेष्वपि स्यादिति प्राप्तम् ।

Siddhānta : Siddhāntin points out that the word ग्रह conveys ग्रह type of vessel only. Therefore not taking into account ग्रहत्व is not proper. Though सोमयागीयप्रधानापूर्व is one, the संमार्ग of each ग्रह has its own अवान्तर अपूर्व. Hence समार्ग of any other vessel such as चमस is not warranted by the statement ग्रहं संमार्ष्टि.

ग्रहश्रुत्यवगतग्रहत्वस्याविवक्षा न युक्ता । यागस्यैकत्वेन प्रधानापूर्वस्य एकत्वेऽपि अनेकधा अभ्यस्यमानस्यैव फलहेतुतया प्रत्यभ्यासमवान्तरापूर्वभेदात् तत्तदपूर्वीयत्वप्रयुक्तः संमार्गो व्रीहिष्वेवावघातवत् ग्रहेष्वेव प्राप्त इति, न चमसेषु कार्य इति ।

सप्तदशारत्नितायाः पशुधर्मताधिकरणम् (III-1-9)

At वाजपेय it is stated that सप्तदशारत्निः वाजपेयस्य यूपो भवति. Here the doubt arises whether सप्तदशारत्नित्व is an auxiliary of वाजपेय or that of पशु of वाजपेय through यूप.

वाजपेये ''सप्तदशारत्निः वाजपेयस्य यूपो भवति'' इति श्रुतम् । सप्तदशारत्नित्वं वाजपेयाङ्गम्, उत यूपद्वारा वाजपेयगतपश्वङ्गं इति सन्देहः ।

Pūrvapaksa : Pūrvapaksin argues that सप्तदशारत्नित्व is an auxiliary of वाजपेय याग itself. In support of this he gives three reasons. i) the expression वाजपेय occurs immediately after सप्तदशारत्नि in the statement. ii) वाजपेय is प्रधान कर्म iii) The context is that of वाजपेय. For these reasons सप्तदशारत्नित्व has to be taken as an auxiliary of वाजपेय. It is true that this being a measurement it cannot be directly applied to वाजपेय याग. However through the vessel षोडशी this can be an auxiliary of याग. the षोडशी vessel has to be of the measurement of सप्तदशारत्नि.

तत्र वाजपेयस्य अव्यवधानेन श्रवणात् प्रधानकर्मत्वात् प्रकरणबलाच्च वाजपेयाङ्गं सप्तदशारत्नित्वम् न यूपद्वारा पश्वङ्गम् उक्तहेतुत्रयान्यतमस्याप्यभावात् । सप्तदशारत्नित्वस्य साक्षात्कर्मण्ययोगेऽपि तदङ्गषोडशिनामकग्रहरूपपात्रद्वारा कर्माङ्गं भविष्यति । यूपशब्दश्च ऊर्ध्वत्वसारूप्याद् ग्रहपरः स्यात् ।

Siddhānta : Siddhānta points out that the expressions सप्तदशारत्नि and यूप are used in the same case suffix. Hence through वाजपेय, यूप can be taken as an auxiliary of पशु of वाजपेय.

अभिधीयते 'सप्तदशारत्निर्यूपः' इति सामानाधिकरण्याद्वाजपेयशब्दस्य सम्बन्ध-सामान्यवाचिषष्ठ्यन्ततया परम्परासम्बन्धेन ''वाजपेयाङ्गपश्वङ्ग यूपः'' इति लक्षणां विनैव पशुयागपरत्वेन सन्निधानादेरविरोधात् ।

अभिक्रमणादीनां प्रयाजमात्राङ्गताधिकारणम् (III-1-10)

At दर्शपूर्णमास, in the context of प्रयाज, the statement 'अभिक्रामं जुहोति' is found. अभिक्राम means moving around आहवनीय fire. Here the doubt arises whether this should be performed by a person who performs प्रयाज or a person who performs all rituals connected with दर्शपूर्णमास.

दर्शपूर्णमासौ प्रकृत्य प्रयाजसमीपे श्रूयते 'अभिक्रामं जुहोत्यभिजित्यै' इति । तत्र अभिक्राममिति आहवनीयस्य अभितः सञ्चरणं किं प्रयाजकर्त्रान्वेति उत कृत्स्नप्रकरणिककर्त्रेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that it is not proper to ignore the main sacrifice. अभिक्रमण is not कारक. It is a क्रिया. प्रयाज is also क्रिया. One क्रिया cannot be connected with another क्रिया. Hence it has to be separated from प्रयाज and be connected with the entire दर्शपूर्णमास. Consequently it gets connected with the performer of the entire दर्शपूर्णमास as a संस्कार.

प्रधानान्वयानादरो न युक्तः । जुहोतिनोक्तप्रयाजक्रियया कारकस्यैवान्वयार्हतया अभिक्रमणरूपक्रियाया अमूर्तरूपायाः कारकत्वाभावेन तदन्वयायोगात्, वाक्यात् पृथक्भूतमभिक्रमणं प्रयाजादिकमिव प्रकरणेन दर्शपूर्णमासाङ्गतया गृहीतं सत् सामर्थ्याद्दर्शपूर्णमासकर्त्रा तत्संस्कारकतया अन्वेतीत्युपपत्तेः ।

Siddhānta : Siddhāntin points out that if अभिक्रमण cannot be connected with प्रयाजक्रिया on the ground that it is a क्रिया, it cannot also be connected with दर्शपूर्णमास as well. If on the ground of प्रकरण it gets connected with दर्शपूर्णमास, on the same ground it can also get connected with प्रयाज. This interpretation is as per शबरभाष्य.

सिद्धान्तस्तु क्रियात्वेन अभिक्रमणस्य जुहोतिना उक्तप्रयाजरूपक्रियान्वये दर्शपूर्णमासरूपप्रधानक्रियान्वयोऽपि न स्यात् । प्रकरणबलेन प्रधानान्वितं सत् तत्कर्तृसंस्कारद्वारा तदुपकारकं चेत् प्रयाजान्वयेऽपि तथा स्यात् । अतस्सन्निधानबलात् प्रयाजकर्त्रैवान्वेतीति । एतच्च यथाभाष्यं वर्णकं ज्ञेयम् ।

दशमे अधिकरणे वार्तिकाभिमतं वर्णकम् (III-1-10)

कुमारिलभट्ट in his वार्तिक presents the पूर्वपक्ष and सिद्धान्त of this अधिकरण in a different way.

वार्तिके तु प्रागुक्तावेव विषयसंशयौ, पूर्वोत्तरपक्षहेतुमात्रभेदः ।

Pūrvapakṣa : Pūrvapakṣin argues that though अभिक्रमण is stated near प्रयाज, दर्शपूर्णमास प्रकरण is stronger. There is no अवान्तरप्रकरण of प्रयाज here. Hence अभिक्रमण has to be performed in all the rituals connected with दर्शपूर्णमास.

सन्निधानादपि दर्शपूर्णमासप्रकरणस्य बलवत्वात्, अवान्तरप्रकरणस्य चाभावात्, महाप्रकरणेन प्राकरणिकेषु दर्शपूर्णमासाङ्गसर्वहोमेषु अभिक्रमणं निविशतीति प्राप्तम् ।

Siddhānta : Siddhāntin points out that अभिक्रमण occurs in the midst of the statements connected with प्रयाज. Therefore there is अवान्तरप्रकरण of प्रयाज. Hence अभिक्रमण is an auxiliary of प्रयाज.

प्रयाजसम्बन्धिवाक्यैः सन्दष्टत्वेन अवान्तरप्रकरणं प्रयाजानामस्तीति कल्पनात् । तेन प्रयाजाङ्गमभिक्रमणमिति सिद्धान्तः ।

उपवीतस्य प्राकरणिकाङ्गताधिकरणम् (III-1-11)

In the context of दर्शपूर्णमास, recitation of सामिधेनी hymns are prescribed. These are called सामिधेनी because these are recited at the time of enkindling the fire. After stating these, निवीत, प्राचीनावीत, उपवीत are prescribed. उपवीत means a garment of cloth used to protect the body from cold, wind, sunlight etc. Here the question is raised whether this उपवीत is an auxiliary of सामिधेनी hymns or that of दर्शपूर्णमास.

दर्शपूर्णमासप्रकरणे काम्यसामिधेनीविकल्पान् विधाय, उपवीतं विधाय, सामधेनीगुणाः श्रूयन्ते । तत्र उपवीतं किं सामिधेनीनामङ्गमुत दर्शपूर्णमासाङ्गमिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that since the उपवीत is stated in the midst of सामिधेनी गुणs it is an auxiliary of सामधेनी

पूर्वत्र उत्तरत्र च सामिधेनीगुणश्रवणेन पूर्वत्रेव सन्दंशेन सामिधेनीनामवान्तरप्रकरण-कल्पनात्तेन सामिधेन्यङ्गमुपवीतमिति ।

Siddhānta : Siddhāntin points out that the context of सामिधेनी is obstructed by the विनियोग of निवित hymns. Hence उपवीत cannot be the auxiliary of सामिधेनी. Hence taking into account the महाप्रकरण of दर्शपूर्णमास it has to be an auxiliary of दर्शपूर्णमास.

निविन्नामकमन्त्रविनियोजकेन सामिधेनीप्रकरणस्य विच्छेदान्न तदङ्गत्वं युक्तम् । तस्मात् पूर्वन्यायाभावान्महाप्रकरणेन दर्शपूर्णमासाङ्गम् ।

गुणानां मिथोऽसम्बन्धाधिकरणम् (III-1-12)

In the context of आधान, wooden vessels made of वारण and वैकङ्कत trees are stated. Here the question arises whether these are the auxiliaries of पवमानेष्टि which itself is an auxiliary of आधान or these are the auxiliaries of the all sacrifices.

आधानप्रकरणे दारुपात्रं होमार्थवत् श्रूयते ''वारणो यज्ञावचरो वैकङ्कतो यज्ञावचरः'' इति । यज्ञोऽवचर्यते अनुष्ठीयते इति यज्ञावचरो यज्ञपात्रम् । वारणवैकङ्कतशब्दौ दारुविशेष-विकारवाचिनौ । तानि किमाधानाङ्गपवमानेष्ट्यङ्गम्, उत सर्वयज्ञाङ्गं इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that वारण etc vessels have to get connected with आधान because it is the context of आधान. However these do not serve any purpose of आधान. There is a general guideline that whenever an auxiliary does not serve the main item it has to be implemented to its auxiliary. In view of this, the auxiliaries वारण etc यज्ञपात्रs get connected to the three हविर्द्रव्यs of पवमानेष्टि.

वारणादिपात्राणि प्रकरणेनाधानेऽन्वितानि सन्ति तत्र प्रयोजनाभावात् ''आनर्थक्या-त्तदङ्गेषु'' इत्युक्तन्यायात् तदङ्गपवमानेष्टिद्रव्यभूतेषु त्रिषु हविःषु निविशन्त इति प्राप्तम् ।

Siddhānta : Siddhāntin points out that just as आधान is enjoined for अग्नि the हविर्द्रव्यs of पवमानेष्टि are also enjoined for अग्नि only. The आधान and पवमानेष्टि do not have अङ्गाङ्गिभाव relation since both of them are the अङ्गs of अग्नि. Two अङ्गs cannot be connected with each other. Both these have to be connected with the main only. In view of this वारण etc. vessels are the auxiliaries of all the rituals of दर्शपूर्णमास.

सिद्धान्तस्तु अग्निमुद्दिश्याधानं यथा विहितं तथा पवमानहवींष्यपि । पवमानहविर्होम-विधानादग्निसंस्कारत्वेन विहितानां पवमानेष्टीनामाधानेन सह नास्त्यङ्गाङ्गिभावः । किन्तु समप्राधान्यमेवेति विनियोजकप्रकरणाभावात् 'यज्ञावचरः' इति वाक्येन दर्शपूर्णमासादि-सर्वयज्ञाङ्गानि पात्राणीति ।

वार्त्रघ्न्यधिकरणम् (III-1-13)

At दर्शपूर्णमास two आज्यभागs namely आग्नेय and सौम्य are enjoined. With reference to these two आज्यभागs recitation of two sets of आग्नेयी and सौमी hymns are prescribed. The first and second are called वार्त्रघ्नी third and fourth are called वृधन्वती. Further it is stated that वार्त्रघ्नी. is to be recited at पौर्णमासी. वृधन्वती is to be recited at अमावास्या. Here the question is raised whether these four hymns are the auxiliaries of दर्शपूर्णमास or that of आज्यभाग.

दर्शपूर्णमासयोः "अग्नीषोमाभ्यामाज्यभागौ यजति" इत्याग्नेयः सोम्यश्चाज्यभागौ विहितौ । तयोः क्रमेण अनुवाक्यायुगलद्वयमाम्नातम् । तत्र आद्यद्वितीये वृत्रहशब्दवत्वात् वार्त्रघ्न्यावित्युच्येते । तृतीयचतुर्थे वृधिधातुनिष्पन्नशब्दवत्वात् वृधन्वत्यावित्युच्येते । तत्रान्य-द्वचनं "वार्त्रघ्नी पौर्णमास्यामनूच्येते, वृधन्वती अमावास्याम्" इति । वार्त्रघ्न्यौ वृधन्वत्यौ इत्यर्थः । तत्र किमेतच्चतुष्टयम् दर्शपूर्णमासाङ्गं, उत आज्यभागाङ्गमिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that though these hymns are enjoined as the auxiliaries of आज्यभाग this has to be set aside because

of the expressed statement that वार्त्रघ्नी has to be recited at पौर्णमासी and वृधन्वती has to be recited at अमावास्या and these are to be considered as the auxiliaries of दर्शपूर्णमास but not आज्यभाग.

क्रमपाठेन आज्यभागाङ्गतया विहितानामपि मन्त्राणाम् तदङ्गताबाधेन ''वार्त्रघ्नी पौर्णमास्यां'', ''वृधन्वती अमावास्याम्'' इति वाक्याभ्यां क्रमापेक्षया प्रबलाभ्यां मन्त्राणां दर्शपूर्णमासाङ्गतावगमात् तदङ्गमेव मन्त्राः, नाज्यभागाङ्गम् ।

Siddhānta : Siddhāntin points out that by the expressed statement आग्नेयी hymns may be considered as the auxiliary of दर्शपूर्णमास. But सौमी hymns cannot be considered since सोम is not a देवता at दर्शपूर्णमास. Even at अग्नीषोमीय, सोम alone is not देवता, Hence these hymns cannot be the auxiliaries of दर्शपूर्णमास. The statement referring to पौर्णमासी and अमावास्या is intended to fix the order of these मन्त्रs with reference to आज्यभाग.

सिद्धान्तस्तु वाक्यात् प्रधानाङ्गत्वे सति आग्नेयीयुगलस्य कथञ्चित् तत्राङ्गत्वायोगेऽपि न सौम्यायुगलस्य तद्युक्तम् । सोमस्य तत्रादेवतात्वात् । अग्नीषोमीयेऽप्यग्निसहितस्य देवतात्वेन केवलसोमस्य तदभावात् दर्शे सर्वथा अनन्वयाच्च । तस्मादाज्यभागयोः अव्यवस्थया प्राप्तयोः मन्त्रयुगलयोः व्यवस्थार्थं वाक्यमिति ।

हस्तावनेजनादीनां कृत्स्नप्राकरणिकाङ्गताधिकरणम् (III-1-14)

At दर्शपूर्णमास the statements ''हस्तौ अवनेनिक्ते'' and ''उलपराजिंस्तृणाति'' are found. Here the question is raised whether हस्तावनेजन is an auxiliary of उलपराजि आस्तरण or all the rituals at दर्शपूर्णमास.

दर्शपूर्णमासयोः प्रकरणे श्रूयते ''हस्ताववनेनिक्ते,'' ''उलपराजिंस्तृणाति'' इति । उलपानां तृणविशेषाणां राजिं पङ्क्तिं वेद्यामास्तृणातीत्यर्थः । तस्मादवनेजनमास्तरण-मात्राङ्गमुत करिष्यमाणसर्वकर्माङ्गमिति इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the statement उलपराजिंस्तृणाति occurs immediately after हस्तावववनेनिक्ते. Hence the हस्तावनेजनसंस्कार is an auxiliary of आस्तरण only.

अत्रापि आनन्तर्यलक्षणक्रमप्रमाणेन हस्तावनेजनरूपहस्तसंस्कारस्य अनन्तरश्रुतोपलपराज्यास्तरणमात्राङ्गत्वम् ।

Siddhānta : Siddhāntin points out that अवनेजन is a संस्कार for हस्त. हस्त becomes सर्वकर्मानुष्ठानुयोग्य when it is संस्कृत. In view of this, setting aside आनन्तर्यरूपक्रम it has to be considered as an auxiliary of all rituals of दर्शपूर्णमास.

अवनेजनं हि हस्तसंस्कारः । संस्कृतौ च हस्तौ सर्वकर्मानुष्ठानुयोग्यावित्येतादृशसामर्थ्यरूपलिङ्गेन दर्शपूर्णमासप्रकरणेन च आनन्तर्यरूपक्रमस्य बाधेन करिष्यमाणसर्वकर्माङ्गं हस्तावनेजनम्, नास्तरणमात्राङ्गम् ।

Bhatta Saṅgraha gives one more example for the point made in this अधिकरण.

Pūrvapakṣa : Pūrvapakṣin points out that at ज्योतिष्टोम there are statements such as ''मुष्टीकरोति,'' ''वाचं यच्छति,'' ''दीक्षितं आवेदयति.'' The मुष्टीकरण, वाग्यम stated here have to be considered as auxiliaries of दीक्षितावेदन, because the statement दीक्षितमावेदयति immediately follows.

एवं ज्योतिष्टोमे 'मुष्टीकरोति', 'वाचं यच्छति' 'दीक्षितमावेदयति' इति श्रुतमुष्टीकरण वाग्यमनयोः मनःप्रणिधानार्थयोः ''अदीक्षिष्टायं ब्राह्मणः'' इति देवेभ्यो मनुष्येभ्याश्चावेदन रूपदीक्षितावेदनस्याङ्गत्वमानन्तर्यादिति प्राप्ते ।

Siddhānta : Siddhāntin points out that on the basis of लिङ्ग and प्रकरण these have to be considered as the auxiliaries of all rituals setting aside आनन्तर्य.

लिङ्गप्रकरणाभ्यां सर्वकर्माङ्गता ज्ञेया । तथा च सूत्रम्, आनन्तर्यं–सन्निध्याम्नानं, अचोदना–अङ्गत्वे प्रमाणं न भवतीति ।

चतुर्धाकरणादीनामाग्नेयमात्राङ्गताधिकरणम् (III-1-15)

At दर्शपूर्णमास, आग्नेय, अग्नीषोमीय, ऐन्द्रग्नि पुरोडाशs are stated. It is further stated that the आग्नेयपुरोडाश is divided into four parts. Here the question is raised whether all the three पुरोडाशs are to be divided into four or only the आग्नेयपुरोडाश are to be divided.

दर्शपूर्णमासयोः आग्नेयाग्नीषोमीयैन्द्राग्निपुरोडाशाः श्रुताः । तत्र ''आग्नेयं चतुर्धा करोति'' इति श्रुतं चतुर्धाकरणं किं पुरोडाशत्रयस्यापि, उत आग्नेयस्यैवेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that just as हस्तावनेजन is considered as an auxiliary of all rituals, here also the पुरोडाशs of all the three have to be divided in four parts. There is no special reason to restrict it to आग्नेय only.

यथा हि पूर्वत्र हस्तावनेजनादेरसङ्कोचेन सर्वकर्माङ्गता तथेहापि आग्नेयवदग्निसम्बन्धस्य अग्नीषोमीयैन्द्राग्नयोरपि पुरोडाशयोः सत्वात् तयोरपि चतुर्धाकरणम् । सङ्कोचे हेत्वभावात् इति प्राप्तम् ।

Siddhānta : Siddhāntin points out that the word आग्नेय has तद्धित suffix in the sense of relating to अग्नि deity. Hence आग्नेयपुरोडाश only has to be divided into four.

सिद्धान्तस्तु ''अग्नेर्ढक्'' इति देवतार्थे विहिततद्धितान्तोऽयमाग्नेयशब्दो अग्निसम्बन्ध-मात्रार्थः । अग्निश्च केवलो द्विदैवत्ययोः पुरोडाशयोर्न देवतेति देवतात्वेनाग्निसम्बन्धस्य द्विदैवत्यपुरोडाशयोर्न मुख्यत्वमिति मुख्याग्नेयस्यैव चतुर्धाकरणमिति ।

अथ तृतीयोऽध्याये द्वितीयः पादः

मुख्ये विनियोगाधिकरणम् (III-2-1)

Among the श्रुति, लिङ्ग etc. earlier is the उपजीव्य for the later. This will be explained in the next पाद। श्रुतिविनियोग is already explained in the first पाद. In this पाद, विनियोग by लिङ्ग will be discussed.

श्रुतिलिङ्गादिषु पूर्वपूर्वस्योत्तरोत्तरं प्रत्युपजीव्यत्वस्योत्तरपादे वक्ष्यमाणत्वादुपजीव्य श्रुतिविनियोगस्य पूर्वपादे प्राधान्येन उक्तत्वादिदानीमत्र पादे श्रुत्युपजीवकेन लिङ्गेन विनियोगो निरूप्यते इति पादयोरर्थभेदः पौर्वापर्यञ्च।

In मन्त्राधिकरण it is already stated that the मन्त्र, ''बर्हिर्देवसदनं दामि'' is an auxiliary of the sacrifice, through अर्थप्रकाशन. This मन्त्र is to be employed for लवन i.e., cutting of बर्हि type of grass. Here a question is raised whether this मन्त्र is to be employed taking into account its primary meaning or secondary meaning of गौण type.

''बर्हिर्देवसदनं दामि'' इत्यादिमन्त्रोऽर्थप्रकाशनेनैव क्रत्वङ्गमित्युक्तं मन्त्राधिकरणे। अयञ्च मन्त्रो देवानां सदनं आश्रयभूतं बर्हिः दामि ''दा लवने'' इति धातोः ''लुनामि'' इति बर्हिर्लवनप्रतिपादनसामर्थ्यरूप- लिङ्गेन लवने विनियुज्यते। तत्र किं मन्त्रो मुख्यार्थमेव प्रकाशयन् विनियुज्यते, अथ गौणमप्यर्थमिति सन्देहः।

Pūrvapakṣa : The word बर्हि has to be taken both in its primary meaning namely दर्भ and secondary meaning उलप etc., other kinds of grass, because, both are utilised in the sacrifice. Therefore this hymn has to be employed at the time of cutting both.

बर्हिशब्देन काशकुशादिदर्भरूपमुख्यार्थस्येव वेद्यास्तरणसाधनोलपादितृणविशेषरूप-गौणार्थस्यापि अनुष्ठेयतया स्मरणावश्यम्भावात् मुख्यार्थस्य लवने गौणार्थस्य लवने चोभयत्र विनियोगः। एवं मन्त्रान्तरस्याप्युभयत्र विनियोगः ध्येयः इति पूर्वपक्षः।

Siddhānta : Secondary meaning of the गौण type is adopted when the primary meaning is not suitable. Hence this hymn has to be employed at the time of cutting दर्भ etc. which are conveyed as primary meaning.

मुख्यार्थानुपपत्त्यादिप्रमाणान्तरे सत्येव गौणार्थप्रतीतिः, नान्यथा । मुख्यार्थस्तु शब्दस्वाभाव्यादेव झटिति प्रतीयते इति मुख्यार्थे एव विनियोगः, न गौणे ।

ऐन्द्राः गार्हपत्ये विनियोगाधिकरणम् (III-2-2)

At अग्निचयन, the मन्त्र ''निवेशनः सङ्गमनः वसूनाम्'' etc. is stated to be employed with reference to गार्हपत्य by the statement ऐन्द्या गार्हपत्यमुपतिष्ठते. In some शाखाs the मन्त्र ''कदाचन स्तरीरसि'' is stated for the same purpose. Both these hymns contain a reference to इन्द्र. Here the question is raised whether this ऐन्द्री hymn has to be employed taking into account its primary meaning इन्द्र deity or it should be taken in the गौण sense.

अग्निचयनप्रकरणे ''निवेशनः सङ्गमनो वसूनामैन्द्या गार्हपत्यमुपतिष्ठते'' इति, ''कदाचन स्तरीरसि'' इति वा ऐन्द्री ऋक् किं मुख्यार्थे विनियुज्यते, गौणार्थे वेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that it has to be employed for इन्द्रप्रकाशन only which is the primary meaning, but not secondary meaning of the गौण type. The expression गार्हपत्य should be taken in the secondary sense namely गृहपतेः स्वामी.

पूर्वपक्षस्तु पूर्वाधिकरणन्यायेन मुख्यार्थभूतेन्द्रप्रकाशन एव विनियुज्यते न गौणे । ब्राह्मणगतगार्हपत्यशब्दस्य यागसाधनत्वसाम्यात् गौण्या वृत्त्या ''गृहपतेर्यजमानस्यायं स्वामी'' इत्यर्थे तद्धितान्तत्वेन वा इन्द्रपरत्वसम्भवादिति ।

Siddhānta : Here the expression गार्हपत्य is used in द्वितीयाविभक्ति. This द्वितीया श्रुति conveys that this hymn has to be employed for गार्हपत्य.

To reconcile the ब्राह्मण statement and मन्त्रलिङ्ग, secondary meaning of गौण type has to be taken for one of them namely इन्द्र or गार्हपत्य. It is better to take the word इन्द्र in the secondary sense than the word गार्हपत्य. Because इन्द्रप्रकाशन is indicated by लिङ्ग and employing it to गार्हपत्य is indicated by श्रुति. When there is a conflict between लिङ्ग and श्रुति, श्रुति has to be preferred.

वचनेन गार्हपत्याङ्गत्वस्य स्पष्टत्वाद्वचनबलात् गार्हपत्ये विनियोगः । मन्त्रलिङ्गस्य विनियोजकवचनस्य च अविरोधायावश्यं क्वचिद्गौणार्थत्वे कल्पनीये प्राप्तार्थके मन्त्र एवेन्द्रपदस्य गार्हपत्ये गौणत्वं न्याय्यम् ।

आह्वानविनियोगाधिकरणम् (III-2-3)

At दर्शपूर्णमास, the statement हविष्कृदेहि etc. is found. The wife of the यजमान is called हविष्कृत् as she prepares the हविस्. अध्वर्यु invites her as "हे हविष्कृत् एहि" त्रिवारमवघातं कुर्वन्, making अवघात thrice. Here the question is raised whether this हविष्कृदेहि hymn is an auxiliary of अवघात or आह्वान.

दर्शपूर्णमासयोः श्रूयते "हविष्कृदेहीति त्रिरवघ्नन्नाह्वयति" इति । देवनामर्थे या हविः करोति सा यजमानपत्नी हविष्कृत् उच्यते । "हे हविष्कृत् एहि आगच्छ" इति त्रिवारमवघातं कुर्वन्नध्वर्युः पत्नीमाह्वयतीत्यर्थः । किमयं 'हविष्कृदेहि' इति मन्त्रोऽवघाते विनियुज्यतेऽथाह्वाने । आवहन्तिश्च काललक्षणार्थ इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that अवघात also plays a role of preparing the हविस्. Therefore this मन्त्र has to be employed for अवघात only. The expression आह्वयति should be taken in the sense he recites the word एहि.

वचनात् हविस्साधनरूपहविष्कृद्गुणयोगात् गौणेऽप्यवघातरूपेऽर्थे हविष्कृच्छब्दस्य वृत्तिसम्भवेनावघातेऽयं मन्त्रो विनियुज्यते "हविष्कृदेहि इत्यवघ्नन्" इति । "आह्वयति" इत्यस्य तु "एहिशब्दमुच्चारयति" इत्यर्थ इति प्राप्ते ।

Siddhānta : Siddhāntin points out that if this मन्त्र is enjoined for अवघात, then performing अवघात thrice also has to be enjoined. This will result in वाक्यभेद. That is to say taking one statement as enjoining two भावनाs. Hence the expression अवघ्नन् has to be taken in the sense of अवहननकाल and the expression एहि should be taken in the sense of आह्वान i.e., inviting the wife of यजमान.

अवघातोद्देशेन मन्त्रस्य विधाने त्रिरित्युक्तत्रिवारमभ्यासस्यापि विधेयतया ''अवघ्नन् इति यत् तत् हविष्कृदेहि इति मन्त्रं उच्चारयन्, त्रिरुच्चारयन्निति वाक्यभेदप्रसङ्गात् । अतो अवघ्नन्नित्यस्य काललक्षणया ''अवहननकाले हविष्कृदेहि इति त्रिराह्वयति'' इति हविष्कृदाह्वानरूपमुख्यार्थे एव विनियोगः ।

अग्निविहरणादिप्रकाशकमन्त्रविनियोगाधिकरणम् (III-2-4)

At ज्योतिष्टोम, it is stated that ''उत्तिष्ठन्नाहाग्नीदग्नीन्विहर.'' It is also stated that ''व्रतं कृणुतेति वाचं विसृजति'' Here the question is raised whether the मन्त्र 'अग्नी' etc is enjoined with reference to उत्थान and the hymn वृतं कृणुत etc. is enjoined for वाग्विसर्ग or both these convey the time.

ज्योतिष्टोमे श्रूयते ''उत्तिष्ठन्नाहाग्नीदग्नीन्विहर'' इति । तत्र सन्देहः उत्थानमुद्दिश्य अग्नीदिति मन्त्रोऽङ्गत्वेन विधीयते व्रतं कृणुतेति च मौनत्यागात्मनि वाग्विसर्गे, उतोभयोरपि काललक्षणार्थता ''उत्थानकाले वाग्विसर्जनकाले चेमौ मन्त्रावुच्चारयेत्'' इति ।

Pūrvapakṣa : Pūrvapakṣin argues that since उत्थान and वाग्विसर्ग are expressely stated the hymns are enjoined for these only.

पूर्वपक्षस्तु उत्तिष्ठन्नाह इत्यादिवचनादुत्थानवाग्विसर्गार्थाविमौ मन्त्रौ ।

Siddhānta : Siddhāntin points out that उत्थानकाल and वाग्विसर्जनकाल are stated as the auxiliaries of the respective मन्त्रs.

सिद्धान्तस्तु मन्त्रोद्देशेन उत्थानादिकालोऽङ्गत्वेन विधीयते ''उत्थानकाले वाग्विसर्जनकाले च अग्नीदित्यादिमन्त्रानुचारयेत्'' इति । उत्थानादिप्रकाशनशक्तिविधुरस्योत्थानादौ विनियोगाभावात् ।

सूक्तवाक्यस्य प्रस्तरप्रहरणाङ्गताधिकरणम् (III-2-5)

At दर्शपूर्णमास the statement ''सूक्तवाकेन प्रस्तरं प्रहरति'' is found. प्रस्तर means दर्भमुष्टि, प्रहरति means प्रक्षिपति. Here the question is raised whether प्रस्तरप्रहरण be made at the time of reciting सूक्तवाक or सूक्तवाक is enjoined as an auxiliary of प्रस्तरप्रहरण.

दर्शपूर्णमासयोः ''सूक्तवाकेन प्रस्तरं प्रहरति'' इति श्रुतम् । तत्र सन्देहः । प्रस्तरप्रहरणस्य सूक्तवाकस्य च कालार्थः सम्बन्धः, उत सूक्तवाकः प्रस्तरप्रहरणाङ्गत्वेनोपदिश्यत इति ।

Pūrvapakṣa : Pūrvapakṣin argues that the purpose of सूक्तवाक is served by देवताप्रकाशन, प्रहरण of प्रस्तर serves the purpose of प्रतिपत्तिरूपसंस्कार for प्रस्तर. Hence these need not be considered as अङ्ग and अङ्गी. Therefore the expression सूक्तवाक should be taken in the sense of the time of recitation of सूक्तवाक hymns.

अध्वर्यु should put the प्रस्तर i.e., दर्भमुष्टि, in the fire at the time of reciting the सूक्तवाक hymns.

पूर्वपक्षस्तु सूक्तवाकस्य ''अग्निरिदं हविरजुषत'' इत्यादिना अनुष्ठितदेवताप्रकाशनेन कृतार्थत्वात् । प्रहरणस्य च स्रुग्धारणादिनानाकर्मोपयुक्तप्रस्तरस्य प्रतिपत्तिरूपसंस्कारत्वेन प्रयोजनवत्वादन्योन्यमङ्गाङ्गित्वापेक्षाभावात् पूर्वत्रेव कालार्थः सम्बन्धः । सूक्तवाकशब्दो लक्षणया कालपरः ''सूक्तवाकपाठकाले अध्वर्युः प्रस्तरं प्रहरेत्'' इति ॥

Siddhānta : Siddhāntin states that the instrumental case suffix in the word सूक्तवाकेन clearly indicates that सूक्तवाक is an auxiliary of प्रहरण.

On the basis of this देवतासम्बन्ध has to be envisaged for प्रहरण. Consequently it assumes the form of देवतोद्देशेन द्रव्यत्यागरूपयाग. In view of this it is proper that सूक्तवाक hymns are an auxiliary of प्रहरण.

सिद्धान्तस्तु सूक्तवाकेनेति तृतीयाश्रुत्या तस्य प्रहरणं प्रत्यङ्गत्वावगमात् श्रुतिविनियुक्त मन्त्राङ्गत्वबलादेव तदभिधेयदेवतासम्बन्धस्य प्रहरणेऽपि कल्पनेन देवतोद्देशेन द्रव्यत्याग-रूपतापत्त्या यागरूपत्वादुपपन्नमिष्टदेवताप्रकाशनं कुर्वत एव सूक्तवाकस्य प्रहरणाङ्गत्वमिति ।

सूक्तवाकानामर्थानुसारेण विनियोगाधिकरणम् (III-2-6)

Here the question is raised whether all सूक्तवाक hymns be recited at both पौर्णमासी and अमावास्या or in the respective places as per the प्रकाशनसामर्थ्य of respective hymns.

सूक्तवाकः सर्वोऽपि पौर्णमास्याममावास्यायाञ्च प्रयोक्तव्यः उत यथासामर्थ्यं विभज्य विनियोज्य इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the expression सूक्तवाक refers to all सूक्तवाक hymns. Hence these are to be recited at both पौर्णमासी and अमावास्या.

सूक्तवाकशब्दस्य ''इदं द्यावापृथिवी भद्रमभूत्'' इत्यादिसमस्तानुवाकवाचित्वेन अध्येतॄणां प्रसिद्धेः पर्वद्वये कृत्स्नोऽप्यनुवाक आवर्तनीयः ।

Siddhānta : Siddhāntin points out that though the whole group of hymns are called सूक्तवाक, these make different देवताप्रकाशन. Therefore keeping the purpose of the प्रकाशन of the respective देवताs these hymns have to be classified and employed.

समवेतदेवताप्रकाशनसामर्थ्यरूपलिङ्गेन कृत्स्नविषयसूक्तवाकसमाख्याया बाधेन प्रयोजनवशाद्विभज्य विनियोगः । न हीन्द्राग्न्यादिपदानां पौर्णमास्यां प्रयोजनमस्ति ।

काम्ययाज्यानुवाक्यानां काम्यमात्राङ्गताधिकरणम् (III-2-7)

At काम्येष्टिकाण्ड, काम्येष्टिs are stated and in the काम्ययाज्यानुवाक्याकाण्ड attached to it the मन्त्रs to be recited are given. In this मन्त्रकाण्ड the मन्त्रs are given following the order of the इष्टिs. Here the question is raised whether the मन्त्रs be recited with reference to these dieties both at काम्येष्टि and अकाम्येष्टि or these have to be recited only at काम्येष्टि.

काम्येष्टिकाण्डे हि ''ऐन्द्राग्नमेकादशकपालं निर्वपेत्'' इत्यादयः काम्येष्टय उक्ताः । तथा ''काम्ययाज्यानुवाक्याकाण्डं'' इति समाख्यातं मन्त्रकाण्डमम्नातम् । तत्र मन्त्रकाण्डे ''इन्द्राग्नी रोचना दिवः'' इत्यादयो मन्त्राः ऐन्द्राग्न्यादीष्टिक्रमेणाम्नाताः । तत्र किमिमे मन्त्राः यथासामर्थ्यं सर्वेष्वेतद्देवेषु काम्याकाम्यकर्मसु विनियोज्यन्ते उत एतास्वेव काम्यास्विष्टिषु यथाक्रमं वा इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that these मन्त्रs are to be recited on the basis of their अर्थप्रकाशनसामर्थ्य both at काम्येष्टि and अकाम्येष्टि. The order need not be taken into account.

पूर्वपक्षस्तु लिङ्गस्य श्रुतिवन्निरपेक्षस्यैव विनियोजकत्वाद्यथासामर्थ्यं सर्वत्र विनियोगः । न चैवं क्रमसमाख्याविरोधः । लिङ्गात्तयोर्दुबलत्वात् ।

Siddhānta : Siddhāntin points out that देवतास्वरूपमात्रप्रकाशन is not the ground for कर्माङ्गत्व, but it is the कर्मापूर्वसाधनबोधप्रकाशन that is the ground. That depends upon कर्मसम्बन्धबोधकप्रमाण. In view of this, these have to be recited only at the काम्य.

देवतास्वरूपमात्रप्रकाशनरूपलिङ्गमात्रेण कर्माङ्गत्वं न ज्ञातुं शक्यम् । किन्तु कर्मापूर्वसाधनभूतप्रकाशनेनैव । तच्च कर्मसम्बन्धबोधकप्रमाणे सति । तस्मात् समाख्याबलान्मन्त्रकाण्डकर्मकाण्डयोः सम्बन्धावगतिवशेन मन्त्रकर्मणोरपि सामान्येन सम्बन्धे ज्ञाते विशेषस्तस्मिन् प्रथमे कर्मण्ययं प्रथमो मन्त्रः इति क्रमादवगम्यते ।

आग्नीध्रोपस्थाने प्रकृतानां मन्त्राणां विनियोगाधिकरणम् (III-2-8)

At ज्योतिष्टोम, the statement ''आग्नेय्या आग्नीध्रमुपतिष्ठते'' etc. is found. Here the question is raised whether the आग्नेयी mantra stated in this context be recited or in any other context also.

ज्योतिष्टोमे श्रूयते ''आग्नेय्या आग्नीध्रमुपतिष्ठते, ऐन्द्रा सदः, वैष्णव्या हविर्धानीम्'' इति । तत्र आग्नीध्रनामकमण्टपविशेषस्य अग्नेय्योपस्थानं यया कयाचित् प्रकृतया अप्रकृतया वा, अथ प्रकृतयैवेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the expression आग्नेयी is a general term applied to अग्निदेवता hymns. Hence recitation of आग्नेयीमन्त्र need not be restricted to the आग्नेयीमन्त्र stated in the context. Any other आग्नेयीमन्त्र also may be recited.

पूर्वपक्षस्तु ''अग्निर्देवता यस्या ऋचः सा आग्नेयी'' इत्यवयवशक्त्या सर्वासामग्नि-सम्बन्धिनीनामृचामाग्नेयीपदेनाभिधानात्, 'अग्न आयाहि वीतये' इत्यादिकया प्रकरण-पठितया वा दाशतयीगतया वा यया कयाचिदुपस्थानम् ।

Siddhānta : Siddhāntin points out that if any other मन्त्र is taken as enjoined, then, it will result in two injunctions, i) Enjoining आग्नेयी मन्त्र as an auxiliary of the उपस्थान of आग्नीध्र, ii) Enjoining उपस्थान as ज्योतिष्टोम अपूर्वौपयिकव्यापारसाधन. On the other hand if the आग्नेयीमन्त्र stated in the context is recited enjoining it as an auxiliary of उपस्थान is sufficient.

सिद्धान्तस्तु अप्रकृतमन्त्रविधिपक्षे आग्नेय्यादीनामृचामाग्नीध्राद्युपस्थानशेषत्वं तत्कृतोप-स्थानस्य ज्योतिष्टोमापूर्वौपयिकव्यापारसाधनता चेत्युभयविधानाद् गौरवम् । क्रतुप्रकरण-पठितानां तु क्रत्वपूर्वौपयिकव्यापारसाधनत्वस्य तत्प्रकरणपाठादेव सिद्धेः ।

भक्षमन्त्राणां यथालिङ्गं ग्रहणादौ विनियोगाधिकरणम् (III-2-9)

At ज्योतिष्टोम by the statement ''सदसि सोमं भक्षयन्ति'' सोमरसशेषभक्षण is enjoined. This भक्षण involves four steps, i) ग्रहण - taking it ii) अवेक्षण - looking at it, iii) निगिरण - gulping it and iv)सम्यग्जरण - digesting it. In भक्षानुवाक, भक्षमन्त्रs are stated. Here the question is raised whether the entire भक्षानुवाक is to be recited at all these four stages or the respective मन्त्रs at the respective stages.

ज्योतिष्टोमेषु हुतस्य सोमरसस्य शेषभक्षणे विहितं ''अभिषुत्याऽऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि सोमं भक्षयन्ति'' इति । तस्मिन् भक्षणे ग्रहणावेक्षणनिगिरणसम्यग्जरण-रूपाश्चत्वारो व्यापारा भक्षानुवाकसंज्ञके भक्षणमन्त्रे समाम्नाताः । तत्र किं सर्वोऽपि भक्षानु-वाकः सोमभक्षणे विनियुज्यते उत तद्ग्रहणे, तद्दर्शने, सम्यग्जरणे इति सन्देहः

Pūrvapakṣa : Pūrvapakṣin argues that ग्रहण etc. four stages are not directly enjoined. It is only भक्षण that is enjoined. The different stages of भक्षण are there only as steps of भक्षण. Hence the entire भक्षानुवाक be recited for भक्षण only.

पूर्वपक्षस्तु भक्षणवद्ग्रहणादिकं न साक्षाद्विहितम् । किन्तु भक्षणं ग्रहणादिना विना न सम्भवतीत्यर्थतः प्राप्तम् । अविहिते ग्रहणादौ मन्त्रस्य विनियोगायोगात् कृत्स्नोऽप्यनुवाकः लक्षणया भक्षणप्रकाशनसामर्थ्यकल्पनेन भक्षण एव विनियुज्यते ।

Siddhānta : Siddhāntin points out that though ग्रहण etc. four stages are not directly enjoined these are included in the very injunction of भक्षण. Therefore the respective मन्त्रs be recited at the respective steps.

सिद्धान्तस्तु साक्षाद्विधानाभावेऽपि भक्षविधिनैवार्थात्कर्तव्यतया प्राप्तत्वाद्यथासामर्थ्यं विभज्य विनियोग इति ।

मन्द्राभिभूतिरित्यादेरेकमन्त्रताधिकरणम् (III-2-10)

In the भक्षानुवाकमन्त्र, the portion from मन्द्र to तृप्यतु applies to तृप्ति. The portion of the मन्त्र from वसुमद्गणस्य to भक्षयामि applies to भक्षण. Here the question is raised whether from मन्द्र etc. upto भक्षयामि, the whole मन्त्र has to be applied for भक्षण or the two parts have to be applied to तृप्ति and भक्षण separately.

प्रागुक्ते भक्षानुवाके मन्द्रेत्यादिस्तृप्यत्वित्यन्तो भागस्तृप्तौ विनियुज्यते वसुमद्गणस्येत्यादिर्भक्षयामीत्यन्तोंशो भक्षणे, उत मन्द्रादिर्भक्षयामीत्यन्त एक एव मन्त्रो भक्षणे विनियुज्यते इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that these two portions have to be separately applied, since, these relate to two different items.

पूर्ववद्यथासामर्थ्यं विभज्य विनियोगः ।

Siddhānta : Siddhāntin points out that तृप्ति that arises from भक्षण is not a separate item. Hence it does not require any separate मन्त्र for it. If the mantra is employed for तृप्तिविशिष्टभक्षण, it will generate interest in the भक्षण. In view of this the entire मन्त्र has to be adopted for भक्षण only.

भक्षणानुनिष्पादिन्यास्तृप्तेर्व्यापारान्तरत्वाभावेन स्मृत्यनपेक्षतया स्मारकमन्त्रापेक्षाभावात् प्रकाशनेऽदृष्टार्थतैव स्यात् । तृप्तिविशिष्टभक्षणप्रकाशने तूत्साहजननेन दृष्टार्थता स्यात् । तस्मात् भक्षणे एव विनियोगः इति सिद्धान्तः ।

इन्द्रपीतस्येत्यादिमन्त्राणां विनियोगाधिकरणम् (III-2-11)

At ज्योतिष्टोम, there are offerings for इन्द्र and also other than इन्द्र. In this context there is a प्रातस्सवनीयभक्षणमन्त्र - ''वसुमद्गणस्य सोमदेव'' etc. Here the question is raised whether this मन्त्र is to be applied for the शेषभक्षण of the offering given to इन्द्र only or other dieties also. If it is to

be offered to other dieties whether their names be brought by ऊह or without it.

ज्योतिष्टोमे सन्त्यैन्द्राण्यनैन्द्राण्यनेकदैवत्यानि प्रदानानि । तेषु शेषे भक्षणीये लिङ्ग-समाख्याभ्यां भक्षमन्त्रस्य विनियोगे स्थिते ''वसुमद्गणस्य सोमदेव ते मतिविदः प्रातस्सव-नस्य गायत्रछन्दसः इन्द्रपीतस्य मधुमत उपहूतस्य उपहूतो भक्षयामि'' इति प्रातःसवनीय-भक्षणमन्त्रः किमैन्द्रस्यैव भक्षणे प्रयोज्य उत अन्येषामिति । यदा त्वन्येषां तदा किमूहेन, अथ यथाश्रुत एवेति त्रेधा सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the expression इन्द्रपीतस्य in the मन्त्रशेष conveys that शेषभक्षण of the offering given to इन्द्र is intended here. Therefore this मन्त्र has to be recited at the time of शेषभक्षण relating to इन्द्र only but not the शेषभक्षण of the offering offered to मैत्रावरुण etc. other dieties. The शेषभक्षण relating to other dieties may be done without the recitation of any मन्त्र. There is another way also. In this hymn, in the place of इन्द्रपीतस्य, मित्रावरुणापीतस्य can be substitued by ऊह.

पूर्वपक्षस्तु इन्द्रपीतस्येत्यस्य इन्द्रेण पीतस्य सोमस्य शेषं भक्षयामीत्यर्थः । तथा सति अस्य मन्त्रस्य इन्द्रप्रदानशेषभक्षणे एव समर्थत्वात्तत्रैवायं मन्त्रो विनियुज्यते । न तु मैत्रावरुणादिशेषभक्षणे । अतो अमन्त्रकमेव तद्भक्षणमित्येकः । इन्द्रपीतस्येति पदस्य अन्यत्रासमर्थत्वेऽपि मित्रावरुणापीतस्येत्यादिरूपेणोहे सति तत्सामर्थ्यं सेत्स्यति । कर्मभेद इव शेषभक्षणभेदेऽप्यूहसम्भवात् ।

Siddhānta : The Siddhānta of this अधिकरण will be stated later in the last अधिकरण of this पाद.

अभ्युन्नीतसोमभक्षणाधिकरणम् (III-2-12)

At ज्योतिष्टोम, there are ten चमस vessels. Four of them are to be used by ब्रह्मा, उद्गाता, यजमान and होता. Five relate to मैत्रावरुण, ब्राह्मणाच्छंसि,

पोता, नेष्टा and अग्नीध्र. One relates to अच्छावाक. Here with the four चमसs relating to ब्रह्म etc. offering has to be given to इन्द्र twice. By the five चमसs relating to मैत्रावरुण etc. the offering has to be offered to इन्द्र once. Before भक्षण of the हविस् in these five चमसs, from द्रोणकलश, सोम has to be brought again and putting into very five चमसs the offering has to be made for मित्रावरुण, इन्द्र, मरुत्, पत्नीवत् त्वाष्ट्र and अग्नि. The चमस relating to अच्छावाक has to be brought after शेषभक्षण from all these. In the five चमसs the सोमशेष of इन्द्र and मित्रावरुण etc. is there. In view of this whether ऊह of मित्रावरुणपीतस्य is to be made or adding इन्द्र also इन्द्रमित्रावरुणपीतस्य is to be made.

ज्योतिष्टोमे सन्ति दश चमसाः । बह्मोद्गातृयजमानहोतृसंज्ञकानां मध्यतःकारिणां चत्वारश्चमसाः । मैत्रावरुणब्राह्मणाच्छंसिपोतृनेष्ट्राग्नीध्रसंज्ञकानाम् होतृकशब्दितानां पञ्च । अच्छावाकस्येकः । तत्र मध्यतः कारिणां चतुर्भिश्चमसैः इन्द्रमुद्दिश्य द्विर्होतव्यम् । होतॄणां तु चमसैः पञ्चभिरिन्द्रमेवोद्दिश्य सकृध्दोमं विधायाभक्षितेषु सशेषेष्वेव तेषु द्रोणकलशात्सोमं पुनरानीय मित्रावरुणेन्द्रमरुत्पत्नीवत्त्वाष्ट्राग्न्यादिभ्यो देवतान्तरेभ्यो हुत्वा भक्ष्यते । अच्छावाक-चमसस्तु भक्षोत्तरकालमानेष्यते । तत्र होतृकाणां चमसेष्विन्द्रस्य मित्रावरुणादीनां च शेषोऽस्ति । तस्मिन् भक्ष्यमाणे सन्देहः मित्रावरुणपीतस्येत्वेवोहः कार्यः उत इन्द्रमित्रावरुणपीतस्येति ।

Pūrvapakṣa : Pūrvapakṣin argues that the शेष of इन्द्रपीतसोम is not separately utilised. This is given to मित्रावरुण etc. dieties along with the newly brought सोम from द्रोणकलश. In view of this, इन्द्रपीतसोमशेष is not separately present there. Hence इन्द्र is not related with शेष of the सोम offered to मित्रावरुण etc. Hence ऊह of only मित्रावरुणपीतस्य is to be made but not इन्द्रमित्रावरुणपीतस्य.

पूर्वपक्षस्तु इन्द्रपीतशेषस्याप्युपादाने हि इन्द्रपीतस्य मित्रावरुणपीतस्य सोमस्य शेषं भक्षयामीत्यर्थः स्यात् । न च तत्र इन्द्रपीतसोमस्य शेषोऽस्ति । अभ्युन्नीतस्य पूर्वतनशेषेण

सह मित्रावरुणादिभ्यो दत्तत्वेन तेभ्यो दत्तशेषस्य इन्द्रसम्बन्धाभावात् मित्रावरुण-पीतस्येत्येवोहः कार्यः ।

Siddhānta : Siddhāntin points out that the सोम brought from द्रोणकलश is meant to be offered to मित्रावरुण etc.dieties. Therefore this portion is related to मित्रावरुण etc. dieties. However the इन्द्रs connection with the earlier सोमशेष still continues. Therefore ऊह of इन्द्रमित्रावरुणपीतस्य has to be made.

सिद्धान्तस्तु द्रोणकलशादानयनं करिष्यमाणं मित्रावरुणादियागार्थमिति बुद्ध्या आनीयमानस्यैव मित्रावरुणादिदेवतासम्बन्धावगमेन पूर्वशेषस्य इन्द्रदेवतासम्बन्धानपायात् इन्द्रमित्रावरुणपीतस्येत्येवोहः कार्य इति ।

पात्नीवतशेषभक्षणे इन्द्रादीनामनुपलक्षणाधिकरणम् (III-2-13)

At ज्योतिष्टोम there are vessels that are connected with two dieties - इन्द्र and वायु. The हविश्शेष from the vessels are put into आग्रयणस्थाली. There is already सोम in आग्रयणस्थाली at the time of भक्षण of the शेष of सोम offered to पत्नीवत् diety, whether the ऊह of इन्द्रवायुपत्नीवत्पीतस्य is to be made or only पत्नीवत्पीतस्य is sufficient.

सन्ति ज्योतिष्टोमे ऐन्द्रवायवादयो द्विदैवत्या ग्रहाः । तेषां हुतशेषीभूताः सम्पाता आदित्यस्थालीमागत्य ततोऽप्याग्रयणस्थाल्यां प्रक्षिप्यन्ते । तस्यामाग्रयणः सोमोऽस्ति । तत्र श्रूयते ''उपांशु पात्रेणाग्रयणात् पात्नीवते गृह्णाति'' इति । तस्मिन् पात्नीवते देवतायै हुतशेषे भक्षणीये सन्देहः किं इन्द्रवायुपत्नीवत्पीतस्येत्यूहः कार्यः उत पत्नीवत्पीतस्येत्येवेति ।

Pūrvapakṣa : Pūrvapakṣin argues that the हविश्शेष in आग्रयणस्थाली relates to पत्नीवत् diety. But the सोमशेष of the two dieties brought to the vessel continues to have relation with these two dieties. Hence ऊह of इन्द्रवायुपत्नीवत्पीतस्य has to be made.

आग्रयणमात्रस्यैव पात्नीवतत्वेनान्यस्य तत्संसृष्टस्य द्विदैवत्यशेषस्यापात्नीवतत्वेन पूर्वदेवतासम्बन्धानापायात् इन्द्रवायुपत्नीवत्पीतस्येत्यूहः कार्य इति प्राप्तम् ।

Siddhānta : Siddhāntin points out that from the statement पात्नीवतमाग्रयणात् in the ablative suffix it is clear that the सोम already present in आग्रयणस्थाली and the सोम mixed with it both belong to पत्नीवत् diety only. Therefore the ऊह of पत्नीवत्पीतस्य is sufficient.

सिद्धान्तस्तु ''पात्नीवतमाग्रयणात्'' इति आग्रयणस्यापादानतया निर्देशेन आग्रयणांशवत् अनाग्रयणमपि तत्संसृष्टं द्विदैवत्यं ततोऽपेतं पात्नीवतमेवेति पूर्वदेवतासम्बन्धापायात् पत्नीवत्पीतस्येत्येवोहः कार्य इति ।

पात्नीवतशेषभक्षणे त्वष्टुरनुपलक्षणीयताधिकरणम् (III-2-14)

In the above अधिकरण, it is concluded that ऊह of पत्नीवत्पीतस्य has to be made. Here the question is raised along with the diety पत्नीवत्, त्वष्टृपीतस्य has to be taken by way of उपलक्षण or not.

भक्षमन्त्रे हि पत्नीवत्पीतस्येत्यूहः कार्य इत्युक्तम् । तत्र पत्नीवत् पीतस्येति त्वष्टाऽप्युपलक्षणीयः, उत न इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that in पात्नीवतहविर्होमाङ्गमन्त्र the name of त्वष्टा occurs.The सोमपान of त्वष्टा is also stated. Therefore पत्नीवत् त्वष्टृपीतस्य has to be taken by ऊह by way of उपलक्षण.

पात्नीवतहविर्होमाङ्गमन्त्रेण पात्नीवत इवत्वष्टुरपि पानावगमाद्देवतायाः पानाभावेन त्वष्टुः पानलिङ्गेन देवतात्वावगमात् पत्नीवत्त्वष्टृपीतस्येत्युपलक्षणीयस्त्वष्टापीत्याह सूत्रकारः ।

Siddhānta : Siddhāntin points out that the expression सह does not give the status of देवता to त्वष्टा. For eg: in the statement 'सहैव दशभिः पुत्रैः भारं वहति गर्दभी,' it is stated that the Donkey carries the load together

with her ten sons. Here it is only the Donkey that is connected with the word "Carries" but not her ten sons.

सोमपेनाग्निना त्वष्टुः सहभावश्रवणेऽप्यग्नेरिव पातृत्वं न निश्चेतुं शक्यते । "सहैव दशभिः पुत्रैः भारं वहति गर्दभी" इत्यादौ पुत्राणां वोढृत्वादृष्टेः । येन देवतात्वं त्वष्टुरपि पत्नीवत इव विज्ञायेत ।

पात्नीवतशेषभक्षे त्रयस्त्रिंशतामनुपलक्षणाधिकरणम् (III-2-15)

At पात्नीवतहोम in याज्यामन्त्र thirty three dieties are mentioned along with पत्नीवत्. Here the question is raised whether in the मन्त्र concerned, thirty three dieties are also to be taken into account or not.

पात्नीवतस्य होमे याज्यामन्त्रः श्रूयते "ऐभिरग्ने सरथं याह्यर्वाङ् नानारथं वा विभवो ह्यश्वाः । पत्नीवतस्त्रिंशतं त्रींश्च देवाननुष्वधमावह मादयस्व" इति । तत्र सन्देहः शेषे भक्षयितव्ये भक्षमन्त्रे पत्नीवदग्निस्त्रयस्त्रिंशत्पीतस्येति त्रयस्त्रिंशद्देवा अप्युपलक्ष्या उत नेति ।

Pūrvapakṣa : Pūrvapakṣin argues that in this hymn the expression मादयस्व indicates that the thirty three dieties also have सोमपान. Therefore they also have to be taken into account by way of उपलक्षण.

इह मादयस्वेति तेषां माद्यत्वश्रवणेन सोमरसपातृत्वप्रतीत्या देवतात्वावगमात् तेऽप्युपलक्ष्या इति ।

Siddhānta : Siddhāntin points out that the द्रव्य offered to अग्नि by यजमान cannot be for the delight of others. Hence पत्नीवान् ie., अग्नि, is only देवता here.

सिद्धान्तस्तु अग्नेर्यजमानद्रव्येण अन्यमादयितृत्वायोगात् आत्मने दत्तेनैव द्रव्येण देवतान्तरमादयितृत्वस्य वाच्यत्वात् यजमानोद्दिष्टस्यैव देवतात्वादग्नेरेव देवतात्वं नान्येषामिति । पात्नीवतमिति वाक्ये पत्नीवानग्निर्देवतास्येत्येव विग्रहो न पत्नीवन्तस्त्रयस्त्रिंशतोऽपि देवा देवता अस्येत्यापि । तथा च तत्र तच्छेषाभावाद्भक्षमन्त्रे तेऽपि नोपलक्ष्या इति ।

भक्षणे अनुवषट्कारदेवतायाः अनुपलक्षणताधिकरणम् (III-2-16)

A ritual named अनुवषट्कार which is a प्रतिपत्तियाग is stated. This is enjoined after सोमग्रहणयाग with the required मन्त्र. This is later taken in विकृति by अतिदेश. while reciting it in the विकृति at the time of सोमशेषभक्षण, the question is raised whether in the भक्षमन्त्र अनुवषट्कारदेवता ie., अग्नि, be taken into account by उपलक्षण or not.

अनुवषट्काराख्यः सोमशेषद्रव्यकप्रतिपत्तियागः । स च विकृतावतिदेशतः प्राप्तोऽनुष्ठीयते । तत्र विकृतौ सोमशेषे भक्षणीये सति भक्षमन्त्रे मन्त्रवर्णप्राप्तानुवषट्कारदेवताऽग्निरुपलक्षणीयः उत नेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that in the मन्त्र, अग्नि is cleary stated as अनुवषट्कारदेवता. Hence, he has to be taken into account by उपलक्षण.

मन्त्रवर्णोक्ताग्नेरनुवषट्कारदेवतात्वाविवादात्सोऽप्युपलक्षणीयः ।

Siddhānta : Siddhāntin points out that in the प्रकृतियाग though अग्नि is stated he is not taken in भक्षमन्त्र by उपलक्षण. इन्द्र who is प्रधानयागदेवता is taken by way of उपलक्षण. Hence in the विकृति also प्रधानयागदेवता only has to be taken by उपलक्षण but not अनुवषट्कारदेवता-अग्नि.

प्रकृतावसावग्निर्विद्यमानोऽपि भक्षमन्त्रे नोपलक्षितः । प्रधानयागदेवतैवेन्द्र उपलक्षित इति विकृतावपि प्रधानयागदेवतैवोपलक्ष्या न गुणकर्मभूतानुवषट्कारदेवताऽग्निरपि इति सिद्धान्तः ।

अनैन्द्राणाममन्त्रकभक्षणाधिकरणम् (III-2-17)

In the earlier five अधिकरणs प्रकृति विकृति भाव of सोमपात्रs was taken for granted. On this basis in the मन्त्रs not related with इन्द्र, ऊह was discussed. Now the position is taken, the शेषभक्षण relating to other than इन्द्र could be managed without any मन्त्र.

एवं सोमपात्राणां प्रकृतिविकृतिभावमुपेत्य अनैन्द्रेषूहेन समन्त्रकं भक्षणमित्युक्तेऽर्थे कस्योहः? कस्य न ? इति पञ्चभिर्नयैर्विचार्य अतः परमनैन्द्रशेषभक्षणममन्त्रकमेवेति पक्षं स्थापयितुं ऊहेन समन्त्रकं भक्षणमिति प्रागुक्तद्वितीयपूर्वपक्षस्य उत्तरमुच्यते । यत्त्वनैन्द्राणामूहेन समन्त्रकं भक्षणमिति तन्न युक्तम् । सोमपात्राणां प्रकृतिविकृतिभावे सत्येवं स्यात् । न चैवम् ।

सोम is कर्माङ्ग but not of any particular प्रधान. This सोम is offered in all प्रधानs. All प्रधानs are समप्रधानs. Hence, there is no प्रकृतिविकृतिभाव. Consequently शेषभक्षण is without any मन्त्र.

सोमेन यजेत इत्युत्पत्तौ श्रुतः सोमः कर्माङ्गम् । न प्रदानविशेषस्य । स एव च सोमः सर्वप्रदानेष्वभ्यस्यत इति सर्वाण्यपि प्रदानानि समप्रधानानीति ।

इन्द्राग्निशेषभक्षणस्य अमन्त्रकताधिकरणम् (III-2-18)

At ज्योतिष्टोम there is ऐन्द्राग्नसोम. Here a question is raised ऐन्द्राग्नशेषभक्षण be made with the recitation of मन्त्र or without any मन्त्र.

''ऐन्द्राग्नं गृह्णाति'' इत्यस्ति ज्योतिष्टोमे ऐन्द्राग्नस्सोमः । तत्र शेषे भक्षणीये सन्देहः ऐन्द्राग्नशेषभक्षणं समन्त्रकमुतामन्त्रकमिति ।

Pūrvapakṣa : Pūrvapakṣin argues that the सोम offered to इन्द्र and अग्नि is naturally offered to इन्द्र also. Therefore ऐन्द्राग्निशेषभक्षण has to be made with the recitation of hymn.

पूर्वपक्षस्तु इन्द्राग्निभ्यां पीतः सोम इन्द्रेणापि पीतः इति इन्द्रपदरूपलिङ्गबलात् समन्त्रकमैन्द्राग्नशेषभक्षणम् ।

Siddhānta : Siddhāntin points out that the word पान should be taken in the sense of दान by लक्षणा. Consequently the implication will be इन्द्राय दत्तसोमस्य. However यजमान has not offered सोम here only for इन्द्र,

but it is offered both for इन्द्र and अग्नि. Hence दान is for two dieties, while मन्त्र mentions only इन्द्र. Therefore ऐन्द्राग्नभक्षण has to be made without any मन्त्र.

सिद्धान्तस्तु, नवमे वक्ष्यमाणदेवताधिकरणन्यायेनाशरीरस्येन्द्रस्य पानायोगात् पीतपदेन दानलक्षणायां इन्द्रपीतस्य इति मन्त्रस्य इन्द्राय दत्तसोमस्य इत्यर्थः स्यात् । न चात्र यजमान इन्द्रमुद्दिश्य दत्तवान् । किन्तु इन्द्राग्नी उद्दिश्य । तस्माद्दानं मिश्रविषयं, मन्त्रस्तु न मिश्रविषय इत्यमन्त्रकमैन्द्राग्नभक्षणमिति ।

गायत्रछन्दसः इत्यादि मन्त्रविनियोगाधिकरणम् (III-2-19)

The भक्षमन्त्र is in गायत्री meter. Hence only the मन्त्र that is in गायत्री meter is to be recited for सोम or मन्त्रs of other meters also.

भक्षमन्त्र एव गायत्रछन्दस इन्द्रपीतस्येति श्रूयते । तत्र गायत्रमेव छन्दो यस्य' इति विग्रहे गायत्र्याद्येकछन्दस्क एव सोमे गायत्रछन्दस इति मन्त्रः प्रयोज्यः, उत छन्दोन्तर-युतेऽपीति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that just as the मन्त्र, इन्द्रपीतस्य etc. is employed for इन्द्र only, not for other dieties, similarly गायत्री meter should not be employed for the सोम for which there are मन्त्रs of other meters.

पूर्वपक्षस्तु इन्द्रपीतस्येति मन्त्रः केवले एवैन्द्रे प्रयोज्यो न देवतान्तरयुक्ते इति पूर्वोक्तनीत्या गायत्र्यादिछन्दोपि न छन्दोन्तरयुते सोमे प्रयोज्यः । किन्तु केवलतद्युक्त एवेति ।

Siddhānta : Siddhāntin points out that एकछन्दस्कसोम is never employed at सवन. Hence the मन्त्रs of different meters such as त्रिष्टुप् etc. be employed for सोम.

सिद्धान्तस्तु एकछन्दस्कसोमस्य क्वचिदपि सवने अभावात् एवकारं विना गायत्रं छन्दो यस्येति बहुव्रीहेश्छन्दोन्तरयुतेपि समानत्वान्नानाछन्दस्केऽपि सोमे गायत्रछन्दसस्त्रिष्टुप्छन्दस इत्यादिरूपेणैव प्रयोज्यो मन्त्र इति ।

एकादशाधिकरणोपसंहाराधिकरणम् (III-2-20)

In earlier अधिकरणs setting aside ऊह it is concluded that in the case of the dieties other than इन्द्र, without any मन्त्र, भक्षण has to be observed. This is only a tentative conclusion. If we take the expression इन्द्रपीतस्य as तत्पुरुष compound, then, this मन्त्र will not be able to be employed with reference to the dieties other than इन्द्र at the time of शेषभक्षण. However if it is taken as बहुव्रीहि, मन्त्र can be recited for शेषभक्षण with reference to the dieties other than इन्द्र also.

ऊहनिरासेनानैन्द्रेष्वमन्त्रकं भक्षणमित्यवान्तरसिद्धान्तः कृतः । अधुनाऽत्र परमसिद्धान्त उच्यते । इन्द्रपीतस्येत्यत्र तत्पुरुषत्वे ह्यनैन्द्रेष्वस्य मन्त्रस्यासामर्थ्यादमन्त्रकमनैन्द्रशेषभक्षणं स्यात् । न चैवम् । बहुव्रीहित्वात् । तथा च इन्द्रेण पीतस्य सवनस्य सम्बन्धिनं सोमं भक्षयामि इत्यर्थसम्पत्तेरनैन्द्राणामपीन्द्रपीतसवनसम्बन्धितया यथाश्रुतमन्त्रस्यानैन्द्रशेषभक्षणेऽपि सामर्थ्यसत्वात् यथाम्नातमन्त्रयुक्तमेवानैन्द्रशेषभक्षणमिति ।

तृतीयाध्याये तृतीयः पादः

उच्चैस्त्वादीनां वेदधर्मताधिकरणम् (III-3-1)

In the earlier पाद, विनियोग by लिङ्गप्रमाण is discussed. In this पाद, विनियोग by वाक्य, प्रकरण etc. other प्रमाणs will be discussed.

पूर्वपादे लिङ्गेन विनियोगश्चिन्तितः । अत्र पादे लिङ्गोपजीविना वाक्येन तदुपजीविप्रकरणादिना च विनियोगश्चिन्त्यत इति पादसङ्गतिः ।

At ज्योतिष्टोम it is stated that प्रजापति desired to undertake creation.

He performed penance. As a result of that penance, three dieties, अग्नि, वायु and आदित्य arose. From these three dieties, ऋग्वेद, यजुर्वेद and सामवेद arose. This occurs at उपक्रम i.e. commencement. At उपसंहार the statement उच्चैः ऋचा क्रियते, उच्चैः साम्ना, उपांशु यजुषा is found.

Here the question is raised. Since in उपसंहार, ऋक् etc. particular hymns are mentioned and at उपक्रम entire ऋग्वेद consisting of मन्त्र and ब्राह्मण is stated, which of them has to be taken as intended here and the other be adjusted to it.

ज्योतिष्टोमे हि ''प्रजापतिरकामयत प्रजाः सृजेयेति । स तपोऽतप्यत । तस्मात्तेपानात्त्रयो देवा असृज्यन्त, अग्निर्वायुरादित्यः । ते तपोऽतप्यन्त । तेभ्यस्तेपानेभ्यस्त्रयो वेदा असृज्यन्त । अग्नेर्ऋग्वेदो वायोः यजुर्वेद आदित्यात्सामवेदः इत्युपक्रम्य श्रूयते, ''उच्चैर्ऋचा क्रियते, उच्चैस्साम्ना, उपांशु यजुषा'' इति ।

तत्र 'उच्चैः ऋचा'' इत्यादिवाक्ये सन्देहः । किमुपसंहारगतऋगादिशब्दः उपक्रमस्थमन्त्रब्राह्मणसमुदायरूपवेदपदानुसाराद्दृगादिवेदपरः, उतैकैकमन्त्रवाचकोपसंहारस्थ ऋगादिपदानुसारेणोपक्रमस्य वेदशब्द एकैक ऋगादिमन्त्रपर इति ।

Pūrvapakṣa : Pūrvapakṣin argues that उपक्रम and उपसंहार should always be in agreement. Hence the expression वेद that occurs in उपक्रम should be interpreted as the hymns of the वेद but not the entire वेद. Consequently उच्चैस्त्व etc. have to be taken as the attributes of ऋक् etc. hymns.

तत्रोपक्रमोपसंहारयोरेकवाक्यत्वायैकविषयकत्वेऽवश्यम्भाविनि प्रथमश्रुतस्यार्थवादस्याप्रधानत्वात्, भूतार्थत्वेनानुवादत्वात्, विध्युदेशस्य प्रधानत्वादप्राप्तार्थत्वात् तदनुरोधेनोपक्रमार्थवादगतो वेदशब्दो लक्षणया वेदैकदेशमन्त्रपरो नेतव्य इति, उच्चैस्त्वादयो धर्मा ऋगादिमन्त्रधर्माः । ऋगादिमन्त्रेण ऋग्वेदपठितेन यजुर्वेदपठितेन वा यदनुष्ठीयते तदुच्चैरिति, यजुर्मन्त्रेण यदनुष्ठीयते तदुपांशु इति ।

Siddhānta : Siddhāntin points out that at उपक्रम the reference to the entire वेद is found by the expression वेद. As it occurs earlier it does not face any conflict. But the reference to the individual hymns occurs at उपसंहार later. Since it conflicts with the earlier statement, it cannot convey its meaning as it is. It has to be adjusted with the statement in उपक्रम.

सिद्धान्त्यते, विध्युद्देशस्य प्रधानत्वाप्राप्तविषयत्वयोः सत्वेऽपीहोपक्रमे वेदपदश्रवणेन संजातविरोधितया स्वार्थानिर्णायकत्वात्, उपक्रमस्य चासंजातविरोधितया स्वार्थनिर्णायकत्वेन लब्धात्मकत्वात्तदनुरोधेनोपसंहारस्य ऋगादिशब्दोऽप्यात्मलाभार्थं तदविरोधाय ऋगादिवेदपरः, न वेदैकदेशमन्त्रपर इति ।

आधाने गानस्योपांशुताधिकरणम् (भाष्यकारीयं वर्णकम्) (III-3-2)

It is found that in one वेद, प्रधानधर्म is enjoined and in another वेद, अङ्गs are enjoined. For eg. अग्नि आधान is enjoined in यजुर्वेद while its अङ्गs namely वारवन्तीयादिसाम are enjoined at सामवेद. Here, the question is raised whether वारवन्तीय etc. be recited with सामवेद accents or with यजुर्वेद accent.

पूर्वत्र सामान्यतः उच्चैस्त्वादेर्वेदधर्मत्वे सिद्धे, अत्र विशेषचिन्तनात्सङ्गतिः । एकत्र वेदे प्रधानं विधीयते, अन्यस्मिन् अङ्गानि । यथा यजुर्वेदे "वसन्ते ब्राह्मणो अग्नीनादधीत" इत्याधानं विहितम् । तदङ्गानि तु वारवन्तीयादिसामानि सामवेदे "य एवं विद्वान् वारवन्तीयं गायति, य एवं विद्वान् यज्ञायज्ञीयं गायति, य एवं विद्वान् वामदेव्यं गायति" इति । तत्र वारवन्तीयादेः सामवैदिकस्वरः उत याजुर्वैदिकः इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the accent based on प्रधानविधि requires प्रधानवाक्यैकवाक्यता. Hence, it is slow. While accent based on सामवेद does not depend upon any other. Therefore, that has to be employed.

प्रधानविधिनिबन्धनस्वरस्य प्रधानवाक्यैकवाक्यतापेक्षित्वेन विलम्बितत्वात् सामवेद-निबन्धन एव स्वरोऽन्यानपेक्षितया शीघ्रं प्रतीयत इति स एव कार्य इति प्राप्ते ।

Siddhānta : Siddhāntin points out that when there is a conflict between प्रधानधर्म and अङ्गधर्म, adopting प्रधानधर्म is proper. The अङ्गs are enjoined by the injunction that enjoins प्रधान. Hence, it is proper to adopt प्रधानस्वर.

सिद्धान्तितम् "अङ्गप्रधानधर्मविरोधे प्रधानधर्मानुग्रहस्यैव न्याय्यत्वात् प्रधानविधिनैवाङ्गानां विहितत्त्वेन तदविरोधाय प्रधानस्वरः एवोपांशुत्वमङ्गानां न सामवेदस्वर उच्चैस्त्वमिति ।

वार्तिककारीयं वर्णकम् (III-3-2)

Kumārila Bhatta thinks that the way in which भाष्यकार explains the theme of this अधिकरण is superflous as this theme is covered under the सूत्र अङ्गगुणविरोधे च तादर्थ्यात् later. वार्तिककार puts the question to be raised in this अधिकरण as when मन्त्र is stated in one वेद and विनियोग is stated in another वेद, the accent to be given for that मन्त्र is to be as per the वेद in which it occurs or as per the वेद in which its विनियोग is stated.

एतद्भाष्यकारीयमधिकरणशरीरं अङ्गगुणविरोधे च तादर्थ्यात् इति द्वादशाध्याय-द्वितीयाधिकरणेन गतार्थम् । वार्तिककारोऽन्यथोक्तवान् । यस्य मन्त्रस्य वेदान्तरे पाठो वेदान्तरे विनियोगविधिः, यथा वारयन्तीयादेः सामवेदे पाठो यजुर्वेदे विनियोगस्तत्र सन्देहः यत्र पाठस्तद्वेदनिमित्तकस्वरोऽथ विनियोगवेदनिबन्धन इति ।

Pūrvapakṣa : Pūrvapakṣin argues that a मन्त्र takes its form in the वेद in which it is stated. Then its विनियोग is made. Therefore it should be recited in the accent in which the मन्त्र occurs but not the accent of the वेद in which its विनियोग is stated.

पूर्वपक्षस्तु यत्र वेदे मन्त्रस्य आम्नानं तत्रैव प्रथमावगतिशब्दिता मन्त्रस्योत्पत्तिः । उत्पन्नस्य हि विनियोग इति यत्रोत्पत्तिस्तद्वेदस्वर एव प्रथमभावित्वाद्युक्तो न विनियोजकवेदस्वरः । विलम्बितत्वात् इति प्राप्ते ।

Siddhānta : Siddhāntin points out that mere occurence of मन्त्र does not indicate its प्रयोज्यत्व. The accent has to be based on its प्रयोज्यत्व. This प्रयोज्यत्व depends upon विनियोग. Hence, the accent of that वेद in which विनियोग occurs has to be adopted.

उत्पत्तिविधिप्राधान्येनोत्पत्तिवेदनिमित्तकस्वरस्य प्रथमोपस्थितत्वेऽप्युत्पत्तिमात्रेण प्रयोज्यत्वासिद्धेः प्रयोज्यतयाऽवधारितस्यैव स्वरापेक्षित्वात्तदवधारणस्य विनियोगाधीनत्वाद्विनियोगो यत्र तद्वेदस्वर एवोपांशुत्वं युक्तमिति सिद्धान्तः ।

ज्योतिष्टोमस्य यजुर्वेदिकताधिकरणम् (III-3-3)

Both in यजुर्वेद and सामवेद, the injunction ज्योतिष्टोमेन स्वर्गकामो यजेत occurs. Here the question is raised whether it has to be taken as enjoined in both or in यजुर्वेद only. In सामवेद it is only quoted to enjoin the auxiliaries.

''ज्योतिष्टोमेन स्वर्गकमो यजते'' इति यजुर्वेदे सामवेदे च श्रूयते । तत्र सन्देहः । किमुभयत्र विधिः उत यजुर्वेद एव विधिः । सामवेदे तु गुणविध्यर्थमनुवादः इति ।

Pūrvapakṣa : Pūrvapakṣin argues that if it has to be taken as enjoined in one of them, there is no specific ground to fix which is that one.

एकत्रैवेत्यत्र नियामकाभावात् उभयत्र विधिरिति प्राप्ते ।

Siddhānta : Siddhāntin points out that in यजुर्वेद, सोमरूपद्रव्य is mentioned. इन्द्र and वायु are mentioned as देवताs. Since, द्रव्य and देवता constitute कर्मस्वरूप, it has taken shape in यजुर्वेद. Hence, it is enjoined in यजुर्वेद only. In सामवेद it is only quoted to enjoin स्तोत्र etc. auxiliaries.

सोमेन यजेत इति सोमद्रव्यस्य ''ऐन्द्रवायवं गृह्णाति'' इति इन्द्रादिदेवतायाश्च यजुर्वेदे श्रवणेन इतरव्यावृत्तकर्मस्वरूपस्य तत्रावगतिसम्भवेन तत्रैव निराकाङ्क्षतया तत्रैव विधिपर्यवसानम् । सामवेदे तु स्तोत्रादिगुणविधानार्थं अनुवाद इति सिद्धान्तः ।

प्रकरणस्य विनियोजकताधिकरणम् (III-3-4)

In this अधिकरण, विनियोग by प्रकरण is discussed. At दर्शपूर्णमास, समिधो यजति, तनूनपातं यजति etc. five यागs are stated. These are collectively known as प्रयाजs. Here the question is raised whether these are auxiliaries of दर्शपूर्णमास or not.

अधुना वाक्योपजीविप्रकरणेन विनियोगश्चिन्त्यत इति सङ्गतिः । दर्शपूर्णमासौ प्रकृत्य श्रूयते ''समिधो यजति, तनूनपातं यजति, इडो यजति, बर्हिर्यजति, स्वाहाकारं यजति'' इति । तत्र सन्देहः किमेते समिधादयः प्रयाजाः दर्शपूर्णमासयोरङ्गं न वेति ।

Pūrvapakṣa : Pūrvapakṣin argues that to consider these as auxiliaries of दर्शपूर्णमास, there are no प्रमाणs such as श्रुति, लिङ्ग and वाक्य. Though the प्रयाजs are in need of a फल, स्वर्ग can be taken as फल. Hence these are separate यागs, but not the auxiliaries of दर्शपूर्णमास.

दर्शपूर्णमासयोरेव शेषत्वे विनियोजकश्रुत्यादित्रयान्यतमप्रमाणाभावात्, फलाकाङ्क्षाणामपि समिधादीनां स्वर्गफलकत्वेन निराकाङ्क्षत्वसम्भवादिति प्राप्ते ।

Siddhānta : Siddhāntin points out that the injunction दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत states that स्वर्ग be obtained by the performance of दर्शपूर्णमास. However the means by which this goal has to be achieved need to be provided. In other words there is इतिकर्तव्यताकाङ्क्षा on the part of दर्शपूर्णमासयाग. On the other hand, for समिधो यजति etc., no फल is stated. Hence these have फलाकाङ्क्षा. These providing दर्शपूर्णमास क्रतूपकार has to be envisaged as फल. Thus there is उभयाकाङ्क्षा here, इतिकर्तव्यताकाङ्क्षा for

दर्शपूर्णमास and फलाकाङ्क्षा for प्रयाजs. This satisfies the guideline of प्रकरणप्रमाण. Hence, प्रयाज etc. are auxiliaries of दर्शपूर्णमास by प्रकरणप्रमाण.

दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत इत्यस्य 'दर्शपूर्णमासाख्यकर्मणा स्वर्गं कुर्यात् इत्यर्थकतया यागेन स्वर्गसम्पादनप्रकरणस्यानिर्ज्ञाततया कथं इति इतिकर्तव्यताकांक्षाया दर्शपूर्णमासकर्मणः सत्वात्समिधादेश्च फलासंयुक्तत्वेन प्रयोजनाकांक्षायाः फलन्तरकल्पनादपि क्रतूपकाररूपदृष्टफलकल्पनस्य लघुत्वात्प्रधानस्येतिकर्तव्यताकांक्षारूपप्रकरणवशात्प्रयाजादीनां दर्शपूर्णमासाङ्गत्वमिति सिद्धान्तः ।

क्रमस्य विनियोजकताधिकरणम् (III-3-5)

In this अधिकरण, विनियोग by स्थानप्रमाण is discussed. At अध्वर्युकाण्ड, three प्रधानकर्मs viz. आग्नेय, उपांशु and अग्नीषोमीय are stated. In याजमान section, three अनुमन्त्रणमन्त्रs are stated in the same order. Here it is clear that the first and the third मन्त्रs are connected with अग्नि and अग्नीषोमीय. So far as the second मन्त्र is concerned it is not clear whether it is an auxiliary of उपांशुयाग only or an auxiliary of all the three यागs.

अध्वर्युकाण्डे प्रधानान्याग्नेयोपांश्वग्नीषोमीयानि कर्माणि क्रमेण श्रुतानि । याजमाने च तस्मिन्नेव क्रमे ''अग्नेरहं देवयज्ययाऽन्नादो भूयासम्'' इति, ''दब्धिरस्य दब्धो भूयासममुं दभेयम्'' इति ''अग्नीषोमयोरहं देवयज्यया वृत्रहा भूयासम्'' इति क्रमेणानुमन्त्रणमन्त्राः श्रुताः । तत्र आद्यन्तयोर्लिङ्गादाग्नेयग्नीषोमीययागाङ्गत्वमविवादमिति मध्यमन्त्र एव किमयमुपांशुयाजाङ्गमुताऽग्नेयादित्रितयाङ्गमिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that लिङ्ग and प्रकरण are in favour of connecting the second मन्त्र with all three यागs. To connect it only with उपांशुयाग, श्रुति or वाक्यप्रमाण are not available. स्थान is not a प्रमाण at all. Hence the second मन्त्र has to be considered as an auxiliary of all the three यागs.

सामर्थ्यरूपलिङ्गस्य इतिकर्तव्यताकांक्षारूपप्रकरणस्य च आग्नेयादित्रितयसाधारण्या-दुपांशुयागमात्राङ्गत्वकल्पनयोः श्रुतिवाक्ययोरभावात् यथासंख्याम्नानरूप क्रमशब्दितस्थानस्य चाप्रमाणत्वात् त्रितयाङ्गम्, न तूपांशुयागमात्रस्याङ्गमिति ।

Siddhānta : Siddhāntin points out that when the मन्त्रs are stated in the same order in which the यागs are enjoined, then, a ground for relation between the two has to be worked out. सामानदेशत्वरूपस्थान is such a ground. Therefore, here the विनियोग of the second मन्त्र at उपांशुयाग is by स्थानप्रमाण.

कर्मविधिक्रमेण मन्त्राम्नानं तेन सह सम्बन्धं विनाऽनुपपन्नं सत् समानदेशत्वरूपं क्रम-शब्दितं स्थानमपि विनियोगे प्रमाणमिति वाच्यम् । आद्यन्तकर्मणोराद्यन्तमन्त्राभ्यां लैङ्गिकविनियोगेन समंत्रतया निराकांक्षत्वेन मध्ये पठितोपांशुयागकर्मणो मन्त्राकांक्षा न केनापि निवृत्तेति तद्बलेन तुल्यदेशत्वरूपं स्थानमुपांशुयागाङ्गतया दब्धिरसीति मन्त्रे विधत्त इत्युपांशुयागमात्राङ्गमयं मन्त्र इति सिद्धान्तः ।

समाख्याया विनियोजकताधिकरणम् (III-3-6)

In this अधिकरण विनियोग by समाख्याप्रमाण is discussed.

At दर्शपूर्णमास, अग्न्यन्वाधान etc. are called आध्वर्यव. सामिधेन्यनुवचन are called होत्र. At सोमयाग, स्तोत्र etc. are called औद्गात्र. Here the question is raised whether the respective items be performed by the respective priests अध्वर्यु etc. or there is no such restriction, all can perform all these duties.

अत्र स्थानप्रमाणोपजीविना समाख्यारूपप्रमाणेन विनियोगः उच्यते इति सङ्गतिः । दर्शपूर्णमासयोरग्न्यन्वाधानादय आध्वर्यवत्वेन सामिधेन्यनुवचनादयो होत्रत्वेन सोमयागे स्तोत्रादय औद्गात्रत्वेन समाख्याताः । ते किमध्वर्युप्रभृतिरेव कार्याः उतानियमेन येन केनचिदिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that श्रुति, लिङ्ग, वाक्य etc. प्रमाणs do not help to determine the above question. समाख्या has no injunctive suffix. Therefore समाख्या also cannot decide विनियोग. Therefore any priest can perform any of the above duties.

श्रुतिलिङ्गवाक्यप्रकरणस्थानेष्वन्यतमस्यापि नियामकस्याभावात्समाख्यायाश्च विधि-प्रत्ययहीनत्वेन अविधायकतया विधिनिबन्धननियमायोगादनियमेन येन केनचिद्यत्किञ्चित्कार्य-मिति प्राप्ते ।

Siddhānta : Siddhāntin points out that if अध्वर्यु etc. are not connected with the respective items, then, the mention of their names with reference to these items becomes purposeless. The अध्वर्यु etc. agents require an activity to be performed by them. The activities अग्न्यन्वाधान etc. require an agent to perform that. Therefore these two get connected as क्रिया and कर्ता. This kind of association is enjoined by प्रयोगविधि.

सिद्धान्त्यते, अध्वर्योरिदमाध्वर्यवं इति सम्बन्धनिमित्तकाध्वर्यवादिवैदिकसमाख्याः अग्न्यन्वाधानादिपदार्थैरसति सम्बन्धे अनुपपन्नाः सत्यः सम्बन्धमवगमयन्ति । स च सम्बन्धः कर्तॄणां कार्यापेक्षत्वात्पदार्थानाञ्च कर्त्रपेक्षत्वात् समाख्यया च मिथः उपस्थितानां योग्यतया क्रियाकर्तृभावरूप एव सिद्ध्यति । तञ्च प्रयोगाविधिः विधत्ते इति विधिनिबन्धननियमसिद्धिरिति ।

श्रुतेर्लिङ्गापेक्षया प्राबल्याधिकरणम् (III-3-7)

In this अधिकरण, प्राब्रल्यदौर्बल्य of श्रुति etc. प्रमाणs is discussed.

It is stated that ''ऐन्द्र्या गार्हपत्यमुपतिष्ठते.'' Here the question is raised whether the ऐन्द्री hymn is to be offered for इन्द्र and गार्हपत्य alternately or together or for इन्द्र only and for गार्हपत्य only.

पूर्वत्र श्रुत्यादिषट्कस्य विनियोगे प्रामाण्यमुक्तम् । अत्र तेषां श्रुत्यादीनां विरोधे प्राबल्यदौर्बल्ये चिन्त्येते । तत्र आदौ श्रुतिलिङ्गयोश्चिन्त्यते । ''ऐन्द्र्या गार्हपत्यमुपतिष्ठते''

इति श्रूयते । तत्र ऐन्द्या ऋचा इन्द्रस्य गार्हपत्यस्य च विकल्पेनोपस्थानमथ समुच्चयेनोपस्थानं, यद्वा इन्द्रस्यैवाथ गार्हपत्यस्यैवेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the तृतीयाश्रुति ऐन्द्या indicates that it is an auxiliary of गार्हपत्योपस्थान. The मन्त्र containing the word इन्द्र indicates that it is for इन्द्रोपस्थान. Thus there is a conflict between श्रुति and लिङ्ग. Hence the उपस्थान of these two has to be made alternately. This is one pūrvapakṣa.

Another pūrvapakṣa is that इन्द्र and गार्हपत्य are प्रधान while उपस्थान is गुण. Keeping in view the guideline 'प्रतिप्रधानं गुणावृत्ति' it has to be performed both for इन्द्र and गार्हपत्य.

A third pūrvapakṣa is that when श्रुति effects विनियोग it takes into account वस्तुसामर्थ्यरूपलिङ्ग. This means that लिङ्ग is उपजीव्य for श्रुति and superior to it. Hence, ऐन्द्री मन्त्र has to be utilised for इन्द्रोपस्थान only.

पूर्वपक्षस्तु ऐन्द्येति तृतीयाश्रुत्या गार्हपत्योपस्थानशेषत्वस्य मन्त्रे च ''हे इन्द्र कदाचिदपि घातुको नासि, हविर्दात्रे प्रीयसे च'' इति मन्त्रलिङ्गबलादिन्द्रोपस्थानशेषत्वस्य च प्रतीत्या श्रुतिलिङ्गयोर्विरोधे सति द्वयोः प्रमाणत्वाविशेषाद् व्रीहियववद् विकल्पः इत्येकः ।

उपस्थानं प्रति इन्द्रगार्हपत्ययोः प्रधानत्वात् उपस्थानस्य च गुणत्वात् प्रतिप्रधानं गुणावृत्तिरिति न्यायेनोपस्थानावृत्या श्रुतिलिङ्गयोः समुच्चयः इति द्वितीयः ।

श्रुतिर्विनियुञ्जाना वस्तुसामर्थ्यमनुसृत्य विनियुङ्क्ते । अन्यथा ''वह्निना सिंचेत्'' इत्यपि विनियुज्येत । अतः उपजीव्यत्वेन लिङ्गस्य प्रबलत्वात् इन्द्र एवोपस्थेयः । न चैन्द्या गार्हपत्योपस्थाने सामर्थ्यमस्ति । येन तत्रापि विनियोगः स्यात् इति तृतीयः ।

Siddhānta : Siddhāntin points out that श्रुति is not prevented here on the ground of सामर्थ्याभाव. Though there is no मुख्यसामर्थ्य, गौणसामर्थ्य is

available here. Hence श्रुति conveys the विनियोग for गार्हपत्योपस्थान. लिङ्ग cannot convey विनियोग by itself. It has to envisage the appropriate श्रुति. Hence, it is दुर्बल to श्रुति.

सिद्धान्तस्तु मन्त्रस्य गार्हपत्ये मुख्यसामर्थ्याभावेऽपि गौणसामर्थ्यस्य सम्भवाद-शक्तिकृत प्रतिबन्धाभावन्निर्विघ्ना श्रुतिः शीघ्रं गार्हपत्ये मन्त्रं विनियुंक्ते । लिङ्गन्तु न साक्षाच्छेषत्वस्य शेषित्वस्य वा बोधकम् । किन्तु श्रुतिं कल्पयित्वैवेति विप्रकृष्यते ।

वाक्यापेक्षया लिङ्गप्राबल्याधिकरणम् (III-3-8)

At दर्शपूर्णमास the statements 'स्योनं ते सदनं करोमि' and 'तस्मिन्सीद' are found. Here the question is raised whether the statement सदनं करोमि, etc. and the statement तस्मिन्सीद etc. are to be separately connected by विनियोग for सदन and साधन i.e., प्रतिष्ठापन, respectively or the विनियोग of whole मन्त्र is for both the सदनकरण and पुरोडाशस्थापन.

लिङ्गवाक्ययोरेकत्र समाविष्टयोर्विरोधे वाक्यदौर्बल्यमर्थविप्रकर्षाज्ज्ञेयम् । तद्यथा ''स्योनं ते सदनं करोमि, घृतस्य धारया सुशेवं कल्पयामि, तस्मिन्सीद, अमृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमानः'' इति दर्शपूर्णमासयोः श्रुते वाक्ये ''हे पुरोडाश ते स्योनं सुखकरं सदनमाश्रयं करोमि । घृतस्य धारया सुशेवं सुखसेव्यं च कल्पयामि । हे व्रीहीणां मेघ सारभूत सुमनस्यमानः सुमनाः सन् अमृते नाशरहिते तस्मिन् सदने, उपविश, प्रतितिष्ठ, स्थिरो भव'' इत्येवं विधार्थप्रतिपादनसामर्थ्यरूपलिङ्गबलेन कल्पयाम्यन्तः सदनकरणे, तस्मिन्नित्याद्यंशः प्रतिष्ठापन इति विभज्य विनियोक्तव्यः, उत सर्वोऽपि मन्त्रः सदनकरणे पुरोडाशस्थापने च विनियोज्य इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that when the whole statement can be considered as one वाक्य, it is not proper to split it as two वाक्यs.

Further the pronoun तस्मिन् in the second वाक्य makes reference to the सदन stated in the earlier portion of the वाक्य. This indicates that the whole statement is one वाक्य.

पूर्वपक्षस्तु सम्भवत्येकवाक्यत्वे वाक्यभेदकल्पनायोगात् । तस्मिन्निति पूर्वोक्तसापेक्ष-तच्छब्देनैकवाक्यत्वप्रतीतेस्तद्बलेन सर्वोऽप्ययं मन्त्रः सदनकरणे प्रतिष्ठापने च उभयत्र विनियोज्य इति ।

Siddhānta : Siddhāntin points out that if the whole statement as one वाक्य conveys विनियोग for both सदन and प्रतिष्ठापन then, since पूर्वार्ध is not able for प्रतिष्ठापनरूपार्थप्रकाशन, उत्तरार्ध is not able for सद न करणरूपार्थप्रकाशन विनियोजकश्रुति as ''कृत्स्नेन मन्त्रेण सदनं कुर्यात्'' and ''कृत्स्नेन मन्त्रेण पुरोडाशस्थापनं कुर्यात्'' cannot be envisaged. Hence, envisaging गौणसामर्थ्य and envisaging the above श्रुति, the विनियोग of the whole मन्त्र for both सदन and प्रतिष्ठापन has to be made. However, मुख्यसामर्थ्यरूपलिङ्ग can directly envisage the विनियोजकश्रुति for सदन and प्रतिष्ठापन if the statements are taken as two sentences and each sentence is विनियोजक for सदन and प्रतिष्ठापन respectively.

सिद्धान्तस्तु, पूर्वत्र हि श्रुतिरेव साक्षाद्विनियोक्त्री, अन्यत्तु तद्द्वारा इत्युक्तम् । श्रुते-र्विनियोजकत्वमपि सामर्थ्यमनुसृत्यैवेत्यप्युक्तम् । एवञ्चैकवाक्यताबलात्सर्वस्योभयत्र विनियोग पक्षे पूर्वार्धस्य उत्तरार्धोक्तप्रतिष्ठापनरूपार्थप्रकाशने उत्तरार्धस्य पूर्वार्धोक्तसदनकरणरूपार्थ-प्रकाशने च मुख्यसामर्थ्याभावेन ''कृत्स्नेन मन्त्रेण सदनं कुर्यात्'' इति ''कृत्स्नेन मन्त्रेण पुरोडाशस्थापनं कुर्यात्'' इति विनियोजकश्रुतिकल्पनायोगात्सहकारिभूतं यादृशतादृशं गौण सामर्थ्यं कल्पयित्वैवोक्तरूपश्रुतिं प्रकल्प्य कृत्स्नस्योभयत्र विनियोग कल्प्य इति वाक्यस्य विनियोगरूपोऽर्थो व्यन्तरित इति विप्रकृष्टः । मुख्यसामर्थ्यरूपलिङ्गस्य तु ''कल्पयाम्यन्तेन सदनं कुर्यात्'' तस्मिन् इत्याद्यंशेन तु पुरोडाशस्थापनं कुर्यात्'' इति साक्षात् श्रुतिकल्पनेन विनियोगरूपोऽर्थः सन्निकृष्टः ।

प्रकरणापेक्षया वाक्यप्राबल्याधिकरणम् (III-3-9)

At दर्शपूर्णमास the statements ''अग्नीषोमाविदं हविरजुषेतां'' and ''इन्द्राग्नी इदं हविरजुषेतां'' are found. In these statements, the portion अग्नीषोमौ has

to be employed on पौर्णमासी and the portion इन्द्राग्नी has to be employed on अमावास्या. Here the question is raised whether the later parts of these statements namely हविरजुषेतां etc. may be employed at both पौर्णमासी and अमावास्या or that which occurs after अग्नीषोमौ is to be employed on पौर्णमास्या and that which occurs after the इन्द्राग्नी has to be employed on अमावास्या.

वाक्यप्रकरणयोरप्यर्थसन्निकर्षविप्रकर्षाभ्यां प्राबल्यदौर्बल्ये ज्ञेये । तथा हि दर्शपूर्णमासयोः "अग्नीषोमाविदं हविरजुषेतां अवीवृधेतां महो ज्यायोऽक्रातां" "इन्द्राग्नी इदं हविरजुषेतां" इत्यादिरूपः सूक्तवाक आम्नातः । तत्र "अग्नीषोमौ" इत्ययमंशः पौर्णमास्यां "इन्द्राग्नी" इत्ययमंशोऽमावास्यायां प्रयोज्य इत्यतीतपादे कृत्स्नोपदेशादिति नयेऽभिहितम् । अत्र तु अग्नीषोमैन्द्राग्नीपदयोरुत्तरौ इदं हविरित्याद्यंशौ किं प्रकरणबलात् पर्वद्वयेऽपि प्रयोज्यौ, उत अग्नीषोमपदादुत्तरांशस्तदेकवाक्यताबलात्पौर्णमास्यां, इन्द्राग्नीपदस्योत्तरांशोऽमावास्यायां इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that these statements occur in the context of प्रधानकर्मप्रकरण. Hence these are attracted by the इतिकर्तव्यताकाङ्क्षा of प्रधानकर्म. Hence, both the later parts of the two statements have to be employed in both.

प्रधानकर्मप्रकरणे पठितस्य सर्वस्य प्रधानार्थत्वात्प्रधानदर्शपूर्णमासकर्मण इतिकर्तव्यताकाङ्क्षारूपप्रकरणेन अग्नीषोमादिपदद्वयात्तदुत्तरांशद्वयं पौर्णमास्यां प्रयुज्यमानाग्नीषोमपदैकवाक्यतया प्रयोक्तव्यम् । तथा अमावास्यायामपि इन्द्राग्नीपदैकवाक्यतया प्रयोज्यमिति प्राप्ते ।

Siddhānta : Siddhāntin points out that the later part of each statement should be considered as one sentence with the earlier part of the sentence that mentions अग्नीषोमीय and इन्द्राग्निदेवताs respectively. By this arrangement, these statements will be able to make respective देवताप्रकाशन. The वाक्यप्रमाण conveys its intended विनियोग by envisaging लिङ्ग and श्रुति two steps only while प्रकरण needs envisaging three steps,

namely वाक्य, लिङ्ग and श्रुति. Hence, here, by वाक्यप्रमाण the विनियोग of the whole of the two मन्त्रs has to be made for अग्नीषोमीय and इन्द्राग्नी respectively.

एकैकांशस्य तदुत्तरपठितस्य तत्तद्देवतावाचिपदेनैकवाक्यता तत्तत्समभिव्याहारादेव सिद्धा। तत एव च तत्तद्देवताप्रकाशनसामर्थ्यमपि सिद्धमिति ''अनेन मन्त्रभागेन पौर्णमास्यां प्रस्तरं प्रहरेत्'' ''इन्द्राग्नी इत्याद्यंशेन चामावास्यायां'' इति श्रुतिकल्पनेन वाक्यस्य विनियोगरूपोऽर्थः सन्निकृष्टः। व्यन्तरितत्वात्।

स्थानापेक्षया प्रकरणप्राबल्याधिकरणम् (III-3-10)

At राजसूय several यागs consisting of पशु, इष्टि and सोम are enjoined. These are समप्रधानs. अभिषेचनीय is one of the सोमयाग, close by it विदेवन, शौनः शेपोपाख्यान etc. are stated. Here the question is raised whether these are the auxiliaries of राजसूय or अभिषेचनीय.

एवं प्रकरणस्थानयोरपि सन्निकर्षविप्रकर्षाभ्यां प्राबल्यदौर्बल्ये ज्ञेये। तथा हि, राजसूये बहवः पश्विष्टिसोमयागाः ''प्रकरणशब्दसामान्यादिति'' चतुर्थान्त्यपादीयाद्यनये वक्ष्यमाण-दिशा समप्रधानभूताश्च ते। तत्र अभिषेचनीयाख्यसोमयागसन्निधौ विदेवनशौनःशेपो-पाख्यानादयः केचन पदार्थाः ''अक्षैर्दीव्यति'' ''शौनः शेपमाख्यापयति'' इति श्रुताः। शुनः शेपविषयमाख्यानं बह्वृचब्राह्मणे पठितं शौनः शेपम्। तत्र ते पदार्थाः किं प्रकरणात् राजसूयाङ्गं, उत सन्निधानादभिषेचनीयस्येति सन्देहः।

Pūrvapakṣa : Pūrvapakṣin argues that आकाङ्क्षारूपप्रकरण also depends upon सन्निधि. As these are stated very close to अभिषेचनीय, these are the auxiliaries of अभिषेचनीय.

आकाङ्क्षारूपप्रकरणस्यापि सन्निध्यधीनतया बलवताऽत्यन्तसान्निध्येनाभिषेचनीयस्याङ्गमेते विदेवनादय इति प्राप्ते।

Siddhānta : Siddhāntin points out that प्रकरण by envisaging वाक्य,

लिङ्ग and श्रुति three steps only conveys that विदेवन etc. are the auxiliaries of राजसूय. While अभिषेचनीय सन्निधि has to envisage प्रकरण, वाक्य, लिङ्ग and श्रुति - four steps. Hence, it is चतुरन्तरित. Therefore, here, विनियोग of विदेवन etc. has to be settled by प्रकरण only.

राजसूयस्याङ्गाकाङ्क्षारूपप्रकरणं विदेवनादिवाक्यानां प्रधानवाक्यैकवाक्यतां कल्पयित्वा, तदुपकारकत्वसामर्थ्यं च प्रकल्प्य, ''विदेवनादिपदार्थैः राजसूयमुपकुर्यात्'' इति श्रुति-कल्पनया शीघ्रं प्रधाने विदेवनादीनङ्गतया बोधयति । सन्निधिस्तु अभिषेचनीये विशेष्याकांक्षामुत्थाप्य, अभिषेचनीयवाक्येनैकवाक्यतां कल्पयित्वा, तदुपकारसामर्थ्यरूपं लिङ्गं च प्रकल्प्य, पश्चाच्छ्रुतिकल्पनेन अभिषेचनीये विनियुंक्ते इति चतुरन्तरित्वात् स्थानस्य विनियोजकत्वं विप्रकृष्टमिति प्रकरणात् सन्निधिरूपस्थानस्य बाध इति सिद्धान्तः ।

समाख्यापेक्षया स्थानप्राबल्याधिकरणम् (III-3-11)

In दर्शपूर्णमासकाण्ड designated as पौरोडाशिक, the मन्त्र which सान्नाय्य-पात्रप्रकाशक is stated close by it, शुंधनप्रकाशकमन्त्र is stated. शुन्धन means the cleaning of sacrificial vessels. Here the question is raised whether this मन्त्र is an auxiliary of पुरोडाशपात्रशुन्धन or सान्नाय्यपात्रशुन्धन.

स्थानसमाख्ययोर्विरोधेऽपि सन्निकर्षविप्रकर्षाभ्यां प्राबल्यदौर्बल्ये ज्ञेये । तथा हि पौराडशिकमिति समाख्यायुक्ते दर्शपूर्णमासकाण्डे सान्नाय्यपात्रप्रकाशकानां ''मातरिश्वनो धर्मोऽसि'' इत्यादिमन्त्राणां सन्निधौ पठितः शुंधनप्रकाशकः ''शुंधध्वं दैव्याय कर्मणे देव-यज्याया'' इति मन्त्रः किं पुरोडाशपात्रशुन्धनाङ्गं, उत सान्नाय्यपात्रशुन्धनाङ्गमिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that since this मन्त्र is stated in पुरोडाशकाण्ड, by the criteria of समाख्या it is an auxiliary of शोधन of उलूखलमुसल etc. all vessels stated in पुरोडाशकाण्ड.

समाख्यया पुरोडाशकाण्डे प्रोक्तानां उलूखलमुसलजुह्वादीनामपि शोधनेऽङ्गमिति प्राप्ते ।

Siddhānta : Siddhāntin points out that in the expression पौरोडाशिक, प्रकृति part mentions पुरोडाश, प्रत्यय part mentions काण्ड. The relation

between the two is not conveyed. That has to be envisaged by समभिव्याहार. Through that the आकांक्षा of मन्त्र on the part of पुरोडाशपात्र has to be envisaged. Then appropriate श्रुति statement has to be envisaged. In this way, समाख्या requires five steps to convey विनियोग while स्थान requires only four steps to convey विनियोग. Hence शुन्धन is enjoined for सान्नाय्यपात्र only. This is an instance of the criteria of स्थान being superior to that of समाख्या.

सिद्धान्तः— पौरोडाशिकमिति समाख्यायां, प्रकृत्या पुरोडाशस्य, प्रत्ययेन काण्डस्योक्त्या तयोस्सम्बन्धस्य,

"पाकं हि पचिरेवाह कर्तारं प्रत्ययोऽप्यकः ।
पाकयुक्तः पुनः कर्ता वाच्यो नैकस्य कस्यचित्" ।

इति वार्तिकोक्तदिशा केनाप्यवाच्यत्वात् केवलं तयोः समभिव्याहारात् "अस्त्यनयोः कश्चित्सम्बन्धः" इति पुरोडाशकाण्डयोः सम्बन्धसामान्यं कल्पनीयम् । ततश्च तत्र पठितपुरोडाशपात्राणां मन्त्राकांक्षा कल्प्या । ततश्च "अनेन मन्त्रेण पुरोडाशपात्राणां शुन्धनं कुर्यात्" इति श्रुतिः कल्प्येति पञ्चान्तरितं समाख्याया विनियोजकत्वम् । स्थानस्य तु सान्नाय्यापात्रशुन्धनसन्निधिः प्रत्यक्ष इत्याकांक्षादिचतुष्टयमात्रं कल्प्यमिति चतुरन्तरितं विनियोजकत्वमिति स्थानप्रमाणेन समाख्याया बाधात्सान्नाय्यपात्रशुन्धनाङ्गं "शुन्धध्वं" इति मन्त्र इति । तदुक्तं वार्तिके—

"एकद्वित्रिचतुः पञ्च श्रुत्यन्तरणकारितम् ।
श्रुत्यर्थं प्रति वैषम्यं लिङ्गादीनामपीष्यते" इति ॥

बाधयोग्यताधिकरणम् (III-3-12)

In this अधिकरण it is stated that, the बाध of उत्तरोत्तरप्रमाण by पूर्वपूर्वप्रमाण is अप्राप्तबाध. While in the instance of विशेषेण सामान्यबाध is प्राप्तबाध.

पूर्वपूर्वस्योत्तरोत्तरप्रमाणमूलप्रतिषेधकत्वेनाप्राप्तबाधोऽयम् ।
सामान्यविशेषत्वादिषु तु प्राप्तबाध इति विवेक्तव्यम् ।

द्वादशोपसत्ताया अहर्गणाङ्गताधिकरण (III-3-13)

At ज्योतिष्टोम the statement ''तिस्रःएव साह्नस्योपसदः द्वादशाहीनस्य'' occurs. The expression साह्न means ज्योतिष्टोमयाग because it is performed on one day only. उपसदः are the होमs that are to be performed after दीक्षा day and before सोमाभिषव. Here the question arises where both three उपसद्s and twelve उपसद्s are the auxiliaries of ज्योतिष्टोम or the latter are the auxiliaries of अहीन. अहीन is also called अहर्गण.

श्रुत्या प्रकरणस्य विरोधसदसद्भावौ त्रिभिर्नियैश्चिन्त्येते । ज्योतिष्टोमे ''तिस्र एव साह्नस्योपसदो द्वादशीहीनस्य'' इति श्रुतम् । दीक्षादिनेभ्य ऊर्ध्वं सोमाभिषवात्पूर्वं कर्तव्या होमा उपसदः । एकेनाह्ना निष्पाद्यत्वात् साह्नो ज्योतिष्टोमः । तस्य त्र्युपसत्वं तावदङ्गम् । द्वादशोपसत्वमपि तदङ्गमुताहर्गणस्येति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that both उपसत्त्वत्रय and उपसत्त्वद्वादश are stated in the ज्योतिष्टोम context only. Hence both these are the auxiliaries of ज्योतिष्टोम only. The expression अहीन may also be interpreted as ज्योतिष्टोम.

प्रकरणबलात् तदपि तस्यैवाङ्गम् । न चाहीनस्येति षष्ठीश्रुतिविरोधः । ज्योतिष्टोमस्य सर्वसोमयागप्रकृतित्वेन सर्वेषामङ्गानां तत्रोपदेशे सति तदुपदेशहीनविकृतीनामिव हीनत्वा-भावेनाहीनशब्दस्य ज्योतिष्टोमपरत्वोपपत्तेः । एवञ्च त्र्युपसत्वद्वादशोपसत्वयोर्विकल्प इति प्राप्तम् ।

Siddhānta : Siddhāntin points out that साह्न and अहीन are two distinct words with distinct meanings. Therefore both cannot be taken to mean ज्योतिष्टोम. The expression अहीन conveys अहर्गण to be performed on two days and three days. Hence अहीन conveys a different याग of

अहर्गण type. Hence द्वादशोपसत्त्व is an auxiliary of अहीन but not that of ज्योतिष्टोम. Though द्वादशोपसत्त्व is stated in the context of ज्योतिष्टोम it has to be taken out from that context and connected with अहर्गण. Hence it is an auxiliary of अहीन only.

सिद्धान्तस्तु, अहर्गणस्यैवाङ्गम् न साह्नस्येति । कुतः? साह्नस्येति अहीनस्येति शब्दभेदादर्थभेदस्य स्फुटत्वात् । द्विरात्रत्रिरात्राद्यहर्गणे अहीनशब्दस्य रूढत्वेन "न हीयत इति अहीनः" इति योगेन स्वरविशेषेण च साह्नपरत्वायोगात् । अतोऽहीनशब्दस्य अहर्गणपरत्वात् तत्परषष्ठीश्रुत्या तत्सम्बन्धावगमात् द्वादशोपसत्वमहर्गणाङ्गमेवेत्यहीनस्येति श्रुत्या प्रकरणस्य विरोधात् तया प्रकरणं बाधित्वा अहर्गणे उत्कृष्यते "द्वादशाहीनस्य इत्ययमंश" इति ।

कुलायादौ प्रतिपदोरुत्कर्षाधिकरणम् (III-3-14)

At ज्योतिष्टोम it is stated that by the मन्त्र "युवं हि स्थः" etc.,प्रतिपद has to be made for two यजमानs. The expression प्रतिपद means the first शस्त्र. It is also stated that the मन्त्र 'एते असृग्रमिन्दव' etc. प्रतिपद has to be made for many यजमानs. Here the question is raised whether both these मन्त्रs should be first recited at ज्योतिष्टोमप्रयोग or these have to be recited in the कुलाय and अहीनयागs where in two यजमानs and बहुयजमानs are found, taking out these मन्त्रs from the context of ज्योतिष्टोम.

ज्योतिष्टोमे श्रुतं "युवं हि स्थः स्वर्पती इति द्वयोर्यजमानयोः प्रतिपदं कुर्यात्, एते असृग्रमिन्दव इति बहुभ्यो यजमानेभ्यः" इति । युवं हि इत्यादिकामृचं द्विकर्तृके यागे प्रतिपदं शस्त्रप्रथमां कुर्यात्,"एते" इति मन्त्रं बहुयजमानके यागे शस्त्रस्यादिभूताम् । कुर्यादिति तदर्थः । तत्र सन्देहः । किमेतन्मन्त्रद्वयस्य प्राथम्यं ज्योतिष्टोमप्रयोगे कार्यं, उत द्विबहुयजमानकेषु कुलयाहीनादिषूत्कृष्टव्यं इति ।

Pūrvapakṣa : Pūrvapakṣin argues that on the basis of the mention of two यजमानs and बहुयजमानs in these two मन्त्रs, these need not be

considered as the auxiliaries of कुलाय, अहीन etc. taking these out of the ज्योतिष्टोम context. It will be stated later in the third पाद of the sixth अध्याय that certain auxiliaries of ज्योतिष्टोम may be dropped out in ज्योतिष्टोम which is नित्यकर्म if the यजमान is not able to perform them. A दक्षिणा of twelve hundred is to be offered at ज्योतिष्टोम. One यजमान will not be able to offer such a huge दक्षिणा. Hence, ignoring the एकत्व of यजमान, two or many यजमानs may function at ज्योतिष्टोम. Therefore the mention of two or many यजमानs suits ज्योतिष्टोम also.

पूर्वपक्षस्तु पूर्वत्राहीनस्येति श्रुत्या प्रकरणबाधेनोत्कर्षेपीह द्वयोरित्यादिद्विबहुश्रुतिभ्यां न प्रकरणस्य बाधेन प्रतिपत्त्वस्य कुलायादिषूत्कर्षो युक्तः । सर्वशक्तौ प्रवृत्तिः स्यात्'' इति षष्ठतृतीयपादीयाद्यनये नित्ये कर्मणि अशक्तिकृताङ्गत्यागस्य वक्ष्यमाणत्वात् ज्योतिष्टोमस्य च ''वसन्ते वसन्ते ज्योतिषा यजेत'' इति वीप्सया नित्यत्वेन द्वादशशतदक्षिणादाना दावसामर्थ्यैनैको यदि न शक्नुयात्तदा अङ्गान्तरवदेकत्वं विहाय द्वौ बहवो वा यजेरन्निति, तदाश्रयणे प्रतिपद्विधानस्य ज्योतिष्टोम एव युक्तत्वादिति ।

Siddhānta : Siddhāntin points out that only उपादेयाङ्गs can be dropped. एकत्व is अनुपादेय अङ्ग. Therefore it cannot be dropped. Hence two or many यजमानs have no place at ज्योतिष्टोम. Therefore these मन्त्रs that state two or many यजमानs should be taken out of the context of ज्योतिष्टोम and be recited at कुलाय and अहीन.

सिद्धान्तस्तु अशक्याङ्गत्यागेऽप्युपादेयस्य त्यागो नानुपादेयस्य देशकालादेरिति षष्ठ एव वक्ष्यमानत्वेनैकत्वस्याप्यनुपादेयतया त्यागायोगाद्यजमानद्वित्वादेर्ज्योतिष्टोमे अभावेन द्विबहु-श्रुतिभ्यां प्रकरणबाधेन कुलायादिषु प्रतिपत्त्वस्योत्कर्षः । श्रूयते च ''एतेन राजपुरोहितौ सायुज्यकामौ यजेयाताम्'' इति ''एको द्वौ बहवो वा अहीनेन यजेरन्'' इति कुलया-हीनयोः द्विबहुकर्तृकत्वम् ।

जाघन्या अनुत्कर्षाधिकरणम् (III-3-15)

At दर्शपूर्णमास the statement ''पत्नीसंयाजान् यजति'' is found. With reference to this the statement जाघन्या पत्नीः संयाजयन्ति is also found. पत्नीसंयाज consists of four आहुतिs. For the third देवपत्नी is देवता. Because of that all the four are called पत्नीसंयाज. The expression जाघनी means a portion of the flesh found in the जघन area of पशु. Here the question is raised whether the offering of जाघनी be taken out of दर्शपूर्णमास context and be offered at a sacrifice where in पशु is द्रव्य.

दर्शपूर्णमासयोः ''पत्नीसंयाजान् यजति'' इति विहितपत्नीसंयाजान् प्रकृत्य ''जाघन्या पत्नीः संयाजयन्ति'' इति श्रुतम् । ''चत्वारः पत्नीसंयाजाः'' इति वाक्येन आहुति-चतुष्टयात्मके कर्मणि तृतीयाऽऽहुतेर्देवपत्नीदेवताकत्वेन तद्वारा चतुष्टयस्यापि पत्नीसंयाज–नामेति ''पत्नीसंयाजान् यजति'' इत्युक्तम् । जाघनी नाम पशोः जघनप्रदेशभवो मांसखण्डविशेषः । तत्र सन्देहः । जाघन्याः प्रकरणादुत्कर्षो उत नेति ।

Pūrvapakṣa : Pūrvapakṣin argues that पत्नीसंयाजs are enjoined as a संस्कार for जाघनी. जाघनी is found only in पशुयाग but not in दर्शपूर्णमासयाग. Hence, the मन्त्र पत्नीः संयाजयन्ति, has to be taken out from दर्शपूर्णमासप्रकरण and be employed at a पशुयाग.

पूर्वपक्षस्तु जाघन्युद्देशेन ह्यत्र पत्नीसंयाजाः संस्कारत्वेन विधीयन्ते । सा च पशुयाग एव । न दर्शपूर्णमासयागे । जाघन्या अपि प्रकृतकर्मासंयोगात्तत्संयुक्तस्य ''पत्नीः संयाजयन्ति'' इत्यस्यापि प्रकरणादुत्कृष्य पशुयागे निवेशः कार्य इति ।

Siddhānta : Siddhāntin points out that, here, पत्नीसंयाज is not enjoined for जाघनी as a संस्कार. But quoting पत्नीसंयाज, जाघनी is enjoined as a साधन. It is true that there is no पशु at दर्शपूर्णमास. Hence जाघनी is not available. However it can be obtained by purchase etc., Hence, पत्नीसंयाज need not be taken out from दर्शपूर्णमास context.

सिद्धान्तस्तु जाघन्युद्देशेन तत्संस्कारतया पत्नीसंयाजविधौ हि स्यादुत्कर्षः । न चैवम् । जाघन्येति तृतीयया ''यत्पत्नीः संयाजयन्ति तज्जाघन्या'' इति पत्नीसंयाजानुवादेन साधनतया विधानात्, दर्शपूर्णमासयागे पशोरभावेन जाघन्या असत्त्वेऽपि क्रयादिना सम्पादयितुम् शक्यत्वान्न प्रकरणादस्योत्कर्ष इति ।

सन्तर्दनस्य संस्थानिवेशाधिकरणम् (III-3-16)

At ज्योतिष्टोम with reference to औदुम्बर plate in which सोमाभिषव is placed by the statement ''न सन्तृणत्ति'' etc. असन्तर्दन is stated. Again it is stated that ''दीर्घसोमे सन्तृद्येत् धृत्यै,'' सन्तर्दन is enjoined. सन्तर्दन means संश्लेष, धृत्यै means दार्ढ्यार्थम्. Here the question is raised in five ways whether this has to be employed in i) दीर्घयजमानकर्तृकज्योतिष्टोम or ii) दीर्घादीर्घकर्तृकज्योतिष्टोम of iii) द्विरात्र or iv) उक्थ्यादिज्योतिष्टोमसंस्था or v) द्विरात्रादिसंस्था.

ज्योतिष्टोमे सोमाभिषवाधारभूते औदुम्बरफलके प्रकृत्य ''न सन्तृणत्त्यसन्तृण्णे हि हनू'' इत्यसन्तर्दनं विधाय, पुनः श्रुतम् ''अथो खलु दीर्घसोमे सन्तृद्येद्धृत्या'' इति । न सन्तृणत्ति न संश्लेषयेत् । सन्तृद्येत् संश्लिष्टे कुर्यात् । धृत्यै दार्ढ्यार्थमित्यर्थः । तत्र पञ्चधा सन्देहः, सन्तृद्येदित्युक्तसन्तर्दनस्य दीर्घयजमानकर्तृके ज्योतिष्टोमे निवेशः, उत दीर्घादीर्घकर्तृकज्योतिष्टोममात्रे । यद्वा द्विरात्रादिषूत्कर्षेण निवेशः, अथ उक्थ्यादिज्योतिष्टोमसंस्थासु किं वा संस्थासु द्विरात्रादिषु चेति ।

Bhātta Saṅgraha discusses these five alternatives in detail in the Pūrvapakṣa and presents सिद्धान्त.

Siddhānta : Siddhāntin states that सन्तर्दन and असन्तर्दनमन्त्रs be employed both in द्विरात्र and संस्था.

सिद्धान्तस्तु, अविशेषेण ज्योतिष्टोमादधिकग्रहानुष्ठानयुक्तेषु द्विरात्रादिषु संस्थासु चोभयत्र निवेशः ।

तृतीयाध्याये चतुर्थः पादः

निवीतस्यार्थवादत्वाधिकरणम् (III-4-1)

In this पाद which is designated as निवीतपाद the question whether there is any विरोध or not between श्रुत्यादित्रितय and प्रकरण is discussed. Particularly, कृत्वर्थ and पुरुषार्थ nature of various items is discussed.

अत्र तु निवीतपादे श्रुत्यादित्रितयस्यैव प्रकरणेन विरोधसदसद्भावौ चिन्त्येते इति पूर्वपादानन्तर्यमस्येति ज्ञेयम् । क्रत्वर्थपुरुषार्थत्वविचारात् पादभेदो ध्येयः ।

At दर्शपूर्णमास it is stated that निवीतम् मनुष्याणाम्, प्राचीनावीतम् पितॄणाम्, उपवीतम् देवानाम् . निवीत means उत्तरीयस्य मध्यदेशे बन्धनम्. प्राचीनावीत means अपसव्यतया वासोधारणम्. उपवीत means सव्यतया उत्तरीयधारणम्. It is already decided that the statement निवीतम् उपव्ययते is not an injunction. It is अर्थवाद only. However if it is taken as injunction, the five alternatives are possible. i) It is a पुरुषधर्म ii) It is a कर्मधर्म. iii)If it is पुरुषधर्म whether it is शुद्धपुरुषधर्म or क्रतुयुक्तपुरुषधर्म, iv) If it is कर्मधर्म whether it is प्राकरणिक सर्वकर्मशेष or मनुष्यप्रधान कर्मशेष stated in the same प्रकरण. (v) Whether it is अतिथिपूजादिकर्मधर्म which are not stated in that प्रकरण.

दर्शपूर्णमासयोः श्रूयते ''निवीतं मनुष्याणाम्, प्राचीनावीतम् पितॄणाम्, उपवीतम् देवानाम्, उपव्ययते देवलक्ष्ममेव तत्कुरुते'' इति । निवीतमुत्तरीयस्य मध्यदेशे बन्धनम् । प्राचीनावीतमपसव्यतया वासोधारणम् । उपवीतन्तु सव्यतयोत्तरीयधारणम् । विधिपक्षे किमयं पुरुषधर्मः कर्मधर्मो वा । आद्येऽपि किं शुद्धपुंधर्मः क्रतुयुक्तपुंधर्मो वा । कर्मधर्मत्वेऽपि प्राकरणिकसर्वकर्मशेषः, उत तत्प्रकरण एव मनुष्यप्रधानेऽन्वाहार्यदानादिकर्मणि, किं वा प्रकरणादन्यत्र अतिथिपूजादिकर्मणि इति पञ्चधा सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin explains the position of all these five alternatives supporting each one of them. He does not state his final position.

Siddhānta : Siddhāntin rejects the possibilities of all the five alternatives and states that it is only अर्थवाद.

सिद्धान्तस्तु, आद्यपक्षे फलकल्पनाप्रसङ्गात्, सर्वेष्वपि पक्षेषु प्रतीतविध्येकवाक्यत्व भङ्गापत्तेः, प्रथमान्त्यपक्षयोः प्रकरणविरोधापत्तेश्च अर्थवादत्वमेव पूर्वोक्त ज्याय इति ।

उपवीतस्य दर्शपूर्णमासाङ्गताधिकरणम् (III-4-2)

At दर्शपूर्णमास, the question whether उपवीत is an auxiliary of the कर्मs related with all the dieties or it is an auxiliary of दर्शपूर्णमास only.

दर्शपूर्णमासयोः ''उपव्ययत'' इति श्रुतमुपवीतं किं सर्वस्य दैवकर्मणोऽङ्गं, उत दर्शपूर्ण मासयोरेवेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that in the context of मृताग्निहोत्र, by the statement ''यज्ञोपवीती हि देवेभ्यः दोहयति'' उपवीत is stated for देवाग्निहोत्र. Hence, it has to be taken as सर्वदैवकर्मार्थ.

मृताग्निहोत्रे ''प्राचीनावीती हि दोहयेत्, यज्ञोपवीती हि देवेभ्यो दोहयति'' इति देवाग्निहोत्रं सिद्धवदुपवीतानुवादेन लिङ्गेन प्रकरणं बाधित्वा सर्वदैवकर्मार्थत्वमेव स्वीकार्यम् । प्रकरणाद्दर्शपूर्णमासमात्राङ्गत्वे अग्निहोत्रे उपवीतानुवादो न युक्तः स्यात् । सर्वार्थमुपवीतमिति प्राप्तम् ।

Siddhānta : Siddhāntin points out that उपवीत is an auxiliary of दर्शपूर्णमास as it is stated in that context.

सिद्धान्तस्तु, प्रकरणाद्दर्शपूर्णमासाङ्गमुपवीतम् ।

उपवीतस्य विधित्वाधिकरणम् (III-4-3)

In this अधिकरण the question whether the expression उपव्ययते is an injunction or it is merely अनुवाद is raised.

''उपव्ययते'' इति किं विधिरुतानुवाद इति सन्देहः।

Pūrvapakṣa : Pūrvapakṣin argues that the statement made in earlier अधिकरण that उपवीत is enjoined as an auxiliary of दर्शपूर्णमास is not proper. उपवीत that is stated in the स्मृति ''नित्योदकी नित्ययज्ञोपवीती'' makes it clear that it is only an अनुवाद of that statement.

पूर्वत्रोपवीतं दर्शपूर्णमासाङ्गतया विधीयत इत्युक्तमयुक्तम् विधित्वस्यैवाभावात् । ''नित्योदकी नित्ययज्ञोपवीती'' इति स्मृतित एवोपव्यानस्य प्राप्तेरिति प्राप्ते ।

Siddhānta : The स्मृति statement only implies that उपवीत is पुरुषार्थ. However to convey क्रत्वर्थत्व it has to be enjoined. Hence the expression उपव्ययते has to be taken as enjoining it.

विधिरेवायं नानुवादः । स्मृतितः पुरुषार्थतया प्राप्तावपि क्रत्वर्थतया प्राप्त्यभावेन अपूर्वत्वादिति सिद्धान्तः ।

Another interpretation is offered under this अधिकरण taking the सूत्र, उपवीतं etc. and विधिर्वा etc. as one अधिकरण. The question whether उपवीत is सर्वकर्मार्थ or दर्शपूर्णमासार्थ is raised.

Pūrvapakṣa : Pūrvapakṣin argues that it is an अनुवाद from स्मृते. Hence it has to be taken as सर्वकर्मार्थ.

Siddhānta : Siddhāntin points out that स्मृति refers to उपवीत as पुरुषार्थ.However to convey that it is also क्रत्वर्थ it has to be enjoined.

उपवीतमिति विधिर्वेति च द्वयमेकाधिकरणतया वा योज्यम् । तथा हि, उपवीतं सर्वकर्मार्थं उत दर्शपूर्णमासार्थमिति सन्देहे, स्मृतिप्राप्तानुवादः । स्मृतिश्चाविशेषेण स्थितेति सर्वकर्मार्थतया प्राप्तमनूद्यत इति प्राप्ते, क्रत्वर्थत्वपुरुषार्थत्वभेदाद्विधिरिति सिद्धान्तः ।

विधिर्वेतिसूत्रस्य वर्णकान्तरम्

For the सूत्र विधिर्वा etc, Bhātta Sangraha gives another वर्णक.

At मृताग्निहोत्र the question is raised whether the उपवीत stated in the statement यज्ञोपवीती is an auxiliary of दैवाग्निहोत्र or it is अनुवाद of the उपवीत stated in the context of दर्शपूर्णमास for praising प्राचीनावीत stated before it. It is concluded that in the earlier part of the statement प्राचीनावीत is enjoined as an auxiliary of अग्निहोत्र of a person who is at the state of मृत्यु. Naturally the उपवीत stated in the next part of the statement namely यज्ञोपवीती has to be taken as related with the अग्निहोत्र of a person who is at जीवदवस्था. Consequently it has to be taken as enjoined for जीवदवस्थापन्न अग्निहोत्र.

विधिर्वेति सूत्रस्य वर्णकान्तरन्तु, मृताग्निहोत्रे यज्ञोपवीतीति वाक्ये श्रुतमुपवीतं दैवाग्निहोत्राङ्गतया विधीयते, उत दर्शपूर्णमासादिषु प्राप्तस्योपवीतस्य पूर्ववाक्योक्तप्रचीनावीतस्तुत्यर्थमनुवाद इति सन्देहे, ''प्राचीनावीती दोहयेत्'' इति मृत्यवस्थापन्नाग्निहोत्राङ्गतया प्राचीनावीतं विधायाम्नातस्य ''यज्ञोपवीती'' इति वाक्यस्य औचित्याज्जीवदवस्थापन्नाग्निहोत्र प्रयोगाङ्गोपवीतविषयता अवगम्यते । तच्चाप्राप्तत्वादनुवादसरूपस्यापि हिशब्दस्य त्यागेन विधित्वमेव युक्तमिति ।

उपवीतोदगग्रत्वयोरनुवादताधिकरणम् (III-4-4)

At मृताग्निहोत्र in the statement ''ये पुरोदञ्चो दर्भाः'' etc. the question whether उदगग्रत्व stated by the expression पुरोदञ्चः is an injunction or अनुवाद is raised.

मृताग्निहोत्र एव ''ये पुरोदञ्चो दर्भास्तान् दक्षिणाग्रांस्तृणीयात्'' इति श्रुते वाक्ये'' ये पुरोदञ्चः ''इत्युक्तमुदगग्रत्वं किं विधिरुतानुवादः इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that उदगग्रत्व is not conveyed by any other way. Hence it has to be taken as an injunction. The latter part of the statement दक्षिणाग्रांस्तृणीयात् has to be taken as a separate statement. उदगग्रत्व relates to the दर्भs that are to be placed at जीवदवस्था performance and दक्षिणाग्रदर्भs are to be spread at मृतावस्था performance of अग्निहोत्र.

प्राप्त्यभावात्, यच्छब्दस्यापि ''ये पुरा जीवदवस्थायां दर्भास्ते उदञ्चः कार्याः'' इति व्यवहितकल्पनयोपपत्तेर्वाक्यभेदेन विधिरेवोदक्त्वस्य । ''दक्षिणाग्रांस्तृणीयात्'' इति मृतावस्थायां वाक्यान्तरमिति प्राप्तम् ।

Siddhānta : Siddhāntin points out that in the statement ये पुरोदञ्चः the pronoun यत् occurs. And this statement has also एकवाक्यता with the injunction दक्षिणाग्रांस्तृणीयात्''. Hence उदगग्रत्व is अनुवाद but not injunction.

एवं प्राप्ते यच्छब्दोपबन्धात्, ''दक्षिणाग्रांस्तृणीयात्'' इति विध्यन्तरैकवाक्यत्वात्, अग्रवन्त्युदगग्राणि'' इति स्मृतितः प्राप्तत्वाच्चायमनुवादो न विधिरिति ।

समिद्धारणस्य विधिताधिकरणम् (III-4-5)

At मृताग्निहोत्र the statement ''अधस्तात् समिधं धारयन् अनुद्रवेत् उपरिहि देवेभ्यो धारयति'' occurs. In this statement it is stated that when the हविस् to be offered to पितृ is taken from गार्हपत्य place to the आहवनीय place for offering, समित् s be held under the अग्निहोत्र हवणी. While the हविस् to be offered for देवs is taken, समित्s be held above. Here the question is raised whether the holding of समित् above in the अग्निहोत्र performed by living persons is an injunction or अनुवाद.

मृताग्निहोत्र एव ''अधस्तात्समिधं धारयन्ननुद्रवेत्, उपरि हि देवेभ्यो धारयति'' इति श्रूयते । पित्र्यं हविर्होतुं गार्हपत्यदेशादाहवनीयदेशं प्रति हविर्नयनकाले स्रुचोऽग्निहोत्रहवण्या अधस्तात्समिधं धारयन् गच्छेत् । देवार्थं हविर्नयनकाले उपरि हि धारयतीति । तत्रोपरिधारणं जीवदग्निहोत्रे विधीयते । उतानूद्यत इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that this is not an injunction it is a praise of holding the समित् below. Hence it is अनुवाद.

हिशब्दोपबन्धादिपूर्वोक्तन्यायेन अधस्तात्समिद्धारणस्तुत्यर्थमनूद्यत इति प्राप्तम् ।

Siddhānta : Siddhāntin points out that there is a practice that all holy objects should be taken from one place to another place covering. Such covering can be made by the palm etc. also. Here the statement that it should be covered with समित्s is an obligatory injunction. If the समित्s are held above, then only these can cover the holy object हविस्.

सर्वमभ्यर्हितं द्रव्यमाच्छाद्यैव देशान्तरं नेतव्यमित्याचारतो हविराच्छादनस्य प्राप्त्या केनेत्याकांक्षायां हस्तादिनाप्याच्छादनसम्भवेऽपि उपरि समिद्धारणं विधीयमानमाच्छादनार्थं सत् नियमादृष्टार्थं भवति ''समिधैव प्रच्छादयेत्'' इति । सा चोपरि धार्यमाणा प्रच्छादनक्षमा नान्यथेति प्राप्तमुपरि धारणमिति ।

षष्ठं दिग्विभागस्यार्थवादताधिकरणम् (III-4-6)

At ज्योतिष्टोम by the statement ''प्राचीनवंशं करोति'', preparation of a मण्टप of canes facing the east is enjoined. With reference to this, another statement is made that ''देवमनुष्या दिशो व्यभजन्त । प्राचीं देवा दक्षिणां पितरः प्रतीचीं मनुष्या उदीचीम् रुद्राः''. Here, the east is assigned to the dieties, south is assigned to पितृs west is assigned to human beings and north is assigned to रुद्रs. It is further stated that ''यत् प्राचीनवंशं करोति, देवलोकमेव तद्यजमान उपावर्तते''. Here, the dieties पितृs and रुद्रs are not eligible to perform any sacrifice, hence only in respect of human beings the question is raised whether for the human beings in the west is (i) मनुष्यधर्म or (ii) कर्मधर्म (iii) सिद्धमनुष्यधर्म or क्रतुयुक्तमनुष्यधर्म (iv) प्राकरणिकक्रतुधर्म or प्रकरणे एव मनुष्योद्देशककर्मधर्म or (v) मनुष्योद्देशकस्वतन्त्रातिथिपूजादिकर्मधर्म is raised.

ज्योतिष्टोमे ''प्राचीनवंशं करोति'' इति विहितं प्रागग्रवंशयुक्तमण्टपविशेषं प्रकृत्य श्रूयते ''देवमनुष्या दिशो व्यभजन्त । प्राचीं देवा दक्षिणां पितरः प्रतीचीं मनुष्याः उदीचीं रुद्राः इति । यत्प्राचीनवंशं करोति, देवलोकमेव तद्यजमान उपावर्तते इति ।

तत्र देवपितृरुद्राणां षष्ठे वक्ष्यमाणादिशा कर्मानधिकारेण तत्र सन्देहानुदयात् ''प्रतीचीं मनुष्याः'' इत्यत्र सन्देहः, किं प्रतीचीभजनं मनुष्यधर्मः कर्मधर्मो वा । मनुष्यधर्म इत्यत्रापि शुद्धमनुष्यधर्म उत क्रतुयुक्तमनुष्यधर्मः । कर्मधर्म इत्यत्रापि प्राकरणिकक्रतुधर्मः यद्वा प्रकरण एव मनुष्योद्देशककर्मपरः किं वा मनुष्योद्देश्यक स्वतन्त्रातिथिपूजादिकर्मधर्मः इति पञ्चधा सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin is not particular about any one of these alternatives. He states that any one of them may be taken.

निवीताधिकरण इव पञ्चसु पक्षेषु प्राप्तेषु ।

Siddhānta : Siddhāntin points out that it cannot be taken as पुरुषार्थ, since it involves envisaging a फल for the पुरुष. It has to be taken as अर्थवाद since, it is stated along with the injunction of प्राचीनवंश. This suits the प्रकरण also.

सिद्धान्तः– पुरुषार्थत्वे फलकल्पनात् प्राचीनवंशविध्येकवाक्यत्वात् प्रकरणाविरोधाच्च अर्थवादत्वमेव युक्तमिति ।

परुषि दितादीनामर्थवादताधिकरणम् (III-4-7)

(i) At दर्शपूर्णमास in पिण्डपितृयज्ञ the statement पर्व प्रतिलुनाति occurs. In this respect it is stated that ''यत्परुषि दितं तद्देवानाम् यदन्तरा तन्मनुष्याणाम्'' etc.

(ii) At ज्योतिष्टोम the statement उप बिलाद् गृह्णाति occurs. In this respect it is stated that ''यत् पूर्णं तन्मनुष्याणाम् उपर्यधो देवानां etc.

(iii) At ज्योतिष्टोम in दीक्षार्थाभ्यङ्ग, it is stated that ''घृतं देवानां मस्तु पितॄणां निष्पक्वं मनुष्याणाम्''.

(iv) At दर्शपूर्णमास in connection with पुरोडाशश्रपण it is stated that ''यो विदग्धः स नैर्ऋतः यो अश्रुतः स रौद्रः etc.''

Here as the diety etc. other than human beings are not eligible to perform sacrifice the question with reference to मनुष्यs only is raised in five ways as in earlier अधिकरण.

दर्शपूर्णमासयोः पिण्डपितृयज्ञे ''पर्व प्रतिलुनाति'' इत्यत्र श्रुतम् ''यत्परुषि दितं तद्देवानां, यदन्तरा तन्मनुष्याणां, यत्समूलं तत्पितॄणां, समूलं बर्हिर्भवति व्यावृत्त्या'' इति ।

ज्योतिष्टोमे च ''उप बिलाद् गृह्णाति'' इत्यत्र श्रुतं ''यत्पूर्णं तन्मनुष्याणां, उपर्यधो देवानां, अधः पितॄणां'' इति ।

तथा तत्रैव दीक्षार्थाभ्यङ्गे श्रूयते'' घृतं देवानां, मस्तु पितॄणां, निष्पक्वं मनुष्याणाम् ।

तथा दर्शपूर्णमासयोः पुरोडाशश्रपणे श्रूयते ''यो विदग्धः स नैर्ऋतः, योऽश्रुतः स रौद्रः, यः श्रुतः स दैवः

अत्र मनुष्येतरेषां कर्मानधिकारात् मनुष्यसंयुक्तवाक्य एव पूर्वत्रैव पञ्चधा सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin explains the implications of five alternatives and states that any one of them may be adopted.

Siddhānta : Siddhāntin states that these are all अर्थवादs. Since these are connected with the injunction समूलं बर्हिर्भवति.

पञ्चपक्षाणामपि प्राप्तिमुक्त्वा''समूलं बर्हिर्भवति'' इत्यादिविध्येकवाक्यत्वादिना अर्थवादत्वमवसेयम् ।

अनृतवदननिषेधस्य क्रतुधर्मताधिकरणम् (III-4-8)

In the context of दर्शपूर्णमास the statement न अनृतं वदेत् occurs. Here the question is raised, whether the अनृतनिषेध stated here (i) is an

injunction of शुद्धपुरुषधर्म or (ii) it is an अनुवाद of क्रतुयुक्तपुरुषधर्म or (iii) it is an अनुवाद of शुद्धक्रतुधर्म or (iv) it is an injunction of शुद्धक्रतुधर्म.

दर्शपूर्णमासप्रकरणे 'नानृतं वदेत्' इति श्रुतोऽनृतनिषेधः किं शुद्धपुरुषधर्मो विधीयते उत क्रतुयुक्तपुरुषधर्मोऽनूद्यते, किं वा शुद्धक्रतुधर्मानुवादः यद्वा शुद्धक्रतुधर्मविधिरिति चतुर्धा सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin quotes the above four alternatives with justification for each and states that any one of them may be adopted.

Siddhānta : Siddhāntin points out that we have to distinguish between अनृतवदननिषेध in स्मृति and अनृतवदननिषेध at the sacrifice. The former is पुरुषार्थ the latter is क्रत्वर्थ. Therefore the latter cannot be taken as अनुवाद of the former.

सिद्धान्तस्तु स्मार्तनिषेधस्य पुरुषार्थतया क्रतुगतनिषेधस्य क्रत्वर्थत्वेन संयोगभेदात् स्मार्तनिषेधस्य पुरुषप्रत्यवायपरिहारकस्य क्रतावप्राप्तेः क्रताववैगुण्यसम्पादकस्य क्रतुमध्य-गतानृतवदननिषेधस्य अप्राप्तत्वादपूर्वः क्रत्वर्थोऽनृतवचनप्रतिषेधो विधीयत इति ।

जञ्जभ्यमानधर्माणां प्रकरणे निवेशाधिकरणम् (III-4-9)

At दर्शपूर्णमास the statement प्राणो वै दक्षः । अपानः क्रतुः । तस्माज्जञ्जभ्यमानो ब्रूयात्, मयि दक्षक्रतू occurs. The word जञ्जभ्यमान means yawning. Here the question is raised whether the hymn to be recited in this connection is शुद्धपुरुषधर्म or क्रतुयुक्तपुरुषसंस्कार.

दर्शपूर्णमासयोः ''प्राणो वै दक्षः । अपानः क्रतुः । तस्माज्जञ्जभ्यमानो ब्रूयात् मयि दक्षक्रतू'' इति । गात्रविनामेन विदारितमुखः पुरुषो जञ्जभ्यमानः । जृम्भमाण इति यावत् । तस्य वाक्येन प्रतीयमानमन्त्रवचनं किं शुद्धपुरुषधर्मः किं वा क्रतुयुक्तपुरुषसंस्कारः क्रतोरेवाङ्गमिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the statement मयि दक्षक्रतू clearly shows that it is connected with पुरुष. Hence it is पुरुषार्थ.

पूर्वपक्षस्तु, पूर्वत्र अनृतवचनस्य पुरुषसंयोगाश्रवणेनापुरुषार्थत्वेऽपीह ''मयि दक्षक्रतू'' इति वचनस्य जञ्भ्यमानपुरुषसंयोगस्य वाक्येन प्रतीतेः, वाक्यस्य च प्रकरणात् बलवत्त्वात्तद्बलात्पुरुषार्थमिदं वचनम् ।

Siddhānta : Siddhāntin points out that yawning may take place at the time of sacrifice also. Therefore it is क्रतुयुक्तपुरुषसंस्कार. Hence it is क्रत्वर्थ.

सिद्धान्तस्तु क्रतावपि जञ्भ्यमानपुरुषसम्भवात् वाक्यप्रकरणयोरविरोधेन क्रतुयुक्तपुरुष संस्कारद्वारा क्रत्वर्थमेव मन्त्रवचनमिति ।

अवगोरण–निषेधादीनां पुमर्थताधिकरणम् (III-4-10)

At दर्शपूर्णमास the statement ''यो ब्राह्मणायावगुरेत्तं शतेन यातयात्'' occurs. अवगुरेत् means अवज्ञां कुर्यात्. Here the question is raised whether the अवगोरण प्रतिषेध is क्रत्वर्थ or पुरुषार्थ.

दर्शपूर्णमासयोः श्रुतम् ''यो ब्राह्मणायावगुरेत्तं शतेन यातयात्, तस्माद्ब्राह्मणाय नावगुरेत्'' इति । अवगुरेत् अवज्ञां कुर्यात् । तं शतसंवत्सरेण भोग्यां यातनां अनुभावयेदित्यर्थः । तत्र नावगुरेदिति प्रतिषेधः क्रत्वर्थः पुरुषार्थो वा इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that अवगोरण that is to say ब्राह्मण अवज्ञा is क्रत्वङ्ग.

ब्राह्मणावज्ञाशब्दितावगोरणनिषेधस्य क्रत्वङ्गत्वमिति प्राप्ते ।

Siddhānta : Siddhāntin points out that the expression यातयात् prescribes that he who indulges in ब्राह्मणनिन्दा has to suffer for hundred years. The निन्दा प्रतिषेध is intended to award such suffering on the part of the person concerned. Therefore it is पुरुषार्थ only.

''यातयात्'' इत्यनेन शतसंवत्सरभोग्ययातनायाः साध्यत्वावगमात् तादृशनरक-परिहारस्य फलत्वसम्भवात् पुरुषार्थ एवावगोरणप्रतिषेध इति ।

मलवद्वासः संवादनिषेधाधिकरणम् (III-4-11)

In the context of दर्शपूर्णमास the statement मलवद्वाससा न संवदेत् occurs. Here the question is raised whether this प्रतिषेध of talking with रजस्वला is क्रत्वर्थ or पुरुषार्थ.

दर्शपूर्णमासप्रकरणे ''मलवद्वाससा न संवदेत्'' इति श्रुतो रजस्वलया संवादप्रतिषेधः किं क्रत्वर्थोऽथ पुरुषार्थ इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that talking with रजस्वला may occur at the time of sacrifice also. Therefore its निषेध is क्रत्वर्थ.

ऋतुमत्या पत्न्या संवादस्य क्रतावपि सम्भवेन प्रकरणात् रजस्वलासंवादप्रतिषेधः क्रत्वर्थ इति प्राप्ते ।

Siddhānta : Siddhāntin points out that at the time of sacrifice the रजस्वला has to be kept away. Hence the question of talking with रजस्वला does not arise. Hence its निषेध is पुरुषार्थ only.

''व्रतदिवसे अस्पृश्या स्यात्तां दूरीकृत्य यजेत'' इति वचनेन सर्वस्मादपि क्रतुव्यापारा न्निवृत्तया रजस्वलया क्रतौ संवादस्य अप्रसक्ततया तत्र निषेधायोगात् । बहिस्तु स्वातन्त्र्येण प्रवर्तमानपुरुषस्य तया संवादप्रसक्तिसम्भवेन तत्रैव निषेधोऽर्थवानिति पुरुषार्थोऽयं प्रतिषेधः इति सिद्धान्तः ।

सुवर्णधारणादीनां पुरुषधर्मताधिकरणम् (III-4-12)

There is a statement ''तस्मात् सुवर्णं हिरण्यं भार्यम्'' without reference to any particular sacrifice. Here the question is raised whether हिरण्यधारण is an injunction as an auxiliary of sacrifice or it is पुरुषार्थ. If it is क्रत्वङ्ग, whether it is आरादुपकारक or सन्निपत्युपकारक, or only शोभनवर्णता conveyed by the word सुवर्ण is enjoined here.

अनारभ्य श्रूयते ''तस्मात्सुवर्णं हिरण्यं भार्यम् । सुवर्ण एव भवति । दुर्वर्णोऽस्य भ्रातृव्यः'' इति । तत्र सन्देहः शोभनवर्णोपेतहिरण्यधारणं किं क्रत्वङ्गतया विधीयते, अथ पुरुषार्थतयेति । आद्येऽपि किं क्रतोरारादुपकारकाङ्गमुत सन्निपत्यङ्गं, किं वा सुवर्णशब्दितशोभनवर्णता- मात्रविधानमिति ।

Pūrvapakṣa : Pūrvapakṣin states that (i) आरादुपकारकतया क्रत्वङ्गमेव (ii) क्रतुगतहिरण्यानुवादेन तस्य धारणरूपसंस्कारो विधीयते (iii) क्रतौ विहित हिरण्यधारणानुवादेन लाघवात् सुवर्णतामात्रं विधीयते.

शोभनवर्णोपेतहिरण्यधारणस्य वैदिकक्रियारूपत्वेन क्रतुस्मारकत्वसंभवादारादुपकारकतया क्रत्वङ्गमेव धारणम् । पुरुषार्थत्वपक्षे फलकल्पनाप्रसङ्गादित्येकः । क्रतुगतहिरण्यानुवादेन तस्य धारणरूपसंस्कारो विधीयते इति द्वितीयः । क्रतौ विहितहिरण्यधारणानुवादेन लाघवात् सुवर्णतामात्रं विधीयत इति तृतीयः ।

Siddhānta : Siddhāntin points out that this statement is not found with reference to any sacrifice. Therefore it cannot be considered as क्रत्वर्थ. Hence it is पुरुषार्थ only.

यद्धि प्रकरणे श्रुतं तद्धि नियमेन क्रतुस्मारकम् । इदञ्चानारभ्याधीतम् । न च हिरण्यं जुह्वादिवत् क्रत्वव्यभिचारि येन क्रतुस्मारकं स्यात् । लोकेऽपि हिरण्यसम्भवात् । अतः क्रतौ नियन्तुमशक्यत्वात् पुरुषार्थं इदं धारणम् ।

जयादीनां वैदिककर्माङ्गताधिकरणम् (III-4-13)

जयाहोम, राष्ट्रभृत् होम, अभ्यातान होम are stated without reference to any particular sacrifice. Here the question is raised whether these are the auxiliaries of both लौकिक and वैदिककर्मs or only of वैदिककर्मs that are to be performed in आहवनीय.

अनारभ्य श्रूयते ''येन कर्मणेर्त्सेत् तत्र जयां जुहुयात्'', ''राष्ट्रभृतो जुहोति'', ''अभ्यातानान् जुहोति'' इति । ते किं अविशेषतो लौकिकवैदिकसर्वकर्माङ्गमुत आहवनीये कर्तव्यानां वैदिककर्मणामेवेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that these rituals are meant for prosperity. prosperity is aimed at by the लौकिक कृष्यादि कर्मs also as it is aimed by वैदिककर्मs. Hence there is no ground to restrict जयादिहोमs only as an auxiliary of वैदिककर्मs. It is true that, होमs have to be offered at आहवनीय only. However, for this purpose, for कृष्यादिकर्म etc. also आहवनीय may be set up.

पूर्वपक्षस्तु वैदिककर्मणेव लौकिककृष्यादिकर्मणापि ऋद्धेरिष्यमाणत्वात्, सङ्कोचे हेत्वभावात्, जयादिहोमाः सर्वाङ्गम् । न च ''यदाहवनीये जुहोति'' इति होममात्रस्य आहवनीये होतव्यत्वोक्त्या कृष्यादौ आहवनीयो नेति न तदङ्गं ते इति वाच्यम् । जयादयो होमत्वादेव आहवनीयप्रयोजका इति तदर्थं आहवनीयं प्रणीय तेषु हूयमाना न दुष्यन्तीति ।

Siddhānta : Siddhāntin points out that even if आहवनीय is set up for जयादिहोम at the time of कृष्यादिकर्म the places of the two will be different.The प्रधानकर्म कृषि etc. will be in one place and the अङ्गकर्मs जयादिहोम etc in a different place ie., आहवनीय. This is not proper. Hence the जयादिहोमs have to be considered as the auxiliaries of वैदिककर्मs only.

सिद्धान्तस्तु, एवमुक्तदिशा आहवनीयाभावकृतवैगुण्याभावेऽपि प्रधानदेशभिन्नदेशत्वकृतवैगुण्यं त्वस्त्येव ''क्षेत्रादौ कृष्यादिप्रधानकर्म क्रियते, जयादयस्त्वाहवनीये'' इति । वैदिककर्ममात्राङ्गत्वे तु प्रधानकर्मसमानदेशत्वं अस्तीति ये आहवनीये कर्तव्यास्तन्मात्राङ्गं जयादय इति ।

वैदिकाश्वप्रतिग्रह इष्टिकर्तव्यताधिकरणम् (III-4-14)

In काम्येष्टिकाण्ड the statement ''यावतोऽश्वान् प्रतिगृह्णीयात् तावतो वारुणान् चतुष्कपालान् निर्वपेत्'' occurs. In respect of this statement, the question whether this वारुणेष्टि is enjoined as पुरुषार्थ for लौकिकाश्वदान to friends etc. or it is enjoined as क्रत्वर्थ for वैदिकाश्वदान at ज्योतिष्टोम, पौण्डरीक etc. sacrifices or it is both for पुरुषार्थ & क्रत्वर्थ.

काम्येष्टिकाण्डे अनारभ्य श्रूयते ''यावतोऽश्वान् प्रतिगृह्णीयात्तावतो वारुणां-श्चतुष्कपालान् निर्वपेत्'' इति । तत्र त्रेधा सन्देहः । किमियं वारुणेष्टिर्मित्रादिभ्यः स्नेहेन कृते लौकिके अश्वदाने निमित्ते पुरुषार्थतया विधीयते, उत वैदिके ज्योतिष्टोमपौण्डरीकादि कर्माङ्गभूते अश्वदाने निमित्ते क्रत्वर्थतया विधीयते, अथोभयत्रेति ।

Pūrvapakṣa : Pūrvapakṣin states that (i)there is no special reason to restrict it either as पुरुषार्थ or क्रत्वर्थ. Hence it is enjoined for both.

सङ्कोचे हेत्वभावात् सर्वार्थैवेष्टिरित्येकः पूर्वपक्षः ।

ii) This इष्टि is stated to avoid दोष. दोष can occur only in लौकिकाश्वदान because while giving अश्वs for friends etc. such अश्वs that have profuse hairs should not be given. Hence if such horses are given this वारुणेष्टि is enjoined as प्रायश्चित्त. Hence this statement relates to लौकिकाश्वदान only. Such दोष does not occur for वैदिकाश्वदान because that is enjoined by vedic injunction.

स एवैनं वरुणपाशान्मुञ्चति इति वाक्यशेषाद्दोषनिर्हरणार्थेयमिष्टिरवगम्यते । दोषश्च लौकिकाश्वदाने । ''न केसरिणो ददाति'' इति स्मृत्या मित्रदायादादिभ्यः प्रीत्या क्रियमाण लौकिकाश्वदानस्य निषेधात् । तदनुष्ठाने प्रायश्चित्तरूपेयमिति द्वितीयः ।

Siddhānta : Siddhāntin points out that in the case of लौकिकाश्वदान, जलोदर etc. दोषs are not observed, either by प्रत्यक्ष or वैद्यशास्त्र. Hence this इष्टि relates to वैदिक अश्वदान only.

सिद्धान्तस्तु दोषश्रवणाद्धि तन्निर्घातार्थतयेयमिष्टिरुच्यते । न चाश्वदाने जलोदराख्य दोषः प्रत्यक्षेण वैद्यशास्त्रेण वा अवगतः । अतो दोषस्यादर्शनात् ''वरुणो वा एतम्'' इत्यादि-रर्थवादो वारुणेष्टिविधेरित्यश्वदानस्य वैदिकक्रियात्वसाम्यात् वैदिकाश्वदाननिमित्तेयमिष्टिः ।

दातुर्वारुणीष्ट्यधिकरणम् (III-4-15)

In respect of the वारुणेष्टि stated in the earlier अधिकरण the question whether this इष्टि is to be performed by the giver or the reciever is raised.

''यावतोऽश्वान् प्रतिगृह्णीयात्'' इति पूर्वोदाहृतवाक्ये श्रुता वारुणेष्टिः किं दातुरुत प्रतिगृहीतुरिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that at the उपक्रम it is stated that प्रजापति who gave the horses developed जलोदर. In order to get rid of it he envisaged this इष्टि and freed himself from जलोदर. From this it appears that, this इष्टि is to be performed by the giver. However the expression प्रतिगृह्णीयात् clearly indicates that it is the reciever who has to perform this इष्टि. The उपक्रम statement only states that when the giver is asked to perform it follows that the reciever also should perform. Hence this इष्टि has to be performed by the giver.

पूर्वपक्षस्तु ''प्रजापतिर्वरुणायाश्वमनयत् । ततो वै स वरुणपाशादमुच्यत'' इत्युपक्रमे अनयत्–दत्तवान्, स तु दाता प्रजापतिः, स्वकीयां वरुणदेवतां जलोदररोगप्रदां प्राप्तवान्, तेन च रोगेणायं ग्रस्तः प्रजापतिः परिदीर्णो भूत्वा, रोगशान्त्यर्थं ध्यानेनेमामिष्टिं दृष्ट्वाऽनुष्ठाय च रोगादमुच्यतेति दातुरिति प्रतीतावपि विध्युद्देशस्य प्रधानत्वात् तत्र च ''प्रतिगृह्णीयात्'' इति प्रतिगृहीतुः प्रतीतेस्तदनुराधोनोपक्रमगतोऽर्थवादः ''दातुस्तावदस्ति, किमु प्रतिगृहीतुः'' इत्येवंरूपेण नेतव्य इति प्रतिगृहीतुरेव दाननिमित्तेयमिष्टिरिति ।

Siddhānta : Siddhāntin points out that for the statement in the उपक्रम no विरोध has arisen. Hence the expression प्रतिगृह्णीयात् should be interpreted as प्रतिग्राहयेत् that is to say, instead of interpreting as he who has recieved, it should be interpreted as he who has made him to recieve. It is the giver who makes a reciever to recieve. Hence the giver has to perform the sacrifice.

सिद्धान्तस्तु श्रुतेः जाताधिकारः स्यात् इति पूर्वपादाद्यनयोक्तदिशाऽसञ्जातविरोधित्वेन प्रबलोपक्रमगतार्थवादानुरोधेन विध्युद्देशगतमपि ''प्रतिगृह्णीयात्'' इत्येतत् ''प्रतिग्राहयेत्'' इत्येवमन्तर्भावितणिजर्थपरतया व्याख्येयमिति दातुरेवेयमिष्टिरिति ।

वैदिकपानव्यापदधिकरणम् (III-4-16)

The statement सोमेन्द्रं चरुं निर्वपेत् श्यामाकं सोमवामिनः occurs without reference to any particular sacrifice. This prescribes शामाक चरुनिर्वाप if one vomits the सोम. Here the question is raised whether this has to be made for the vomiting सोम in the ordinary way or the सोम drunk at the sacrifice. In other words whether it is पुरुषार्थ or क्रत्वर्थ.

अनारभ्य श्रूयते ''सोमेन्द्रं चरुं निर्वपेच्छ्यामाकं सोमवामिनः'' इति । अत्र सन्देहः किं लौकिके सोमे रसायनाद्यर्थं पीते वान्ते च पुमर्थतयेयमिष्टिरुत वैदिके क्रत्वर्थतयेति ।

Pūrvapakṣa : Pūrvapakṣin states that the statement एष वा इन्द्रियेण वीर्येण व्यृद्ध्यते etc. states that when the सोम is vomitted, it results in weakness of the इन्द्रियs and the weakness of the strength. Hence the इष्टि to be performed to ward off these is पुरुषार्थ. In the case of सोमपान in the वैदिक sacrifice context, is enjoined by शास्त्र. Therefore even if one vomits it, it is not his fault. Therefore the इष्टि is not necessary for that. Hence it is for पुरुषार्थ only.

''एष वा इन्द्रियेण वीर्येण व्यृध्यते यः सोमं वमति'' इति स्ववाक्यश्रुतेन्द्रियवीर्यनाशरूपदोषहेतुत्वस्य प्रत्यक्षसिद्धत्वेन अर्थात्तत्समाधानस्य फलत्वसिद्धेः फलकल्पनागौरवाभावाल्लौकिकं वमनमिष्टेर्निमित्तमिति पुमर्थयमिष्टिः । वैदिके तु पानमात्रस्य शास्त्रार्थत्वाद्वमनेऽपि न कश्चिद्दोष इति ।

Siddhānta : Siddhāntin points out that लौकिकसोमपान is made for धातुसाम्य, naturally sometimes it results in vomiting. Hence vomiting of

लौकिकसोमपान is not दोष. In the case of vedic sacrifice the मन्त्र states that the सोम should not move back beyond the navel. It should be digested. Hence if it is vomited without properly digesting it, it is a defect. To ward off this defect this इष्टि is prescribed. Hence it is क्रत्वर्थ.

सिद्धान्तस्तु, लोके धातुसाम्यार्थिनो वमनायैव सोमपानेन तत्र वमनस्य दोषाहेतुत्वात् । वेदे तु ''हिन्व मे गात्रा हरिवः'' इत्यनेन मन्त्रेण मे नाभिमवाङ्माऽतिगाः'' इति जरयितुं सोमशेषः प्रतिपत्तितया पीयत इति जरणपर्यन्तस्य शास्त्रार्थत्वाद्वमनेन तस्य नाशे क्रतुवैगुण्य प्राप्तेस्तत्समाधानार्था सती प्रायश्चित्तरूपेयमिष्टिः क्रत्वङ्गमिति ।

सोमेन्द्रचरोर्यजमानपानव्यापद्विषयताधिकरणम् (III-4-17)

In this अधिकरण the question whether the इष्टि stated in earlier अधिकरण is to be performed if यजमान vomits सोम or ऋत्विक्s vomit सोम.

''सोमेन्द्र चरुं निर्वपेत्'' इति श्रुतेष्टिः किं यजमानवमननिमित्ता उत ऋत्विग्वमन-निमित्तापीति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that since there is no special mention of यजमान or ऋत्विक्s, this इष्टि has to be performed in the case of vomiting in both cases.

विशेषाश्रवणादुभयवमननिमित्तेयं सोमेन्द्रेष्टिरिति प्राप्ते ।

Siddhānta : Siddhāntin points out that the statement ''यो वमति स निर्वपति'' he who vomits should offer निर्वाप. It is यजमान who offers निर्वाप. Hence, this इष्टि is enjoined for him only.

सिद्धान्तस्तु ''यो वमति स निर्वपति'' इति निर्वप्तुर्वमनं चरुनिमित्तम् । निर्वप्ता यजमानो न ऋत्विक् । अतो यजमानवमननिमित्तेयमिष्टिरिति ।

आग्नेयाष्टाकपालचरोः व्यवदानमात्रस्य होतव्यताधिकरणम् (III-4-18)

भाष्यकारीयं वर्णकम्

The वमन stated in earlier अधिकरण relates to हविश्शेष. Hence the very position whether there is शेष or not has to be examined. In the context of दर्शपूर्णमास the statement आग्नेयोऽष्टाकपाल: occurs. Here the question is raised whether there is शेष of अष्टाकपालपुरोडाश or not.

दर्शपूर्णमासप्रकरणे ''आग्नेयोऽष्टाकपालः इति श्रुतम् । तत्राष्टाकपालपुरोडाशस्य शेषोऽस्त्युत नेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the expression अष्टाकपाल conveys that the entire पुरोडाश of अष्टाकपाल has to be offered to the अग्नि diety. Hence there is no शेष. It is true that in वाक्यशेष it is stated that the हविस् is offered twice, but it only means that the entire पुरोडाश has to be offered taking it twice.

अष्टाकपालशब्दितस्य कृत्स्नपुरोडाशावयविन एव आग्नेय इति तद्धितेन देवतासम्बन्धोक्तेः अत्यक्तस्य तत्सम्बन्धायोगात्, देवतोद्देशेन त्यक्तस्य सर्वस्य होतव्यत्वान्नास्ति तस्य शेषः । न चैवं ''द्विर्हविषोऽवद्यति'' इति वाक्यशेषोक्तद्विरवदानविरोधः शङ्क्यः । ''यत्सर्वं जुहोति तद्द्विरवदाय'' इत्युपपत्तेः ।

Siddhānta : Siddhāntin points out that in कल्पसूत्रs it is stated that the पुरोडाश be taken holding it between the thumb and the middle finger and offered twice. This means there is still पुरोडाश शेष.

सिद्धान्तस्तु, ''आग्नेयस्य पुरोडाशस्य मध्यादङ्गुष्ठपर्वमात्रमवदानं तिरश्चीनमवद्यति'' इति कल्पसूत्रोक्त्याऽङ्गुष्ठपर्वपरिमाणस्यैव द्विः खण्डयित्वा देवतायै दातव्यत्वात्, व्यवादानमात्रस्यैव होतव्यत्वादस्ति शेष इति ।

वार्तिककारीयं वर्णकम्

According to वार्तिककार, the Pūrvapakṣin states that when there is no special प्रमाण to offer a portion of the पुरोडाश, the whole of पुरोडाश has to be offered. This practice is found in respect of the offering other kinds of हविस् to other dieties. Therefore there is no शेष here.

असति प्रमाणे साक्षादेवाग्रेयत्वं कृत्स्नपुरोडाशस्य स्यात् । एवं च हविरन्तरे देवतासम्बन्धिनोऽशेषस्यापि प्रायेण होमदर्शनादस्यापि तथात्वमिति प्राप्ते ।

Siddhānta : Siddhāntin points out that in the वाक्यशेष offering पुरोडाश twice in a certain way is stated. Hence the entire पुरोडाश is not offered. This means that there is शेष.

वाक्यशेषोक्तव्यवदानवशात्तन्मात्रस्यैव होमो न सर्वस्य ।

सर्वशेषैः स्विष्टकृदनुष्ठानाधिकरणम् (III-4-19)

In this अधिकरण whether स्विष्टकृत् etc. शेषकार्यs be performed taking हविश्शेष only from one or हविश्शेष of आग्नेय etc. all the three.

स्विष्टकृदादिशेषकार्याणि किमेकस्माद्धविःशेषात् कार्याणि? किं वा आग्नेयादिहविस्त्रयशेषैः कार्याणि? इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that the statement ''शेषात्स्विष्टकृते समवद्यति'' इति शास्त्रस्याग्नेयदिहविषां मध्ये यत्किंचिद्धविःशेषेणानुष्ठानेऽप्युपपत्तेः न सर्वैः शेषकार्याणामनुष्ठानमिति प्राप्तम् ।

Siddhānta : Siddhāntin points out that स्विष्टकृत् etc. are prescribed as प्रतिपत्तिकर्म for the संस्कार of हविश्शेष. If हविश्शेष from only one is taken the other two will remain without संस्कार. Hence हविश्शेष of all the three has to be taken for शेषकार्य.

उपयुक्तहविःशेषसंस्कारार्थं प्रतिपत्तित्वेन स्विष्टकृदादेर्विधानात् । तत्रैकस्यैव प्रतिपत्तावन्यस्य तदभावेन क्रतुवैगुण्यापत्तेराग्नेयाग्नीषोमीयादिहविःशेषैरपि स्विष्टकृदादिशेषकार्याणि कर्तव्यानीति सिद्धान्तः ।

प्राथमिकशेषात्स्विष्टकृदनुष्ठानाधिकरणम् (III-4-20)

This अधिकरण is of the nature of कृत्वा चिन्ता. The expression कृत्वाचिन्ता means granting for the sake of arguement. In the pūrvapakṣa of earlier अधिकरण it is stated that शेषकार्य may be performed taking the हविश्शेष from only one. Here the question is raised whether the हविश्शेष of मुख्यहविस् be taken or any हविस्.

कृत्वाचिन्तयेदमारभ्यते । पूर्वाधिकरणे पूर्वपक्षे ह्येकस्मादेव हविषः शेषकार्याणि कर्तव्यानीत्युक्तम् । तत्र यस्मात्कस्माद्धविषः शेषमुद्धृत्य शेषकार्याणि कर्तव्यानि, उत मुख्याद्धविष इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that there is no special reason to specify it, that it should be taken from मुख्यहविस् only. Hence हविश्शेष of any other हविस् may be taken.

अविशेषाद्यथेच्छमेकस्माच्छेषोद्धार इत्येवं प्राप्ते ।

Siddhānta : Siddhāntin points out that the expression मुख्य means प्राथमिक. Hence हविश्शेष of मुख्य only be taken for शेषकार्य. Once शेषकार्य is performed by this there is no need to take हविश्शेष from others.

सिद्धान्तसूत्रम् ''मुख्याद्वा पूर्वकालत्वादिति'' मुखे भवं मुख्यं प्राथमिकम् । तत एव शेषोद्धारो नान्यतः । कुतः? पूर्वकालत्वात् मुख्यानुष्ठानकाले शेषकार्याणामपि कर्तव्यतया बुद्धिस्थत्वात्, तदनुरोधेन ततः शेषे स्थापिते ततः शेषकार्यसिद्धौ नान्यतः पश्चात्कालीनाच्छेषस्योद्धार इति ।

पुरोडाशविभागस्य भक्षार्थताधिकरणम् (III-4-21)

In this अधिकरण the statement आग्रेयं चतुर्धा कृत्वा etc. states that partitioning आग्रेय हविस् into four portions, यजमान should direct that this is for ब्रह्मा, this is for होता, this is for अध्वर्यु and this is for अग्नीध, and give it to them. Here the question is raised whether these portions are given for their use as they liked or for the भक्षण of this as संस्कार of शेषद्रव्य.

आग्रेयं चतुर्धा कृत्वा, चतुर्धा कृतस्य पुरोडाशशेषस्य भागान् यजमान एवं निर्दिशेत् ''इदं ब्रह्मणः, इदं होतुः, इदमध्वर्योः, इदमग्नीधः'' इति । हविर्भागसमर्पणमृत्विजां यथेष्ट-विनियोगयोग्यत्वाय आनत्यर्थमुत तच्छेषद्रव्यसंस्कारतया भक्षणार्थमिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that since भक्षण is not mentioned in the context, it is not for the संस्कार of शेषद्रव्य. This is given to hire them to get their services. Hence, they can make use of it as they like.

एतत्समर्पणन्तु न संस्कार्यतया भक्षणार्थम् । भक्षणस्याश्रवणात् । कर्मकारेभ्यो ऋत्विग्भ्यो भृतिदानेन तान् परिक्रेतुमेव । क्रयश्च तदङ्गीकारानुसारेण स्वल्पेनापि युक्त इति स्वकीया भागास्तैरिच्छयोपयोक्तुं शक्या इति प्राप्तम् ।

Siddhānta : Siddhāntin points out that the offering of the entire हविस् to देवता is intended right at the beginning. Therefore यजमान is not the owner of it. Hence he cannot use the हविश्शेष for having hired the services. Hence भक्षण is शेषसंस्कार.

सिद्धान्तस्तु ''अग्नये जुष्टं निर्वपामि'' इति कृत्स्नस्य हविषो देवतार्थं सङ्कल्पितत्वेन तत्र यजमानस्य ऋत्विक्तुल्यतया स्वामित्वाभावेनायुक्तः परिक्रयः । भक्षणन्तु प्रतिपत्त्यर्थ-त्वाद्युक्तम् । पुरोडाशस्य भक्षणार्हत्वात् भक्षणेन कर्मकरणोत्साहजननाच्च भक्षणार्थमिदं समर्पणमिति ।

तृतीयाध्याये पञ्चमः पादः

ध्रुवाज्यादिभिः स्विष्टकृदादिशेषाननुष्ठानाधिकरणम् (III-5-1)

Here the question whether स्विष्टकृत् etc. शेषकार्यs be performed with the आज्यशेष which is द्रव्य for उपांशुयाज or not is raised.

स्विष्टकृदादिकार्याणि किमुपांशुयाजद्रव्यरूपाज्यशेषात्कर्तव्यानि, उत नेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that the statement ''शेषात्स्विष्टकृते समवद्यति'' enjoins स्विष्टकृत् etc. without any reference to particular प्रकरण. Hence these can be performed from all हविःशेषs. This means that these can be performed with उपांशुयाजाज्यशेष also.

''शेषात्स्विष्टकृते समवद्यति'' इत्यादिना विहितानां स्विष्टकृदादीनां प्रकरणाविशेषेण सर्वप्रदानहविःशेषान्वयादुपांशुयाजाज्यशेषादपि तानि कर्तव्यानि इति प्राप्तम् ।

Siddhānta : Siddhāntin asks the question whether स्विष्टकृत् etc. शेषकार्य be performed with the आज्य remaining in जुहू taken from ध्रुवा for उपांशुयाज or with the आज्य remaining in ध्रुवा itself after taking आज्य by जुहू for उपांशुयाज. The first alternative does not work since स्विष्टकृत् is meant for the प्रतिपत्ति of पुरोडाशशेष which is yet to take place. The second alternative does not work because, since the entire आज्य is offered no शेष is available. Hence शेषकार्य cannot be made by आज्य.

सिद्धान्तस्तु, किमुपांशुयाजादिसर्वयज्ञार्थतया ध्रुवायां स्थितादाज्यादुपांशुयाजार्थं जुह्वा गृहीते यदवशिष्टं ध्रुवायामाज्यं ततः गृहीत्वा हुतावशिष्टं यत्ततः कर्तव्यानीति । नाद्यः । तस्य पश्चाद्भाविपुरोडाशशेषप्रतिपत्त्यर्थं स्विष्टकृदुपस्तरणाभिघारणोपयोगितया कृतकार्यत्वा-भावेन प्रतिपत्त्यनर्हत्वात् । नान्त्यः । तस्याशेषस्यापि होमेन शेषाभावात् । अतो नाज्याच्छेषकार्याणीति ।

साकंप्रस्थायीये शेषकर्माननुष्ठानाधिकरणम् (III-5-2)

In the context of दर्शपूर्णमास, साकं प्रस्थायीययाग is prescribed. At this the statement अग्नीधे सृचौ प्रदाय सह कुम्भीभिः अभिक्रामन्नाह is found. Here the question is raised, स्विष्टकृत् etc. शेषकार्यs be performed or not.

दर्शपूर्णमासप्रकरणे ''साकंप्रस्थायीयेन यजेत पशुकामः'' इति विहिते कर्मणि श्रूयते ''अग्नीधे स्रुचौ प्रदाय सह कुम्भीभिरभिक्रामन्नाह'' इति । तत्र स्विष्टकृदादिशेषकार्याणि कार्याणि न वेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that साकं प्रस्थायीय is a विकृति of सान्नाय्य. At सान्नाय्य there is शेषकार्य. Hence at साकं प्रस्थायीय also शेषकार्यs have to be observed. It cannot be stated that no शेष is available at that, because as in the प्रकृतियाग of it the होमद्रव्य has to be taken from कुम्भी into जुहू. Hence there is शेष.

साकंप्रस्थायीयस्य सान्नाय्यविकृतित्वात् तत्र च शेषकार्यसत्वादिहापि प्रकृतिवच्छब्देन शेषकार्याणि स्युः । न च शेषाभावः । चतसृभिर्दधिपयःकुम्भीभिः सहाहवनीयदेशेऽभिक्रमणमात्रस्य श्रवणेन कुम्भीभिः होमस्याश्रवणादिति वाच्यम् । प्रकृताविव जुह्वां कुम्भीभ्योऽवदाय होतव्यतया हुतशेषस्य सत्त्वादिति प्राप्ते ।

Siddhānta : Siddhāntin points out that in the statement अग्नीधे सृचौ प्रदाय etc. it is clearly stated that जुहू and उपभृत् that are to be used for होम are handed over to अग्नीध and only कुम्भीs are taken for होम. This means that the entire होमद्रव्य stored in कुम्भी is offered for the होम. Hence there is no शेष.

''अग्नीधे स्रुचौ प्रदाय'' इति होमार्थजुहूपभृतौ स्रुचौ विहाय कुम्भीभिरभिक्रमणं श्रूयमाणं कुम्भीनामेव होमार्थतामवगमयतीति कुम्भीभिरेव दधिपयसोर्होमे सति कुम्भीमात्रावशेषेण पूर्वत्रेव हविःशेषाभावान्नास्ति शेषकार्यं इति सिद्धान्तः ।

सौत्रामण्यां शेषकार्याननुष्ठानाधिकरणम् (III-5-3)

At सौत्रामणीयाग पयोग्रहs of आश्विन, सारस्वत and ऐन्द्र and also the सुराग्रहs are stated. Here the question is raised स्विष्टकृत् etc. शेषकार्य be observed or not.

सौत्रामणीनामके यागे आश्विनसारस्वतैन्द्राः पयोग्रहाः सुराग्रहाश्च सन्ति । तत्र स्विष्टकृदादिशेषकार्याणि कर्तव्यानि न वेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that पयोग्रह is सान्नाय्यविकार. सुराग्रह is औषधपुरोडाशविकार. होम has to be performed from these taking the हविर्द्रव्य. Naturally शेष remains. Hence शेषकार्य has to be observed.

पयोग्रहस्य सान्नाय्यविकारत्वात् सुराग्रहस्यौषधपुरोडाशविकारत्वात् तेष्वपि चोदकाबाधायादायैव होमः कार्य इति शेषसत्त्वात् कार्याणि शेषकार्याणीति प्राप्ते ।

Siddhānta : Siddhāntin points out that in the statement यथागृहीतान् ग्रहान् ऋत्विज उपाददते etc. it is clearly stated that whatever is brought that has to be offered at the होम. Hence there will be no शेष. Consequently शेषकार्यs are not to be observed.

''यथागृहीतान् ग्रहान् ऋत्विज उपाददते, उत्तरेऽग्नौ पयोग्रहान् जुह्वति, दक्षिणेऽग्नौ सुराग्रहान्'' इति वाक्ये यथागृहीतानामेव होमार्थं ऋत्विग्भिरुपादानस्य यथोपात्तानामेव होमस्य चोपदेशेनातिदेशिकस्य बाधान्नास्ति शेष इति पूर्वत्रैव न शेषकार्याणीति सिद्धान्तः ।

सर्वपृष्ठेष्टौ स्विष्टकृदिडादीनां सकृदनुष्ठानाधिकरणम् (III-5-4)

In this अधिकरण the point whether शेषकार्य should be observed once only or in some cases it has to be observed many times is discussed.

शेषकार्याणामेवमपवादोक्तावपोदितादन्यत्र सर्वत्रापि सकृदेवानुष्ठानं, किं वा क्वचिदसकृदपीति चिन्तनात्प्रासङ्गिकी सङ्गतिः।

At सर्वपृष्ठ इष्टि, निर्वाप for six इन्द्रs is stated starting with इन्द्राय राथन्तराय निर्वपति. For these six इष्टिs only one पुरोडाश is stated as द्वादशकपालः पुरोडाशो भवति.

''य इन्द्रकामो वीर्यकाम स्यात् तमेतया सर्वपृष्ठया याजयेत्'' इति विहितायामिष्टौ षडिन्द्रा एवं श्रूयन्ते ''इन्द्राय राथन्तराय निर्वपति, इन्द्राय बार्हताय, इन्द्राय वैरूपाय, इन्द्राय वैराजाय, इन्द्राय शाक्वराय, इन्द्राय रैवताय'' इति । तत्रैकोऽपीन्द्रः पृष्ठस्तोत्रेषु षट्सु विहितानां षण्णां रथन्तरादिसाम्नां सम्बन्धेन विशेष्यमाणः षोढा भिद्यते । तासामिन्द्रदेवतानां षण्णामिष्टीनामेक एव पुरोडाशो विधीयते ''द्वादशकपालः पुरोडाशो भवति वैश्वदेवत्वाय'' इति ।

Here the question is raised whether for performing स्विष्टकृत् etc. हविस् be taken for each इष्टि separately or only once, for all six इष्टिs.

तत्र किं प्रतिकर्म भेदेन स्विष्टकृदाद्यर्थमवदेयमुत सकृदेवेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that since different dieties are stated for each इष्टि these are different कर्मs and the offering of हविस् for these is also different. Hence स्विष्टकृत् etc. शेषकार्य be done separately.

देवताभेदेन प्रदानभेदेन च कर्मणां भेदे सति तेषां प्रत्येकमेवेतिकर्तव्यताकांक्षायां प्रत्येकमेव चोदकेनेतिकर्तव्यताप्राप्तेः स्विष्टकृदिडादिशेषकार्यं पृथक्पृथक्कर्तव्यमिति प्राप्तम् ।

Siddhānta : Siddhāntin points out that after पुरोडाश is offered at all इष्टिs the remaining is सर्वशेष. Hence शेषकार्य has to be done only once.

सिद्धान्तस्तु, सर्वेषु प्रदानेषु कृतेषु योऽवशिष्टः पुरोडाशः स सर्वशेष इति ततोऽवदाने सर्वे कृतार्था भवेयुरिति सकृदेव शेषकार्यं कर्तव्यमिति ।

ऐन्द्रवायवग्रहे निःशेषभक्षणाधिकरणम् (III-5-5)

भाष्यकारीयं वर्णकम्

At ज्योतिष्टोम there is ऐन्द्रवायवग्रह. Here the question is raised whether the शेषभक्षण related with this is to be made once or more than once.

ज्योतिष्टोमेऽस्त्यैन्द्रवायवो ग्रहः । तस्य शेषभक्षः सकृदुतासकृदिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that शेषकार्य is a संस्कार for सोमरूपद्रव्य and since द्रव्य is one, शेषकार्यरूपभक्ष also has to be once only.

पूर्वत्रेवात्र संस्कार्यस्य सोमरूपद्रव्यस्यैकत्वात्सकृदेव शेषकार्यरूपो भक्ष इति प्राप्ते ।

Siddhānta : Siddhāntin points out that there is a clear statement that द्विरैन्द्रवायवस्य भक्षयति. Hence शेषकार्य is of the nature of भक्षण twice.

''द्विरैन्द्रवायवस्य भक्षयति, द्विर्ह्येतस्य वषट्करोति'' इति वचनात् द्विर्भक्षरूपं शेषकार्यमिति सिद्धान्तः ।

वार्तिककारीयं वर्णकम्

वार्तिककार states that since there is a clear statement that भक्षण has to be made twice, the पूर्वपक्ष stated by भाष्यकार does not arise. Hence this has to be stated as अर्थवाद on the ground that a reason is given as द्विः भक्षयति. Hence as per the ruling given in हेतुवन्निगदाधिकरण it has to be considered as अर्थवाद.

i) अत्र वचने सति पूर्वपक्षस्यानुदयात् नाधिकरणान्तरं भाष्योक्तं युक्तम् । किन्तु द्विर्भक्षणे द्विःप्रदानस्य ''द्विर्ह्येतस्य वषट्करोति'' इति हेतुत्वकथनात् प्रत्यैन्द्रप्रदानं शेषकार्यं षोढा आवर्तनीयमिति पूर्वत्र शङ्का ।

ii) हेतुवन्निगदाधिकरणन्यायेन अर्थवादत्वान्न तस्य हेतुसमर्पकत्वमिति वक्तुं पूर्वशेषतयेदं सूत्रं योज्यमित्याहुः ।

सोमे शेषभक्षणाधिकरणम् (III-5-6)

At सोमयाग many ग्रहs, चमसs and पुरुषs are stated. Here the question is raised whether there is शेषभक्षण or not. In the case it is there, then, a further question is raised whether भक्षण be made by all without any specification or it has to be made by him whose name is specifically stated or on the grounds of समाख्या, वषट्कार etc. the भक्षण is to be made.

सोमयागे बहवो ग्रहाश्चमसाः पुरुषाश्च सन्ति । तत्र शेषभक्षो नास्त्युतास्तीति । अस्तीति पक्षे किं सर्वत्र सर्वेषामविशेषेण भक्षणं, किं वा यत्र यस्य प्रत्यक्षवचनमस्ति तस्य तत्र भक्ष उत समाख्यावषट्कारहोमाभिषवप्रत्यक्षवचनैर्भक्ष इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that (i) there is no शेष here. Hence the question of शेषभक्षण does not arise. (ii) The statement पुरस्तात् ऐन्द्रवायवं भक्षयति indicates that शेष is there. As there is no special ground for शेषभक्षण of one of these, the शेषभक्षण of all has to be observed.

(iii) The statement पुरस्तात् etc. relates to अध्वर्यु. Hence the भक्ष relates to him only.

पूर्वपक्षस्तु, यद्ग्रहान् जुहोति, यच्चमसान् जुहोति इति ग्रहाद्युद्देशेन होमविधानेन कृत्स्नस्यापि होतव्यत्वात् कुम्भीष्विव न शेषोऽस्ति ''अल्पं जुहोति'' इति वचनात् शेषसत्वेऽपि भक्षणे वचनाभावान्नास्ति भक्षणम् । एवं च ऐन्द्रवायवे भक्ष्यस्यैवाभावेन पूर्वत्र तस्य द्विर्भक्षणोक्तिरयुक्तेत्येकः ।

''पुरस्तादैन्द्रवायवं भक्षयति'' इति विशेषविधानमन्यथाऽनुपपन्नं भक्षं गमयत्, स्थालीपुलाकन्यायेनाविशेषात् सर्वत्र सर्वेषां भक्षमनुमापयतीति द्वितीयः ।

यत्रैन्द्रवायवादावध्वर्य्वादेर्भक्षणं श्रुतं तत्र तस्य भक्ष इति तृतीयः ।

Siddhānta : Siddhāntin points out that the grounds for asigning भक्षण to यजमान or particular priest are (i) समाख्या (ii) वचन (iii) वषट्कार

and (iv) होमाभिषव. Hence, on the basis of समाख्या as चम्यते भक्ष्यते अत्र इति चमसः, the भक्षण of चमस only is stated.

सिद्धान्तस्तु, सत्यं, यस्य यत्र भक्षः श्रुतस्तस्य तत्र भक्षणमिति । श्रवणमेव न भक्षनियमे प्रमाणम् । किन्तु समाख्यावचनवषट्कारहोमाभिषवा अपि । अतो होत्रादिभिः ''चम्यते भक्ष्यते अत्र इति भक्षणसम्बन्धनिमित्ता समाख्येति समाख्यया भक्षनियमो ज्ञेयः ।

उद्गातॄणां मतभेदेन ससुब्रह्मण्यानामपसुब्रह्मण्यानां वा भक्षाधिकरणम् (III-5-7)

Here the question is raised whether on the basis of the expression ''प्रोद्गातॄणां'' in the sentence stated in earlier अधिकरण, भक्षण in उद्गातृ चमस is to be made only by उद्गाता or by others also. In the case it has to be made by others also whether it is by all ऋत्विक्s or by उद्गाता, प्रस्तोता and प्रतिहर्ता, three only or with सुब्रह्मण्य as fourth.

''प्रोद्गातॄणां'' इति पूर्वोक्तवाक्ये उद्गातृप्रातिपादिकानुरोधेन तस्यैकस्यैवोद्गातृचमसे भक्ष उत प्रत्ययार्थबहुत्वानुरोधादन्येषामपि । अन्येषामपीत्यत्र किं सर्वेषामृत्विजां, किं वा असुब्रह्मण्यानामेकस्तोत्रयोगिनामुद्गातृप्रस्तोतृप्रतिहर्तॄणां त्रयाणां छन्दोगानां, यद्वा ससुब्रह्मण्यानां छन्दोगानां चतुर्णामिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin supports the first three alternatives with suitable explanations.

Siddhānta : Siddhāntin points out that there is no reason to exclude सुब्रह्मण्य who has also studied सामवेद. Therefore चमसभक्षण be made by all the four. This is the view held by भाष्यकार.

योगाद् रूढेर्बलवत्त्वेन रूढ्या एक एवोद्गातृपदेन प्रतीयत इति बहुवचनोपपत्तये लक्षणाया अवश्यम्भावे प्रस्तोतृप्रतिहर्त्रोः प्रत्यासत्तिरिव सुब्रह्मण्यस्यापि सामवेदाध्यायित्वेन सुब्रह्मण्याह्वाने तदीयकर्मण्यप्युद्गातृत्वसमाख्यासत्वाच्च प्रत्यासत्तिभावेन ससुब्रह्मण्यानां चतुर्णां भक्ष इति सिद्धान्त इति भाष्यकारः ।

वार्तिककारीयं वर्णकं

However वार्तिककार takes the stand only the first three will be present in यज्ञशाला and they are actually engaged in यज्ञकर्म. सुब्रह्मण्य does not play these roles. Therefore चमसभक्षण is only for the first three.

वार्तिककारस्तु, एकस्तोत्रसम्बन्धः सदसि सन्निधानं कर्मसु व्याप्रियमाणत्वञ्चेत्येव-मन्तरङ्गप्रत्यासत्तेस्त्रयाणामेव भावेन सुब्रह्मण्यस्य त्रितयान्यतमस्याप्यभावादपसुब्रह्मण्यानां त्रयाणामेव भक्ष इति सिद्धान्तितवान् ।

ग्रावस्तुतोऽपि सोमभक्षणाधिकरणम् (III-5-8)

In the earlier two अधिकरणs भक्षण is settled on the basis of समाख्या. In this अधिकरण, भक्ष is proposed to be settled on the basis of expressed statement. There is a ग्रह called हारियोजन. With reference to this there is a statement ''एतस्य हारियोजनस्य सर्व एव लिप्सन्ते''. लिप्सन्ते means भक्षयन्ति. Here the question is raised whether ग्रावस्तुत् who is one of the four priests has भक्षण in this ग्रह or not.

''हरिरसि हारियोजनः'' इत्यनेन मन्त्रेण गृह्यमाणो ग्रहो हारियोजनः । तत्र हारियोजनग्रहे होतृगणमध्ये चतुर्थतया स्थितस्य ग्रावस्तुन्नामकस्य भक्षोऽस्त्युत नेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that in the earlier part of this sentence चमसिन्s are stated. Hence the word सर्व in the latter part of the sentence refer to चमसिन्s only. ग्रावस्तुत् is not a चमसिन्. Hence there is no भक्षण for him.

पूर्ववाक्ये चमसिनां सन्निधानादुत्तरवाक्ये सर्वशब्देन तेषामेव वाच्यत्वेनाचमसिनो ग्रावस्तुतो नास्ति भक्ष इति प्राप्तम् ।

Siddhānta : Siddhāntin points out that सर्वभक्षण which is supported by वाक्यप्रमाण cannot be set aside by स्थानप्रमाण. Hence ग्रावस्तुत् is also covered by the word सर्व. Consequently he also has भक्षण.

सिद्धान्तस्तु, अथशब्देन एवकारेण च चमसिमात्रपरत्वशङ्कां सर्वशब्दस्यापोद्य वाक्येन विहितसर्वभक्षणस्य सन्निधिरूपस्थानप्रमाणेन सङ्कोचायोगात्सर्वशब्देन ग्रावस्तुतोऽपि ग्रहणादस्ति तस्यापि तत्र भक्ष इति ।

वषट्करणस्य भक्षनिमित्तताधिकरणम् (III-5-9)

In the earlier अधिकरण, भक्ष was settled on the basis of समाख्या and वचन. In this अधिकरण भक्ष on the basis of वषट्कार will be discussed. In the statement वषट्कर्तुः प्रथमभक्षः the question is raised whether the word वषट्कार is to be taken as the ground for भक्ष or not.

समाख्यावचनाभ्यां भक्ष उक्तः । अधुना अवसरप्राप्ते वषट्काराद्भक्ष उच्यते इति सङ्गतिः। ''वषट्कर्तुः प्रथमभक्षः'' इति श्रुते वाक्ये वषट्कारो भक्षे निमित्तमुत नेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that होता himself is वषट्कर्ता. चमसभक्ष for होता is already stated on the ground of समाख्या. Therefore वषट्कार is not the ground but only प्राथम्य of भक्ष for वषट्कर्ता namely होता is enjoined here.

होतुरेव वषट्कर्तृत्वात् तस्य च ''होतुश्चमसः'' इति समाख्यया भक्षणं प्राप्तमेवेति वषट्कर्तृकं यद्भक्षणमिति वषट्कर्तृत्वविशिष्टभक्षणानुवादेन प्राथम्यमात्रमत्राप्राप्तं विधीयत इति न वषट्कारस्य भक्षणनिमित्ततापरमिदं वाक्यमिति प्राप्ते ।

Siddhānta : Siddhāntin points out that प्रथमभक्षः is a compound word. Hence प्राथम्यविशिष्टभक्षण is enjoined here. For this वषट्कार is the ground.

''प्रथमभक्षः'' इत्यस्य समस्तपदत्वेन ''यो भक्षः सः प्रथमः'' इत्येवं विधातुमयोग्यत्वात् प्राथम्यविशिष्टं भक्षणमत्र विधीयते इति तस्मिन् भक्षणे वषट्कारोऽपि निमित्तमिति सिद्धान्तः ।

होमाभिषवयोः मिलितयोः भक्षनिमित्तताधिकरणम् (III-5-10)

The statement ''हविर्धाने ग्रावभिरभिषुत्याऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्ति'' occurs. Here the question is raised whether the होम and अभिषव are the grounds of भक्ष or not.

हविर्धाने ग्रावभिरभिषुत्याऽहवनीये हुत्वा प्रत्यञ्चः परेत्य सदसि भक्षान् भक्षयन्ति'' इति । तत्र होमाभिषवयोर्भक्षनिमित्तत्वमस्त्युत नेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the statement हविर्धाने etc. can be taken as गुणविधि for भक्ष. Therefore it cannot be taken as अपूर्वभक्षणविधि on the ground of होम and अभिषव.

हविर्धाने इत्यादिवाक्यस्य भक्षानुवादेन गुणविधित्वसम्भवेन होमाभिषवनिमित्तकापूर्व-भक्षणविधिपरत्वाभावान्न निमित्तं होमाभिषवाविति प्राप्ते ।

Siddhānta : Siddhāntin points out that since अभिषव, हविर्धान and ग्राव are stated in other statements there is no scope for enjoining them here. Hence भक्षण is enjoined here on the ground of होम and अभिषव.

अभिषवो हविर्धानं ग्रावाणो वा वचनान्तरप्राप्तत्वान्न विधीयन्ते । अतो होमाभिषवो-भयनिमित्तकं भक्षान्तरमेव विधीयते इति भवत्येव होमाभिषवौ मिलितावपरं भक्षे एकं निमित्तमिति सिद्धान्तः ।

वषट्कर्त्रादीनां चमसे सोमभक्षणाधिकरणम् (III-5-11)

In this अधिकरण the question whether चमसभक्षण is only for those who are चमसिन्s stated in the statement प्रैतु होतुः चमसः etc. or it is also for वषट्कर्ता and होमाभिषवकर्ता namely होता and अध्वर्यु also.

''प्रैतु होतुश्चमसः, प्र ब्रह्मणः, प्रोद्गातॄणां'' इत्यत्र किं समाख्यया चमसिनामेव भक्षः, उत वषट्कर्तुर्होमाभिषवकर्त्रोः होत्रध्वर्योरप्यस्ति भक्ष इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the समाख्या is only about चमस. Hence it is निरवकाश. In the case of वषट्कर्ता and होमसहित अभिषवकर्ता, भक्ष is available in ग्रहशेष.Hence it is सावकाश.

Consequently चमसभक्ष is not meant for वषट्कर्ता and होमाभिषवकर्ता.

समाख्यायाश्चमसैकविषयत्वेन निरवकाशत्वात् वषट्कारस्य होमसहिताभिषवस्य च भक्षनिमित्तस्य ग्रहशेषे भक्षप्रापकत्वेनापि सम्भवेन सावकाशत्वात् नास्ति चमसेषु तयोर्भक्ष इति प्राप्तम् ।

Siddhānta : Siddhāntin points out that the statements ''वषट्कर्तुः प्रथमभक्षः'' and ''हविर्धाने ग्रावभिः अभिषुत्य'' clearly state that both वषट्कर्ता and होमाभिषवकर्ता have भक्ष. This cannot be set aside by समाख्या. These two also have शेषभक्ष.

सिद्धान्तस्तु ''वषट्कर्तुः प्रथमभक्षः'' इति वचनेन ''हविर्धाने ग्रावभिरभिषुत्य'' इत्यादि वचनेन च विहितयोर्वषट्कारहोमाभिषवनिमित्तभक्षयोः कल्प्यविधिसमाख्यया बाधायोगात् सर्वैः शेषस्य भक्षसम्भवादस्ति तयोरपि चमसेषु भक्ष इति ।

होतुः प्रथमभक्षणाधिकरणम् (III-5-12)

In the earlier अधिकरण it is concluded that many priests can have भक्षण in one पात्र. Here the question is raised whether अध्वर्यु should do भक्षण first or वषट्कर्ता.

सिद्धेऽनेकेषां एकपात्रभक्षणेऽत्र क्रमश्चिन्त्यते । तत्र किमध्वर्युरादौ भक्षयेदुत वषट्कर्तेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that since the पात्र will be in the hand of अध्वर्यु he should do भक्षण first. The statement that prescribes भक्षण for वषट्कर्ता prescribes भक्षण only. The word प्रथम in that statement

relates to अध्ययन only. If that is also to be enjoined it will result in वाक्यभेद.

अध्वर्युहस्त एव पात्रस्यावस्थानात्स एव पूर्वं भक्षयेत् । वषट्कर्तुः इति वचनन्तु भक्षमात्रविधिपरम् । प्रथमपदं तु अध्ययनमात्रोपयोगि । तस्यापि विधाने वाक्यभेदापत्तेः । चमसिभ्यः प्राथम्यापेक्षया वा सङ्कोचेन तदुपपत्तेरित्येवं प्राप्तम् ।

Siddhānta : Siddhāntin points out that the statement about भक्षण is not made with reference to any particular ऋत्विक्. Hence it cannot be restricted to अध्वर्यु only on the ground that पात्र is held by him. Further by the statement ''होतेव नः प्रथमः पाहि'' the other priests request अध्वर्यु that होता who is वषट्कर्ता have भक्षण first. Hence प्रथमभक्षण is for him only.

अविशेषेण प्रवृत्तवचनस्य पात्रसन्निधानरूपन्यायमात्रेण चमस्यपेक्षया प्रथममिति सङ्कोचायोगात् विशिष्टविधौ वाक्यभेदानापत्तेः वषट्कर्तुः प्रथमं भक्ष इति सिद्धान्तः ।

भक्षस्यानुज्ञापूर्वकत्वाधिकरणम् (III-5-13)

In the earlier अधिकरण it is stated that प्रथमभक्षण is by वषट्कर्ता. Here the question is raised whether he should observe भक्षण by taking the permission of the other two or without it.

पूर्वं वषट्कर्तुरादौ भक्षणमित्युक्तम् । तत्रोत्तरौ भक्षयितारावनुज्ञाप्य भक्षयेदनज्ञाप्यैव वेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that making भक्षण after taking permission of the other two is a roundabout procedure. Hence he may make भक्षण without permission.

अनुज्ञापूर्वकभक्षणानुष्ठाने गौरवादननुज्ञाप्येति प्राप्ते ।

Siddhānta : Siddhāntin points out that in the मन्त्र, ''तस्मात्सोमो न

अनुपहूतेन पेयः'' it is clearly stated that without the permission सोमपान should not be made. Hence after taking the permission only भक्षण has to be made.

''तस्मात्सोमो नानुपहूतेन पेयः'' इति मन्त्रेऽनुपहूतेन अननुज्ञातेन न पातव्य इत्युक्तेर्वचनादनुज्ञाप्य भक्षयेदिति सिद्धान्तः ।

वैदिकवचनेन अनुज्ञापनाधिकरणम् (III-5-14)

In the earlier अधिकरण it is stated that after taking अनुज्ञापन, भक्षण is to be made. Here the question is raised whether अनुज्ञापन be made by वैदिक word or लौकिक word.

अनुज्ञाप्य भक्षयितव्यमिति स्थिते तदनुज्ञापनं लौकिकेन शब्देन वैदिकेन वेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that it is easy to make अनुज्ञापन by लौकिक word than by वैदिक word. Hence अनुज्ञापन be made by लौकिक word only.

लाघवाल्लौकिकेनेति प्राप्ते ।

Siddhānta : Siddhāntin points out that there is a मन्त्र viz. ''उपहूतः उपह्वयस्व'' for अनुज्ञापन. Therefore अनुज्ञापन is made by वैदिक word only.

''उपहूत उपह्वयस्व'' इत्ययं मन्त्रो लिङ्गेन अनुज्ञापने विनियुज्यत इति मन्त्रवाक्येनैवानुज्ञापनमिति ।

वैदिकवचनेन प्रतिवचनाधिकरणम् (III-5-15)

In the मन्त्र quoted in earlier अधिकरण the word उपहूतः means अनुज्ञातोऽसि. This occurs first and the word उपह्वयस्व which means अनुज्ञां देहि occurs later. Here the question is raised whether without splitting these two, the whole मन्त्र should be recited for one of them that is to

say either for अनुज्ञा or for अनुज्ञापन and for the remaining लौकिक word be used or the whole hymn be recited for both अनुज्ञा and अनुज्ञापन or these two be split and used for the respective purposes.

(i) पूर्वोक्तमन्त्रे हि ''उपहूतः'' इत्यंशः ''अनुज्ञातोऽसि'' इत्यर्थकतया अनुज्ञाप्रकाशन शक्त आदौ श्रुतः । ''उपह्वयस्व'' इत्ययमंशस्तु ''अनुज्ञां देहि'' इत्यर्थकतया अनुज्ञापनप्रतिपादने शक्तः पश्चात्पठितः ।

(ii) तत्र सन्देहः, वाक्यभङ्गमकृत्वा सर्वोऽपि मन्त्रोऽनुज्ञानुज्ञापनयोरन्यत्र विनियोज्योऽन्यत्र लौकिकः शब्दः, उत उभयत्र सर्वोऽपि मन्त्रः, किं वा लिङ्गवशाद्विभज्येति ।

Pūrvapakṣa : Pūrvapakṣin argues that अनुज्ञापन has to be made earlier, then only अनुज्ञा has to be given. But here in this मन्त्र, these two are stated in the reverse way. Hence they cannot be utilised splitting them. Therefore the whole मन्त्र has to be used either for one of them or for both of them.

अनुज्ञापूर्वकत्वादनुज्ञाया मन्त्रयोश्च तद्विपरीतत्वान्न विभज्य विनियोगः । तस्मात् समस्तोऽयमन्यतरत्रोभयत्र वा विनियोज्य इति प्राप्तम् ।

Siddhānta : Siddhāntin points out that the two parts of the मन्त्र convey the two respective acts. Therefore these have to be separated. Keeping the respective meanings of these, these two be used in the order in which these two acts take place. The order given in the text is पाठक्रम while the reorganised order as per the meanings conveyed by these two is अर्थक्रम. Here पाठक्रम has to be set aside by अर्थक्रम.

लिङ्गेनैकवाक्यतां बाधित्वा विभज्य विनियोज्यः । तत्रापि पाठक्रमादनुज्ञापूर्वं प्रकाश्यमाना निष्फला सती अदृष्टार्था स्यात् । अनुज्ञापनपूर्वकत्वादनुज्ञायाः । तस्मादर्थक्रमेण पाठक्रमं बाधित्वा पश्चात्पठितोऽपि ''उपह्वयस्व'' इत्यंशः प्रश्नसमत्वात्पूर्वभाविन्यनुज्ञापने प्रयोज्यः । पूर्वपठितेपि उपहूतः इत्यंशः प्रत्युत्तरसमानत्वात् पश्चादनुज्ञायां प्रयोज्य इति सिद्धान्तः ।

एकपात्राणां अनुज्ञापनाधिकरणम् (III-5-16)

Here the question is raised whether the अनुज्ञापन stated in earlier अधिकरण is required in the case of भिन्नपात्रs or एकपात्रसमवेत.

प्रकृतमनुज्ञापनं भिन्नपात्राणामपि कार्यमुतैकपात्रसमवेतानामेवेति प्रसङ्गाच्चिन्तनात् प्रासङ्गिकी सङ्गतिः सन्देहश्च ।

Pūrvapakṣa : Pūrvapakṣin states that अनुज्ञापन is अदृष्टार्थ. Hence to restrict it either to भिन्नपात्र or एकपात्रसवमेत, there is no special reason. Hence, those who use भिन्नपात्र also have to have अनुज्ञापन. अनुज्ञापनस्यादृष्टार्थतया सङ्कोचे विशेषहेत्वभावात् प्रात्रान्तरपातॄणामप्यनुज्ञापनमिति प्राप्ते ।

Siddhānta : Siddhāntin points out that the purpose of अनुज्ञापन is to pacify the unpleasantness of eating more portion of शेष by one or more of the participants. Such more eating is possible only in the case of एकपात्रसमवेत. Therefore अनुज्ञापन is required only in their case, not for those who eat in भिन्नपात्र.

अनेकसाधारणे शेषवस्तुनि कथञ्चिदधिकांशभक्षणप्राप्तापराधनिमित्तेतरकोपशान्तिरूप-दृष्टप्रयोजकं ह्यनुज्ञापनम् । तत्रैकपात्रपुरुषाणामेव सम्भवतीति तेषामेवोपाह्वानं, नान्येषा-मपीति सिद्धान्तः ।

स्वयं यष्टुर्भक्षास्तित्वाधिकरणम् (III-5-17)

At ज्योतिष्टोम in the इज्याs called ऋतु याज्या for यजमान is stated by the statement "सह अभिप्रेष्यति होतः एतद्यजेति स्वयं वा निषय यजति". Here this याज्या is observed by यजमान only instead of होता. For this purpose even यजमान recites याज्या. Here the question is raised just as होता is left out for reciting याज्या, whether वषट्कार and भक्ष also should be taken out from him or he only performs them.

(i) तत्र ज्योतिष्टोमे ऋतुनामकेज्यासु ''यजमानस्य याज्या । सोऽभिप्रेष्यति होतरेतद्यजेति । स्वयं वा निषद्य यजति'' इति वचनात् काचिद्याज्या होतुरपनीय यजमानस्य विधीयते । तत्र यजमानो निषद्य यजति । स्वयमेव याज्यां पठति ।

(ii) तदा किं याज्यायाः होतुरपनये वषट्कारभक्षावप्यपनीयते, उत तौ होतर्येवावतिष्ठेते इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that by the statement यजमानस्य याज्या, होता is left out only for the purpose of recitation of the याज्या. वषट्कार has to be made after the recitation of याज्या. It is not a part of याज्या. Hence by taking out याज्या from होता it does not follow that वषट्कार and भक्ष also be taken out from him.

पूर्वपक्षस्तु ''यजमानस्य याज्या'' इति होतुः सकाशात् याज्यापनयनमात्रचोदनात् ''याज्या अधिवषट्करोति'' इति याज्याया उपरि श्रुतवषट्कारस्य याज्यानन्तर्भावान्न तदपनये तस्यापनयः । तदनपनयनादेव भक्षोऽपीति होतैव यजमानप्रयुक्तयाज्याया अधिवषट्कर्ता भक्षयिता चेति ।

Siddhānta : Siddhāntin points out that the role of यजमान as the performer of याग will be complete only with वषट्कार. If he recites याज्या only that will be incomplete. Hence यजमान himself is वषट्कर्ता and भक्षयिता but not होता.

सिद्धान्तस्तु, प्रत्यक्षवचनेन श्रुतं यजमानस्य यष्टृत्वं वषट्कारे सति पूर्णं भवति । याज्यामात्रप्रयोगे तन्न्यूनं स्यात् । अतो यजमान एव तत्र वषट्कर्ता भक्षयिता च, न होतेति ।

फलचमस्येज्याविकारताधिकरणम् (III-5-18)

At ज्योतिष्टोम in the statement यदि राजन्यं वैश्यं वा याजयेत् etc. it is stated that if he desires to have सोमभक्षण the buds of न्यग्रोध flowers be brought, crushed and putting it in the दधि be given to him for भक्ष instead of सोम.

Here the question is raised whether this substitute for सोम is to be given only for भक्ष or for the very use of सोम at the याग as यागसाधन.

(i) ज्योतिष्टोमे ''यदि राजन्यं वैश्यं वा याजयेत्, स यदि सोमं बिभक्षयिषेत् न्यग्रोधस्तिभिनीराहृत्य, ताः सम्पिष्य, दधनि संमृज्य तमस्मै भक्षं प्रयच्छेत्, न सोमम्, इति राजन्यवैश्यनिमित्तः फलाख्यचमसः श्रुतः । स्तिभिन्यो वटमुकुलानीत्येके । वटफलानीत्यन्ये ।

(ii) तत्र सन्देहः, फलचमसो भक्षमात्रे सोमविकारः सन् सोमं बाधते, अथ यागसाधनमपि सोमं विकुर्वंस्तं बाधित्वा यागसाधनत्वेनापि स्वयं निविशत इति ।

Pūrvapakṣa : Pūrvapakṣin argues that both at उपक्रम and उपसंहार, भक्ष only is mentioned. Hence the substitute द्रव्य sets aside सोम only for the purpose of भक्ष but not for याग. Hence राजन्य and वैश्य will not have सोमभक्ष. They will have only the भक्ष of substitute द्रव्य.

बिभक्षयिषेत्, इत्युपक्रमात् ''भक्षं प्रयच्छेत्'' इत्युपसंहारात्तत्रैव विकारो भूत्वा सोमं बाधते, नेज्यायामपीति, पूर्वत्र होतुरिव राजन्यवैश्ययोरपि सोमभक्षापनय इति प्राप्तम् ।

Siddhānta : Siddhāntin points out that भक्ष is प्रतिपत्तिसंस्कार. This cannot be made for a द्रव्य that is not यागसाधन. Hence the substitute of सोम has to be used as यागसाधन setting aside सोमद्रव्य.

अनिज्यासाधनस्य भक्षरूपप्रतिपत्तिसम्बन्धायोगाद्यागद्रव्यसोमविकारः सन् फलचमसो यागसाधनसोमद्रव्यं बाधित्वा स्वयं साधनत्वेन निविशत इति यागविकारो, न भक्षमात्रविकार इति सिद्धान्तः ।

ब्राह्मणानामेव राजन्यचमसानुसर्पणाधिकरणम् (III-5-19)

At राजसूय in दशपेययाग which is सोमयागविकार ten चमसs from ज्योतिष्टोम have to be utilised. Among these भक्षण of यजमानचमस has to be made by राजा who is यजमान. In this connection the statement ''दश दश एकैकं चमसं अनुसर्पेयुः'' and also the statement ''शतं ब्राह्मणाः सोमं भक्षयन्ति'' occur.

Here the question is raised whether भक्षण of राजन्य चमस is to be made by ten राजन्यs or ten ब्राह्मणs.

(i) राजन्यस्य सोमभक्ष इव फलचमसभक्षोऽपि कचिन्नास्तीतीह कथनात्सङ्गतिः । राजसूये दशपेयाख्ये सोमविकारयागे ज्योतिष्टोमाद्दशचमसाः प्राप्ताः । तत्र यजमान-चमसस्य राज्ञो भक्षणं प्राप्तम् । तत्रेदं वचनम् ''दश दशैकैकं चमसमनुसर्पेयुः'' इति श्रुतम् । तथा ''शतं ब्राह्मणाः सोमं भक्षयन्ति'' इत्यपि श्रुतम् । उपसर्पेयुः भक्षणार्थमिति शेषः ।

(ii) तत्र सन्देहः राजन्यचमसं राजन्या दश भक्षयेयुरुत दश ब्राह्मणा इति ।

Pūrvapakṣa : Pūrvapakṣin states that in the statement दश दश etc. ten persons approaching for चमसभक्षण is stated. Here the ten राजन्यs only are meant. The statement ''शतं ब्राह्मणाः'' is in the present tense. Therefore it is only अनुवाद, and it has to be taken in the sense of both ब्राह्मण and अब्राह्मण group of persons by लक्षणा.

पूर्वपक्षस्तु ''दश दश'' इति वाक्ये ''अनुसर्पेयुः'' इति विधिश्रवणात्प्रतिचमसं दश-संख्या विधीयते । राजन्या एव दश राजन्यचमसं भक्षयेयुः । ''शतं ब्राह्मणाः'' इति तु वर्तमाननिर्देशतया यथाप्राप्तानुवादत्वात् । ब्राह्मणाब्राह्मणसमुदाये ब्राह्मणशब्दो लक्षणया नीयमानेऽपि न दुष्यतीति ।

Siddhānta : Siddhāntin points out that it is not proper to interpret the word ब्राह्मण by adopting लक्षणा when मुख्यार्थ is possible. The repeatation as दश, दश indicates that for each चमस ten have to approach for भक्षण. There are ten चमसs. This will satisfy शतसङ्ख्या in the statement of शतं ब्राह्मणाः. Therefore ten ब्राह्मणs have to approach for each चमस.

सिद्धान्तस्तु, ''शतं ब्राह्मणाः सोमं भक्षयन्ति'' इत्यत्र श्रुतार्थसम्भवे लक्षणा न न्याय्या। सम्भवति च प्राप्तेषु दशसु चमसेषु भक्षणायानुसर्पतां पुंसां दश दशेति वीप्सया प्रतिचमसं दशसंख्याविधानेन सिद्धां शतसंख्यामनूद्य संख्येयानां सर्वेषां ब्राह्मण्यविध्यङ्गीकारे श्रुत्यर्थः ।

तृतीयाध्यायस्य षष्ठः पादः

स्रुवादिषु खादिरतादिविधेः प्रकृतिगामिताधिकरणम् (III-6-1)

The statement ''यस्य पर्णमयी जुहूः भवति'' occurs without reference to any particular sacrifice. The word पर्णमयी means made by पलाश leaf. जुहू means a sacrificial instrument made by the wood of पलाश tree with हंसमुख of the measurement of a forearm. It is already settled that it is क्रत्वर्थ. Here the question is raised whether it is प्रकृतिविकृतिरूपसर्वक्रत्वर्थ or only प्रकृत्यर्थ.

''यस्य पर्णमयी जुहूर्भवति, न स पापं श्लोकं श्रृणोति'' इत्यनारभ्य श्रूयते । पर्णमयी पलशविकाररूपेत्यर्थः । जुहूर्नाम अरत्निप्रमाणदण्डो हंसमुखदळबिलः पलाशदारुविकृतिविशेषः । पर्णतायाः क्रत्वर्थत्वे सिद्धे, किं प्रकृतिविकृतिरूपसर्वक्रत्वर्थमिदं पर्णताविधानमुत प्रकृत्यर्थमेवेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that to enjoin पर्णता, जुहू has to be available. This is available both in प्रकृति and विकृति. Therefore पर्णमयत्व is both प्रकृतिविकृतिरूपसर्वक्रत्वर्थ.

पूर्वपक्षस्तु, पर्णताविधेर्हि जुह्वाः प्राप्तिमात्रमपेक्षितम् । सा च प्राप्तिः प्रकृतावौपदेशिकी विकृतावातिदेशिकी । सा सर्वापि प्राप्तिः प्राप्तिरूपेण तुल्येत्युभयत्र प्राप्तजुह्वनुवादेन विधीयमानं पर्णमयत्वं सर्वार्थमिति ।

Siddhānta : Siddhāntin points out that when जुहू is taken from प्रकृति into विकृति by अतिदेश the पर्णता of it also follows. Consequently if पर्णता is enjoined again in विकृति there will be द्विरुक्तिदोष. Therefore पर्णताविधि is only at प्रकृतियाग. This ruling also applies to the स्रुव etc. made by खादिर tree wood.

सिद्धान्तस्तु, विकृतावतिदेशतः प्राप्तमनूद्य पर्णमयत्वं ''यस्य'' इति वाक्येन विधेयम् । अतिदेशतो जुहूप्राप्तिवेलायां पर्णतापि जुह्वा सहैव प्राप्यते इति पुनस्तत्रानेन वाक्येन पर्णताविधौ द्विरुक्तिदोषः स्यात् । तस्मात्प्रकृतियागार्थमेव पर्णताविधिरिति । एवं ''खादिरः स्रुवो भवति'' इत्यादावपि ध्येयम् ।

सामिधेनीनां सप्तदशसंख्याया विकृतिगामिताधिकरणम् (III-6-2)

The statement सप्तदश सामिधेनीरनुब्रूयात् occurs without reference to any particular sacrifice. The ऋक्s that are meant for enkindling the sacrificial fires are called सामिधेनी. Here the question is raised whether the साप्तदश्य i.e. seventeen number relates to प्रकृतियाग or विकृतियाग.

''सप्तदश सामिधेनीरनुब्रूयात्'' इत्यनारभ्य श्रुतम् । प्र वो वाजा अभिद्यव ''इत्याद्या अग्निसमिन्धनार्था ऋचः सामिधेन्यः । तासां साप्तदश्यं किं प्रकृतौ निविशते उत विकृताविति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that साप्तदश्य relates to प्रकृति only but not विकृति. It cannot be stated that by the statement ''पञ्चदश सामिधेनीरनुब्रूयात्'', पाञ्चदश्य is stated in the context of प्रकृति. Hence it is difficult to relate साप्तदश्य with it, because, वाक्य and प्रकरण being of equal importance, साप्तदश्य and पाञ्चदश्य can be taken as alternates.

पूर्वत्र पर्णमयत्वादिकमिव प्रकृतावेव साप्तदश्यं निविशते । न विकृतौ । न च ''पञ्चदश सामिधेनीरनुब्रूयात्'' इति प्राकरणिकपाञ्चदश्यविरोधः शङ्क्यः । वाक्यप्रकरणयोस्तुल्य-बलत्वाद् द्वयोर्विकल्प इति पूर्वपक्षः ।

Siddhānta : Siddhāntin points out that in the case of पाञ्चदश्य it is presented earlier by प्रकरण. The साप्तदश्य is presented later. Hence पाञ्चदश्य may be adopted in प्रकृति while साप्तदश्य may be adopted in मित्रविन्दादि विकृति.

सामिधेनीस्वरूपमात्रसम्बन्धोऽवगम्यते । पश्चात्तु तन्मात्रसम्बन्धे संख्ययोरानर्थक्यात् सामिधेनीपदलक्षितापूर्वार्थताकारसम्बन्धोऽवगम्यते । तदाकारसम्बन्धे वाक्यप्रकरणयोर्न तुल्यता । पाञ्चदश्यस्य कैमर्थ्याकाङ्क्षायां प्रकरणात्स्वत एवापूर्वोपस्थितेः फलवदफलन्यायेन शीघ्रं तादर्थ्यं ज्ञायते । क्रत्वपूर्वप्रत्यासत्तेः पाञ्चदश्यमेव बलीयः इति, पूर्वनिविष्टपाञ्चदश्यावरुद्धायां तेनैव निराकाङ्क्षायां प्रकृतौ निवेशमलभमानं साप्तदश्यं श्रुतसाप्तदश्यासु मित्रविन्दादिविकृतिषु निविशत इति ।

नैमित्तिकसाप्तदश्यस्य प्रकृतिगामिताधिकरणम् (III-6-3)

In this अधिकरण with reference to the statement सप्तदश वैश्यस्य, the question is raised whether साप्तदश्य relating to वैश्य be observed in प्रकृति or विकृति.

''सप्तदशवैश्यस्य'' इति विहितं वैश्यनिमित्तकं साप्तदश्यं किं प्रकृतावुत श्रुतसाप्तदश्यायां विकृतौ निविशत इति सन्देहः ।

Siddhānta : Siddhāntin points out that पाञ्चदश्य stated in प्रकृति relates to नित्ययाग while साप्तदश्य stated in the statement सप्तदशवैश्यस्य is नैमित्तिक. In the light of this नैमित्तिक statement, नित्य statement has to exclude वैश्यs. The नित्य statement is सावकाश, since, it can be adopted by other than वैश्य, while नैमित्तिक is निरवकाश. Hence वैश्यनिमित्तकसाप्तदश्य has to be adopted at प्रकृति only.

नैमित्तिकेनानेन वचनेन प्रकृतिगतस्य नित्यस्य पाञ्चदश्यस्य वैश्यव्यतिरिक्तविषयतया सङ्कोचनीयत्वान्नित्यं सामान्यरूपतया सावकाशत्वेन च दुर्बलम् । नैमित्तिकन्तु विशेषरूपत्वनिरवकाशत्वाभ्यां प्रबलम् । तस्माद्वैश्यनिमित्तकं साप्तदश्यं प्रकृतावविष्ठत इति सिद्धान्तः ।

आधानस्य पवमानेष्ट्यनङ्गताधिकरणम् (III-6-4)

There is a statement अग्नये पवमानाय पुरोडाशमष्टादशकपालं निर्वपेत् etc. This states पवमानेष्टि. There is another statement वसन्ते ब्राह्मणोऽग्नीनादधीत.

This states आधान. Here the question is raised whether this आधान is an auxiliary of पवमानेष्टि or not.

''अग्नये पवमानाय पुरोडाशमष्टादशकपालं निर्वपेत्, अग्नये पावकाय, अग्नये शुचये'' इति । तथा वसन्ते ब्राह्मणोऽग्नीनादधीत'' इति च । तत्र किमाधानं पवमानादीष्टचङ्गमुत नेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that पवमानेष्टि is दर्शपूर्णमासविकृति. Hence आहवनीय etc. अग्निs are the auxiliaries of this इष्टि. Hence आधान which is of the nature of संस्कार has also to be taken as an auxiliary of पवमानेष्टि.

दर्शपूर्णमासविकृतिषु पवमानादीष्टिषु चोदकप्राप्तानामाहवनीयाद्यग्नीनामिष्टचङ्गत्वे सति तत्संस्काररूपस्याऽधानस्यापि तदङ्गतावश्यम्भावात् विश्वजिन्न्यायेन स्वर्गफलकपवमानादीष्टचङ्गमाधानमिति प्राप्तम् ।

Siddhānta : Siddhāntin points out that if आधान is stated as an auxiliary of इष्टि, since no फल is stated for them, फल has to be envisaged by विश्वजिन्न्याय. Further in respect of these इष्टिs, a statement is found that आधेयस्य हवींषि संवत्सरे संवत्सरे निर्वपेत् तेन चैनं पुनर्नवं करोति. Hence these इष्टिs being for अग्निसंस्कार are अग्न्यर्थ. आधान is also अग्न्यर्थ. Hence these cannot be अङ्ग and अङ्गी for each other. Therefore आधान is not an auxiliary of पवमानेष्टि.

सिद्धान्तस्तु, आधानस्येष्टचङ्गत्वे तासामश्रुतफलत्वेन विश्वजिन्न्यायेन फलकल्पनाप्रसङ्गात् अग्न्याधेयस्य हवींषि संवत्सरे संवत्सरे निर्वपेत्, तेनैव न जीर्यते, तेन चैनं पुनर्नवं करोति'' इत्यग्निसंस्कारार्थतोक्त्या चेष्टीनामग्न्यर्थत्वादाधानस्यापि श्रुत्या अग्न्यर्थत्वेनोभयोः अन्योन्याङ्गाङ्गिभावायोगान्नेष्टचङ्गमाधानमिति ।

वार्तिककारीयं वर्णकम्

वार्तिककार states that by the statement ''अग्न्याधेयस्य हवींषि निर्वपेत्'' it is found that these इष्टिs are for आधान. Hence these इष्टिs should be taken as auxiliaries of आधान.

''अग्न्याधेयस्य हवींषि निर्वपेत्'' इत्युक्त्या आधानार्थतावगमात् आधानाङ्गत्वमिष्टीनाम् ।

आधानस्य सर्वार्थताधिकरणम् (III-6-5)

In this अधिकरण the question is raised whether आधान is an auxiliary of दर्शपूर्णमासादिप्रकृतियागs or an auxiliary of only अग्नि.

आधानं दर्शादिप्रकृतिभूतक्रत्वङ्गमुताग्निमात्रार्थमिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that आधान which is enjoined for आहवनीय etc. अग्निs which are for दर्शपूर्णमास, अग्निहोत्र etc. sacrifices. Therefore आधान is an auxiliary of दर्शपूर्णमास etc. through अग्नि.

दर्शपूर्णमाससोमाग्निहोत्ररूपप्रकृतियागानां फलवत्त्वात्तदर्थाहवनीयोद्देशेन विधीयमानमाधानं जुहूद्देशेन विधीयमानपर्णमयीत्वं जुहूद्वारा क्रत्वर्थमिवाग्निद्वारा दर्शादिप्रकृत्यर्थमस्तीति प्राप्तम् ।

Siddhānta : Siddhāntin points out that though by the statement ''यदाहवनीये जुहोति'' the क्रतुसम्बन्ध is stated for आहवनीय, there is no harm if आधान is taken as enjoined for आहवनीयस्वरूप only. Moreover before आधान there is no क्रतुसम्बन्ध for आहवनीय etc. Hence आधान is only अग्न्यर्थ.

''यदाहवनीये जुहोति'' इति क्रतुसम्बन्धश्रवणेऽप्याहवनीयादिस्वरूपस्य दृष्टत्वात्तत्स्वरूपानुवादेनाधानविधानाऽनर्थक्याभावात्, आधानवाक्यप्रवृत्तेः प्राक् क्रतुसम्बन्धप्रसिद्ध्यभावाच्च क्रतुसम्बन्धित्वाकारेणाग्नीनामुद्देश्यत्वस्य अनावश्यकत्वान्न प्रकृतिभूतदर्शाद्यङ्गादिद्वारा क्रत्वर्थत्वमाधानस्येत्यग्न्यर्थत्वमेव ।

पवमानेष्टीनामसंस्कृतेऽग्नौ कर्तव्यताधिकरणम् (III-6-6)

Here, a question is raised whether the पवमानेष्टि be performed in संस्कृताग्नि or ordinary अग्नि.

किं संस्कृते अग्नौ पवमानेष्टय: कार्या उत तदसंस्कृतेऽग्नाविति सन्देह:

Pūrvapakṣa : Pūrvapakṣin states that पवमानेष्टिs are दर्शपूर्णमासविकृति. As these are इष्टिs these have to be performed in संस्कृताग्नि only.

पूर्वपक्षस्तु– पवमानेष्टीनां दर्शपूर्णमासविकृतित्वात् इष्टित्वहेतुना दर्शादीष्टिदृष्टान्तेनेष्टि-संस्कृताग्नावनुष्ठातव्यतानुमानाच्च संस्कृताग्नावेवेष्टय: इति ।

Siddhāntin : Siddhāntin points out that at the time of पवमानेष्टि the यागकर्म is not yet started. These इष्टिs are not the auxiliaries of याग. Hence these have to be observed in असंस्कृताग्नि only

सिद्धान्तस्तु कर्मणस्त्वप्रवृत्तत्वात् प्रकृतावनङ्गत्वान्नास्त्यतिदेश इत्यसंस्कृताग्नावेव ता अनुष्ठेया: ।

उपाकरणादीनामग्नीषोमयिधर्मताधिकरणम् (III-6-7)

At ज्योतिष्टोम, three पशुs for अग्निष्टोमसंस्था viz. अग्नीषोमीय, सवनीय and अनुबन्ध्य are stated. पशुधर्मs such as यूपच्छेदन, उपाकरण are stated. Here the question is raised whether these पशुधर्मs are enjoined for all the three पशुs or only for सवनीय or for सवनीय and अग्नीषोमीय or only for अग्नीषोमीय is raised.

ज्योतिष्टोमे अग्निष्टोमसंस्थाके त्रय: पशव आम्नाता: अग्नीषोमीय: सवनीयोऽनुबन्ध्य-श्चेति । तथा पशुधर्मा यूपच्छेदनोपाकरणपर्यग्निकरणादय: । तत्र किमेते पशुधर्मास्त्रयाणां पशूनां साधारण्येन विधीयन्ते, अथ सवनीयस्यैव, सवनीयाग्नीषोमीययोर्वा अग्नीषोमीयस्यैव वा इति चतुर्धा सन्देह: ।

Pūrvapakṣa : Pūrvapakṣin states the grounds for all the four alternatives and does not specifically support any one of them.

Siddhānta : Siddhāntin explains the inadequacy of the grounds given by Pūrvapakṣin for first three alternatives and states that the पशुधर्मs are only in respect of अग्नीषोमीय.

आनर्थक्यप्रतिहतज्योतिष्टोमप्रकरणबाधेन सन्निधिरूपस्थानप्रमाणादग्नीषोमीयार्थाः पशुधर्मा इति ।

शाखाहरणादीनामुभयदोहधर्मताधिकरणम् (III-6-8)

At दर्शपूर्णमास, पलाशशाखाच्छेदन, वत्सापकरण etc. दोहधर्माः are stated. दोह means milking the cow. There are two दोहs. One in the evening the earlier day, another, next day morning. Here whether the दोहधर्मs are for the दोह of the evening or both for the evening and morning.

i) दर्शपूर्णमासप्रकरणे पलाशशाखाच्छेदनं तथा वत्सापकरणमित्यादयो दोहधर्माः पठिताः । दोहौ द्वौ स्तः । पूर्वेद्यू रात्रावेको दोहः । परेद्युः प्रातरन्यः । दोहधर्माः पूर्वेद्युरनुष्ठीयन्ते ।

ii) ते किं सायंदोहार्था उतोभयार्था इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that these are for the evening दोह only.

पूर्वत्रेवानुष्ठानसादेश्यादवान्तरप्रकरणाद्वा सायंदोहार्था इति प्राप्तम् ।

Siddhānta : Siddhāntin states that these are in दर्शपूर्णमासप्रकरण since the प्रकरण for both evening दोह and morning दोह is same, these are for both of them.

अतो दर्शपूर्णमासप्रकरणेन गृहीता दोहधर्माः प्रकरणविशेषात्स्थानबाधेनोभयार्थाः ।

सादनादीनां सवनत्रयधर्मताधिकरणम् (III-6-9)

At ज्योतिष्टोम in प्रात:सवन, ऐन्द्रवायव etc. ten ग्रह्s are used. In माध्यन्दिनसवन, मरुत्वती etc. ग्रह्s are used. In तृतीयसवन, आदित्य etc. ग्रह्s are used. Here सादन, सम्मार्ग etc. ग्रह्धर्म्s are stated near प्रात:सवनीय ग्रह्. Here the question is raised whether these ग्रह्धर्म्s are only for प्रातः सवनग्रह्s or for all the ग्रह्s used in the सवनत्रय.

ज्योतिष्टोमे प्रातः सवने सन्त्यैन्द्रवायवादयो दश ग्रहाः । माध्यन्दिने मरुत्वतीयादयः । तृतीयसवने आदित्यादयः । तत्र सादनसम्मार्गादयो ग्रहधर्माः प्रातः सवनीयग्रहसन्निधावाम्नाताः । ते किं ग्रहधर्माः प्रातःसावनिकग्रहार्था उत सवनत्रयगतसर्वग्रहार्था इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that ऐन्द्रवायव etc. ग्रह्s are observed in प्रात:सवन only. Hence, by स्थानप्रमाण the सादन, सम्मार्ग etc. धर्म्s should be considered as धर्म्s of ऐन्द्रवायव etc. only.

ऐन्द्रवायवादिग्रहाणां प्रातस्सवन एवानुष्ठानेन तेषामनुष्ठानसादेश्यरूपस्थानप्रमाणसत्त्वादन्येषां अन्यदाऽनुष्ठानेन तदभावादैन्द्रवायवादीनामेव ते धर्मा इति प्राप्ते ।

Siddhānta : Siddhāntin states that सादन etc. are ग्रह्धर्म्s by वाक्यप्रमाण and ज्योतिष्टोमधर्म by प्रकरणप्रमाण. वाक्य and प्रकरण are superior to स्थान. Hence सादन etc. धर्म्s should be observed for the ग्रह्s at all the three सवनs.

सिद्धान्तः, सादनादीनां वाक्येन ग्रहधर्मत्वं प्रकरणेन ज्योतिष्टोमधर्मत्वञ्चावगम्यत इति प्रबलाभ्यां वाक्यप्रकरणाभ्यां स्थानं बाधित्वा त्रिषु सवनेषु सादनादयोऽवतिष्ठन्त इति सर्वार्था इति ।

रशनात्रिवृत्त्वादीनां सर्वपशुधर्मताधिकरणम् (III-6-10)

At अग्नीषोमीय near the पशु, परिवेष्टन of यूप by रशना and त्रिवृत्त्व and दर्भमयत्व of रशना are stated. Here the question is raised whether the रशना and its धर्म्s are for अग्नीषोमीय परिव्याण or सवनीय परिव्याण.

i) अग्नीषोमीयपशुसन्निधौ ''परिव्ययति, ऊर्ग्वै रशना'' इति ''त्रिवृद्भवति'' इति ''दर्भमयी भवति'' इत्यादिना रशनया यूपस्य परिवेष्टनं, रशनायास्त्रिवृत्त्वं, दर्भमयत्वञ्चेत्यादयो धर्मा उक्ताः ।

ii) ते किं परिव्याणसाधनरशना तद्धर्माश्चाग्नीषोमीयपरिव्याणार्थाः सवनीय परिव्याणार्था अपीति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that if रशना etc. are meant for परिव्याणस्वरूप only it is अनर्थक. Therefore by स्थान, प्रकरण or अवान्तरप्रकरण, रशना and its धर्मs are for परिव्याण which is for यूप of अग्नीषोमीय.

इह तु परिव्याणस्वरूपमात्रार्थत्वे रशनादीनामानर्थक्यादबाधितसन्निधिरूपस्थान-प्रकरणादवान्तरप्रकरणाद्वा अग्नीषोमीयार्थयूपार्थपरिव्याणार्था रशना तद्धर्माश्चेति प्राप्ते ।

Siddhānta : Siddhāntin states that यूप is for पशुत्रय. Therefore रशना and रशनाधर्मs are for सवनीयपरिव्याण also.

यूपश्च पशुत्रयस्यापि तन्त्रमिति वक्ष्यमाणत्वेन अग्नीषोमीयपशुसम्बन्धि यूपसम्बन्धि सवनीयपरिव्याणमपि भवतीति श्रुत्या तदर्था रशना तद्धर्माश्चेति ।

अंश्वदाभ्ययोरपि सादनादिधर्मत्वाधिकरणम् (III-6-11)

सादन, सम्मार्जन etc. ग्रहधर्मs are stated to be the auxiliaries of ग्रहs in the three सवनs. Here the question is raised whether these are the auxiliaries of the two ग्रहs viz. अंशु and अदाभ्य which are stated without reference to any particular sacrifice.

ग्रहधर्माणां सवनत्रयग्रहसाधारण्यमुक्तम् । ते किं ''अंशु गृह्णाति'' ''अदाभ्यं गृह्णाति'' इति अनारभ्य श्रुतयोरंश्वदाभ्यसंज्ञकयोर्ग्रहयोरपि सम्भवन्त्युत नेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that these धर्मs are to be observed

only for such ग्रह्s that are stated in ज्योतिष्टोमप्रकरण but not for the two ग्रह्s viz. अंशु and अदाभ्य which are not stated in the context of ज्योतिष्टोम.

ज्योतिष्टोमप्रकरणवशेन प्राकरिणकानामेव ते धर्माः । न त्वंश्वदाभ्ययोरपि । असन्निधानादिति प्राप्तम् ।

Siddhānta : Siddhāntin states that the ग्रहधर्मs are stated as the means of ज्योतिष्टोमापूर्व. Such a position is found even in the case of अंशु and अदाभ्य. Hence ग्रहधर्मs are also the धर्मs of these two ग्रह्s, by वाक्यप्रमाण.

ज्योतिष्टोमापूर्वसाधनत्वाकारेणोद्देश्यत्वात्, तादृशाकारश्चानारभ्याधीतसाधारण इति तेन रूपेण ग्रहानुद्दिश्य सादनादि विदधता ''उपोप्तेऽन्ये ग्रहाः साद्यन्ते'' इत्यादिवाक्येन अप्राकरणिकयोस्तयोरप्यमी धर्माः स्युरिति ।

चित्रिण्यादीष्टकानामग्न्यङ्गताधिकरणम् (III-6-12)

The statements ''चित्रिणीः उपदधाति'', ''वज्रिणीः उपदधाति'' are found without reference to any particular sacrifice. In the अग्निप्रकरण, by the statement ''अखण्डाः अकृष्णाः कुर्यात्'', अखण्डत्व and अकृष्णत्वधर्मs are stated for इष्टकाs. Here the question is raised whether these are the धर्मs of such इष्टकाs that are used in अग्निप्रकरण only or these are the धर्मs of चित्रिणी and वज्रिणी इष्टकाs also.

अनारभ्य श्रूयते ''चित्रिणीरुपदधाति'' वज्रिणीरुपदधाति इत्यादि । अग्निप्रकरणे च ''अखण्डा अकृष्णा कुर्यात्'' इतीष्टकानां धर्माः उक्ताः । ते किं प्राकरिणिकीनां धर्मा उतानारभ्याधीतानां चित्रिणीसंज्ञकानामपीति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that there is no विनियोजकवाक्य in the case of चित्रिणी and वज्रिणी इष्टाकाs. Therefore अखण्डत्व and अकृष्णत्व धर्मs cannot be assigned to them.

चित्रिण्यादिनामकेष्टकाविशेषणं विनियोजकवाक्यमपि न प्राकरणिकमस्ति । अतो न तद्धर्मवत्त्वं तासामिति ।

Siddhānta : Siddhāntin states that अखण्डत्व etc धर्मs are not enjoined for the इष्टकास्वरूप but as अग्र्यपूर्वसाधन such position is found in the case of चित्रिणी etc. also. "The इष्टकाs that are for अग्र्यपूर्व should be अखण्ड and अकृष्ण" is stated here.

इष्टकास्वरूपानुवादेनाखण्डत्वादिधर्मविधानानर्थक्येनाग्र्यपूर्वसाधनत्वाकरेणैवोद्देष्टव्यत्वात्तादृशाकारस्य चित्रिण्यादावपि सत्त्वेन "या इष्टका अग्र्यपूर्वीयास्ता अखण्डाः अकृष्णाः कुर्यात्" इत्येवमिष्टकोद्देशेन धर्मान्विदधद्वाक्येन प्रकरणाद्बलवता अनारभ्याधीतानां चित्रिण्यादीनामपि धर्माः ।

अभिषवादीनां सोममात्राङ्गताधिकरणम् (III-6-13)

In the statements "सोमं क्रीणाति, सोमं अभिषुणोति" etc. क्रय and अभिषव that are the संस्कारs for सोम are stated. Here the question is raised whether these are to be adopted for फलचमस by उपदेश or not.

"सोमं क्रीणाति सोममभिषुणोति", इत्यादिवाक्योक्तक्रयाभिषवादिसोमसंस्काररूपधर्मा अपि फलचमसे उपदेशतः प्राप्नुवन्ति, उत नेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that फलचमस is also a kind of इज्या. Hence it is also अपूर्वसाधन. Therefore it has to be adopted by उपदेश only.

फलचमसस्यापीज्याविशेषत्वेनापूर्वसाधनत्वविशेषादुपदेशात एव सोमधर्माः स्युरिति ।

Siddhānta : Siddhāntin points out that क्रय etc धर्मs are the धर्मs of नित्यभूतसोम while नैमित्तिकफलचमस is सोमविकार. Hence these धर्मs are to be adopted by अतिदेश only.

नित्यभूतसोमार्था एव क्रयादयो धर्माः । नैमित्तिकफलचमसस्य तु सोमविकारत्वादतिदेशतो धर्मा

प्रतिनिधिष्वपि मुख्यधर्मानुष्ठानाधिकरणम् (III-6-14)

In the fourth अधिकरण of 3rd पाद of 6th अध्याय it will be stated that when the prescribed द्रव्य is not available, प्रतिनिधि is to be taken. Here the question is raised whether the enjoining of the प्रतिनिधि is on par with the enjoining of the मुख्यद्रव्य.

षष्ठे श्रुतिप्रमाणत्वादिति तृतीयपादीये चतुर्थेऽधिकरणे श्रुतद्रव्यापचारे प्रतिनिधिरुपादेय इति वक्ष्यते । स किं मुख्येन समानविधान उत नेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that प्रतिनिधि is taken only when the मुख्य द्रव्य is not available. Therefore enjoining of प्रतिनिधि cannot be on par with the मुख्यद्रव्य.

मुख्याभावनिमित्तकत्वात्प्रतिनिधेः फलचमसवदतिदेशात एव धर्मप्राप्तेर्न मुख्यद्रव्यसमानविधिः प्रतिनिधिरिति प्राप्तम् ।

Siddhānta : Siddhāntin points out that though नीवार etc. प्रतिनिधिs are taken when मुख्यद्रव्य is not available, these are not taken independently as यागसाधन but a few व्रीहि अवयवs that are present in नीवार are taken as यागसाधन since सकलावयवs are not available. As it is not possible to pick up the few व्रीहि अवयवs found in नीवार, the नीवारs are taken as प्रतिनिधि. Hence the नीवारविधि is on par with व्रीहिविधि.

सिद्धान्तस्तु नीवारादिप्रतिनिधिद्रव्यस्य मुख्यव्रीह्याद्यभावनिमित्तत्वेऽपि न स्वातन्त्र्येण ते यागसाधनत्वेनोपादीयन्ते । किन्तु ये नीवारादिगता व्रीह्यवयवा विकला दृश्यन्ते त एव सकलाभावाद्यागीयत्वेनोपादीयन्ते । नीवारोपादानं विना तद्गतव्रीह्यवयवोपादानाशक्तेर्नान्तरीयकतयैव तदुपादानम् ।

श्रुतेष्वपि प्रतिनिधिषु मुख्यधर्मानुष्ठानाधिकरणम् (III-6-15)

In the statement ''यदि सोमं न विन्देत पूतीकानभिषुणुयात्,'' पूतीक is stated as प्रतिनिधि for सोम. Here the question is raised whether पूतीककाविधि is on par with सोमविधि or not.

''यदि सोमं न विन्देत पूतीतिकानभिषुणुयात्'' इति प्रतिनिधिः श्रूयते । तत्र किं समानविधानं उतातिदेशत एव धर्मप्राप्तिः पूतीके इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that पूतिकs are not प्राप्त here. Therefore considering them as साधन is गौरव. Hence, पूतीकलताविधान is असमानविधान.

पूतीकानामत्यन्ताप्राप्तसाधनत्वविधौ गौरवापत्तेः असमानविधाना पूतीकलता, इति प्राप्तम् ।

Siddhānta : Siddhāntin points out that when सोम is not available a few सोमावयवs that are present in पूतीकलता only be taken.

Hence, पूतीकग्रहण is for the purpose of सोमावयवग्रहण present in them. Hence, सोमावयवs only are साधन here, in view of this पूतिकलता विधान is सोमसमानविधान.

सिद्धान्तस्तु— सोमाभावे विकलांस्तदवयवान् उपादित्सुः पूतीकगतानेवोपादद्यादिति प्राप्तप्रतिनिधिनियमविधिपक्षे लाघवान्, पूतीकग्रहणस्य च सोमावयवोपलक्षणार्थतयोपपत्तेः, तत्रत्यसोमावयवानामेव साधनत्वात् सोमसमानविधाना पूतीकलतेति ।

दीक्षणीयादिधर्माणामग्निष्टोमाङ्गताधिकरणम् (III-6-16)

At ज्योतिष्टोम there are four संस्थाs viz अग्निष्टोम, उक्थ्य, षोडशी, and अतिरात्र. Though ज्योतिष्टोम is one, it is considered as four on the basis of संस्थाभेद. Among these four, the first one i.e. अग्निष्टोम is क्रत्वर्थ. The other

three are enjoined for फल. Here the question is raised whether the दीक्षणीयेष्टि, प्रायणीयेष्टि etc. auxiliaries are enjoined for प्रथमसंस्था i.e., अग्निष्टोम only or for other संस्थाs also.

i) ज्योतिष्टोमस्य चतस्रः संस्था अग्निष्टोमः उक्थ्यः षोडशी अतिरात्रश्चेति । तत्र अग्निष्टोमः क्रत्वर्थः । अन्यास्तिस्रः संस्थाः ज्योतिष्टोमाश्रयाः फले विधीयन्ते ''पशुकामः उक्थ्यं गृह्णीयात्'' इति ''षोडशिना वीर्यकामः स्तुवीत'', इति ''अतिरात्रेण प्रजाकामं याजयेत्'' इति ।

ii) तत्र ज्योतिष्टोमप्रकरणे श्रुतो दीक्षिणीयेष्टयाद्यङ्गविधिर्ज्योतिष्टोमस्य प्रथमसंस्थाविशेषे अग्निष्टोमे यथा प्रवृत्तस्तथैवोक्थ्यादावप्युपदेशतः प्रवर्तते उत अतिदेशात इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that both क्रतु and its संस्थाs belong to the same प्रकरण. Hence there has to be समानविधान for all the four ज्योतिष्टोमसंस्थाs.

पूर्वपक्षस्तु संस्थानां क्रतोश्च फलवत्वेन कथंभावाकांक्षालक्षणप्रकरण- तौल्यात्पूर्वत्र प्रतिनिधिरिव समानविधानमेवाङ्गानामुभयत्र युक्तमिति ।

Siddhānta : Siddhāntin states that अग्निष्टोमसंस्था is distinct from काम्यसंस्थाs. Hence ignoring the काम्यसंस्थाs, the धर्मs have to be considered as क्रत्वर्थ only.

क्रतुस्तु काम्यसंस्थाभिर्विनाप्यग्निष्टोमसंस्थोऽस्तीति काम्यसंस्थाऽनादरेणैव धर्मान् गृह्णातीति केवलक्रत्वर्थता तु शक्या कल्पयितुम् ।

तृतीयाध्यायस्य सप्तमः पादः

बर्हिरादीनां दर्शपूर्णमासतदङ्गोभयाङ्गताधिकरणम् (III-7-1)

At दर्शपूर्णमास the statements वेद्यां हवींषि आसादयति and बर्हिषि हवींषि आसादयति are found. The auxiliaries of these वेदिं खनति, बर्हिः लुनाति are stated. Here the question is raised whether these auxiliaries are of प्रयाजादिरूप अङ्गs and दर्शरूपप्रधान commonly or merely the auxiliaries of प्रधान हविस् only.

दर्शपूर्णमासयोः श्रूयते ''वेद्यां हवींष्यासादयति'' ''बर्हिषि हवींष्यासादयति'' इति । तथा तद्धर्माश्च श्रूयन्ते ''वेदिं खनति बर्हिः लुनाति'' इत्यादयः । ते किं प्रयाजादि-रूपाङ्गदर्शादिरूपप्रधानयोः साधारणा उत प्रधानहविषामेवेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that it is necessary to have एकवाक्यता with प्रकरण. प्रकरण is that of प्रधान. Therefore these वेदि and बर्हि with their auxiliaries खनन, लवन etc. are the auxiliaries of प्रधानयाग.

प्रकरणेनैकवाक्यतावश्यम्भावात्, प्रकरणञ्च प्रधानस्येति प्रधानहविषामेव खननलवनादि-स्वधर्मार्पितं वेदिबर्हिरादिकमङ्गमिति ।

Siddhānta : Siddhāntin points out that the statement वेद्यां हवींषि आसादयति does not convey that ''हविरासादनद्वारा प्रधानापूर्वं कुर्यात्'', but it conveys that the हविस् which is दर्शपूर्णमासोपकारि that must be placed on वेदि. The हविस् of प्रयाज etc. is also प्रधानोपकारि. Therefore वेदि etc. are the auxiliaries of both the हविस् of both प्रधानयाग and अङ्गभूतप्रयाजादियाग.

''हविरासादनद्वारा प्रधानापूर्वं कुर्यात्'' इत्यर्थो न वेद्यामिति वाक्यस्य, किन्तु ''यद्दर्शपूर्णमासोपकारिहविः तद्वेद्याम्'' इत्यर्थः । एवं हि नातिप्रसङ्गः । अङ्गभूत-प्रयाजादेर्हविरपि प्रधानस्योपकारकमेव । तत्रापि वेद्यादिरङ्गम् ।

स्वामिसंस्काराणां प्रधानार्थताधिकरणम् (III-7-2)

At ज्योतिष्टोम shaving केश & श्मश्रु etc. संस्कारs are stated for यजमान. Here, the question is raised whether the संस्कारs stated for यजमान have to be observed both in respect of अङ्ग and प्रधान or प्रधान only.

ज्योतिष्टोमे केशश्मश्रुवपनादयः 'संस्कारास्तु पुरुषसामर्थ्ये' इत्युत्तरपादे वक्ष्यमाणदिशा यजमानसंस्काररूपा धर्मा श्रुताः । ग्रहसोमहोमो ज्योतिष्टोमे मुख्यः । अग्नीषोमीय-पश्वादिकमङ्गम् । तत्र यजमानधर्माः किमङ्गप्रधानार्थाः, प्रधानार्था एव वेति सन्देहः ।

Pūrvpakṣa : Pūrvapakṣin argues that these are कर्तृधर्मs. कर्तृत्व is for both मुख्य and अङ्ग. Therefore these are necessary both for अङ्ग and प्रधान.

पूर्वपक्षस्तु अङ्गप्रधानयोर्द्वयोरप्येते पूर्वत्रेवोपकारकाः । कुतः ? कर्तृधर्मत्वात् । यजमानो हि कर्तृतया वपनादिभिः संस्क्रियते । कर्तृत्वञ्च यथा मुख्यं प्रति तथाङ्गं प्रत्यप्यस्तीत्युभयो-रुपकारका एते धर्मा इति ।

Siddhānta : Siddhāntin points out that यजमान has two capacities viz. कर्तृत्व and भोक्तृत्व. The role of कर्तृत्व is क्रियानिष्पत्ति while the role of भोक्तृत्व is फलभोग. The former is दृष्ट while the latter is अदृष्ट. The उपकार provided by वपन etc.संस्कारs is अदृष्ट. Hence these are related with भोक्तृत्व role. It is प्रधान that leads to फलभोग. Hence the वपन etc. यजमानसंस्कारs are for प्रधान only.

सिद्धान्तस्तु, यजमानस्य कर्तृत्वभोक्तृत्वरूपौ द्वावाकारौ स्तः । तत्र क्रियानिष्पत्तिर्दृष्टा । फलभोगो ह्यदृष्टः । एवञ्च वपनादिकृतोपकारस्याप्यदृष्टत्वाद्भोक्तृशेषाः वपनादयः फलभोग-साधने प्रधान एव पर्यवस्यन्ति ।

सौमिकवेद्यादीनामङ्गप्रधानोभयाङ्गताधिकरणम् (III-7-3)

At ज्योतिष्टोम वेदि is stated. Its measurement is also given. Here the question is raised whether this वेदि is for प्रधान or for अङ्गs.

i) ज्योतिष्टोमे वेदिः श्रूयते ''षट्त्रिंशत्प्रक्रमा प्राची, चतुर्विंशतिरग्रेण, विंशज्जघनेन, इयति शक्ष्यामहेऽस्याम् कर्तुं'' इति । अस्यार्थः, प्रक्रमः पादः । प्राची षट्त्रिंशत्प्रक्रमदीर्घा । चतुर्विंशतिरग्रेण प्राग्भागे तिर्यक्चतुर्विंशतिप्रक्रमव्यायामा । जघनेन पश्चाद्भागे तिर्यक्त्रिंशत्प्रक्रमव्यायामा । इयति इयत्यां एतावत्परिमाणवत्यां अस्यां वेद्यां कर्तुम् शक्ता स्म इति ।

ii) तत्र सन्देहः सौमिकीयं वेदिः प्रधानार्था अथाङ्गार्थापीति ।

Pūrvapakṣa : Pūrvapakṣin argues that in the statement ''शक्ष्यामहे अस्यां कर्तुम्'', the word कर्तुम् indicates that it is related to something that is proposed to be performed. It is प्रधान that is proposed to be performed, because, that leads to the result, but not the अङ्गs. The अङ्गs are only to achieve प्रधान. Therefore वेदि is for प्रधान only.

पूर्वपक्षस्तु ''इयति शक्ष्यामहे अस्यां कर्तुं'' इति चिकीर्षितविषय एव भवति । चिकीर्षितश्च प्रधानम् । फलहेतुत्वात् । नाङ्गानि । अतः पूर्वत्रेव प्रधानार्थैव वेदिरिति ।

Siddhānta : Siddhāntin points out that though प्रधान leads to the result, it does so when performed along with the auxiliaries only. Therefore the वेदि is an auxiliary of both अङ्ग and प्रधान.

प्रधानस्य फलहेतुत्वेन चिकीर्षितत्वेऽपि साङ्गस्यैव फलं प्रति पुष्कलकारणतया साङ्गमेव चिकीर्षितमित्यंगप्रधानोभयार्था वेदिरिति ।

अभिमर्शनादीनामङ्गप्रदानोभयाङ्गताधिकरणम् (III-7-4)

At दर्शपूर्णमास, it is stated that by the hymn चतुर्होता, हविरभिमर्शन be made on पौर्णमासी and by the hymn पञ्चहोता, हविरभिमर्शन be made on अमावास्या . The hymn पृथिवी होता द्यौः अध्वर्युः is designated as चतुर्होता and the hymn अग्निर्होता etc. is designated as पञ्चहोता. Here the question is raised whether these hymns are for both अङ्ग and प्रधान or only for प्रधान.

''चतुर्होत्रा पौर्णमासीमभिमृशेत्, पञ्चहोत्राऽमावास्याम्'' इति दर्शपूर्णमासयोर्हविरभिमर्शनार्थौ द्वौ मन्त्रौ श्रुतौ । पृथिवी होता द्यौरध्वर्युः'' इत्यादिको मन्त्रश्चतुर्होतेत्युच्यते । ''अग्निर्होता'' इत्यादिको मन्त्रः पञ्चहोता । तत्र सन्देहः किं तौ मन्त्रावङ्गप्रधानार्थावुत प्रधानार्थावेवेति ।

Pūrvapakṣa : Pūrvapakṣin argues that since these मन्त्रs are stated with प्रधानवाचिपौर्णमासी and अमावास्या these are for प्रधान only.

प्रधानवाचिपौर्णमास्यादिशब्दार्थोद्देशेन श्रुतौ मन्त्रौ प्रधानार्थाविववचनाद्युक्ताविति पूर्वः पक्षः।

Siddhānta : Siddhāntin points out that the expressions पौर्णमासी and अमावास्या convey कर्म. No अभिमर्शन can be made for कर्म. Hence it has to be understood as whatever is उपकारक for पौर्णमासी कर्म, for that अभिमर्शन be made by the hymn चतुर्होता and whatever is उपकारक for अमावास्या कर्म, अभिमर्शन be made for that by the hymn पञ्चहोता. In these two कर्मs, there is both प्रधानहविस् and अङ्गहविस्. Therefore these two hymns are for the अभिमर्शन of both प्रधानहविस् and अङ्गहविस्.

पौर्णमास्यमावास्याशब्दौ कर्मवचनौ । न च कर्मणोरभिमर्शनं सम्भवति । पौर्णमासीकर्मणि यदस्त्युपकारकं तच्चतुर्होत्रा अभिमृशेत्, अमावास्याकर्मणि यत्तत्पञ्चहोत्रेति । तदुभयकर्मणि विद्यमानश्च प्रधानहविरङ्गहविश्च भवति । तस्मादङ्गप्रधानहविरभिमर्शार्थौ मन्त्राविति ।

दीक्षादक्षिणयोः प्रधानार्थताधिकरणम् (III-7-5)

At ज्योतिष्टोम, दीक्षा and दक्षिणा are stated by the statements ''दण्डेन दीक्षयति etc. and द्वादशशतं दक्षिणा''. Here the question is raised whether दीक्षा and दक्षिणा are for both अङ्ग and प्रधान or प्रधान only.

ज्योतिष्टोमे दीक्षा दक्षिणा च श्रुते । ''दण्डेन दीक्षयति, वाससा दीक्षयति, तिस्रो दीक्षाः'' इति ''तस्य द्वादशशतं दक्षिणा'' इति । ते दीक्षादक्षिणे अङ्गप्रधानोभयार्थे उत प्रधानार्थे इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that by the statement ''दीक्षितो अग्नीषोमीयं पशुमालभेत'', there is विनियोग for अङ्गs also. दक्षिणा is अङ्ग for entire प्रयोग. Hence, both दीक्षा and दक्षिणा are for both प्रधान and अङ्ग.

पूर्वपक्षस्तु वपनन्यायेन दीक्षाया यजमानसंस्कारतया प्रधानार्थत्वे सिद्धेऽपि ''दीक्षितोऽग्नीषोमीयं पशुमालभेत'' इति ''दीक्षितो भृतिं वन्वीत'' इत्यादावङ्गेष्वपि विनियोगात्, दक्षिणायाः प्रयोगाङ्गत्वात् पूर्वत्रेवोभयार्थं दीक्षादक्षिणम् ।

Siddhānta : Siddhāntin points out that there is a clear statement that दीक्षा and दक्षिणा are प्रधानोपकारक. Hence, these are for प्रधान only.

सिद्धान्तस्तु षष्ठ्याः साक्षात्सम्बन्धरूपमुख्यार्थसम्भवे परम्परासाधारणसामान्यसम्बन्धस्यानाश्रयणीयत्वाद्वचनबलात्प्रधानोपकारकमेव दीक्षादक्षिणमिति ।

अन्तर्वेदेर्यूपानङ्गताधिकरणम् (III-7-6)

At अग्नीषोमीयपशु stating that ''यूपं मिनोति'' it is further stated that ''अर्धमन्तर्वेदि मिनोति, अर्धं बहिर्वेदि,'' मिनोति means प्रक्षिपति puts in. Here the question is raised whether अन्तर्वेद्येकदेश is enjoined here as an auxiliary of यूप or it indicates the area of मान together with बहिर्वेदि.

अग्नीषोमीयपशौ ''यूपं मिनोति'' इति प्रकृत्य श्रूयते ''अर्धमन्तर्वेदि मिनोति, अर्धं बहिर्वेदि इति । मिनोति प्रक्षिपति । तत्र किमन्तर्वेद्येकदेशो यूपाङ्गत्वेन विधीयते उत बहिर्वेदिसहितो यूपस्य मानदेशं लक्षयतीति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that by the statement अर्धमन्तः, वेद्येकदेश is enjoined as an auxiliary of यूप. When अर्ध is put in अन्तः, naturally अर्धान्तर will be बहिः. This is just an अनुवाद of natural position.

''अर्धमन्तः'' इति वचनात् वेद्येकदेश एव यूपाङ्गतया चोद्यते । अर्धे च तत्र मीयमाने अर्धान्तरं बहिरेव भवतीति ''अर्धं बहिर्वेदि'' इत्यनुवाद इति प्राप्तम् ।

Siddhānta : Siddhāntin points out that the expression अर्धमन्तर्वेदि does not mean अर्धमेव अन्तर्वेदि but it means अर्धं अन्तर्वेदि मातव्यम् । Consequently अर्धान्तर is neither enjoined nor rejected. वेद्यन्तर्भाग is संस्कृत while the वेदि बहिर्भाग is असंस्कृत. Hence बहिर्वेदि has to be separately enjoined. This results in वाक्यभेद. However the असंस्कृत लौकिकदेश presented by उपलक्षण by अभ्यन्तर and बाह्यभाग is sufficient for putting the यूप. If this लौकिकदेश is enjoined, there will be no वाक्यभेद. Hence लौकिकदेश is enjoined as an auxiliary of यूप.

सिद्धान्तस्तु ''अर्धमन्तर्वेदि'' इत्यस्य ''अर्धमेवान्तर्वेदि'' इति न अर्थः । किन्तु ''अर्धं तावदन्तर्वेदि मातव्यम्'' इति । ततश्च अर्धान्तरं न विहितं न प्रतिषिद्धमिति तस्यार्धान्तरस्यान्तर्वा बहिर्वा मानं स्यात् । तत्र संस्कृतवेद्यन्तर्भाग इव असंस्कृतो वेदि-बहिर्भागो ''बहिर्वेदि'' इत्यनेन विधेय इति वाक्यं भिद्येत । यदा तु वेदेरभ्यन्तरबाह्य-भागाभ्यामुपलक्षितोऽसंस्कृतो लौकिको देशो मीयमानयूपोचितो विधीयते तदा नास्ति वाक्यभेदः । तस्माल्लौकिकदेश एवात्र यूपाङ्गत्वेन विधीयते । न तु संस्कृतो वेदिभाग इति ।

हविर्धानस्य सामिधेन्यनङ्गताधिकरणम् (III-7-7)

At ज्योतिष्टोम it is stated that ''उत यत् सुन्वन्ति तत्सामधेनीरन्वाहुः''. In this statement the expression यत् refers to दक्षिणशकट. In हविर्धानमण्टप there are two शकटs. in the south and the northern region. These शकटs are called हविर्धान. अभिषव has to be performed near this दक्षिणशकट. Here the question is raised whether हविर्धान is an auxiliary of सामिधेनी or the place near it.

ज्योतिष्टोमे श्रूयते ''उत यत्सुन्वन्ति तत्सामिधेनीरन्वाहुः'' इति । हविर्धानमण्टपे दक्षिणोत्तरभागस्थितयोः हविर्धाननामकयोः शकटयोर्मध्ये दक्षिणशकटमत्र यत्तच्छब्दार्थः । तस्य समीपे अभिषवः । तत्र हविर्धानं सामिधेन्यङ्गमुत तल्लक्षितो देश इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that देशलक्षण is not proper. Hence, हविर्धान itself is an auxiliary of सामिधेनी.

युक्ता पूर्वत्र वाक्यभेदभयाल्लक्षणा । प्रकृते तु तदभावान्न देशलक्षणा युक्ता । तस्माद्धविर्धानमेव सामिधेन्यङ्गमिति प्राप्तम् ।

Siddhānta : Siddhāntin points out that अङ्गाङ्गिभाव depends upon आकांक्षा. हविर्धान is utilised for keeping the सोम. Hence, it has no other प्रयोजनाकांक्षा. सामिधेनीs are meant for अग्निसमिन्धन ie., enkindling sacrificial fire. Therefore these also have no other अकांक्षा. Hence, these cannot be considered as अङ्ग and अङ्गी. Hence, the purpose of this statement is to regulate the performance of अभिषव near दक्षिणहविर्धान only.

सामिधेनीनां दर्शपूर्णमासाख्यप्रकृतित उत्तरवेदिस्थाहवनीयदेशात्पश्चिमदेशश्चोदकेनाङ्गतया प्राप्तः । स च दक्षिणोत्तरस्य वा हविर्धानस्य समीपे भवतीति तत् दक्षिणहविर्धानसमीप इति नियममात्रं लाघवाद्विधीयते इति हविर्धानशब्दो हविर्धानसमीपस्याभिषवदेशलक्षक इति ।

अङ्गानामन्यद्वाराऽनुष्ठानाधिकरणम् (III-7-8)

In this अधिकरण the question is raised whether the दर्शपूर्णमास etc. sacrifices be performed by यजमान only in all respects or द्रव्यत्याग हविस्त्याग and दक्षिणादान only has to be performed by him and other items be performed by यजमान or anyone else, or यजमान should perform त्याग only and other items be performed by others.

दर्शपूर्णमासादिकं कर्म यजमानेनैव सर्वं कर्तव्यं, उत द्रव्यत्यागहविस्त्यागदक्षिणादानादिकं तेनैव कार्यमन्यद्यजमानोऽन्यो वेत्यनियमोऽथ त्यागमेव यजमानः कुर्यादन्यत्त्वन्य इति त्रेधा सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that (i) the क्रियाफल has to be obtained by यजमान only. If he does not perform all items of the sacrifice,

he will not be entitled for the results. Therefore he alone has to perform all items.

(ii) Even if यजमान does not perform all items and he gets some items performed by the others. यजमानकर्तृत्व is satisfied. Moreover ऋत्विजs are required to be appointed. If यजमान himself performs all items, then, appointing ऋत्विजs will be purposeless. Hence, excepting त्याग, all other items, may be performed by others also.

i) "स्वर्गकामो यजेत" इति क्रियाफलस्य कर्तृगामित्व एवात्मनेपदविधानात् यजमानस्य सर्वाङ्गोपेतकर्माकर्तृत्वे फलभागित्वाभावापातेन फलार्थी यजमान एव सर्वाङ्गं प्रधानं कुर्यादित्येकः ।

ii) साक्षात्कर्तृत्वेनेव परंपरया प्रयोजककर्तृत्वेनापि भवति । "ऋत्विजो वृणीते" इत्यादिवचनोक्तो ऋत्विजां परिक्रयो अनर्थकः स्यात् । अतो यजमानेनैव त्यागमात्रं कार्यमिति नियमः । अन्यत्र तु स्वयं शक्यश्चेत् स्वयं सर्वं कुर्यात् । अशक्तश्चेदन्येन कारयेत् इति त्यागादन्यत्रानियमः । सर्वकरणपक्षे दक्षिणादानमदृष्टार्थम् । अन्यैः कारयितृत्वपक्षे ऋत्विगानतिरूपदृष्टार्थमिति द्वितीयः ।

Siddhānta : Siddhāntin points out that यजमान will get फल even when he utilises the services of others. परिक्रयण of others is obligatory. Hence, यजमान should get other items excepting त्याग done by others.

सिद्धान्तस्तु प्रयोजककर्तृत्वेनापि फलभाक्त्वे सति परिक्रयणस्य नित्यवदाम्नातस्य पाक्षिकत्वाद्दृष्टार्थत्वयोरयोगात्तन्नित्यत्वाय उत्सर्गादन्यदन्येन कारयितव्यम् इति ।

परिक्रीतानामृत्विजां संख्याविशेषनियमाधिकरणम् (III-7-9)

In the earlier अधिकरण it was stated that excepting त्याग, other items be done by others. In this अधिकरण the question is raised whether only one other is to be employed or many or there is no fixed number.

उत्सर्गादन्यत्रान्यः कर्तेत्युक्तम् । स किमनियतसंख्याकः, किं वा एक उतानेक इति त्रेधा सन्देहः ।

Pūrvapakṣa : (i) In order to justify परिक्रयण, the others are to be employed. This requirement will be satisfied by employing one or two or many. Therefore there is no fixing of the number.

(ii) The others are employed to satisfy the statement of परिक्रयण, by employing one only परिक्रयण is satisfied. Therefore only one has to be employed. The same person gets the designations – अध्वर्यु, होता etc. on the basis of his different roles.

i) पूर्वपक्षस्तु परिक्रयविध्यन्यथानुपपत्या हि कर्त्रन्तरोपादानम् । स चैकस्य द्वयोर्बहूनां वोपादानेऽप्युपपन्न इति नैतावन्त इति नियमे हेतुरस्तीत्यनियम इत्याद्यः ।

ii) परिक्रयणवशेनान्योपादानम् । अतो यावता विना परिक्रयणायोगस्तावदेव कल्पनीयमित्येकमात्रोपादानेपि परिक्रयणाद्युपपत्तेरेक एवान्यः । स च तत्तत्कर्मकर्तृत्वनिमित्ततया अध्वर्युहोत्रादिसंज्ञयाऽभिलप्यत इति द्वितीयः ।

Siddhānta : Siddhāntin points out that the designations ब्रह्मा, अध्वर्यु उद्गाता are given only at the time of inviting them by the statements ब्रह्माणं वृणीते etc. Since वरण of the same person cannot be repeated, the number of priests to be invited has to be as per the number of names given.

"ब्रह्माणं वृणीते उद्गातारं वृणीते अध्वर्युं वृणीते" इति कर्मकृतेः प्राक्प्रवृत्ताभ्यर्थनारूपवरणसमय एव संज्ञानां श्रवणेन वरणनिमित्तत्वमेव तासां वाच्यम् । वरणानि च एकस्यैव पुनः श्रुतिरित्यभ्यासाधिकरणन्यायेन विहितस्य पुनर्विधानायोगात्समिधादियागवद्भिन्नान्येवेति यावद्वरणं संज्ञाभेदो यावत्संज्ञं कर्तृभेदोऽङ्गीकार्यः ।

चमसाध्वर्यूणां पृथक्त्वाधिकरणम् (III-7-10)

At ज्योतिष्टोम the statement "चमसाध्वर्यून् वृणीते" is found. Here, the

question is raised whether these चमसाध्वर्युs are different from sixteen ऋत्विजs already stated or these are among them only.

ज्योतिष्टोमे ''चमसाध्वर्यून् वृणीते'' इति श्रुतम् । ते किं प्रागुक्तषोडशर्त्विग्भ्योऽन्ये उत तेष्वन्यतमा एवेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the designation चमसाध्वर्यु is a यौगिक word. Therefore it is not a ground for वरण. Hence प्रतिप्रस्थाता etc. earlier stated ऋत्विजs only have to be taken as चमसाध्वर्युs on the basis of their holding चमस.

पूर्वपक्षस्तु पूर्वत्र होत्रादिसमाख्यानां भेदकत्वेऽपि चमसाध्वर्युसंज्ञायाः ''चमसेऽध्वर्यवः'' इति योगिकत्वेन वरणनिमित्तत्वाभावान्न कर्तृभेदकतेति प्रागुक्तप्रतिप्रस्थातृप्रभृतय एव चमसयोगाच्चमसाध्वर्यव इति ।

Siddhānta : Siddhāntin points out that the statement चमसाध्वर्यून् वृणीते clearly states their वरण. प्रतिप्रस्थाता etc. whose वरणs has already taken place cannot be taken by this statement of वरण of चमसाध्वर्यु. Hence, these are different.

सिद्धान्तस्तु ''चमसाध्वर्यून् वृणीते'' इति वरणभेदाम्नानात्, वृतेषु तदयोगात्, पूर्वन्यायेन चमसाध्वर्यवोऽन्ये ।

चमसाध्वर्यूणां बहुत्वनियमाधिकरणम् (III-7-11)

In this अधिकरण the question is raised whether बहुत्व of चमसाध्वर्युs stated in the statement ''चमसाध्वर्यून् वृणीते'' is to be taken into account or not.

''चमसाध्वर्यून् वृणीते'' इत्यत्र बहुवचनोक्तं बहुत्वं विवक्षितमुत नेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that as बहुत्वसंख्या is उद्देश्यगत it need not be taken into account like एकत्व of ग्रह in the statement ग्रहं सम्मार्ष्टि. Hence, चमसाध्वर्यूs may be taken as one, two or many.

उद्देश्यगतत्वात् ग्रहैकत्ववदविवक्षितं बहुत्वम् । तथा चैको द्वौ बहवो वा ग्राह्या इति ।

Siddhānta : Siddhāntin points out that here वरणसंस्कारयुक्तचमसाध्वर्युs are enjoined for क्रतु. Hence the बहुत्व here is उपादेयगत but not उद्देश्यगत. Therefore there are many चमसाध्वर्युs.

वरणसंस्कारयुक्तांश्चमसाध्वर्यून् क्रतुं प्रति विधत्ते ''वरणेन चमसाध्वर्यून् कर्तॄन् क्रत्वङ्गत्वेन उपाददीत'' इति । तथा च क्रतुं प्रत्युपादेयत्वात्तद्गता संख्या पश्वेकत्वद्विवक्षणीया ''बहवश्चमसाध्वर्यव:'' इति ।

चमसाध्वर्यूणां दशसंख्यानियमाधिकरणम् (III-7-12)

In the earlier अधिकरण it was established that there are many चमसाध्वर्युs. In this अधिकरण the question is raised whether there is any fixed number of these or not.

चमसाध्वर्यूणां संख्यानियमो नास्त्युतास्तीति सन्देह: ।

Pūrvapakṣa : Pūrvapakṣin argues that since, there is no special ground to fix the number of चमसाध्वर्युs any number of them may be taken or by applying कपिञ्जलाधिकरणन्याय only three may be taken

नियामकाभावादेतावन्त इत्यनियमो वा कपिञ्जलाधिकरणन्यायेन त्रय एवेति ।

Siddhānta : Siddhāntin points out that at ऋतुपेययाग the statement दश चमसाध्वर्यव: is found. Hence, there are only ten चमसाध्वर्युs.

ऋतुपेये यागे ''दश चमसाध्वर्यव:'' इत्यनुवादरूपलिङ्गदर्शनाच्च दशैव चमसाध्वर्यव इति सिद्धान्त: ।

शमितुरपृथक्त्वाधिकरणम् (III-7-13)

In the मन्त्र, ''शमितार उपेत न यज्ञं'' etc. शमिता is stated. Here the question is raised whether this शमिता is one among the ऋत्विजs already stated or is different, since he has a different name.

''शमिता पशुं नयति'' इति ''शमितार उपेत न यज्ञम्'' इति मन्त्रे च श्रुतः शमिता प्रागुक्तेष्वन्यतम उत ततोऽन्य इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that as he has a different name he is different.

पूर्वत्र चमसाध्वर्यूणामिव संज्ञाभेदादन्य इति ।

Siddhānta : Siddhāntin points out that there is no वरण of शमिता. Therefore he is one of the ऋत्विजs already stated on the basis of the role of शमयितृत्व. शमयितृत्व means संज्ञपन. Since, अध्वर्यु does not perform संज्ञपन, the अध्वर्युपुरुषs प्रतिप्रस्थाता etc. have to be taken as शमिता.

i) ''शमितारं वृणीते'' इति वरणविधेरभावात्, शमितेति संज्ञायाः शमयितेत्यर्थे ''शमिता यज्ञे'' इति पाणिनिना निपातित्वेन यौगिकतया पूर्वोक्तान्यतमे संज्ञपनयोगादध्वर्य्वादावपि सम्भवादुक्तेष्वन्यतम इति सिद्धान्तः ।

ii) स चाऽध्वर्यवसमाख्यया संज्ञपनकर्तृतया शमिताऽध्वर्युः प्राप्तस्तथापि ''परागावर्ततेऽध्वर्युः पशोः संज्ञप्यमानात्'' इति वचनेनाध्वर्योः परावृत्तिश्रवणेन अध्वर्युपुरुषाः प्रतिप्रस्थात्रादयः संज्ञपयितार इति ।

उपगातुः अपृथक्त्वाधिकरणम् (III-7-14)

At ज्योतिष्टोम there are उपगाताs. Here the question is raised whether these are distinct from the ऋत्विजs already stated or not.

ज्योतिष्टोमे सन्त्युपगातारः । ते प्रकृतेभ्योऽन्ये उतत एवेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that these are different as these have separate names. Just as in the लौकिक practice there are उपगाताs different from गायकs by the side of गायकs, here also the उपगाताs are different.

उपगातारः प्रागुक्तेभ्योऽन्य एव । यथा लौकिके गायकेभ्योऽन्ये पार्श्वस्था उपगातारस्तथेहाप्युपगातारोऽन्य एव ।

Siddhānta : Siddhāntin points out that there is a specific statement that न अध्वर्युः उपगायेत्. This clearly shows that the other ऋत्विजs can do उपगान. Therefore उपगाताs are not different from ऋत्विजs.

ऋत्विजां मध्य एव केचिदुपगातारो नान्ये । एवं हि सति ''नाध्वर्युरुपगायेत्'' इति निषेधोऽर्थवान् ।

सोमविक्रेतुः पृथक्त्वाधिकरणम् (III-7-15)

There is a सोमविक्रयी. Here the question is raised whether this सोम विक्रयी is one among the ऋत्विजs already stated or different.

अस्ति सोमविक्रयी । स किमुक्तानामन्यतमोऽथान्य इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that as there is no separate वरण of सोमविक्रयी he should be considered as one of the ऋत्विजs.

भेदकवरणाभावात् उपगातृवदुक्तेष्वन्यतम एव सोमविक्रयी इति ।

Siddhānta : Siddhāntin points out that only सोमक्रय is enjoined but not सोमविक्रय. Hence सोमविक्रय is not क्रत्वर्थ. ऋत्विजs are for क्रत्वर्थ. Therefore, they cannot undertake विक्रय. Hence सोमविक्रयी is different from ऋत्विजs.

सिद्धान्तः, क्रयस्यैव विहितत्वेन विक्रयाख्यकर्मणोऽचोदिततया क्रत्वर्थत्वाभावात् क्रत्वर्थमुपात्ता ऋत्विजः कथं विक्रयं कुर्युः । तस्मादुक्तेभ्येऽन्यः सोमविक्रयीति ।

ऋत्विक् इति नाम्नोऽसर्वगामिताधिकरणम् (III-7-16)

भाष्यकारीयं वर्णकम्

In this अधिकरण the question is raised whether ब्रह्मा etc. sixteen ऋत्विजs and ten चमसाध्वर्युs all are ऋत्विजs or only some of them.

एवं पूर्वत्र ब्रह्मादय षोडश, दश चमसाध्वर्यव इति बहवः कर्तार इति सिद्धे, तेषु नामविशेषचिन्तनात्सङ्गतिः । ते सर्वे किमृत्विङ्नामवन्त उत केचिदेवेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the word ऋत्विक् is यौगिक word conveying that these perform यागs. Since all of them participate in the याग and play their respective roles, all these are ऋत्विजs.

पूर्वपक्षस्तु ऋत्विक्छब्दोऽयमृतुयजननिमित्तो यौगिकः । सर्वे च ते कर्मणि तत्तत्कार्यकारणादृतौ यजन्तीति यष्टृशब्देनेव ऋत्विङ्नामवाच्याः ।

Siddhānta : Siddhāntin points out that the name ऋत्विज is not based on participation in the याग but it depends upon वरण as ''ऋत्विजो वृणीते''. This वरण relates to अध्वर्यु etc. other than चमसाध्वर्यु. Therefore अध्वर्यु etc. only are called ऋत्विजs.

सिद्धान्तस्तु ऋत्विक्छब्दस्योक्तदिशा यौगिकत्वे स्यादेवं सर्वेषामृत्विक्त्वम् । न चैवम् । किन्तु ''ऋत्विजो वृणीते'' इति वरणनिमित्तकः । तच्च वरणं चमसाध्वर्युवरणव्यावृत्त-मध्वर्य्वादितत्तन्निष्ठमेव निमित्तमिध्वर्य्वादय एव ऋत्विङ्नामानः ।

वार्तिककारीयम् वर्णकम्

वार्तिककार puts it in a different way. He takes the name ऋत्विज on the basis of ऋतु यजन only. However to exclude चमसाध्वर्यु, he takes this ऋतुयजन related to अध्वर्यु etc. only.

ऋतुयजनहेतुकत्वमेवर्त्विक्छब्दस्याङ्गीकृत्य, चमसाध्वर्युष्वतिप्रसङ्गनिरासाय तत्तद्गतऋतु-यजनविशेषं चमसाध्वर्युव्यावृत्तमुपादाय, अध्वर्य्वादय एव ऋत्विजो नान्ये ।

दीक्षादक्षिणावाक्योक्तब्रह्मादीनामेव सप्तदशार्त्विक्त्वाधिकरणम् (III-7-17)

In this अधिकरण the question is raised whether some among ब्रह्मा etc. and some among चमसाध्वर्यु be taken as ऋत्विजs or ब्रह्मा etc. only are to be taken as ऋत्विजs.

ये प्रागृत्विङ्नामान उक्तास्ते किं ब्रह्मादिषु केचिच्चमसाध्वर्युषु केचिदित्यनियम उत ब्रह्मादय एवेति नियम इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that there is no special ground to consider ब्रह्मा etc. only for this designation. Hence, some among ब्रह्म etc and some among चमसाध्वर्यु may be taken as ऋत्विजs.

विशेषाश्रवणादनियमे प्राप्ते ।

Siddhānta : Siddhāntin points out that by the statement ऋत्विग्भ्यो दक्षिणां ददाति, दक्षिणा for ऋत्विक् is stated. This is followed by the statement अग्नीधे ददाति, ब्रह्मणे ददाति etc. since in दक्षिणावाक्य, ब्रह्म etc. sixteen only are stated, these only are ऋत्विजs.

सिद्धान्तः ब्रह्मादीनामेवर्त्विक्त्वं नान्येषामिति नियम एव । ''ऋत्विग्भ्यो दक्षिणां ददाति'' इत्युक्त्वा ''अग्नीधे ददाति'' इत्यादिदक्षिणावाक्ये ब्रह्मादीनां षोडशानां कीर्तनेन ब्रह्मादिश्रुतिसंयोगाद्दक्षिणाभिर्नियमनिर्णयोपपत्तिः ।

ऋत्विजां स्वामिसप्तदशत्वाधिकरणम् (III-7-18)

In addition to sixteen ऋत्विजs, a seventeenth person is stated. Here the question is raised whether this seventeenth person is सदस्य or यजमान.

दीक्षादक्षिणावाक्ययोः कीर्तनेन ब्रह्मादीनां षोडशानामृत्विक्तसिद्धावत्रावशिष्ट चिन्तनात् सङ्गतिः । सप्तदशः किं सदस्य उत यजमान इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that सदस्य is also present in the hall. Therefore he is seventeenth.

सदसि स्थिततया सदस्यनामकर्त्विक् सप्तदशः ।

Siddhānta : Siddhāntin points out that there is no injunction of any duty for सदस्य. Hence he cannot be taken as seventeenth. Therefore the यजमान who has to play the main role in याग is to be taken as seventeenth.

''सदस्य इदं कुर्यात्'' इति विध्यभावेन तस्य कर्मकरत्वाभावेन यागरूपकर्मकरणत्व-साम्यात् यजमानः सप्तदश इति सिद्धान्तः ।

आध्वर्यवादिष्वेवाध्वर्य्वादीनां कर्तृतनियमाधिकरणम् (III-7-19)

In this अधिकरण, the question whether the duties of अध्वर्यु etc. can be done by anyone of them or on the basis of समाख्या the duties are arranged distinctly for each.

तेषां अध्वर्युप्रभृतीनां कार्यं लिङ्गप्रकरणाभ्यामव्यवस्थितमुत समाख्यया व्यवस्थितमिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that since all these are able to discharge the ritual duties and since the ज्योतिष्टोमादिक्रतुप्रकरण is common to all anyone can do any ritual duty. The समाख्या आध्वर्यव etc. is only पक्षे प्राप्तानुवाद.

सर्वेषां कर्मकृतौ शक्तिसत्त्वाज्ज्योतिष्टोमादिक्रतुप्रकरणस्य सर्वसाधारण्यात्समाख्यातो बल-वद्भ्यां लिङ्गप्रकरणाभ्यामव्यवस्थितं कार्यम् । आध्वर्य्वादिसमाख्या तु पक्षे प्राप्तानुवाद इति प्राप्तम् ।

Siddhānta : Siddhāntin point out that the ritual duties are to be assigned on the basis of the समाख्या i.e. आध्वर्यव, हौत्र etc. From this it is clear that the respective ritual duties are assigned to the respective priests.

लिङ्गप्रकरणाभ्यां कर्तॄणां कार्यानियम इति स्थितपूर्वपक्षस्योत्तरं तत्संयोगादित्यादिसूत्रे उक्तम् । आध्वर्यवं हौत्रं औद्गात्रमिति विशिष्टपुरुषसंयोगात्कर्मणो व्यवस्थैव स्यात् ।

येन येन यद्यत्समाख्यायते तेन तेन तत्तत्कर्तव्यमिति संयोगस्यार्थवत्त्वादिति ।

अग्नेः प्रकृतिविकृतिसर्वार्थताधिकरणम् (III-7-20)

ii) under this अधिकरण, following theme is discussed. Here the question is raised whether the आहवनीय अग्नि stated in the statement यदाहवनीये जुहोति is only for the होमs that are stated in the प्रकृतियाग or for the होमs stated both in प्रकृति and विकृतियागs.

अनारभ्यवादेन ''यदाहवनीये जुहोति'' इति विहिताग्नयः किं प्रकृतावाम्नातहोमार्था उत प्रकृतिविकृत्युभयत्राम्नातहोमार्था इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that the आहवनीय etc. अग्निs are only for प्रकृति होमs.

प्रकृत्याम्नातहोमार्था इति ।

Siddhānta : Siddhāntin points out that आहवनीय etc. अग्निs are both for प्रकृति and विकृति. The expression अग्नयश्च सर्वार्थाः has to be taken by अनुषङ्ग. Because, the statement यदाहवनीये जुहोति is a separate statement not belonging to the context of any particular याग.

सिद्धान्तः, अग्नयश्च स्वकालत्वात् । अग्नयश्च सर्वार्था इत्यनुषङ्गः । स्वकालत्वात् स्वतन्त्रत्वाम्नानात् अप्रकरणाधीतत्वादिति यावदिति ।

समाख्यायातकर्तृत्वस्यापि क्वचिद्बाधाधिकरणम् (III-7-21)

Under this अधिकरण, an objection to the point that the ritual duties are to be assigned on the basis of समाख्या is raised as under, if by the criteria of समाख्या duties are assigned to the respective priests then all the ritual duties stated in अध्वर्युकाण्ड will have to be performed by अध्वर्यु

only. This conflicts with the statement ''प्रतिप्रस्थाता मन्थिनं गृह्णाति,'' ''नेष्टा पत्नीमुदानयति'' etc. This results in ignoring of समाख्या प्रतिप्रस्थाता, नेष्टा etc.

न चैवं समाख्यया नियमे सति अध्वर्युकाण्डे पठितस्य सर्वस्याध्वर्युणैव कार्यत्वात् ''प्रतिप्रस्थाता मन्थिनं गृह्णाति'' ''नेष्टा पत्नीमुदानयति'' इत्यादिवचनानां नेष्ट्रीयमित्यादि समाख्यानाञ्चायोग इति शंक्यम् ।

This objection is answered by pointing out that अध्वर्यु समाख्या on the basis of these ritual duties stated in अध्वर्युकाण्ड is a general समाख्या while प्रतिप्रस्थाता, नेष्टा etc. समाख्याs stated in the same context are विशेषसमाख्याs. The विशेषसमाख्या sets aside सामान्यसमाख्या. Hence these particular ritual duties assigned to particular other priests have to be observed by the particular other priests only.

वचनविशेषसमाख्याभ्यां सामान्यसमाख्यया बाधादिति.

समुचितयोरनुवचनप्रैषयोर्मैत्रावरुणकर्तृकत्वाधिकरणम् (III-7-22)

At अग्नीषोमीयपशु by the statements, ''मैत्रावरुणः प्रैष्यति, चानु चाह'' प्रैष and अनुवचन both are stated together. In the statement अग्नये समिध्यमानायानुब्रूहि, only प्रैष is stated. In another statement प्र वा वाजा अभिद्यवः only अनुवचन is stated. Here the question is raised whether मैत्रावरुण has to perform all the three i.e. केवलप्रैष, केवलानुवचन and प्रैष युक्तानुवचन or he has to perform only प्रैषयुक्तानुवचन.

अग्नीषोमीयपशौ श्रूयते ''मैत्रावरुणः प्रैष्यति चानु चाह'' इति प्रैषशिरस्कानुवचनम् । होताऽयक्षदग्निं समिधम्'' इत्यनुवचनमन्त्रस्यान्ते प्रैषश्रवणात् प्रैषयुक्तानुवचनमस्ति । तथा केवलं प्रैषवचनमप्यस्ति ''अग्नये समिध्यमानायानुब्रूहि'' इत्यादि । तथा केवलानुवचनमप्यस्ति ''प्र वो वाजा अभिद्यवः'' इत्यादिकम् । तत्र सन्देहः किं केवलप्रैषवाक्ये केवलेऽनुवचने प्रैषयुक्तानुवचने च सर्वत्र मैत्रावरुणः कर्तेति मैत्रावरुणवाक्यस्यार्थ उत प्रैषयुक्तानुवचन एव इति ।

Pūrvapakṣa : Pūrvapakṣin argues that though प्रैष and अनुवचन are stated together, their साहित्य is not to be taken into account. Hence मैत्रावरुण has to perform all the three.

पूर्वपक्षस्तु ''प्रैष्यति चानु चाह'' इति चशब्दाभ्यां प्रैषानुवचनयोः साहित्यप्रतीतावपि प्रैषानुवचनयोरुद्देश्यत्वेन तद्गतसाहित्यस्याविवक्षितत्वात्केवलयोः प्रैषानुवचनयोः सहित-प्रैषानुवचनयोश्च सर्वत्रैव कर्तृत्वमिति मैत्रावरुणवाक्यस्यार्थः ।

Siddhānta : Siddhāntin points out that if प्रैष and अनुवचन are taken separately it will result in वाक्यभेद. Therefore the statement where in both प्रैष and अनुवचन are stated together, their साहित्य has to be taken into account. This means that मैत्रावरुण has to observe only प्रैषयुक्तानुवचन not प्रैष alone nor अनुवचन alone. Further it is already known by समाख्या that प्रैष has to be observed by अध्वर्यु and अनुवचन by होता. Therefore मैत्रावरुण has not to observe केवलप्रैष and केवलानुवचन.

सिद्धान्तस्तु, प्रत्येकमुद्देश्यत्वे प्रत्युद्देश्यं वाक्यसमाप्तेर्वाक्यभेदापातेन प्रैषान्तानुवचनरूपः एक एव पदार्थ उद्देश्य इति प्रैषयुक्तानुवचन एव मैत्रावरुणः कर्तेति मैत्रावरुणवाक्यार्थः । किञ्च व्यस्तयोः प्रैषानुवचनयोः समाख्यया अध्वर्युहोतृकर्तृकत्वं निर्ज्ञातमिति न तत्र कर्त्राकांक्षा ।

चमसहोमेऽध्वर्योः कर्तृताधिकरणम् (III-7-23)

Earlier the setting aside of सामान्यसमाख्या by विशेषसमाख्या is stated. Here, an instance of the exception for this position is discussed.

At ज्योतिष्टोम there are चमसाध्वर्युs. Here the question is raised whether चमसहोमs have to be performed by these or by अध्वर्यु.

अत्र तु विशेषसमाख्यया यः सामान्यसमाख्याबाध उक्तस्तस्यापवादः क्रियत इति सङ्गतिः । सन्ति चमसाध्वर्यवो ज्योतिष्टोमे । ते किं चमसाध्वर्युसमाख्यया चमसैर्जुहयुरुता-ध्वर्युरिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that it is already stated earlier that विशेषसमाख्या sets aside सामान्यसमाख्या. चमसाध्वर्युसमाख्या is विशेषसमाख्या while अध्वर्युसमाख्या is सामान्यसमाख्या. Hence setting aside अध्वर्युसमाख्या, चमसाध्वर्युs have to observe चमसहोम.

पूर्वपक्षस्तु, नेष्ट्रीयमित्यादिविशेषसमाख्यया आध्वर्यवमिति सामान्यसमाख्यया इवेहाप्याध्वर्यवसमाख्याया बाधेन चमसाध्वर्युरूपविशेषसमाख्यया चमसैश्चमसाध्वर्यव एव जुहुयुरिति ।

Siddhānta : Siddhāntin points out that when विशेषसमाख्या does not depend upon सामान्यसमाख्या, then only it sets aside सामान्यसमाख्या. But in the case of चमसाध्वर्युs this विशेषसमाख्या is not सामान्यसमाख्यानिरपेक्षा. Therefore it cannot completely set aside अध्वर्युसमाख्या. However, when अध्वर्यु is engaged in ग्रहहोम etc. other ritual duties, चमसाध्वर्युs may observe चमसहोम. This is the purpose of विशेषसमाख्या.

i) सिद्धान्तस्तु, यत्र सामान्यसमाख्यानिरपेक्षैव विशेषसमाख्या तत्रैव तया तद्बाधः । अत्र तु चमसेष्वध्वर्युवदेते भवन्तीति हि तेषु विशेषसमाख्याप्रवृत्तिः । तत्र यदि चमसैरध्वर्युराध्वर्यवमिति सामान्यसमाख्यया न जुहुयात्तदा चमसे तेषां जुह्वतामाध्वर्युवद्भावो न स्यादिति चमसाध्वर्युसमाख्यैव बाधिता स्यात् ।

ii) अध्वर्योरन्यत्र ग्रहहोमादौ व्यापृतत्वेनाशक्तौ सत्यां तेषामपि होमसम्भवेन विशेषसमाख्योपपत्तेः ।

श्येनवाजपेययोरनेककर्तृताधिकरणम् (III-7-24)

श्येनयाग is stated in सामवेद that has the समाख्या of औद्गात्र. वाजपेययाग is stated in यजुर्वेद that has the समाख्या of आध्वर्यव. Both these are विकृतियागs of ज्योतिष्टोम. Here the question is raised whether उद्गाता alone is कर्ता for श्येनयाग and its अङ्गs taken from प्रकृतियाग and अध्वर्यु alone should perform वाजपेययाग and its अङ्गs. taken from प्रकृतियाग. or in these two यागs there are many कर्ताs.

औद्गात्रेतिसमाख्यायुक्ते सामवेदे श्येनयाग आम्नातः । आध्वर्यवसमाख्यावति यजुर्वेदे वाजपेयः पठितः । द्वावपि ज्योतिष्टोमविकृती । तत्र समाख्यावशाच्छ्येनयागे उद्गातैकः कर्ता वाजपेये च अध्वर्युरेकः कर्ता सन्नतिदेशतः प्राप्तानङ्गपदार्थानुद्गात्रादिः स स एव कुर्यादुत प्रकृताविव श्येने वाजपेये च नानाकर्तार इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that on the basis of प्रधानवेदसमाख्या both the यागs and its अङ्गs have to be performed by उद्गाता and अध्वर्यु only.

पूर्वपक्षस्तु साङ्गश्येनयागादिकं समाख्यावशात्तेन तेनैव कार्यमिति । न च समाख्यान्तर युक्तवेदोक्ताङ्गनाम् इति पूर्वत्र तृतीयपादीयद्वितीयनये अभिहितरीत्याऽत्रापि प्रधानवेदद्वारक-समाख्ययैवाङ्गानां प्राप्त्योद्गात्रादिकर्तृताया एव प्राप्ते ।

Siddhānta : Siddhāntin points out that the अङ्गs are stated by the separate injunction. The प्रधानयागसमाख्या does not come into the picture before the अङ्गs are stated because प्रधानविधि being प्रयोगविधि it does not take its full shape before अङ्गs are taken into account. Hence प्रधानद्वारकसमाख्या does not apply until प्रधानविधि takes its shape. Hence नानाकर्तृकत्व stated at the time of enjoining अङ्गs has to be followed.

सिद्धान्तस्तु, प्रधानद्वारकसमाख्या हि यदि चोदकप्राप्तेः प्रागेव स्यात्तदा तद्बाधिका स्यात्। न चैवम् । यावद्धि चोदकेनाङ्गानि न प्राप्यन्ते तावत्प्रयोगविधिरूपप्रधान-विधेरेवापूर्तेस्ततः प्राक् समाख्यैवात्मानं न लभत इति कथं चोदकेन प्राप्यमाणनानाकर्तृ-न्निवारयेत्। चोदकेनाङ्गानां प्राप्तौ च सकर्तृकाण्येवाङ्गानि प्राप्नुवन्ति। किं समाख्या करिष्यति।

तृतीयाध्यायस्य अष्टमः पादः

क्रयस्य स्वामिकर्मताधिकरणम् (III-8-1)

At ज्योतिष्टोम, असित दक्षिणा of twelve hundred is stated in यजुर्वेद which has आध्वर्यव समाख्या and it is also stated in सामवेद that has औद्गातृसमाख्या.

At दर्शपूर्णमास, अन्वाहार्य दक्षिणा is stated in अध्वर्युवेद. Here a question is raised whether ऋत्विक् परिक्रय has to be made by अध्वर्यु etc. on the basis of समाख्या or not.

ज्योतिष्टोमेऽसितदक्षिणा । सा च द्वादशशतरूपाऽऽध्वर्यवसमाख्यावति यजुर्वेदे समाम्नाता औद्गात्रसमाख्यायुक्तसामवेदे च । दर्शपूर्णमासयोरन्वाहार्यदक्षिणाप्यध्वर्युवेदे । तत्र दक्षिणादानेन ऋत्विक्परिक्रयः किं समाख्यावशादध्वर्य्वादिभिः कर्तव्यः उत नेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that परिक्रय should be made by अध्वर्यु etc. only on the basis of समाख्या. It is true that परिक्रय is स्वामिकार्य ie., यजमानकार्य. Therefore अध्वर्यु cannot make it by offering his own द्रव्य as दक्षिणा. However यजमान may enable him by his own द्रव्य for the परिक्रय of ऋत्विक्s.

समाख्यावशादध्वर्य्वादिभिरेव परिक्रयः कर्तव्यः स्यादिति प्राप्तम् । न च अध्वर्युः स्वामिकार्यार्थिं कथं स्वद्रव्येणान्यान् परिक्रीणीयादिति शङ्क्यम् । यजमानोऽध्वर्यवे द्रविणं दत्वा तद्द्वारा अन्यान् क्रीणातीत्युपपत्तेः ।

Siddhānta : Siddhāntin points out that the entire याग along with its auxiliaries has to be made by यजमान only. Ignoring this on the basis of समाख्या another कर्ता cannot be entrusted for making some items of the याग. Moreover before ऋत्विक् परिक्रय, अध्वर्यु etc. are not there. Hence ऋत्विक्परिक्रय has to be made by यजमान only.

सिद्धान्तस्तु ''स्वर्गकामो यजेत'' इति प्रधानविधिना स्वरसः साङ्गे प्रधाने स्वामिन एव कर्तृत्वावगतेस्तद्बाधेन समाख्या न कर्त्रन्तरं प्रापयितुमलम् । तथात्वे ''यः कामयेत वीरो स आजायेत इति, स चतुर्होतारं जुहुयात्'' इत्यादावपि समाख्याबलेनाध्वर्युकर्तृकत्वापत्तेः । अतः परिक्रयात् प्रागध्वर्य्वादेरभावान्न तत्कर्तृता परिक्रयस्य । किन्तु यजमानकर्तृकत्वमेवेति ।

वपनादिसंस्काराणां याजमानताधिकरणम् (III-8-2)

In अध्वर्युवेद by the statement केशश्मश्रू वपते, नखानि निकृन्तते, the पुरुषसंस्कार of केशश्मश्रूवपन is prescribed. Here the question is raised whether these पुरुषसंस्कारs are for यजमान or अध्वर्यु.

अध्वर्युवेदे ''केशश्मश्रू वपते, नखानि निकृन्तते'' इति श्रूयते । तन्मन्त्रश्च ''आप उन्दन्तु जीवसे'' इत्यादिस्तत्रैव श्रुतः । ते किं केशश्मश्रुवपनादयः पुरुषसंस्काराः यजमानसम्बन्धिनोऽथाध्वर्युसम्बन्धिन इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that these संस्कारs are to be made for अध्वर्यु only on the basis of समाख्या.

पूर्वपक्षस्तु, परिक्रये कर्त्रन्तराप्राप्तेः समाख्यया नियमायोगेऽपि वपनादिषु कर्त्रन्तरप्राप्तेः परिक्रयविधिबलादेव सिद्धेः समाख्यया नियमसम्भवादाध्वर्यवत्वमेव केशश्मश्रुवपनादेर्युक्तमिति ।

Siddhānta : Siddhāntin states that वपन etc. are संस्कारs that provide कार्ययोग्यता. Hence यजमान for obtaining फलरूपकार्ययोग्यता has to undergo these संस्कारs himself.

सिद्धान्तस्तु वपनादयो हि स्वतः संस्कारतया लोके प्रसिद्धाः । संस्काराश्च कार्ययोग्यताऽऽधानार्था इति प्रोक्षणादिषु सिद्धम् । ततश्च स्वामी स्वस्य फलरूपकार्ययोग्यताऽऽधानार्थं स्वस्मिन्नेव वपनादिकं अनुमन्यते ।

तपसो याजमानताधिकरणम् (III-8-3)

At ज्योतिष्टोम, by the statement व्यहं नाश्नाति, त्र्यहं नाश्नाति etc. तपस् of the nature of कायशोषण is prescribed. Here the question is raised whether this has to be observed by यजमान or अध्वर्यु.

ज्योतिष्टोमे ''व्यहं नाश्नाति, त्र्यहं नाश्नाति'' इति कायशोषणरूपं तपःशब्दितं कर्मास्ति । तत्किं यजमानेन कार्यमुत अध्वर्युणेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that fasting is painful. Hence its observance does not suit यजमान who longs for happiness. Hence it has to be observed by अध्वर्यु on the basis of समाख्या.

पूर्वपक्षस्तु वपनादीनां फलसंस्कारत्वेन याजमानत्वेऽप्यनशनरूपतपसः क्लेशात्मकत्वेन सुखार्थिस्वामिप्रतिकूलस्य स्वामिगतातिशयानाधायकतया संस्कारत्वायोगात् स्वामिनस्तत्र गुणभूततया परिक्रयविधिना कर्त्रन्तरप्राप्तेः समाख्ययाऽऽध्वर्यवत्वमेव युक्तमिति ।

Siddhānta : Siddhāntin points out that संस्कारता is कार्ययोग्यताऽऽधायकता. It is done in two ways by investing a special capacity and by removing obstructions. Here, अधर्म done unwittingly in the course of performing the sacrifice is removed by तपस् of the nature of fasting. Hence it has to be observed by यजमान only.

सिद्धान्तस्तु संस्कारता हि कार्ययोग्यताऽऽधायकता । योग्यताऽऽधायकत्वञ्चातिशयजननादिव प्रतिबन्धनिरासादपि लोके दृष्टम् । ततश्च क्रतुफलविपरीतस्वफलभोगदानेन क्रतुफलं प्रतिबध्नतो बलवतो दुःखहेतोरधर्मस्य दुःखात्मकं तपोऽनुभवता भोगेन क्षपणाद्प्रत्यूहं क्रतुफलोत्पत्तेर्दुःखात्मकस्यापि तपसः कार्ययोग्यताऽऽधायकतया संस्कारत्वाविरोधाद्याजमानत्वमेवेति ।

लोहितोष्णीषतादीनां सर्वर्त्विग्धर्मताधिकरणम् (III-8-4)

At वाजपेय, the statement, ''हिरण्यमालिनः ऋत्विजः प्रचरन्ति'' is found. At श्येनप्रकरण, the statement ''लोहितोष्णीषा लोहितवसना निवीताः ऋत्विजः प्रचरन्ति'' is found. Here, the question is raised whether these should be worn by the ऋत्विक्s who are indicated by the समाख्या only or by all ऋत्विक्s is raised.

वाजपेये ''हिरण्यमालिनो ऋत्विजो प्रचरन्ति'' इति श्रूयते तथा श्येनप्रकरणे ''लोहितोष्णीषा लोहितवसना निवीता ऋत्विजः प्रचरन्ति'' इति श्रूयते । ते किं हिरण्यमालित्वादयो धर्माः समाख्यया तत्तत्पुरुषैः कार्या उत सर्वर्त्विग्भिरिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that the हिरण्यमालित्व etc. stated in अध्वर्युकाण्ड be observed by अध्वर्यु only on the basis of समाख्या ।

पूर्वपक्षस्तु, अध्वर्युकाण्डे पठिता हिरण्यमालित्वादयोऽध्वर्युभिरेव हिरण्येत्यादिवचना-दृत्विग्भिः क्रियमाणानां तेषां समाख्याविषयत्वसम्भवादिति ।

Siddhānta : Siddhāntin points out that these are enjoined for ऋत्विक्s by the न्याय, ''प्रतिप्रधानं गुणावृत्तिः,'' these apply to all ऋत्विक्s. Hence, these are to be observed by all ऋत्विक्s. समाख्या has no scope here.

सिद्धान्तस्तु ऋत्विगुद्देशेन विधीयमानानां तेषां प्रतिप्रधानं गुणावृत्तिरिति न्यायेन वचनात्सर्वार्थतासिद्धेर्न समाख्याविषयत्वसम्भव इति सर्वर्त्विग्धर्मा हिरण्यमालित्वादय इति ।

वृष्टिकामनाया याजमानताधिकरणम् (III-8-5)

At ज्योतिष्टोम, the statement ''यदि कामयेत वर्षुकः पर्जन्यः स्यादिति, नीचैः सदो मिनुयात्'' is found. Here the question is raised whether this is a कामना on the part of अध्वर्यु taking the statement as ''अध्वर्युः यदि कामयेत'' or यजमान.

ज्योतिष्टोमे सदोमाने गुणकामः श्रुतः ''यदि कामयेत वर्षुकः पर्जन्यः स्यादिति, नीचैः सदो मिनुयात्'' इति । अयमर्थः, पुरस्तात्पश्चाच्चावस्थितौ हविर्धानप्राचीनवंशौ यथोच्चौ तथा सदो नोच्चं कार्यमिति । तत्र सन्देहः, किम् ''अध्वर्युर्यदि कामयेत'' इत्याध्वर्यवः काम उत 'यदि यजमानः कामयेत' इति याजमानः काम इति ।

Pūrvapakṣa : Pūrvapakṣin states that this कामना is on the part of अध्वर्यु only who is सदोमानकर्ता but not यजमान.

वाक्येन सदोमानसमानकर्तृकत्वप्रतीतेर्मानकर्तुरध्वर्युत्वाद्वाक्याविरुद्धया समाख्यया कामयतेराध्वर्यत्वमेव युक्तम् । न याजमानत्वमिति ।

Siddhānta : Siddhāntin points out that in the expression सदो मिनुयात्, the verb is used in परस्मैपद. This indicates that सदोमानफल has to go to someone other than who makes सदोमान. Hence, though सदोमान is made by अध्वर्यु its result namely वृष्टि goes to यजमान. Therefore, the कामना on the part of यजमान only is stated here.

सिद्धान्तः– परस्मैपदप्रयोगवशेन मानफलस्यान्यगामित्वप्रतीतेर्वृष्टिलक्षणफलस्य यजमानत्वगामित्वात्, परस्मैपदश्रुत्या वाक्यसमाख्ययोर्बाधात् याजमानत्वमेव कामयतेः । वाक्यं तु ''यजमानकामितां वृष्टिं पर्जन्यः सम्पादयत्वित्येवं योऽध्वर्युः कामयेत स नीचैः सदो मिनुयात्'' इत्येवं व्याख्येयम् ।

आयुर्दादिमन्त्राणां याजमानताधिकरणम् (III-8-6)

The मन्त्रs ''आयुर्दा अग्नेऽस्यायुर्मे देहि'' etc. are stated in आध्वर्यववेद. Here the question is raised whether these are to be recited by अध्वर्यु or यजमान.

''आयुर्दा अग्नेऽस्यायुर्मे देहि'' इत्यादयो मन्त्रा आध्वर्यसमाम्नाते वेदे पठिताः । ते किमध्वर्युणा प्रयोक्तव्या उत यजमानेनेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin takes the stand that these are to be recited by अध्वर्यु only.

पूर्वत्र ''मिनुयात्'' इति परस्मैपदश्रुत्या समाख्याबाधेन कामयतेर्याजमानत्वेऽपीह विरोधिश्रुतेरभावात्समाख्ययाऽध्वर्युणैव प्रयोक्तव्या इति प्राप्ते ।

Siddhānta : Siddhāntin points out that the result of the recitation of the मन्त्र i.e. प्रधानकर्मफल goes to यजमान only. Therefore recitation should be made by यजमान only.

सिद्धान्त्यते, अत्र मन्त्रे मन्त्रलिङ्गान्मन्त्रोच्चारयितृपुरुषनिष्ठत्वेन प्रधानकर्मफलमाशास्यमवगम्यमानं यजमानगाम्येव युक्तमिति लिङ्गात्समाख्याया बाधेन याजमानत्वमेव मन्त्रोच्चारणस्येति ।

व्याम्नातस्योभयप्रयोज्यताधिकरणम् (III-8-7)

At दर्शपूर्णमास the मन्त्रs ''वाजस्य मा प्रसवेन'' etc. are stated in अध्वर्युकाण्ड ie., यजुर्वेद, and also in यजमानकाण्ड. Here the question is raised whether these should be recited by यजमान alone or अध्वर्यु alone or by both of them or anyone.

दर्शपूर्णमासयोः ''वाजस्य मा प्रसवेन'' इत्यादयो मन्त्राः सामान्यरूपेणाध्वर्युकाण्डे विशेषरूपेण यजमानकाण्डे चाम्नाताः । ते किं येन केनचित्प्रयोक्तव्याः, उत यजमानेनैव अथाध्वर्युणैव किं वोभयाभ्याम् इति चतुर्धा सन्देहः ।

Pūrvapakṣa : (i) Pūrvapaksa is stated in three ways. (i) since the मन्त्र is one, recitation by one will satisfy the requirement. Therefore any one of them may recite.

(ii) विशेषसमाख्या is in favour of यजमान as it is stated in यजमानकाण्ड. Hence यजमान should recite.

(iii) स्रुग्व्यूहन etc. मन्त्रs are आध्वर्यव मन्त्रs. Hence, अध्वर्यु alone should recite.

पूर्वपक्षस्तु मन्त्रस्यैकत्वेनैकेन पठिते सति मन्त्रस्य चरितार्थत्वाद्यः कश्चिद्ब्रूयादित्येकः । विशेषसमाख्याया बलीयस्त्वद्याजमान एवेति द्वितीयः । स्रुग्व्यूहनादेर्मन्त्रार्थस्याऽध्वर्यवत्वान्मन्त्रोऽप्यध्वर्युणैव प्रयोक्तव्यः इति तृतीयः ।

Siddhānta : Siddhāntin points out that if one alone recites then stating the मन्त्र in another काण्ड becomes superfluous. Since there is no conflict between the two समाख्याs it should be recited by both. However there is a difference in the intention of each one of them. अध्वर्यु intends to convey "I will perform the act conveyed by this मन्त्र''. यजमान intends to convey "I will not commit any mistake" in the observance of meaning conveyed by this मन्त्र.

सिद्धान्तस्तु, एकेनैव मन्त्रस्य पाठे काण्डान्तरपाठस्य वैयर्थ्यप्रसङ्गात्, समाख्याद्वया-विरोधादुभाभ्यां पठनीयः इति कर्तृद्वयसमुच्चयः । परन्तु तयोः पठतोराशयभोदोऽस्ति । ''अनेन मन्त्रेण प्रकाशितमर्थमनुष्ठास्यामि'' इत्यध्वर्योराशयः । ''अत्र न प्रमदिष्यामि'' इति यजमानस्येति ।

अभिज्ञस्यैव वाचयितव्याधिकरणम् (III-8-8)

At वाजपेय, the statement ''क्लृप्तीर्यजमानं वाचयति'' is found. The expression क्लृप्तीः refers to आयुर्यज्ञेन कल्पताम् etc. मन्त्रs. अध्वर्यु should make the यजमान to recite these. Here the question is raised whether these should be made to be recited by यजमान who knows the मन्त्र and मन्त्रार्थ or even such यजमान who does not know, or both of them.

वाजपेये श्रूयते ''क्लृप्तीर्यजमानं वाचयति'' इति । ''आयुर्यज्ञेन कल्पताम्'' इत्यादिकान्मन्त्रान् वाचयेदध्वर्युरित्यर्थः । तत्र किं मन्त्रमन्त्रार्थयोरभिज्ञमनभिज्ञश्चोभौ वाचयेदुतानभिज्ञमथाभिज्ञमेवेति त्रेधा सन्देहः ।

Pūrvapakṣa : i) Pūrvapakṣin argues that it is not particularly stated that only such यजमान who knows मन्त्र and मन्त्रार्थ be made to recite this. Hence, both should recite this.

ii) Since the यजमान who knows मन्त्र and मन्त्रार्थ is able to recite by himself, he need not be made to recite by अध्वर्यु. But only such यजमान who does not know be made to recite.

''विद्वांसमेव वाचयेत्'' इति विशेषाश्रवणात् उभावपि वाचयेदित्येकः पूर्वपक्षः । अभिज्ञः स्वयमेव वक्तुम् शक्त इति न वाच्यः । किन्त्वनभिज्ञ एव वाचनीय इत्यन्यः ।

Siddhānta : Siddhāntin points out that only those who know मन्त्र and मन्त्रार्थ are eligible to perform the sacrifice. Therefore the question of making such persons who do'nt know to recite, does not arise. Hence

यजमान who knows मन्त्र and मन्त्रार्थ be made to recite these. This is intended to enable him to remember मन्त्र and मन्त्रार्थ.

सिद्धान्तस्तु ''अधिकारो हि विदुषो, नाज्ञस्य'' इति षष्ठाद्यपादे चातुर्वर्ण्यमविशेषादित्यत्र वक्ष्यमाणत्वेनानभिज्ञस्याधिकाराभावाद्विद्वानेव यजमानो वाचनीयः । तदनुकूलस्मरणाचरणेनोपपत्तेश्चाभिज्ञमेव वाचयेदिति ।

द्वादशद्वन्द्वानामाध्वर्यवताधिकरणम् (III-8-9)

In दर्शपूर्णमासप्रकरण, वत्सश्च उपावसृजति उखाश्चाधिश्रयति etc. twelve pairs of acts are stated. These are formed into pair as वत्सापकरण is one act and the placing the milk obtained by milking the cow in पिठरस्थापन is another act. These two are to be made into one pair. Similarly twelve pairs are worked out. Here the question is raised whether these acts and forming them into the pairs both be made by यजमान or अध्वर्यु.

i) आध्वर्यवसमाख्यावति यजुर्वेदे यजमानकाण्डे षष्ठे प्रश्ने दर्शपूर्णमासप्रकरणे श्रूयते ''द्वादश द्वन्द्वानि, दर्शपूर्णमासयोस्तानि सम्पाद्यानि इत्याहुः । वत्सश्चोपावसृजति उखाश्चाधिश्रयति, अव च हन्ति दृषदौ च समाहन्ति, अधि च वपते, कपालानि चोपदधाति, पुरोडाशं चाधिश्रयति, आज्यश्च स्तम्बयजुश्च हरति, अभि च गृह्णाति, वेदिश्च परिगृह्णाति, पत्नीश्च सन्नह्यति, प्रोक्षणीश्चासादयति, आज्यं च । एतानि वै द्वादशद्वन्द्वानि दर्शपूर्णमासयोः । तानि य एवं सम्पाद्य यजते'' इति । पलाशशाखया वत्सापाकरणमेकं कर्म । दोहनेन सम्पादितं क्षीरं धारयितुं पिठरस्थापनमन्यत्कर्म । तदुभयमेकं द्वन्द्वम् । एवमन्यानि च कर्मद्वन्द्वानि ज्ञेयानि ।

ii) तत्र सन्देहः किं द्वयोर्द्वयोर्मिथः प्रत्यासन्नत्वरूपद्वन्द्वसंपादनं पदार्थाश्च यजमानः कुर्यात् उत अध्वर्युः ।

Pūrvapakṣa : Pūrvapakṣin argues that the आध्वर्यवसमाख्या is a सामान्यसमाख्या while याजमानसमाख्या is विशेषसमाख्या. विशेषसमाख्या sets aside सामान्यसमाख्या. Hence both should be observed by यजमान only.

यजमानरूपविशेषसमाख्यया आध्वर्यवरूपसामान्यसमाख्याया बाधाद्यजमानेनैव तान्यनुष्ठेयानीति ।

Siddhānta : Siddhāntin points out that यजमानकाण्ड is an अवान्तरकाण्ड within आध्वर्यवकाण्ड ie., यजुर्वेदकाण्ड. In the अवान्तरकाण्ड, वत्सापकरण etc. acts are enjoined. From this it becomes known that forming these into pairs is to be made by यजमान. However as यजमान employs the ऋत्विक्s to do the acts connected with the performance of the sacrifice, the statement which says, यजमान should form these into pairs should be taken in the sense that यजमान should make the अध्वर्यु to form into pairs. Hence अध्वर्यु forms them into pairs.

सिद्धान्तस्तु, आध्वर्यवसमाख्याते यजुर्वेदे याजमानमिदमवान्तरकाण्डम् । महाकाण्डन्त्वाध्वर्यवमेव । तत्रैते वत्सापाकरणादयो धर्माश्चोद्यन्ते । अतः प्रथमं विहितानां अनुपजातविरोधितया तत्रैवाध्वर्युकर्तृकत्वेन निर्ज्ञातानां यजमानेन द्वयोर्द्वयोर्मिथः प्रत्यासन्नत्वरूपद्वन्द्वतासम्पादनमात्रं विधीयते । तच्च यजमानः स्वानुष्ठेयकरणार्थमेवर्त्विजां क्रीतत्वेनाध्वयुर्यथा द्वयं द्वयमासन्नं करोति तथा कारयतीति ।

होतुराध्वर्यवकरणमन्त्रानुष्ठातृत्वाधिकरणम् (III-8-10)

At अग्नीषोमीयपशु, reciting the मन्त्र ''परिवीरसि'' etc. which are known as यूपपरिव्याणकरणमन्त्र, अध्वर्यु encircles यूप by रशना. This encircling is restated by होता reciting the मन्त्र, ''युवा सुवासाः परिवीत'' etc. The मन्त्र परिवीरसि is known as करणमन्त्र and the मन्त्र ''युवा सुवासाः'' etc. is known as क्रियमाण अनुवादि मन्त्र. These two मन्त्रs have to be recited at कुण्डपायिनमयन सत्र also. At that सत्र it is stated that यो होता सोऽध्वर्युः i.e., the होता and अध्वर्यु are one and the same. One and the same होता cannot recite the two मन्त्रs simultaneously. Here the question is raised whether the हौत्रमन्त्र be recited first and then आध्वर्यव मन्त्र or there is no fixed order, that is to say, any one of them may be recited first.

i) अग्नीषोमीयपशौ ''परिवीरसि'' इत्यनेन यूपपरिव्याणकरणमन्त्रेणाध्वर्युर्यूपस्य रशनया परिव्याणं करोति । तदानीं क्रियमाणपरिव्याणं होता ''युवा सुवासाः परिवीत आगत्स उ श्रेयान् भवति जायमानः । तं धीरासः कवयः उन्नयन्ति स्वाद्यो मनसा देवयन्तः'' इति मन्त्रेणानुवदति ।

ii) स च मन्त्रः ''परिवीरसि'' इति करणमन्त्रेणानुष्ठीयमानस्यापरिसमाप्त्यवच्छिन्न-स्यानुवादीति क्रियमाणानुवादीत्युच्यते । तौ करणमन्त्रक्रियमाणानुवादिमन्त्रौ चोदक-परम्परया कुण्डपायिनमायनं सत्रं प्राप्तौ ।

iii) तत्र च अध्वर्योर्होतुश्च समास इति शब्दतोऽभेदः श्रुतः ''यो होता सोऽध्वर्युः इति। तत्रैको होता द्वौ मन्त्रौ सकृत्प्रयोक्तुमशक्तः किं हौत्रं ब्रूयादुताध्वर्यवमुतानियम इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that (i) अनियमः इत्येकः there is no fixed order. any one of them may be recited first is one view of Pūrvapakṣa ii) क्रियमाणानुवादिमन्त्र should be recited first is another Pūrvapakṣa.

i) अनियमः इत्येकः पूर्वपक्षः

ii) अन्यस्तु, होता क्रियमाणानुवादिनमेव मन्त्रं वदेदिति ।

Siddhānta : Siddhāntin points out that one and the same person cannot discharge the duties of होता and आध्वर्यु. Therefore only one of them has to be assigned. As per the statement ''यो होता सोऽध्वर्युः'', होता has to perform the duties of अध्वर्यु. Hence होता has to recite परिवीरसि etc. करणमन्त्र which was to be recited by अध्वर्यु. The other मन्त्र युवा सुवासाः etc. that was recited by होता in प्रकृतियाग is now to be recited by मैत्रावरुण who is होतृपुरुष in this सत्र. This means, आध्वर्यवमन्त्र has to be stated first and then होतृमन्त्र.

सिद्धान्तस्तु, होत्राध्वर्यवयोः कर्मणोरुभयोरेकेन कर्तुमशक्यत्वेनान्यतरत्यागेऽवश्यं कार्ये ''यो होता सोऽध्वर्युः'' इति प्रतिपक्षवचनेन चोदकतोऽपि प्रबलेनाध्वर्यवधर्मेषु होतुः प्राप्त-तयाऽऽतिदेशिकं हौत्रं क्रियमाणानुवदिमन्त्रं त्यक्त्वाऽऽध्वर्यवमेव ''परिवीरसी'' इति करण-मन्त्रमेव होता वदेत् । हौत्रं ''युवा सुवासाः'' इति मन्त्रं तु होतृपुरुषो मैत्रावरुणादिर्वदेदिति ।

प्रैषप्रैषार्थयोः पृथक्कर्तृकत्वाधिकरणम् (III-8-11)

At दर्शपूर्णमास,''प्रोक्षणीरासादय'', ''अग्नीदग्नीन्विहर'' etc. प्रैषमन्त्रs are stated and प्रोक्षण्यासादन, अग्निविहरण etc. are conveyed by these मन्त्रs. Here the question is raised whether both प्रैष and प्रैषार्थ be observed by अध्वर्यु alone or प्रैष by one person and प्रैषार्थानुष्ठान by another person.

दर्शपूर्णमासयोः प्रैषाः समाम्नाताः ''प्रोक्षणीरासादय'' ''अग्नीदग्नीन्विहर'' ''इध्मा-बर्हिरुपसादय'' इत्यादयः । ते किं प्रैषाः प्रैषार्थभूतप्रोक्षण्यासादनाग्निविहरणादयश्चाध्वर्युणैव कार्या उत अन्यः प्रेषयिताऽन्यस्तदर्थानुष्ठातेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that there is no conflict between these two roles. Therefore the two roles be played by अध्वर्यु only.

प्रैषप्रैषार्थयोराध्वर्यवसमाख्यावगतैककर्तृकत्वे विरोधाभावेन तत्त्यागायोगादध्वर्युर्द्वयोरपि कर्तेति ।

Siddhānta : Siddhāntin points out that in the प्रैष, अग्नीदग्नीन्विहर, अग्नीत् is addressed. This indicates that he is प्रैषार्थानुष्ठाता and a different person from प्रैषकर्ता. One and the same person cannot address himself and perform the act stated to him by addressing him. In view of this प्रैषकर्ता and प्रैषार्थानुष्ठाता are different persons.

''अग्नीत्'' इति सम्बोधनस्य च चेतनान्तरविषयकत्वेन स्वात्मनि च प्रैषायोगात्प्रैष-लिङ्गबलादाध्वर्यवसमाख्याबाधेन प्रैषप्रैषार्थौ भिन्नभिन्नकर्तृकाविति ।

प्रैषप्रैषार्थयोर्यथाक्रममाध्वर्यवाग्नीध्रताधिकरणम् (III-8-12)

In the earlier अधिकरण it is stated that प्रैषार्थकर्ता and प्रैषकर्ता are different persons. Here the question is raised whether अध्वर्यु is प्रैषार्थकर्ता and अग्नीत् is प्रैषकर्ता or it is the otherway round.

प्रैषयितुरन्यः प्रैषार्थकर्तेत्युक्तम् । स किमध्वर्युः प्रैषार्थकर्ता, प्रैषयिता ''अग्नीत्'' उत विपरीतमिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that अध्वर्यु is प्रैषार्थकर्ता and अग्नीत् is प्रैषयिता. This position creates a difficulty. In the प्रैष statement अग्नीदग्नीन्विहर, अग्नीत् is addressed. This indicates that he has to be प्रैषार्थानुष्ठाता. However, this difficulty may be solved by taking the very word अग्नीत् in the sense of अध्वर्यु by गौणीवृत्ति.

तस्मादध्वर्युः प्रैषार्थकर्ता, प्रैषयिता त्वग्नीदिति । न च तत्रत्याग्नीत्पदस्य का गतिरिति शंक्यम् । गौण्या वृत्त्या अध्वर्युपरत्वसम्भवादिति ।

Siddhānta : Siddhāntin points out that when a word can be taken in मुख्यार्थ assigning गौणार्थ to it is not possible. Therefore अध्वर्यु is प्रैषयिता and अग्नीत् is प्रैषार्थानुष्ठाता ।

समाख्याया अबाधेनोपपत्तौ क्वापि बाधायोगात्, अग्नीत्पदस्य गौणार्थत्वस्य मुख्यार्थसम्भवेनायोगात् प्रैषयिताऽध्वर्युः प्रैषार्थानुष्ठाता अग्नीदिति ।

करणमन्त्रेषु स्वामिफलस्याशासितव्यताधिकरणम् (III-8-13)

At दर्शपूर्णमास the ममाग्ने वर्चो etc. मन्त्रs are of the nature of प्रत्यगाशीर्वाद. These are recited by अध्वर्यु. Here the question is raised whether the फल stated in these मन्त्रs goes to अध्वर्यु or यजमान.

दर्शपूर्णमासप्रकरणस्था ''ममाग्ने वर्चो विहवेष्वस्तु'' इत्यादयः प्रत्यगाशीरूपा अप्यध्वर्युणैव पठ्यन्ते। तत्र सन्देहः, मन्त्रगतं वर्चःप्रभृति फलं किमध्वर्योरुत यजमानस्येति।

Pūrvapakṣa : Pūrvapakṣin states that the word मम in the मन्त्र indicates that the फल stated in it goes to the very reciter of मन्त्र i.e. अध्वर्यु.

ममेति पदलिङ्गान्मन्त्रप्रकाश्यवर्चःप्रभृतिफलस्याध्वर्युगामित्वमेव युक्तमिति।

Siddhānta : Siddhāntin points out that the फल of साङ्गप्रधानयाग has to go to यजमान only. अध्वर्यु is employed by यजमान by paying appropriate दक्षिणा. Therefore, he cannot get any फल of याग. He gets only the दक्षिणा. Hence, the फल stated in the ममाग्ने etc. मन्त्र goes to यजमान only. The word मम in the मन्त्र should be taken in the sense of मदीयस्य यजमानस्य.

साङ्गप्रधानभावनाविषयाङ्गफलानामपि यजमानगामित्वप्रतीतेर्यजमानपरिक्रीतस्याध्वर्योर्दक्षिणातिरिक्तफलसम्बन्धस्यन्याय्यत्वाच्छ्रुतिन्यायाभ्यां विरुद्धं तल्लिङ्गं यजमानपरत्वेनोपचारेण नेयम् ''मम मदीयस्य यजमानस्य वर्चोऽस्तु'' इति।

करणमन्त्रेषु कर्मार्थफलस्य ऋत्विग्धर्मताधिकरणम् (III-8-14)

At दर्शपूर्णमास, for आघारहोम, स्रुक् and स्रुव filled with आज्य, holding close to the navel, अध्वयु recites ''अग्नाविष्णू'' etc. करण मन्त्र. This मन्त्र conveys सन्तापाभावरूपफल. Here the question is raised whether this फल goes to यजमान or अध्वर्यु.

दर्शपूर्णमासयोराघारहोमार्थमाज्यपूर्णौ पृथक् स्रुक्स्रुवौ गृहीत्वा नाभिसमीपे हस्तेन धारयति। तत्रायं करणमन्त्रोऽध्वर्युणा पठ्यते ''अग्नाविष्णू मा वामवक्रमिषं विजिहाथां मा मा सन्ताप्तं लोकं मे लोककृतौ कृणुतम्'' इति।

Pūrvapakṣa : Pūrvapakṣin argues that यजमान desires that अध्वर्यु should perform his duties without any सन्ताप may be taken as conveyed

by this मन्त्र. अध्वर्यु performing his duties smoothly is necessary for यजमान. Hence the फल stated in this मन्त्र goes to अध्वर्यु only.

असन्तप्तेनैव कर्म कर्तव्यमित्यसन्तापस्याध्वर्युगतत्वेनापि यजमानेच्छाविषयत्वं स्वाभिमत कर्मसमाप्त्यर्थमावश्यम् । तस्मादसन्तापादिकमध्वर्युगामी ।

Siddhānta : Siddhāntin agrees with it.

सिद्धान्तेऽध्वर्युरेवेति ।

करणमन्त्रेषु क्वचित्कर्मार्थफलस्य यजमानर्त्विगुभयधर्मताधिकरणम् (III-8-15)

At ज्योतिष्टोम in हविर्धानमण्टप there are four pits called उपरव. Among these near one उपरव, यजमान spreads his right hand. अध्वर्यु holds यजमानs hand by his hand. यजमान from the मन्त्र ''किमत्र भद्रं तन्नौ सह'' by the word ''किमत्र'' asks about फल. अध्वर्यु by the word ''भद्रं'' in the same मन्त्र replies. Then यजमान by the word तन्नौ सह accepts that as belonging to him. Here the question is raised whether this भद्ररूपफल goes to यजमान or अध्वर्यु.

ज्योतिष्टोमे हविर्धानमण्टपसोमाभिषवाधारयोः फलकयोरधस्ताच्चतसृष्वाग्नेयादिविदिक्षु चत्वार उपरवनामका गर्ता वर्तन्ते । तेष्वेकस्मिन्नुपरवके यजमानो दक्षिणहस्तं प्रसारयति । तत्रैवाध्वर्युरपि स्वहस्तं प्रसार्याधस्ताद्यजमानहस्तं गृह्णाति । तदा यजमानः ''किमत्र भद्रं तन्नौ सह'' इति मन्त्रे किमत्र इत्यंशेन फलं पृच्छति । अध्वर्युश्च ''भद्रम्'' इत्यंशेनोत्तरं ब्रूते । ततो यजमानः ''तन्नौ सह'' इति मन्त्रेण तत्फलं स्वकीयत्वेन स्वीकरोति । तत्र सन्देहः, भद्ररूपं फलं स्वामिमात्रगाम्युताध्वर्युगाम्यपीति ।

Pūrvapakṣa : Pūrvapakṣin states that this फल goes to यजमान only.

पूर्वपक्षस्तु याजमानत्वमेव ।

Siddhānta : Siddhāntin points out that the word नौ is in dual number. Together with the word सह it conveys that भद्ररूपफल goes to both of them.

सिद्धान्तस्तु ''नौ'' इति द्विवचनेन ''सह'' इत्यनेन चोभयगामित्वप्रतीतेर्द्वयोरपि भद्ररूपं फलमिति ।

प्राकृतधर्माणां विकृतावपूर्णपदार्थानङ्गताधिकरणम् (III-8-16)

Cutting etc. auxiliaries of बर्हि ie., दर्भ grass, are the auxiliaries of both अङ्ग and प्रधान. This is already stated in the first section, these are taken into विकृति. Here, the question is raised- whether these are to be taken as auxiliaries of बर्हि that are utilised for यूपावटास्तरण or not.

पूर्वपादे अङ्गप्रधानार्थतयोक्ता लवनादयो बर्हिरादिधर्माः । ते किं विकृतावतिदिश्यमाना यूपावटास्तरणबर्हिष्वपि भवन्त्युत न इति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that the auxiliaries of बर्हि etc. stated in प्रकृतियाग are to be taken as the auxiliaries of बर्हि utilised for यूपावटास्तरण in विकृति also.

अङ्गप्रधानार्थतया बर्हिरादिधर्माणां प्रागुक्ततया विकृतिगतयूपावटस्तरणबर्हिष्वपि स्युरिति प्राप्तम् ।

Siddhānta : Siddhāntin points out that cutting etc. auxiliaries of बर्हि are for the बर्हिःकार्य but not for mere बर्हिस्वरूप. अतिदेश from प्रकृति to विकृति is made through the कार्य of the respective items. यूपावटास्तरण is not a प्राकृतकार्य. Hence, cutting etc. auxiliaries of बर्हि do not apply to the यूपावटास्तरणसाधनबर्हि in विकृति.

सिद्धान्तस्तु प्रकृतौ बर्हिर्धर्मा बर्हिःकार्यप्रयुक्ताः । न बर्हिःस्वरूपप्रयुक्ताः । आनर्थक्यात् । कार्यद्वारेणैव विकृतावतिदिश्यन्ते । यूपावटास्तरणं न प्राकृते कार्यम् । अतो यूपावटस्तरणसाधने बर्हिषि न लवनादयो बर्हिर्धर्माः ।

विधृतिपवित्रयोः परिभोजनीयबर्हिषा कर्तव्यताधिकरणम् (III-8-17)

At दर्शपूर्णमास, पवित्र made of दर्भ and विधृति made of कुश are

prescribed. Here, the question is raised whether these be made from the बर्हिs that are संस्कृत by लवन and used for वेदिस्तरण or असंस्कृत.

दर्शपूर्णमासयोः ''समावप्रच्छिन्नाग्रौ दर्भौ प्रादेशमात्रौ पवित्रे करोति'' इति श्रुतम् । तथा विधृती अपि श्रुते । विधृती नाम वेद्यामुदगग्रतया स्थाप्यौ ''ऐक्षवी विधृती'' इति वाक्योक्तौ कुशौ । तानि किं विधृतिपवित्राणि लवनादिसंस्कृताद्वेदिस्तरणार्थाद्बर्हिषः कार्याणि, किं वा बर्हिस्सापेक्षप्राकृतसर्वधर्मादसंस्कृतात् परिभोजनीयादिति संशयः ।

Pūrvapakṣa : Pūrvapakṣin argues that लवन etc. auxiliaries of बर्हि are meant for प्रधानोपकारिबर्हि. विधृति etc. also are प्रधानोपकारि. Hence, these should be made by संस्कृतबर्हि only.

बर्हिर्धर्माणां प्रधानोपकारिबर्हिर्मात्रार्थत्वात् विधृत्यादीनां प्रधानोपकारित्वाविशेषात् संस्कृतादेव बर्हिषो विधृत्यादिकरणमिति प्राप्ते ।

Siddhānta : Siddhāntin points out that the entire संस्कृतबर्हि is utilised for वेदिस्तरण. संस्कृतबर्हि is not left for preparing विधृति. Hence, to prepare विधृति etc. संस्काररहित दर्भs called परिभोजनीय be used.

कृत्स्नस्यापि लवनादिसंस्कृतस्य बर्हिषो ''बर्हिषा वेदिं स्तृणाति'' इति विहितवेदिस्तरणे विनियोगान्न ततो विधृत्यादिकरणम् । किन्तु विधृतिपवित्रनिष्पत्तिरपि शास्त्रीयलवनादिसंस्काररहितैः परिभोजनीयनामकैर्दर्भैः कार्येति सिद्धान्तः ।

प्राकृतपुरोडाशादीनां निधनाधिकरणम् (III-8-18)

At ज्योतिष्टोम it is stated that a portion of पुरोडाश be placed in ऐन्द्रवायवपात्र. Here, the question is raised whether this portion be taken from सवनीयपुरोडाश or be taken from a separate पुरोडाश.

ज्योतिष्टोमे श्रूयते ''पुरोडाशशकलमैन्द्रवायवस्य पात्रे निदधाति'' इति । शकलः एकदेशः । तत्र सन्देहः । तत्किं सवनीयपुरोडाशादपनीय शकलः पात्रे निधातव्य उत पुरोडाशान्तरमुत्पाद्य तच्छकलस्य निधानमिति ।

Pūrvapakṣa : Pūrvapakṣin argues that since, the पुरोडाश meant for याग cannot be used for another purpose, another पुरोडाश be prepared and a portion of this be placed in ऐन्द्रवायवपात्र.

यागार्थस्यान्यत्र विनियोगासम्भवान्नूतनं किंचित्पुरोडाशं सम्पाद्य तदीयशकलेनैन्द्रवायवे प्रक्षेपक्रिया कार्येति ।

Siddhānta : Siddhāntin states that a portion of सवनीयपुरोडाश only be placed. In the statement शकलं निदधाति, the word शकल is in the accusative case suffix. This indicates that संस्कार has to be made for the portion that is taken. प्रतिपत्तिरूपसंस्कार can be made only for that which is इष्टिशेष. Hence, a portion of पुरोडाश that is offered at सवनीय only be placed in ऐन्द्रवायवपात्र.

सिद्धान्तस्तु सवनीयपुरोडाशशकलस्यैवैतन्निधानम् । ''शकलं निदधाति'' इति द्वितीयाश्रुत्या शकलस्य संस्कार्यत्वावगमात्, इष्टिशिष्टस्यैव प्रतिपत्तिरूपसंस्कारापेक्षणात् ।

काम्येष्टिषूपांशुत्वधर्मस्य प्रधानार्थताधिकरणम् (III-8-19)

The statement ''यज्ञाथर्वणं वै काम्या इष्टयः, ताः उपांशु यष्टव्या'' is found. उपांशु कर्तव्याः means be performed reciting the hymns in a low voice. This is necessary because these काम्येष्टिs have to be kept a secret. Here, the question is raised whether उपांशुत्व prescribed here both for प्रधान and अङ्ग or only for प्रधान.

''यज्ञाथर्वणं वै काम्या इष्टयः, ता उपांशु यष्टव्याः'' इति विकृतौ श्रूयते । अथर्ववेदोक्तकर्मवद्यज्ञेषु काम्या इष्टयो गोप्याः । तस्मात्ता उपांशु कर्तव्या इति तदर्थः । तत्र किमुपांशुत्वमङ्गप्रधानार्थमुत प्रधानार्थमेवेति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that उपांशुत्व is both for प्रधान and अङ्ग.

उपांशुत्वस्यापि उभयार्थता इति ।

Siddhānta : Siddhāntin states that the statement यज्ञाथर्वणं etc. prescribes उपांशुत्व only in respect of प्रधानकर्म. Hence, उपांशुत्व is only for प्रधानकर्म.

वाक्यात्प्रधानार्थतयैव विधानान्नोभयार्थत्वम् । किन्तु प्रधानकाम्येष्ट्यर्थतैवोपांशुत्वस्येति ।

श्येनाङ्गानां नवनीताज्यताधिकरणम् (III-8-20)

At श्येनयाग, by the statement ''दृतिनवनीतमाज्यं भवति'', आज्य that is made out of the butter stored in दृति is prescribed. The word दृति means चर्मभस्त्रिका. Here, the question is raised whether this is meant for प्रधान or अङ्ग.

श्येने श्रूयते ''दृतिनवनीतमाज्यं भवति'' इति । दृतिश्चर्मभस्त्रिका । तत्र चिरं संगृहीतं यन्नवनीतं तत्प्रकृतिद्रव्यकमाज्यमिति तदर्थः । तत्किं प्रधानार्थमुताङ्गार्थमिति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin states that आज्य is not stated in the context of श्येन. Hence, दृतिनवनीत–प्रकृतिक–आज्य is enjoined. for प्रधानश्येनयाग as a substitute for सोम.

पूर्वपक्षस्तु आज्यस्य श्येने अप्राप्तेराज्योद्देशेन तत्प्रकृतितया दृतिनवनीतविधानासम्भवाद् दृतिनवनीतप्रकृतकमाज्यं विशिष्टमेव विधेयम् । तच्च पूर्वत्र वाक्यादुपांशुत्वस्येव प्रकरणात् प्रधानश्येनयागार्थं सोमप्रत्याम्नानतयैवेति ।

Siddhānta : Siddhāntin points out that there is no total absence of आज्य in श्येनयाग. Though it is absent in प्रधान it is present in अङ्ग by अतिदेश . Hence, with reference to this आज्य the auxiliary दृतिनवनीत is enjoined here, for अङ्गs only.

सिद्धान्तस्तु, यदि सर्वथा आज्यस्याप्राप्तिः स्यात्तदैवं स्यात् । इह तु प्रधाने तदप्राप्ता-वप्यङ्गावतिदेशतस्तत्प्राप्तिसम्भवात्तदनुवादेन दृतिनवनीतगुणविधाने लाघवान्न विशिष्टविधि-

गौरवाङ्गीकारो युक्तः । तस्मात् दृतौ नवनीतं प्रकृतिद्रव्यं यस्य तदाज्यं दृतिनवनीतं इति व्युत्पत्त्या आज्यप्राप्तिमच्छ्येनाङ्गेष्वेव तस्य निवेश इति ।

सर्वेषां श्येनाङ्गानां नवनीताज्यताधिकरणम् (III-8-21)

In the earlier अधिकरण it was stated that दृतिनवनीतत्व is an auxiliary of श्येनाङ्ग. In this अधिकरण the question whether दृतिनवनीतत्व is an auxiliary of पशु, पुरोडाश etc. अङ्गs that are observed at सुत्याकाल or the auxiliaries of दीक्षणीय etc. that are observed at other times.

उक्ते श्येनाङ्गधर्मत्वेऽत्र तद्विशेषचिन्तनात्सङ्गतिः । दृतिनवनीतत्वं किं सुत्याकालीनेषु पशुतत्पुरोडाशरूपेष्वङ्गेषु स्यादुत कालान्तरवर्तिदीक्षणीयाद्यङ्गेष्वपीति सन्देहः ।

Pūrvapakṣa : Pūrvapakṣin argues that दृतिनवनीतत्वगुण is an auxiliary of सुत्याकालीन अङ्गs only because it is enjoined as the अङ्ग of श्येन in a general way.

पूर्वपक्षस्तु सुत्याकालीनाङ्गेष्वेव स्यात् । कुतः? विमतो दृतिनवनीतत्वगुणः सुत्याकालीन एव भवितुमर्हति, सामान्यतः श्येनाङ्गत्वेन विहितत्वात् ।

Siddhānta : Siddhāntin points out that दृतिनवनीतत्व is enjoined for आज्यसामान्य by the statement ''यदाज्यं तत् दृतिनवनीतं''. From this it is clear that it is meant for all the अङ्गs.

सिद्धान्तस्तु, ''यदाज्यं तत् दृतिनवनीतं'' इति आज्यसामान्यानुवादेन दृतिनवनीतं विदधद्वाक्यं सर्वार्थमेवावगमयतीति वाक्येनानुमानस्य बाधात्सर्वाङ्गेषु निवेशोऽस्य गुणस्येति ।

सवनीयानां मांसमयताधिकरणम् (III-8-22)

There is a सत्र called शाक्यानामयन which is to be performed in thirtysix years. In this context it is stated that यजमान proceeds for hunting on संस्थित day. In the course of hunting from the flesh of all the मृगs killed by him सवनीयपुरोडाश be made. The word तरसमय means मांसमय.

Here the question is raised whether तरसमयत्व ie., मांसमयत्व, is enjoined for सवनीयपुरोडाश only or for all पुरोडाशs.

षट्त्रिंशत्सु संवत्सरेष्वनुष्ठेयं शाक्यानामयनं नाम सत्रं । तत्रैतद्वाक्यं श्रूयते "संस्थितेऽहनि गृहपतिर्मृगयां याति । स यान् मृगान् हन्ति तेषां तरसमयाः सवनीयाः पुरोडाशाः भवन्ति इति । तरसमया मांसमया इत्यर्थः । तत्र सन्देहः । किं तरसमयत्वं सर्वपुरोडाशानां विधीयते, किं वा सवनीयानामेवेति ।

Pūrvapakṣa : Pūrvapakṣin argues that तरसमयत्व is enjoined here for all पुरोडाशs. There is no special reason to restrict it to सवनीयपुरोडाश only. Just as in the statement सृष्टीः उपदधाति the word सृष्टि is understood both the hymns that contain the word सृष्टि and those which do not contain it are taken as employed by the word सृष्टि. Here also the word सवनीय be taken in the sense of सवनीयासवनीयसमुदाय.

यथा हि पूर्वत्र नवनीतं सर्वश्येनाङ्गार्थमेवं पुरोडाशमात्रानुवादेन वाक्याद्विधीयमानं तरसमयत्वमपि सर्वपुरोडाशार्थं स्यात् । सङ्कोचाभावात् । "सृष्टीरुपदधाति" इत्यत्र सृष्टचसृष्टि समुदाये सृष्टिपदस्येव सवनीयासवनीयसमुदाये सवनीयपदस्यामुख्यवृत्त्या वोपपत्तिरिति प्राप्ते ।

Siddhānta : Siddhāntin points out that here तरसमयत्व is not enjoined for पुरोडाश as such. But it is enjoined for सवनीयपुरोडाश only. Hence, it applies to सवनीयपुरोडाश only.

न चैवमिह पुरोडाशानुवादेन तरसमयता विधीयते । सन्निहितान्वयलाभाय "ये सवनीयास्ते तरसमयाः" इति सवनीयानुवादेन तरसमयताविधिरेव युक्तः ।

The eight section of third chapter ends.

The third chapter ends.

ಭಾಟ್ಟಸಂಗ್ರಹ

ಅಧ್ಯಾಯ-1 ಪಾದ-1

ನತ್ವಾ ಧರ್ಮಂ ವೇದಗಮ್ಯಂ ಜೈಮಿನ್ಯಾದಿಮುನೀನಪಿ ।

ಕರೋಮಿ ಬಾಲಬೋಧಾಯ ಭಟ್ಟೋಕ್ತನ್ಯಾಯಸಂಗ್ರಹಮ್ ॥

ಶ್ರೀರಾಘವೇಂದ್ರ ತೀರ್ಥರು ಪೂರ್ವಮೀಮಾಂಸಾಶಾಸ್ತ್ರದ ಮುಖ್ಯವಿಷಯವಾದ ಧರ್ಮವನ್ನು ಮತ್ತು ಈ ಶಾಸ್ತ್ರದ ಪ್ರವರ್ತಕರಾದ ಜೈಮಿನೀ ಮೊದಲಾದ ಋಷಿಗಳನ್ನೂ ನಮಸ್ಕರಿಸಿ, ಭಾಟ್ಟಮತದಲ್ಲಿ ಹೇಳಿದ ನ್ಯಾಯಗಳ ಸಂಕ್ಷಿಪ್ತವಾದ ನಿರೂಪಣೆಯನ್ನು ವಿದ್ಯಾರ್ಥಿಗಳಿಗೆ ತಿಳಿಸಿಕೊಡುವುದಕ್ಕಾಗಿ ಈ ಗ್ರಂಥವನ್ನು ಬರೆಯುತ್ತಿದ್ದೇವೆ ಎಂದು, ಮಂಗಲಾಚರಣೆಯನ್ನೂ ಈ ಗ್ರಂಥದ ವಿಷಯ ನಿರೂಪಣೆಯನ್ನೂ ಮಾಡಿದ್ದಾರೆ.

ಧರ್ಮಜಿಜ್ಞಾಸಾಧಿಕರಣ (I-1-1)

ಈ ಶಾಸ್ತ್ರದ ಮೊದಲನೇಯ ಸೂತ್ರವಾದ ''ಅಥಾತೋ ಧರ್ಮಜಿಜ್ಞಾಸಾ'' ಎಂಬ ಸೂತ್ರದಲ್ಲಿ ಜೈಮಿನಿ ಮಹರ್ಷಿಗಳು ವೇದಾಧ್ಯಯನವು ಮುಗಿದ ಮೇಲೆ ಧರ್ಮದ ಜಿಜ್ಞಾಸೆಯನ್ನು ಕೈಕೊಳ್ಳಬೇಕು ಎಂದು ಹೇಳಿದ್ದಾರೆ. ಈ ಹೇಳಿಕೆಗೆ ''ಸ್ವಾಧ್ಯಾಯೋ ಅಧ್ಯೇತವ್ಯಃ'' ಎಂಬ ವಿಧಿವಾಕ್ಯವೂ ಆಧಾರ. ಇಲ್ಲಿ ಮೊದಲು ವೇದಗಳ ಅಧ್ಯಯನವನ್ನು ಸ್ವರ್ಗದ ಸಂಪಾದನೆಗಾಗಿ ಮಾಡಬೇಕೆಂದು ಹೇಳಿದೆಯೋ ಅಥವಾ ಕರ್ಮಾನುಷ್ಠಾನಕ್ಕೆ ಅನುಕೂಲವಾಗುವ ವೇದಗಳ ಅರ್ಥಜ್ಞಾನವನ್ನು ಮಾಡಿಕೊಳ್ಳಬೇಕೆಂದು ಹೇಳಿದೆಯೋ ಎಂಬ ಸಂದೇಹವನ್ನು ಮಾಡಿಕೊಂಡು ವಿಷಯ ವಿಚಾರವನ್ನು ಮಾಡಲಾಗಿದೆ.

ಪೂರ್ವಪಕ್ಷ : ವೇದಗಳ ಅರ್ಥಜ್ಞಾನವನ್ನು ಮಾಡಿಕೊಳ್ಳಲು ವಿಧಿಯ ಅಗತ್ಯವಿಲ್ಲ. ಭಾರತಾದಿ ಗ್ರಂಥಗಳನ್ನು ಓದಿದವರಿಗೆ ಅವುಗಳ ಅರ್ಥವು ಸಹಜವಾಗಿಯೇ ಆಗುವಂತೆ ವೇದಗಳನ್ನು ಓದಿದವರಿಗೂ ಅವುಗಳ ಅರ್ಥವು ಸಹಜವಾಗಿಯೇ ಆಗುವುದು. ಆದ್ದರಿಂದ ವೇದಗಳ ಅಧ್ಯಯನ ಮಾಡಬೇಕು ಎಂಬ ಈ ವಿಧಿವಾಕ್ಯವು ಈ ಅಧ್ಯಯನವು ಸ್ವರ್ಗಕ್ಕೆ ಸಾಧನ ಎಂದು ತಿಳಿಸುತ್ತದೆ. ಯಾವ ವಿಧಿವಾಕ್ಯದ ಸಂದರ್ಭದಲ್ಲಿ ಒಂದು ವಿಶಿಷ್ಟ ಫಲವನ್ನು ಹೇಳಿಲ್ಲವೋ ಅಲ್ಲಿ ಸ್ವರ್ಗವೇ ಫಲವೆಂದು ತೆಗೆದುಕೊಳ್ಳಬೇಕು ಎಂದ ಮೀಮಾಂಸಾಶಾಸ್ತ್ರವು ಒಪ್ಪಿಕೊಂಡ ಸಾಮಾನ್ಯ ನಿಯಮವು. ಹೀಗೆ ಅರ್ಥಜ್ಞಾನದ ಅಗತ್ಯವಿಲ್ಲದ್ದರಿಂದ ಅದರ ಜಿಜ್ಞಾಸೆಯು ಅಂದರೆ ವೇದಗಳ ಅರ್ಥವೆಂದು ಹೇಳಲಾದ ಧರ್ಮದ ಜಿಜ್ಞಾಸೆಯು ಅಗತ್ಯವಿಲ್ಲ. ಆದ್ದರಿಂದ ಮೀಮಾಂಸಾಶಾಸ್ತ್ರವನ್ನು ಆರಂಭಿಸುವ ಅಗತ್ಯವಿಲ್ಲ.

(i) ಅಧ್ಯಯನಾರ್ಥಜ್ಞಾನಯೋಃ ಹೇತುಹೇತುಮದ್ಭಾವಸ್ಯ ಭಾರತಾಧ್ಯಯನಾದೌ ದೃಷ್ಟತ್ವೇನ ವಿಧ್ಯನಪೇಕ್ಷಣಾತ್ ।

ಸಿದ್ಧಾಂತ : 'ಸ್ವಾಧ್ಯೇಯೋ ಅಧ್ಯೇತವ್ಯಃ' ಎಂಬ ವಿಧಿಯು ನಿಯಮವಿಧಿಯು. ಇದು ವೇದಗಳ ಅರ್ಥವನ್ನು ಗುರುಗಳ ಮುಖಾಂತರ ಅಧ್ಯಯನ ಮಾಡಿಯೇ ತಿಳಿದುಕೊಳ್ಳಬೇಕು ಎಂದು ಹೇಳುತ್ತದೆ. ಲಿಖಿತ ಪುಸ್ತಕಗಳಿಂದಾಗಲಿ ಸ್ವತಃ ಅಧ್ಯಯನ ಮಾಡಿ ಆಗಲಿ ತಿಳಿದುಕೊಳ್ಳಲು ಅವಕಾಶವಿಲ್ಲ. ಆದ್ದರಿಂದ ವೇದಾರ್ಥದ

ಜಿಜ್ಞಾಸೆಯು ಅಂದರೆ ಧರ್ಮದ ಸ್ವರೂಪದ ವಿಚಾರವು ಅಗತ್ಯವಾಗಿದೆ. ಆದ್ದರಿಂದ ಮೀಮಾಂಸಾಶಾಸ್ತ್ರದ ಆರಂಭವು ಸೂಕ್ತವಾಗಿದೆ.

ಅರ್ಥಜ್ಞಾನರೂಪ ದೃಷ್ಟಫಲವು ಇರುವಾಗ ಸ್ವರ್ಗರೂಪ ಅದೃಷ್ಟಫಲವನ್ನು ಕಲ್ಪಿಸುವುದು ಯುಕ್ತವಲ್ಲ.

''ದೃಷ್ಟೇ ಸಂಭವತಿ ಅದೃಷ್ಟಕಲ್ಪನಾಯೋಗಾತ್ ದೃಷ್ಟಾರ್ಥಜ್ಞಾನಫಲಕತ್ವಮೇವ ಅಧ್ಯಯನಸ್ಯ ಯುಕ್ತಮ್''

ಧರ್ಮಲಕ್ಷಣಾಧಿಕರಣ (I-1-2)

ಎರಡನೆಯ ಸೂತ್ರವಾದ ''ಚೋದನಾಲಕ್ಷಣಃ ಅರ್ಥಃ ಧರ್ಮಃ'' ಎಂಬ ಸೂತ್ರದಲ್ಲಿ ಜೈಮಿನಿ ಮಹರ್ಷಿಗಳು ಧರ್ಮದ ಲಕ್ಷಣವನ್ನೂ ಧರ್ಮದ ವಿಷಯದಲ್ಲಿ ಪ್ರಮಾಣವನ್ನೂ ಹೇಳುತ್ತಾರೆ. ಚೋದನ ಅಂದರೆ ವೈದಿಕ ವಿಧಿವಾಕ್ಯದಿಂದ ಬೋಧಿತವಾದದ್ದು ಮತ್ತು ಶ್ರೇಯಸ್ಸಿಗೆ ಸಾಧನವಾದದ್ದು ಧರ್ಮ ಎಂದು ಈ ಲಕ್ಷಣದ ಅಭಿಪ್ರಾಯವು. ಶ್ರೇಯಸ್ಸಿಗೆ ಸಾಧನವಾದದ್ದು ಎಂಬ ಮಾತನ್ನು ಶ್ಯೇನಯಾಗವೇ ಮೊದಲಾದ ಆಭಿಚಾರಿಕ ಕರ್ಮಗಳು ಧರ್ಮವಲ್ಲ ಎಂದು ತಿಳಿಸುತ್ತದೆ. ವೈದಿಕ ವಿಧಿವಾಕ್ಯಗಳಿಂದ ಬೋಧಿತವಾದದ್ದು ಎಂಬ ಮಾತು ''ಚೈತ್ಯವಂದನವೇ ಮೊದಲಾದ ಅವೈದಿಕ ಸಂಪ್ರದಾಯಗಳು ಧರ್ಮವಲ್ಲ'' ಎಂದು ತಿಳಿಸುತ್ತದೆ.

ಚೋದನಾ ಪ್ರಮಾಣ ಎಂಬ ಮಾತು ಎರಡು ಅಂಶಗಳನ್ನು ತಿಳಿಸುತ್ತದೆ. (i) ಚೋದನಾ ಏವ ಪ್ರಮಾಣಮ್, ಧರ್ಮದ ವಿಷಯದಲ್ಲಿ ವೈದಿಕ ವಿಧಿವಾಕ್ಯವು ಮಾತ್ರ ಪ್ರಮಾಣ. ಪ್ರತ್ಯಕ್ಷಾದಿ ಇತರ ಪ್ರಮಾಣಗಳು ಪ್ರಮಾಣವಲ್ಲ. (ii) ಚೋದನಾಪ್ರಮಾಣಮೇವ, ವೈದಿಕ ವಿಧಿವಾಕ್ಯವು ಧರ್ಮದ ವಿಷಯದಲ್ಲಿ ಖಂಡಿತವಾಗಿಯೂ ಪ್ರಮಾಣವು.

ಧರ್ಮಸ್ಯ ಪ್ರತ್ಯಕ್ಷಾದ್ಯಗಮ್ಯತ್ವಾಧಿಕರಣ (I-1-4)

ಹಿಂದಿನ ಅಧಿಕರಣದಲ್ಲಿ ಪ್ರತ್ಯಕ್ಷಾದಿಗಳು ಧರ್ಮದ ವಿಷಯದಲ್ಲಿ ಪ್ರಮಾಣಗಳಲ್ಲ ಎಂದು ಹೇಳಿದ್ದನ್ನು ಸಮರ್ಥಿಸಲು ಜೈಮಿನಿ ಮಹರ್ಷಿಗಳು ಈ ಅಧಿಕರಣದಲ್ಲಿ ಪ್ರತ್ಯಕ್ಷದ ಸ್ವರೂಪವನ್ನು ಹೇಳಿ, ಅದು ಏಕೆ ಧರ್ಮದ ವಿಷಯದಲ್ಲಿ ಪ್ರಮಾಣವಲ್ಲ ಎಂದು ತಿಳಿಸುವರು. ಈ ಸೂತ್ರದ ಮೊದಲನೇ ಭಾಗವಾದ ''ಸತ್ಸಂಪ್ರಯೋಗೇ ಪುರುಷಸ್ಯ ಇಂದ್ರಿಯಾಣಾಂ ಬುದ್ಧಿಜನ್ಮ ತತ್ ಪ್ರತ್ಯಕ್ಷಮ್'' ಎಂಬಲ್ಲಿ ಇಂದ್ರಿಯಕ್ಕೂ ವಸ್ತುಗಳಿಗೂ ಸಂಯೋಗವುಂಟಾದಾಗ ಪುರುಷರಿಗೆ ಆಗುವ ಜ್ಞಾನವೇ ಪ್ರತ್ಯಕ್ಷ ಜ್ಞಾನವು ಎಂದು ಹೇಳಲಾಗಿದೆ. ಎರಡನೆಯ ಭಾಗವಾದ ''ಅನಿಮಿತ್ತಂ ವಿದ್ಯಮಾನೋಪಲಂಭನತ್ವಾತ್'' ಎಂಬಲ್ಲಿ ಪ್ರತ್ಯಕ್ಷವು ವರ್ತಮಾನ ಕಾಲದಲ್ಲಿ ಇರುವ ವಿಷಯಗಳನ್ನು ಮಾತ್ರ ತಿಳಿಸಿಕೊಡುವುದರಿಂದ ಧರ್ಮದ ವಿಷಯದಲ್ಲಿ ಪ್ರಮಾಣವಲ್ಲ ಎಂದು ತಿಳಿಸಿಕೊಡುತ್ತದೆ.

''ಪ್ರತ್ಯಕ್ಷಸ್ಯ ವರ್ತಮಾನಮಾತ್ರಗ್ರಾಹಿತ್ವಾತ್ ಧರ್ಮಸ್ಯ ಅನುಷ್ಠೇಯತಯಾ ಕಾಲತ್ರಯಾಸಂಸ್ಪೃಷ್ಟತಯಾ ವಿಧಿಬೋಧಿತತ್ವಾತ್ ನ ಪ್ರತ್ಯಕ್ಷಗಮ್ಯತ್ವಂ''

ಅನುಮಾನ ಉಪಮಾನ ಅರ್ಥಾಪತ್ತಿ ಇತ್ಯಾದಿ ಇತರ ಪ್ರಮಾಣಗಳು ಪ್ರತ್ಯಕ್ಷವನ್ನೇ ಅವಲಂಬಿಸಿರುವುದರಿಂದ ಇವು ಧರ್ಮದ ವಿಷಯದಲ್ಲಿ ಪ್ರಮಾಣವಾಗಲಾರವು.

ಧರ್ಮೇ ವಿಧಿಪ್ರಾಮಾಣ್ಯಾಧಿಕರಣ (I-1-5)

ಈ ಅಧಿಕರಣದ ''ಔತ್ಪತ್ತಿಕಸ್ತು'' ಇತ್ಯಾದಿ ಸೂತ್ರವು ನಾಲ್ಕು ಮಾತುಗಳನ್ನು ಹೇಳುತ್ತದೆ.

(i) ''ಔತ್ಪತ್ತಿಕಸ್ತು ಶಬ್ದಸ್ಯ ಅರ್ಥೇನ ಸಂಬಂಧಃ'' – ಶಬ್ದ ಮತ್ತು ಅರ್ಥಗಳ ಸಂಬಂಧವು ಸ್ವಾಭಾವಿಕವಾದುದು, ನಿತ್ಯವಾದುದು, ಇಲ್ಲಿ ಔತ್ಪತ್ತಿಕ ಎಂಬ ಶಬ್ದಕ್ಕೆ ಸ್ವಾಭಾವಿಕ ಎಂದು ಅರ್ಥವು. ಈ ಸಂಬಂಧವನ್ನು ಯಾವುದೇ ಒಬ್ಬ ವ್ಯಕ್ತಿ ಅಥವಾ ಅನೇಕ ವ್ಯಕ್ತಿಗಳು ಕಲ್ಪಿಸಿಲ್ಲ.

(ii) ಉಪದೇಶ : ವಿಧಿಃ, ತಸ್ಯ ಜ್ಞಾನಸ್ಯ ಜ್ಞಾನಂ ಜ್ಞಾಪಕಃ
ವೈದಿಕ ವಿಧಿವಾಕ್ಯವು ಧರ್ಮವನ್ನು ತಿಳಿಸಿಕೊಡುವುದು.

(iii) ''ತಸ್ಯ ಜ್ಞಾನಸ್ಯ ಅವಿಪರ್ಯಯಃ ಅನಪೇಕ್ಷತ್ವಾತ್''
ವೈದಿಕ ವಿಧಿವಾಕ್ಯದಿಂದ ಉಂಟಾದ ಜ್ಞಾನವು ಸ್ವತಃ ಪ್ರಮಾಣವು. ಇದು ಪ್ರಮಾಣಾಂತರ ಸಂವಾದವನ್ನು ಅಪೇಕ್ಷಿಸುವುದಿಲ್ಲ.

(iv) ''ಅನುಪಲಬ್ಧೇ–ಮಾನಾಂತರಾಜ್ಞಾತೇ ಅರ್ಥೇ ತತ್ ಪ್ರಮಾಣಮ್ ಚೋದನಾವಾಕ್ಯಂ ಪ್ರಮಾಣಂ''

ವೈದಿಕ ವಿಧಿವಾಕ್ಯದಿಂದ ಬೇರೆ ಪ್ರಮಾಣಗಳಿಂದ ತಿಳಿದುಬಾರದ ಧರ್ಮ ಎಂಬ ವಿಷಯವು ತಿಳಿದುಬರುವುದು.

ಶಬ್ದನಿತ್ಯತ್ವಾಧಿಕರಣ (I-1-6)

ಈ ಅಧಿಕರಣದಲ್ಲಿ ಶಬ್ದ ಮತ್ತು ಅರ್ಥಗಳ ಸಂಬಂಧವು ಸ್ವಾಭಾವಿಕ ಮತ್ತು ನಿತ್ಯ ಎಂಬ ಪ್ರಮೇಯವು ಸರಿಯಲ್ಲ. ಯಾಕೆಂದರೆ ಶಬ್ದವು ನಿತ್ಯವಲ್ಲ ಎಂಬ ಆಕ್ಷೇಪವನ್ನು ಪರಿಹರಿಸಲಾಗಿದೆ. ವರ್ಣಗಳು ನಿತ್ಯ. ಶಬ್ದಗಳು ವರ್ಣಗಳಿಂದ ಕೂಡಿರುತ್ತವೆ. ಆದ್ದರಿಂದ ಶಬ್ದಗಳು ನಿತ್ಯ ಎಂದು ಉತ್ತರಿಸಲಾಗಿದೆ.

ಪೂರ್ವಪಕ್ಷ : ಶಬ್ದಗಳು ತಾಲು, ಜಿಹ್ವೆಗಳ ಪ್ರಯತ್ನದಿಂದ ಉಂಟಾಗುತ್ತವೆ. ಮತ್ತು ಉಂಟಾದ ಕೆಲವು ಕ್ಷಣಗಳಲ್ಲಿಯೇ ನಾಶವಾಗುತ್ತವೆ. ಇದಲ್ಲದೆ ಶಬ್ದವನ್ನು ಮಾಡು, ಶಬ್ದವನ್ನು ಮಾಡಬೇಡ ಇತ್ಯಾದಿ ಅನುಭವದ ಮಾತುಗಳು -ಇವು ಉತ್ಪನ್ನವಾಗಿರುವುದನ್ನು, ನಾಶವಾಗಿರುವುದನ್ನು ತೋರಿಸುವುವು.

(i) ಶಬ್ದಃ ಕೃತ್ರಿಮಃ ಪ್ರಯತ್ನಾಂತರಭಾವಿತ್ವಾತ್ ಘಟವತ್ ।

(ii) ಉಚ್ಚಾರಣಾನಂತರಮನವಸ್ಥಾನೇನ ವಿನಷ್ಟತ್ವಾತ್ ।

(iii) 'ಶಬ್ದಂ ಕುರು,'' ''ಶಬ್ದಂ ಮಾ ಕಾರ್ಷೀಃ'' ಇತಿ ಪ್ರಯೋಗಾತ್ ।

ಸಿದ್ಧಾಂತ : ''ಗ'' ಇತ್ಯಾದಿ ವರ್ಣಗಳನ್ನು ಬೇರೆ ಬೇರೆ ಕಾಲದಲ್ಲಿ ಬೇರೆ ಬೇರೆ ಜನರು ಉಚ್ಚರಿಸಿದರೂ ಇವೆಲ್ಲ ಒಂದು ''ಗಕಾರ'' ಎಂಬ ಅನುಭವ ಬರುವುದು. ಆದ್ದರಿಂದ ಶಬ್ದವು ನಿತ್ಯವಾಗಿರುವುದು.

ಬಹುಭಿಃ ಬಹುಕೃತ್ವೋ ಗವಾದಿಶಬ್ದೇ ಉಚ್ಚಾರಿತೇ ತ ಏವ ಇಮೆ ಗಕಾರಾದಯೋ ವರ್ಣಾಃ ಇತ್ಯಬಾಧಿತಪ್ರತ್ಯಕ್ಷ ಪ್ರತ್ಯಭಿಜ್ಞಾನಾತ್ ಶಬ್ದಸ್ಯ ಅನಾದಿತ್ವಸಿದ್ಧೇಃ ।

ಪೂರ್ವಪಕ್ಷಿಯು ಹೇಳಿದ ಯುಕ್ತಿಗಳು ಶಬ್ದದ ಅಭಿವ್ಯಕ್ತಿಯನ್ನು ತಿಳಿಸುತ್ತವೆ. ಆದರೆ ಇವು ಶಬ್ದದ ಉತ್ಪತ್ತಿಯನ್ನು ಸಮರ್ಥಿಸುವುದಿಲ್ಲ.

''ಪೂರ್ವಪಕ್ಷ್ಯಭಿಮತಕೃತ್ರಿಮತ್ವಸಾಧಕಹೇತವಃ ವ್ಯಂಜಕಧ್ವನಿವಿಷಯತ್ವಾದಿನಾ ಅನ್ಯಥಾ ನೇಯಾಃ ಇತಿ ಶಬ್ದಃ ಅಕೃತ್ರಿಮ ಏವ'' ।

ಈ ಅಧಿಕರಣದ ಉದ್ದೇಶವು ಶಬ್ದ ಮತ್ತು ಅರ್ಥಗಳ ಸಂಬಂಧವು ನಿತ್ಯವು. ಇದನ್ನು ಯಾವುದೇ ಒಬ್ಬ ವ್ಯಕ್ತಿಯಾಗಲಿ, ಅಥವಾ ಅನೇಕ ವ್ಯಕ್ತಿಗಳಾಗಲಿ ಜೋಡಿಸಿ ಮಾಡಿದ್ದಲ್ಲ. ಆದ್ದರಿಂದ ಪುರುಷ ಸಂಬಂಧವಿಲ್ಲದ ವೈದಿಕ ವಿಧಿವಾಕ್ಯಗಳಿಂದ ಉಂಟಾಗುವ ಧರ್ಮದ ಜ್ಞಾನವು ಪರಮ ಪ್ರಮಾಣ ಎಂದು ಸಮರ್ಥಿಸುವುದು.

''ಶಬ್ದಾರ್ಥಸಂಬಂಧಸ್ಯ ಔತ್ಪತ್ತಿಕತ್ವಂ ಉಪದೇಶಸ್ಯ ಪ್ರಾಮಾಣ್ಯಂ ಪ್ರಾಗುಕ್ತಂ ಯುಕ್ತಮೇವ''

ವೇದೇ ಪ್ರತ್ಯಾಯಕತ್ವಾಧಿಕರಣ (I-1-7)

ಈ ಅಧಿಕರಣದಲ್ಲಿ ಶಬ್ದ ಮತ್ತು ಅರ್ಥಗಳ ಸಂಬಂಧ ನಿತ್ಯವೂ ಸ್ವಾಭಾವಿಕವೂ ಆಗಿದ್ದರೂ ವೈದಿಕ ವಿಧಿವಾಕ್ಯಗಳು ಧರ್ಮವನ್ನು ತಿಳಿಸಲು ಸಮರ್ಥವಾಗಲಾರವು ಎಂಬ ಆಕ್ಷೇಪವನ್ನು ಪರಿಹರಿಸಲಾಗಿದೆ.

ಪೂರ್ವಪಕ್ಷ : ಶಬ್ದ ಮತ್ತು ಅರ್ಥಗಳು ಸ್ವಾಭಾವಿಕ ಮತ್ತು ನಿತ್ಯಸಂಬಂಧವುಳ್ಳವಾಗಿದ್ದರೂ ಅವು ಧರ್ಮವನ್ನು ತಿಳಿಸಲಾರವು. ಅಗ್ನಿಹೋತ್ರ ಇತ್ಯಾದಿ ಪದಗಳು ಬಿಡಿ ಬಿಡಿಯಾಗಿ ಧರ್ಮವನ್ನು ತಿಳಿಸಲಾರವು. ''ಅಗ್ನಿಹೋತ್ರಂ ಜುಹುಯಾತ್'' ಇತ್ಯಾದಿ ವಾಕ್ಯಗಳೇ ಧರ್ಮವನ್ನು ತಿಳಿಸಬಲ್ಲವು. ಈ ವಾಕ್ಯಗಳು, ಅವುಗಳ ಅರ್ಥವನ್ನು ಯಾರಾದರೂ ಒಬ್ಬ ವ್ಯಕ್ತಿಯು ಆ ಅರ್ಥವು ಬರುವಂತೆ ಅವುಗಳನ್ನು ಜೋಡಿಸಿದಾಗ ಮಾತ್ರ ಕೊಡುವವು. ಆದ್ದರಿಂದ ಇವುಗಳಲ್ಲಿ ಪುರುಷರ ಕೈವಾಡ ಇರಲೇ ಬೇಕಾಗುವುದು. ಆದ್ದರಿಂದ ವೇದಕ್ಕೆ ಸ್ವತಃ ಪ್ರಮಾಣ ಇರುವುದು. ಆದ್ದರಿಂದ ವೇದಗಳು ಧರ್ಮಬೋಧಕ ಎನ್ನುವ ಮಾತು ಸರಿ ಅಲ್ಲ.

(i) ಪದಾತ್ಮಕಶಬ್ದಸ್ಯ ಅನಾದಿನಿತ್ಯತ್ವೇಪಿ ಅಗ್ನಿಹೋತ್ರಾದಿ ಪದಮಾತ್ರಸ್ಯ ಧರ್ಮಾಪ್ರಮಾಪಕತ್ವಾತ್ । ಅಗ್ನಿಹೋತ್ರಂ ಜುಹುಯಾತ್ ಇತಿ ಪದಕದಂಬಾತ್ಮಕಂ ವಾಕ್ಯಮೇವ ತಥಾಭೂತಂ ವಾಚ್ಯಮ್ । ವಾಕ್ಯಂ ಚ ಅಗೃಹೀತಸಂಗತಿಕಂ ವಾಕ್ಯಾರ್ಥಂ ಬೋಧಯತಿ ಚೇತ್ ಅತಿಪ್ರಸಂಗಃ । ಗೃಹೀತಸಂಗತಿಕಂ ಚೇತ್ ಪುರುಷಕೃತಸಂಕೇತಸಾಪೇಕ್ಷತ್ವೇನ ಅನಪೇಕ್ಷತ್ವಲಕ್ಷಣಪ್ರಾಮಾಣ್ಯಭಂಗಾತ್ ।

(ii) ಉತ್ಪತ್ತೌ ಶಬ್ದಾರ್ಥಸಂಬಂಧಾನಾಂ ಸ್ವಾಭಾವಿಕತ್ವೇಽಪಿ ಚೋದನಾಃ ಅವಚನಾಃ ವಾಕ್ಯಾರ್ಥಸ್ಯ ಅವಾಚಕಾಃ ಸ್ಯುಃ । ಅರ್ಥಸ್ಯ ಪದಾಭಿಹಿತಪದಾರ್ಥಾನಾಂ ಅತನ್ನಿಮಿತ್ತತ್ವಾತ್ । ವಾಕ್ಯಾರ್ಥಬೋಧಾನಿಮಿತ್ತತ್ವಾತ್ ।

ಸಿದ್ಧಾಂತ : ಶಬ್ದಗಳೇ ತಮ್ಮ ಅರ್ಥಗಳ ಮೂಲಕ ವಾಕ್ಯಾರ್ಥವನ್ನು ತಿಳಿಸುವವು. ಆದ್ದರಿಂದ ವಾಕ್ಯಾರ್ಥವನ್ನು ತಿಳಿದುಕೊಳ್ಳಲು ವಾಕ್ಯಗಳಿಗೆ ಪ್ರತ್ಯೇಕವಾಗಿ ಅರ್ಥವನ್ನು ಕಲ್ಪಿಸುವ ಅಗತ್ಯವಿಲ್ಲ.

''ಸಿದ್ಧಾಂತಸ್ತು ಪದಾನಾಮೇವ ವೃದ್ಧವ್ಯವಹಾರಾದಿನಾ ಗೃಹೀತಸಂಗತಿಕಾನಾಂ ಪದಾರ್ಥ ಪ್ರತ್ಯಾಯನ-ದ್ವಾರಾ ವಾಕ್ಯಾರ್ಥಬೋಧಕತ್ವೋಪಪತ್ತೇಃ ವಾಕ್ಯಸ್ಯ ಅನ್ಯನಿರಪೇಕ್ಷತ್ವಾತ್ ಯುಕ್ತಂ ಚೋದನಾಯಾಃ ಪ್ರಾಮಾಣ್ಯಂ.''

ವೇದಾಪೌರುಷೇಯತ್ವಾಧಿಕರಣ (I-1-8)

ಈ ಅಧಿಕರಣದಲ್ಲಿ ವೇದಗಳ ಅಪೌರುಷೇಯತ್ವವನ್ನು ಸಮರ್ಥಿಸಲಾಗಿದೆ.

ಪೂರ್ವಪಕ್ಷ : ವೈದಿಕ ಸೂಕ್ತಗಳಿಗೆ ಪಿಪ್ಪಲಾದ, ಕಠ ಇತ್ಯಾದಿ ಋಷಿಗಳ ಸಂಬಂಧವನ್ನು ಹೇಳಲಾಗಿದೆ. ಇದರಿಂದ ಇವರು ಆಯಾ ಸೂಕ್ತಗಳನ್ನು ರಚಿಸಿದವರು ಎಂದು ತಿಳಿದುಬರುತ್ತದೆ. ಅಲ್ಲದೇ ಲೌಕಿಕ ವಾಕ್ಯಗಳಂತೆ ವೇದವು ವಾಕ್ಯರೂಪವಾಗಿರುವುದರಿಂದ ಅವು ಪೌರುಷೇಯ ಎಂದು ಅನುಮಾನ ಮಾಡಬಹುದು. ಆದ್ದರಿಂದ ವೇದವು ಪೌರುಷೇಯವೇ ಆಗಿವೆ.

(i) ವೇದವಾಕ್ಯಂ ಪೌರುಷೇಯಂ ವಾಕ್ಯತ್ವಾತ್ ಲೌಕಿಕ ವಾಕ್ಯವತ್ ।

(ii) ಪೌರುಷೇಯತ್ವಂ ಚ ಪಿಪ್ಪಲಾದಿಪುರುಷಸಮಾಖ್ಯಾನಾತ್ ।

(iii) ಕಠೇನ ಕೃತಂ ಕಾಠಕಮಿತ್ಯೇವಂ ಕಾಠಕ ಕಾಲಾಪಕಾದಿಶಬ್ದವಾಚ್ಯತ್ವಾತ್ ।

ಸಿದ್ಧಾಂತ : ಪಿಪ್ಪಲಾದ, ಕಠ ಇತ್ಯಾದಿ ಹೆಸರುಗಳು ಈ ಸೂಕ್ತಗಳ ಅಧ್ಯಯನದ ಸಂಪ್ರದಾಯ ಪ್ರವರ್ತಕರು ಎಂದು ಮಾತ್ರ ತಿಳಿಸುತ್ತದೆ.

(i) ಕಾಠಕಾದಿಸಮಾಖ್ಯಾಯಾಃ ಅಧ್ಯಯನಸಂಪ್ರದಾಯಪ್ರವರ್ತಕತ್ವೇನೋ- ಪಪತ್ತೇಃ ।

ವೇದಗಳು ಭಾರತಾದಿಗಳಂತೆ ಪೌರುಷೇಯವಾಗಿದ್ದರೆ ಅವುಗಳ ರಚನೆಯನ್ನು ಮಾಡಿದವರ ಹೆಸರುಗಳು ತಲೆತಲಾಂತರಗಳಿಂದ ಮಹಾಭಾರತವನ್ನು ರಚಿಸಿದ ವೇದವ್ಯಾಸರ ಹೆಸರಿನಂತೆ ತಿಳಿದುಬರಬೇಕಾಗಿತ್ತು. ಆದ್ದರಿಂದ ಲೌಕಿಕ ವಾಕ್ಯಗಳ ಅಥವಾ ಮಹಾಭಾರತಾದಿ ವಾಕ್ಯಗಳ ದೃಷ್ಟಾಂತದಿಂದ ವೇದಗಳನ್ನು ರಚಿಸಿರುವವರು ಇರುವರು ಎಂದು ಹೇಳಲು ಬರುವುದಿಲ್ಲ.

ಅಧ್ಯಾಯ-1, ಪಾದ-2

ಅರ್ಥವಾದಾಧಿಕರಣ (I-2-1)

ಈ ಅಧಿಕರಣದಲ್ಲಿ ಅರ್ಥವಾದವಾಕ್ಯಗಳೂ ಕೂಡ ಯಜ್ಞಗಳ ಪ್ರಾಶಸ್ತ್ಯವನ್ನು ಬೋಧಿಸಿ ವಿಧಿವಾಕ್ಯಗಳೊಡನೆ ಅನ್ವಯವನ್ನು ಪಡೆಯುತ್ತವೆ. ಆದ್ದರಿಂದ ಇವು ಧರ್ಮದ ವಿಷಯದಲ್ಲಿ ಪ್ರಮಾಣವಾದವುಗಳು ಎಂಬುದನ್ನು ಸಮರ್ಥಿಸಲಾಗಿದೆ.

